कलिकालसर्वज्ञ - श्रीहेमचन्द्राचार्यविरचिते

# श्रीसिद्धहेमचन्द्रशब्दानुशासने अज्ञातकर्तृका ढुण्ढिका ॥

## [ तृतीयो विभागः ]

### [ तृतीयाध्यायस्य द्वितीयपादत आरभ्य चतुर्थाध्यायस्य प्रथमपादपर्यन्तम् ]

सम्पादक : मुनि-विमलकीर्तिविजयः




प्रकाशक :

कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी

स्मृति संस्कार शिक्षणनिधि - अहमदाबाद.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अर्हम् ॥

कलिकालसर्वज्ञ - श्रीहेमचन्द्राचार्यविरचिते

# श्रीसिद्धहेमचन्द्रशब्दानुशासने अज्ञातकर्तृका ढुण्ढिका ॥

## [तृतीयो विभागः]

[तृतीयाध्यायस्य द्वितीयपादत आरभ्य चतुर्थाध्यायस्य प्रथमपादपर्यन्तम्]

सम्पादक :

आचार्य-श्रीविजयशीलचन्द्रसूरि-शिष्यः

मुनि-विमलकीर्तिविजयः



श्रीहेमचन्द्राचार्य

प्रकाशक :

कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी

स्मृति संस्कार शिक्षणनिधि - अहमदाबाद.

ई. २०१०. वि. सं. २०६६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**श्रीसिद्धहेमचन्द्रशब्दानुशासने अज्ञातकर्तृका ढुण्ढिका (तृतीयो विभागः) ।**

सम्पादक : **मुनि-विमलकीर्तिविजयः ।**

प्रकाशक : **कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी स्मृति संस्कार शिक्षणनिधि**
अहमदाबाद

प्रथमावृत्तिः ई.स. २०१० । वि.सं. २०६६ । वीर नि.सं. २५३६

प्रतय : २५०

पृष्ठानि : १२+३८४

आर्थिक सहयोग : श्रीगोवालिया टेंक जैन संघ, मुंबई

प्राप्तिस्थान : (१) श्रीविजयनेमिसूरीश्वरजी स्वाध्याय मंदिर,
१२, भगतबाग, नवा शारदामंदिर रोड,
शेठ आणंदजी कल्याणजीनी पेढी पासे,
पालडी, अहमदाबाद-३८०००७.
फोन : २६६२२४६५

(२) सरस्वती पुस्तक भण्डार
११२, हाथीखाना, रतनपोल,
अहमदाबाद-३८०००१.
फोन : २५३५६६९२

मूल्यम् : रू. ३५०/-

मुद्रक : क्रिष्ना ग्राफिक्स
९६६, नारणपुरा जूना गाम, नारणपुरा,
अहमदाबाद-१३. फोन : २७४९४३९३

Jain Education International For Private & Personal Use Only www.jainelibrary.org



વિ.સં. ૧૨૫૭માં પ્રતિષ્ઠિત શ્રીહેમચંદ્રાચાર્યની પ્રતિમા - ધંધુકા

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# સમર્પણ

કલિકાલસર્વજ્ઞ શ્રીહેમચન્દ્રાચાર્યની
નવમી સૂરિપદશતાબ્દીના ઉપલક્ષમાં નવસો વર્ષમાં થયેલ,
શ્રીસિદ્ધહેમવ્યાકરણના સર્વ અભ્યાસુઓને
સમર્પિત........

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# પ્રકાશકીય નિવેદન.....

પરમપૂજ્ય આચાર્યશ્રી વિજયસૂર્યોદયસૂરીશ્વરજી મહારાજની શુભ ભાવના તેમજ પ્રેરણાથી વિ.સં. ૨૦૪૫ના વર્ષે સ્થપાયેલ, કલિકાલસર્વજ્ઞ શ્રીહેમચન્દ્રાચાર્ય ભગવંતના નામ સાથે જોડાયેલ આ ટ્રસ્ટે, પૂજ્ય આચાર્યશ્રીના શિષ્ય આચાર્યશ્રી વિજયશીલચન્દ્રસૂરિજી મહારાજના માર્ગદર્શનમાં અનેક સાહિત્યિક પ્રવૃત્તિઓ કરી છે. તેમાં આપણા મૂર્ધન્ય વિદ્વજ્જનોને 'શ્રીહેમચન્દ્રાચાર્ય ચન્દ્રક' અર્પણ કરી તેમનું બહુમાન કરવામાં આવે છે. વિદ્વજ્જનોને આમંત્રણ આપીને વિવિધ વિષયો પર પરિસંવાદં અને સંગોષ્ઠીનું આયોજન થાય છે અને પ્રાચીન સાહિત્યના ગ્રંથોનું સંશોધન-સંપાદન કરાવવાપૂર્વક તેનું પ્રકાશન કરવામાં આવે છે. આજ પર્યંત આ ટ્રસ્ટના આશ્રયે આવા અનેક ગ્રંથોનું પ્રકાશન થયેલ છે, જે જૈન સંઘમાં જ નહિ પણ દેશ-વિદેશના અસંખ્ય વિદ્વાનોમાં પણ પ્રશંસાપાત્ર તથા ઉપાદેય બનેલા છે. 'अनुसन्धान' નામે એક શોધપત્રિકા પણ આ ટ્રસ્ટના ઉપક્રમે પ્રકાશિત કરવામાં આવે છે, જેના અદ્યાવધિમાં ૫૨ અંકો થઈ ચુક્યા છે.

આજે આ ટ્રસ્ટના ઉપક્રમે શ્રીહેમચન્દ્રાચાર્યના सिद्धहेमव्याकरण ઉપર લખાયેલા ढुण्ढिका નામના અપ્રગટ વિવરણનો ગ્રંથ પ્રકાશિત થઈ રહ્યો છે, જેનો અમને આનંદ છે. આ ગ્રંથનું હસ્તલિખિત પ્રતિઓ પરથી પ્રતિલિપિ-લેખન તેમજ સંપાદન, પૂજ્ય આ.શ્રી વિજયશીલચન્દ્રસૂરિમહારાજના શિષ્ય મુનિરાજ શ્રીવિમલકીર્તિવિજયજી મહારાજે કરેલ છે. આવું સરસ કાર્ય કરવા બદલ તેઓ અભિનંદનના અધિકારી છે.

શ્રીહેમચન્દ્રાચાર્યના ગ્રંથ પરની અપ્રકાશિત ટીકાના ગ્રંથના બીજા ભાગનું પ્રકાશન થઈ ગયેલ છે, ત્રીજા ભાગનું પ્રકાશન કરવાનો લાભ અમારા ટ્રસ્ટને સાંપડ્યો, તે અમારું સદ્ભાગ્ય છે. અમો આશા રાખીએ છીએ કે બાકીના ભાગ પણ આ જ રીતે તૈયાર થશે અને તેના પ્રકાશનનો લાભ પણ અમોને-અમારા ટ્રસ્ટને જ પ્રાપ્ત થશે.

પ્રસ્તુત પુસ્તકના પ્રકાશનમાં ''શ્રીગોવાલિયા ટેંક જૈન સંઘ, મુંબઈ'' તરફથી આર્થિક સહયોગ ટ્રસ્ટને પ્રાપ્ત થયો છે તે બદલ ટ્રસ્ટ તેઓનો આભાર માને છે.

લિ.

જ્ઞાનપંચમી, ૨૦૬૭

કલિકાલસર્વજ્ઞ શ્રીહેમચન્દ્રાચાર્ય નવમજન્મ
શતાબ્દી સ્મૃતિ સંસ્કાર-શિક્ષણનિધિ
અમદાવાદ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# સંપાદકીય નિવેદન

વિક્રમની બારમી સદીમાં નવાંગી વૃત્તિકાર શ્રીઅભયદેવસૂરિ મહારાજના સહોદર પૂર્ણતલગચ્છીય શ્રીદેવચન્દ્રસૂરિ મહારાજના શિષ્ય કલિકાલસર્વજ્ઞ શ્રીહેમચન્દ્રસૂરિ મહારાજ થયા હતા. સાનુકૂળ કાળ-સ્વભાવ-નિયતિ-પુરુષાર્થ-ભવિતવ્યતાદિ ગુણો મહાપુરુષોમાં રહેલી મહાનતાને ઉજ્જાગરિત કરતા હોય છે. તેમના તેજના પુંજથી તે યુગથી સંસ્કૃતિ પણ ઓજસ્વી બની અજ્ઞાનરૂપી અંધકારનો નાશ કરી સમ્યગ્જ્ઞાનરૂપી જ્ઞાનની જ્વાલાને પ્રજ્વલિત કરનારી બનતી હોય છે. પુણ્યશાળીના પગલે પગલે નવનિધાન પ્રગટ થતા હોય છે. તેમ શ્રીહેમચન્દ્રસૂરિ મહારાજના શબ્દે-શબ્દે વાક્યે-વાક્યે નવનવા ગ્રંથો પ્રગટ થતાં હતાં. કલિકાલસર્વજ્ઞના મુખારવિંદમાંથી વાણીનો પ્રવાહ-વાણીનો વૈભવ-વાણીનો વિલાસ અહર્નિશ વહેતો જ હતો. શ્રીહેમચન્દ્રસૂરિ મહારાજે સ્વ-પર-ઉભય ઉપકારક સાડાત્રણ કરોડ શ્લોક પ્રમાણ અનેકવિધ ગ્રંથોનું સર્જન કર્યું હતું. ભાગ્યે જ એવો કોઈક વિષય હશે જે એમની કલમથી લખાયો ન હોય.

નૈયાયિકો માટે પ્રમાણમીમાંસા-અયોગવ્યવચ્છેદદ્વાત્રિંશિકા-અન્યયોગવ્યવચ્છેદદ્વાત્રિંશિકા, છાંદસો માટે છંદોનુ-શાસન, અલંકારના જિજ્ઞાસુઓ માટે કાવ્યાનુશાસન, શબ્દોના પિપાસુઓ માટે અભિધાનચિંતામણિનામમાલા-દેશીનામમાલા- અનેકાર્થસંગ્રહ, શબ્દલિંગના અભ્યાસીઓ માટે લિંગાનુશાસન, યૌગિકો માટે યોગશાસ્ત્ર, સાહિત્યકારો માટે ત્રિષષ્ટિશલાકાપુરુષચરિત્ર, ઐતિહાસિકો માટે દ્વયાશ્રયમહાકાવ્ય તેમ વૈયાકરણીઓ માટે ગૂર્જરેશ્વર સિદ્ધરાજની પ્રેરણા-સહાયથી સંસ્કૃત-પ્રાકૃત-શૌરસેની-માગધી-પિશાચી-ચૂલિકાપિશાચી-અપભ્રંશભાષાઓના સર્વાંગપૂર્ણ આઠ અધ્યાય બત્રીશ પાદયુક્ત પંચાંગી સવાલાખ શ્લોકપ્રમાણ શ્રીસિદ્ધહેમચન્દ્રશબ્દાનુશાસન નામના વ્યાકરણની રચના કરી હતી. ગૂર્જરેશ્વર સિદ્ધરાજે પોતાનાં રાજપુરોહિતો તથા રાજસભાના વિદ્વાનો પાસે આ વ્યાકરણની પરીક્ષા કરાવી હતી. કષ-છેદ-તાપથી પરિશુદ્ધ થએલા સો ટચના સોનાની જેમ આ વ્યાકરણ સાંગોપાંગપૂર્ણ સર્વાંગશુદ્ધ છે તેવી ખાતરી-પ્રતીતિ થઈ ત્યારે આ વ્યાકરણને હાથીની અંબાડીમાં પધરાવી વાજતે-ગાજતે નગર-રાજ્યમાં ફેરવી રાજમહેલમાં પધરાવી પૂજા કરી હતી.

શ્રીસિદ્ધહેમચન્દ્રશબ્દાનુશાસનવ્યાકરણના મૂળસૂત્રોમાં આવેલા શબ્દો, તથા ઉદાહરણ-પ્રત્યુદાહરણની સાધનિકાઓ કોઈક વ્યાકરણ વિશારદે તૈયાર કરી ઢુંઢિકા નામે પ્રસિદ્ધ કરી હતી. તેની એક હસ્તલિખિત પ્રતિ શ્રીહેમચન્દ્રાચાર્ય જૈન જ્ઞાનમંદિર-પાટણનાં જ્ઞાનભંડારમાં રહેલી ''સિદ્ધહેમચન્દ્રાનુશાસન બૃહદ્વૃત્તિ ઢુંઢિકા પંચમાધ્યાયપર્યંત'' (ચતુષ્કઆખ્યાત-કૃદ્વૃત્તિઢુંઢિકા) પત્ર-૩૫૭, ડા. ૯૭, નં. ૨૪૦૦ તથા બીજી હસ્તલિખિત પ્રતિ શ્રીહંસવિજયજી-કાંતિવિજયજી મહારાજ સંગૃહીત જ્ઞાનભંડાર (જાની શેરી - વડોદરા)માં રહેલી ''સિદ્ધહેમશબ્દાનુશાસન ઢુંઢિકાવૃત્તિ - પંચમાધ્યાયપર્યંત'' પત્ર-૨૯૫, પ્રતિ નંબર ૨૦૨૦ને આધારે અજ્ઞાતકર્તૃકા ઢુંઢિકાના ત્રીજા ભાગનું સંપાદન કાર્ય કર્યું છે. અધ્યયન-અધ્યાપનમાં

Jain Education International For Private & Personal Use Only www.jainelibrary.org

સુગમતા રહે તે હેતુથી વ્યાકરણસંબંધી શબ્દમહાર્ણવન્યાસ-ધાતુપારાયણ-ક્રિયારત્નસમુચ્ચયાદિ અનેકવિધ ગ્રંથોના ઉદ્ધરણો આપ્યાં છે. તથા પાટણ જ્ઞાનભંડારમાંથી પ્રાપ્ત થયેલી બીજી હસ્તલિખિતપ્રતિને આધારે ઉદ્ધરણો-પાઠાંતરો આપવામાં આવ્યાં છે ત્યાં P કરવામાં આવ્યો છે.

બાલબ્રહ્મચારી તપાગચ્છાધિપતિ શાસનસમ્રાટ આચાર્ય શ્રીવિજયનેમિસૂરીશ્વરજી મ.સા.ના સમુદાયના ગચ્છાધિપતિ પરમપૂજ્ય આચાર્ય શ્રીવિજયસૂર્યોદયસૂરીશ્વરજી મ.સા. તથા પરમપૂજ્ય આચાર્ય શ્રીવિજયશીલચન્દ્રસૂરીશ્વરજી મ.સા.ની પ્રેરણા-કૃપાથી ત્રીજા ભાગનું સંપાદન કાર્ય કરી શક્યો છું.

ગ્રંથપ્રકાશનમાં પ્રત્યક્ષ-પરોક્ષ સહભાગી બનનાર સર્વેની અનુમોદના.

ગ્રંથનું સંપાદન કરતાં કોઈ પણ ક્ષતિ રહી ગઈ હોય તો સુધારી લેવા વિનંતિ.

જ્ઞાનપંચમી, ૨૦૬૭
જીવિત મહાવીરસ્વામી જૈન દેરાસર, કેબીનચોક, મહુવા
(શાસનસમ્રાટ વિજયનેમિસૂરીશ્વરજી મ.સા.ની જન્મભૂમિ-કાળધર્મભૂમિ)

**મુનિ વિમલકીર્તિવિજય**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ।। सम्पादनोपयुक्तग्रन्थसूचिः ।।

(१) श्रीसिद्धहेमचन्द्रशब्दानुशासनम् ।
[ स्वोपज्ञतत्त्वप्रकाशिकाभिधानबृहद्वृत्ति-स्वोपज्ञशब्दमहार्णवन्यास-श्रीकनकप्रभसूरिरचितन्याससारसमुद्धारसंवलितम् ]
तृतीयोऽध्यायः ।
बृहन्न्यासानुसन्धानकारः - सम्पादकश्च - आ० श्रीमद्विजयलावण्यसूरीश्वरः ।

(२) श्रीमद्विजयलावण्यसूरिप्रणीतो धातुरत्नाकरः [भाग १ थी ७]

(३) श्रीहेमचन्द्रसूरिभगवद्भिरचितं धातुपारायणम् ।

(४) श्रीहैमव्याकरणसत्का श्रीउणादिगणविवृत्तिः ।

(५) आचार्यश्रीगुणरत्नसूरिविरचितः क्रियारत्नसमुच्चयः ।

(६) श्रीहेमहंसगणिविरचितो न्यायसंग्रहः ।

(७) हैमकृदन्तश्रेणिः । सम्पादिका - साध्वी श्रीअमीरत्नाश्रीजी ।

(८) शब्दरत्नमहोदधिः १-२-३ । संकलनकर्त्ता - पंन्यासप्रवरमुक्तिविजयो गणिः ।

(९) श्रीसिद्धहेमचन्द्रशब्दानुशासनं स्वोपज्ञमध्यमवृत्त्यवचूरिभ्यामलङ्कृतम् । प्रथमो विभागः-द्वितीयो विभागः ।

(१०) श्रीहेमचन्द्राचार्यरचिता अभिधानचिन्तामणिनाममाला ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ।। संक्षेपतो विषयानुक्रमः ।।

## तृतीयाध्यायस्य द्वितीयः पादः । समासप्रकरणम् ।

## सूत्रसंख्या - १५६ ।


| | सूत्राङ्कः | पत्राङ्कः |
|---|---|---|
| स्यादेराम्विधानम् | ३।२।१ | १ |
| स्यादेरम्विधानम् | ३।२।२ - ३।२।५ | २-३ |
| स्यादेर्लुब्विधानम् | ३।२।६ - ३।२।८, ३।२।२९ | ३-५, १५ |
| स्यादेरलुब्विधानम् | ३।२।९ - ३।२।३८ | ५-१८ |
| द्वन्द्वे आकार-ईकारादिविधानम् | ३।२।३९ - ३।२।४७ | १९-२२ |
| श-ष-सादिनिपातनविधानम् | ३।२।४८ | २२ |
| पुंवद्विधानम् | ३।२।४९ - ३।२।५२ | २४-३० |
| पुंवन्निषेधः | ३।२।५३ - ३।२।५६ | ३१-३७ |
| पुंवद्विधानम् | ३।२।५७ - ३।२।६२ | ३८-४५ |
| पुंवत्- ह्रस्वविधानञ्च | ३।२।६३ | ४६ |
| ह्रस्वविधानम् | ३।२।६४ - ३।२।६७ | ४८-५१ |
| महतो डाविधानम् | ३।२।६८ - ३।२।७० | ५२ |
| महतो डानिषेधः | ३।२।७१ | ५३ |
| आत् - दीर्घविधानञ्च | ३।२।७२ | ५३ |
| दीर्घविधानम् | ३।२।७३ - ३।२।९० | ५४-६६ |
| एकादशादीनि निपातनानि | ३।२।९१ | ६६ |
| द्वि-त्र्यष्टानां द्वा-त्रयो-ऽष्टाविधानम् | ३।२।९२ - ३।२।९३ | ६७-६९ |
| हृदयस्य हृद्विधानम् | ३।२।९४ | ६९ |
| पादस्य पदविधानम् | ३।२।९५ | ७० |
| पादस्य पद्विधानम् | ३।२।९६ - ३।२।९८ | ७१-७२ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | सूत्राङ्कः | पत्राङ्कः |
|---|---|---|
| नासिकाया नस्विधानम् | ३।२।९९ - ३।२।१०० | ७२ |
| शिरसः शीर्षन्विधानम् | ३।२।१०१ - ३।२।१०२ | ७३ |
| शिरसः शीर्षविधानम् | ३।२।१०३ | ७३ |
| उदकस्य उदविधानम् | ३।२।१०४ - ३।२।१०७ | ७४-७६ |
| लुग्विधानम् | ३।२।१०८ | ७६ |
| अप ईप्विधानम् | ३।२।१०९ | ७७ |
| अप उप्विधानम् | ३।२।११० | ७७ |
| मोऽन्त-ह्रस्वविधानञ्च । | ३।२।१११ | ७८ |
| मोऽन्तविधानम् । | ३।२।११२ - ३।२।११८ | ८०-८२ |
| दन्तविधानम् । | ३।२।११९ - ३।२।१२१ | ८३-८४ |
| ड्द्रिरन्तविधानम् । | ३।२।१२२ | ८४ |
| सह-समः सध्रि - समिविधानम् । | ३।२।१२३ | ८६ |
| तिरसस्तिरिविधानम् । | ३।२।१२४ | ८७ |
| नञोऽकारविधानम् । | ३।२।१२५ - ३।२।१२६ | ८८-८९ |
| नञो नगविधानम् । | ३।२।१२७ | ८९ |
| नञोऽन्विधानम् । | ३।२।१२९ | ९१ |
| कोः कद्विधानम् । | ३।२।१३० - ३।२।१३२ | ९१-९२ |
| कोः किमो वा कद्विधानम् । | ३।२।१३३ | ९२ |
| कोः काविधानम् । | ३।२।१३४ - ३।२।१३६ | ९२-९३ |
| कोः का-कवविधानम् । | ३।२।१३७ | ९३ |
| लुग्विधानम् । | ३।२।१३८ - ३।२।१४१ | ९४-९५ |
| तीरस्य तारविधानम् । | ३।२।१४२ | ९५ |
| सहस्य सविधानम् । | ३।२।१४३ - ३।२।१४७ | ९६-९८ |
| सहस्य सनिषेधः । | ३।२।१४८ | ९८ |
| समानस्य सविधानम् । | ३।२।१४९ - ३।२।१५१ | ९९-१०० |
| अन्यस्य त्यदादेश्च आत्त्वविधानम् । | ३।२।१५२ | १०० |
| इदम्-किमौ ईत्-कीविधानम् । | ३।२।१५३ | १०१ |
| क्त्वो यब्विधानम् । | ३।२।१५४ | १०१ |
| पृषोदरादीनि निपातनानि । | ३।२।१५५ | १०२ |
| अवस्योपसर्गस्य व० - अपेः पिविधानम् । | ३।२।१५६ | १०५ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

## तृतीयाध्यायस्य तृतीयः पादः । आख्यातप्रकरणम् ।
## सूत्रसंख्या - १०८ ।



| | सूत्राङ्कः | पत्राङ्कः |
|---|---|---|
| वृद्धिसंज्ञाविधानम् । | ३।३।१ | १०७ |
| गुणसंज्ञाविधानम् । | ३।३।२ | १०८ |
| धातुसंज्ञाविधानम् । | ३।३।३ | १०८ |
| दासंज्ञाविधानम् । | ३।३।५ | ११३ |
| वर्त्तमानादिप्रत्ययविधानम् । | ३।३।६ - ३।३।१६ | ११४-११६ |
| परस्मैपदप्रत्ययविधानम् । | ३।३।१९ | ११८ |
| आत्मनेपदप्रत्ययविधानम् । | ३।३।२० | ११८ |
| आत्मनेपदविधानम् । | ३।३।२२ - ३।३।९९ | १२२-१६३ |
| परस्मैपदविधानम् । | ३।३।१०० - ३।३।१०८ | १६३-१६७ |



## तृतीयाध्यायस्य चतुर्थः पादः । आख्यातप्रकरणम् ।
## सूत्रसंख्या - ९४ ।



| | सूत्राङ्कः | पत्राङ्कः |
|---|---|---|
| आयप्रत्ययविधानम् । | ३।४।१ | १६८ |
| णिङ्प्रत्ययविधानम् । | ३।४।२, ३।४।१९, ३।४।३८ - ३।४।४१ | १६८,१७८,१९०-१९१ |
| ङीयप्रत्ययविधानम् । | ३।४।३ | १६९ |
| सन्प्रत्ययविधानम् । | ३।४।५ - ३।४।७, ३।४।२१ | १६९-१७०, १८१ |
| यक्प्रत्ययविधानम् । | ३।४।८ | १७१ |
| यङ्प्रत्ययविधानम् । | ३।४।९ - ३।४।१२ | १७२-१७५ |
| यङ्प्रत्ययनिषेधः । | ३।४।१३ | १७६ |
| यङ्प्रत्ययलुब्विधानम् । | ३।४।१४ - ३।४।१५ | १७६-१७७ |
| यङ्प्रत्ययालुब्विधानम् । | ३।४।१६ | १७७ |
| णिच्प्रत्ययविधानम् । | ३।४।१७ - ३।४।१८ | १७८-१७९ |
| णिच्प्रत्ययविधानम् । | ३।४।४२ - ३।४।४३ | १९१-१९५ |
| णिग्प्रत्ययविधानम् । | ३।४।२० | १८० |
| काम्यप्रत्ययविधानम् । | ३।४।२२ - ३।४।२३ | १८२-१८३ |
| क्यन्प्रत्ययविधानम् । | ३।४।२३ - ३।४।२४, ३।४।३६ - ३।४।३७ | १८३,१८९-१९० |
| क्विप्प्रत्ययविधानम् । | ३।४।२५ | १८४ |



Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | सूत्राङ्कः | पत्राङ्कः |
|---|---|---|
| क्यङ्प्रत्ययविधानम् । | ३।४।२६ - ३।४।३५ | १८५-१८९ |
| परोक्षाया आम्विधानम् । | ३।४।४६ - ३।४।५१ | १९६-२०० |
| पञ्चम्या आम्विधानम् | ३।४।५२ | २०० |
| सिच्प्रत्ययविधानम् । | ३।४।५३ - ३।४।५४ | २०१ |
| सक्प्रत्ययविधानम् । | ३।४।५५ - ३।४।५६ | २०२-२०३ |
| सक्प्रत्ययनिषेधः । | ३।४।५७ | २०४ |
| डप्रत्ययविधानम् । | ३।४।५८ - ३।४।५९ | २०४-२०५ |
| अङ्प्रत्ययविधानम् । | ३।४।६० - ३।४।६५ | २०६-२१० |
| ञिच्प्रत्ययविधानम् । | ३।४।६६ - ३।४।६८ | २११-२१२ |
| ञिट्प्रत्ययविधानम् । | ३।४।६९ | २१३ |
| क्यप्रत्ययविधानम् । | ३।४।७० | २१५ |
| शव्प्रत्ययविधानम् । | ३।४।७१ | २१७ |
| श्यप्रत्ययविधानम् । | ३।४।७२ - ३।४।७४ | २१८-२१९ |
| श्नुप्रत्ययविधानम् । | ३।४।७५ - ३।४।७८ | २२०-२२२ |
| श्नाप्रत्ययविधानम् । | ३।४।७८ - ३।४।७९ | २२२ |
| आनप्रत्ययविधानम् । | ३।४।८० | २२३ |
| शप्रत्ययविधानम् । | ३।४।८१ | २२३ |
| श्नप्रत्ययविधानम् । | ३।४।८२ | २२४ |
| उप्रत्ययविधानम् । | ३।४।८३ | २२४ |
| ञि-क्यात्मनेपदप्रत्ययविधानम् । | ३।४।८४ - ३।४।८७, ३।४।९४ | २२५,२२८,२३७ |
| ञिच्प्रत्ययनिषेधः । | ३।४।८८ - ३।४।९२ | २२९-२३१ |
| ञि-क्यप्रत्ययनिषेधः । | ३।४।९३ | २३३-२३७ |


## चतुर्थाध्यायस्य प्रथमः पादः । आख्यातप्रकरणम् ।
## सूत्रसंख्या - १२१ ।


| | सूत्राङ्कः | पत्राङ्कः |
|---|---|---|
| धातोर्द्वित्वविधानम् । | ४।१।१ | २३९ |
| धातोराद्य-द्वितीयाद्यंशद्वित्वविधानम् । | ४।१।२ - ४।१।१४ | २४२-२४९ |
| सादौ सनि धातूनां बहुधादेशविधानम् । | ४।१।१६ - ४।१।२२ | २५०-२५३ |
| परोक्षायां स्वरस्य एत्त्वविधानम् । | ४।१।२३ - ४।१।२९ | २५३-२५९ |
| परोक्षायां स्वरस्य एत्त्वनिषेधः । | ४।१।३० | २५९ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | सूत्राङ्कः | पत्राङ्कः |
|---|---|---|
| हौ स्वरस्य एत्त्वविधानम् । | ४।१।३१ | २६० |
| परोक्षायां देङः दिगिविधानम् । | ४।१।३२ | २६० |
| ङे ण्यन्तपिबतेः पीप्य्विधानम् । | ४।१।३३ | २६१ |
| द्वित्वे सति पूर्वापरस्वरव्यञ्जनयोर्नानाविधादेशादिविधानम् । | ४।१।३४ - ४।१।७१ | २६१-३०० |
| य्वृद्धिधानम् । | ४।१।७२, ४।१।७५, ४।१।७८ - ४।१।९० | ३००,३०२,३०३-३१६ |
| य्वृन्निषेधः । | ४।१।७३ - ४।१।७४, ४।१।७६ - ४।१।७७ | ३०१,३०२,३०३ |
| प्यायः पीविधानम् । | ४।१।९१ - ४।१।९३ | ३१७-३१८ |
| स्फायः स्फीविधानम् । | ४।१।९४ | ३१९ |
| स्त्यः स्तीविधानम् । | ४।१।९५ - ४।१।९६ | ३१९-३२० |
| श्यः शीविधानम् । | ४।१।९७ - ४।१।९९ | ३२०-३२१ |
| श्रः शृतं विधानम् । | ४।१।१०० | ३२२ |
| श्रपेः शृतं निपातनम् । | ४।१।१०१ | ३२३ |
| दीर्घविधानम् । | ४।१।१०३ - ४।१।१०७ | ३२४-३२७ |
| धातोश्च्छ्-वः श्-ऊट्विधानम् । | ४।१।१०८ | ३२८ |
| मव्यादिधातूनामुपान्त्येन सह ऊट्विधानम् । | ४।१।१०९ | ३३१ |
| धातोश्छ्वोर्लुग्विधानम् । | ४।१।११० | ३३३ |
| धातोश्चस्य कत्वं - जस्य गत्वविधानम् । | ४।१।१११ | ३३५ |
| धातोश्च-जोः क-गौ निषेधौ । | ४।१।११३ - ४।१।११९ | ३४०-३४३ |
| भुज-न्युब्जौ निपातितौ । | ४।१।१२० | ३४३ |
| वीरुत् - न्यग्रोधौ निपातितौ । | ४।१।१२१ | ३४४ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

## कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यविरचितं श्रीसिद्धहेमचन्द्रशब्दानुशासनम् ॥

# श्रीसिद्धहेमचन्द्रशब्दानुशासने अज्ञातकर्तृका ढुण्ढिका ॥

## ॥ अथ तृतीयाध्यायस्य द्वितीयः पादः ॥

**परस्परा-ऽन्योन्येतरेतरस्याम् स्यादेर्वाऽपुंसि ॥३।२।१॥**

**[परस्पराऽन्योन्येतरेतरस्याम्]** परस्परं च अन्योन्यं च इतरेतरं च = परस्पराऽन्योन्येतरेतरम्, तस्य । आम्शब्दात् स्वरूपेण अर्थवत्त्वात् सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । प्रश्लेषव्याख्याने यदा अम् स्थाप्यते तदा लिङ्गत्रयेऽपि स्यादिस्थाने अमा भाव्यम् ।

**[स्यादेः]** सिरादिर्यस्याऽसौ स्यादिस्तस्य ।

**[अपुंसि]** न पुमान् = अपुमान्, तस्मिन् ।

**[इमे सख्यौ परस्परां भोजयतः, परस्परं भोजयतः]** परश्च परश्च । अम् । अनेन आम् । 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) । भुज् । भुङ्क्ते परस्परं कर्त्ता, तं भुञ्जानं सख्यौ प्रयुञ्जाते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । वर्त्त० तस् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[आभिः सखीभिः परस्परां भोज्यते, परस्परेण भोज्यते]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भुङ्क्ते ब्राह्मणस्तं परस्परः प्रयुङ्क्ते । णिग्प्र० । तं परस्परं भोजयन्तं सख्यः प्रयुञ्जते । पुनर्णिग् । यदा कर्त्तरि तृतीया तदा णिग् द्वयम् । यदा तु करणे सहार्थे वा परस्परादिपदं वर्त्तते तदा एको णिग् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'णेरनिटि' (४।३।८३) णिग्लोपः ।

**[इमाः सख्यः परस्परां प्रयच्छन्ति, परस्परस्मै प्रयच्छन्ति]** 'यमूं उपरमे' (३८६) यम्, प्रपूर्व० । वर्त्त० अन्ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'गमिषद्यमश्छः' (४।२।१०६) म० → छ० । 'स्वरेभ्यः' (१।३।३०) द्वित्वम् । 'अघोषे प्रथमोऽशिटः' (१।३।५०) छ० → च० ।

**[इमाः परस्परां परस्परस्माद् वा बिभ्यति]** 'ञिभींक् भये' (११३२) भी । वर्त्त० अन्ति । 'हवः शिति' (४।१।१२) "भी" द्विर्वचनु । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'अन्तो नो लुक्' (४।२।९४) नलोपः । 'योऽनेकस्वरस्य' (२।१।५६) यत्वम् ।

**[इमाः परस्परां परस्परस्य वा स्मरन्ति]** 'स्मृं चिन्तायाम्' (१८) स्मृ । वर्त्त० अन्ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'स्मृत्यर्थ-दयेशः' (२।२।११) इत्यनेन कर्म, पक्षे कर्मत्वाभावात् 'शेषे' (२।२।८१) षष्ठी परस्परस्येत्यत्र ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[इमाः परस्परां परस्परस्मिन् वा स्निह्यन्ति]** 'ष्णिहौच् प्रीतौ' (१२४१) ष्णिह् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्निह् । वर्त्त० अन्ति । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[इमे नराः परस्परं भोजयन्ति]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भुञ्जानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । वर्त्त० अन्ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[नरैः परस्परेण भोज्यते]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भुञ्जानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'णेरनिटि' (४।३।८३) णिग्लोपः ।।छ।।

**अमव्ययीभावस्याऽतोऽपञ्चम्याः** ।।३।२।२।।

**[अव्ययीभावस्य]** न वि 'इंण्क् गतौ' (१०७५) इ । न व्येति = न क्षयंयातीत्यव्ययम् । 'युवर्ण-वृ-दृ-वश-रण-गमृद-ग्रहः' (५।३।२८) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'इवर्णादि०' (१।२।२१) यत्वम् । 'नञत्' (३।२।१२५) न० → अ० । 'भू सत्तायाम्' (१) भू । अनव्ययस्य अव्ययस्य भवनं = अव्ययीभावः । 'वा ज्वलादि दु-नी-भू-ग्रहा-ऽऽस्त्रोर्णः' (५।१।६२) णप्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'कृ-भ्वस्तिभ्यां कर्मकर्तृभ्याम्०' (७।२।१२६) च्विप्र० । 'ईश्च्वाववर्णस्या-ऽनव्ययस्य' (४।३।१११) ई । 'अप्रयोगीत्' (१।१।३७) च्विलोपः, तस्य ।

**[अपञ्चम्याः]** न पञ्चमी = अपञ्चमी । 'नञत्' (३।२।१२५) न० → अ०, तस्याः ।

**[उपकुम्भं तिष्ठति]** कुम्भस्य समीपं = उपकुम्भम् । सि । अनेनाऽम् ।

**[उपकुम्भं पश्य]** कुम्भस्य समीपं = उपकुम्भम् । अम् । अनेनाऽम् ।

**[उपकुम्भं देहि]** कुम्भस्य समीपं = उपकुम्भम् । ङे । अनेनाऽम् ।

**[उपकुम्भं स्वामी]** कुम्भस्य समीपं = उपकुम्भम् । ङस् । अनेनाऽम् ।

**[कष्टश्रितः]** कष्टं श्रितः । 'श्रितादिभिः' (३।१।६२) समासः ।

**[प्रियोपकुम्भस्तिष्ठति]** प्रियमुपकुम्भं यस्य सः ।

**[प्रियोपकुम्भाय देहि]** प्रियमुपकुम्भं यस्य सः, तस्मै ।

**[अधिस्त्रि]** स्त्रीष्वधि ।

**[उपवधु]** वध्वाः समीपम् ।

**[उपकर्तृ]** कर्तुः समीपम् । सि । 'अनतो लुप्' (३।२।६) सिलुप् ।

**[उपकुम्भात्]** कुम्भस्य समीपमुपकुम्भम्, तस्मात् ।।छ।।

**वा तृतीयायाः** ।।३।२।३।।

**[किं न उपकुम्भम्, किं न उपकुम्भेन]** अस्मद् । षष्ठी आम् । 'पदाद् युग्विभक्त्यैकवाक्ये वस्-नसौ बहुत्वे' (२।१।२१) ''नस्'' आदेशः । कुम्भस्य समीपमुपकुम्भम् । 'कृताऽऽद्यैः' (२।२।४७) तृतीया ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[किं नः प्रियोपकुम्भेन]** प्रियमुपकुम्भं यस्य सः, तेन ॥छ॥

**सप्तम्या वा** ॥३।२।४॥

**[उपकुम्भं निधेहि, उपकुम्भे निधेहि]** 'डुधांग्क् धारणे च' (११३९) धा, निपूर्व० । पञ्चमी हि । 'हौ दः' (४।१।३१) आ० → ए० ।

**[प्रियोपकुम्भे निधेहि]** प्रियमुपकुम्भं यस्य, तस्मिन् ॥छ॥

**ऋद्ध-नदी-वंश्यस्य** ॥३।२।५॥

**[ऋद्धनदीवंश्यस्य]** 卐 ऋद्धश्च नदी च वंश्यश्च, तस्य ।

**[सुमगधं वसति]** मगधानां शोभना ऋद्धिः = सुमगधम् ।

**[सुमद्रं वसति]** मद्राणां शोभना ऋद्धिः ।

**[उन्मत्तगङ्गं देशे वसति]** उन्मत्ता गङ्गा यस्मिन् देशे, तस्मिन् । 'क्लीबे' (२।४।९७) ह्रस्वः । 'परतः स्त्री०' (३।२।४९) पुंवत् । 'नदीभिर्नाम्नि' (३।१।२७) अव्ययीभावः समासः । अनेन सप्तमी ङि → अम् ।

**[लोहितगङ्गं वसति]** लोहिता गङ्गा यस्मिन् देशे, तस्मिन् ।

**[शनैर्गङ्गं वसति]** शनैर्गङ्गा यस्मिन् देशे, तस्मिन् ।

**[तूष्णींगङ्गं वसति]** तूष्णीं गङ्गा यस्मिन् देशे, तस्मिन् । 'क्लीबे' (२।४।९७) ह्रस्वः ।

**[द्वियमुनं वसति]** द्वे यमुने । 'क्लीबे' (२।४।९७) ह्रस्वः, तस्मिन् । 'संख्या समाहारे' (३।१।२८) अव्ययीभावः समासः उभयत्र ।

**[सप्तगोदावरं वसति]** सप्तानां गोदावरीणां समाहारः । 'संख्याया नदी-गोदावरीभ्याम्' (७।३।९१) अत्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) ईलोपः, तस्मिन् ।

**[एकविंशतिभारद्वाजं वसति]** एकेनाऽधिका विंशतिर्भारद्वाजा वंश्या येषु = एकविंशतिर्भारद्वाजम् । सप्तमी सुप् । अनेन सुप् → अम् । प्रथमं 'मयूरव्यंसकेत्यादयः' (३।१।११६) समासः । ततो 'वंश्येन पूर्वार्थे' (३।१।२९) अव्ययीभावः समासः । 'वसं निवासे' (९९९) वस् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[त्रिपञ्चाशद्गौतमम्]** त्रिभिरधिका पञ्चाशत्, त्रिपञ्चाशद् गौतमा वंश्या येषु, तेषु ।

**[त्रिकोशलम्]** तिस्त्रः कोशला वंश्या येषु, तेषु । 'क्लीबे' (२।४।९७) ह्रस्वः ।

**[उपगङ्गे]** गङ्गायाः समीपमुपगङ्गम्, तस्मिन् ।

**[उपयमुने]** यमुनायाः समीपमुपयमुनम् । 'क्लीबे' (२।४।९७) ह्रस्वः, तस्मिन् ॥छ॥

**अनतो लुप्** ॥३।२।६॥

**[अनतः]** न अत् = अनत् । 'अन् स्वरे' (३।२।१२९) अन्, तस्य ।

---

P. 卐 ऋद्धं च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अधिस्त्रि]** स्त्रीष्वधि = अधिस्त्रि । 'क्लीबे' (२।४।९७) ह्रस्वः ।

**[उपवधु]** वध्वाः समीपमुपवधु । 'क्लीबे' (२।४।९७) ह्रस्वः ।

**[उपकर्तृ]** कर्तुः समीपम् ।

**[उपकुम्भात्]** कुम्भस्य समीपमुपकुम्भम्, तस्मात् ।

**[उपकुम्भाभ्याम्]** कुम्भयोः समीपमुपकुम्भे, ताभ्याम् ।

**[उपकुम्भेभ्यः]** कुम्भानां समीपमुपकुम्भानि, तेभ्यः ।

**[उपकुम्भेन]** कुम्भस्य समीपमुपकुम्भम्, तेन ।

**[उपकुम्भे]** कुम्भस्य समीपमुपकुम्भम्, तस्मिन् ।

**[प्रियोपवधुः]** प्रियं उपवधु यस्याऽसौ ।

**[अत्युपवधुः]** उपवधु अतिक्रान्तः सः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।।छ।।

**अव्ययस्य** ।।३।२।७।।

**[अव्ययस्य]** न वि 'इंण्क् गतौ' (१०७५) इ । न व्येति = न क्षयंयातीत्यव्ययम् । 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः' (५।३।२८) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'इवर्णादे०' (१।२।२३) यत्वम् । 'नञत्' (३।२।१२५) न० → अ० । तस्य ।

**[परमोच्चैः]** परमं च तद् उच्चैश्च । सि । अनेन लुप् ।

**[भोजं भोजं व्रजति]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । अभीक्ष्णं (आभीक्ष्ण्यं) भोजनं पूर्वम् । 'ख्णम् चाऽऽभीक्ष्ण्ये' (५।४।४८) ख्णम्प्र० → अम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'भृशा-ऽऽभीक्ष्ण्या-ऽविच्छेदे द्विः प्राक् तमबादेः' (७।४।७३) द्विर्वचनम् । सि । अनेन सर्वत्र लुप् । धृज (१३०)-धृजु (१३१) - ध्वज (१३२) - ध्वजु (१३३) - ध्रज (१३४) - ध्रजु (१३५) - वज (१३६) - 'व्रज गतौ' (१३७) व्रज् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[ततः]** तद् । तस्मात्ततः । 'किमद्व्यादिसर्वाद्यवैपुल्यबहोः पित् तस्' (७।२।८९) तस्प्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[तत्र]** तद् । तस्मिन् । 'सप्तम्याः' (७।२।९४) त्रप्प्र० → त्र । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[कथम्]** किम् । केन प्रकारेण । 'कथमित्थम्' (७।२।१०३) थम्प्र० । 'किमः कस्तसादौ च' (२।१।४०) किम्० → क० ।

**[ब्राह्मणवत्]** ब्राह्मण इव । 'स्यादेरिवे' (७।१।५२) वत्प्र० ।

**[पचतितराम्]** द्वयोर्मध्ये प्रकृष्टं पचति । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । 'किं-त्याद्येऽव्ययादसत्त्वे तयोरन्तस्याऽऽम्' (७।३।८) अन्तस्याऽऽम् । 'वत्तस्याम्' (१।१।३४) अव्ययसंज्ञा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[द्विधा]** द्वाभ्यां प्रकाराभ्याम् । 'संख्याया धा' (७।२।१०४) धाप्र० । 'अधण्तस्वाद्या शसः' (१।१।३२) अव्ययसंज्ञा ।

**[अतिस्वरः]** स्वः । 卐 स्वर्गं अतिक्रान्ता ये ते, जस् ।

**[अत्युच्चैसः]** उच्चैरतिक्रान्ता ये ते, जस् ।।छ।।

## ऐकार्थ्ये ।।३।२।८।।

**[ऐकार्थ्ये]** एकोऽर्थो यस्य तत्, एकार्थस्य भावः । 'पति-राजान्तगुणाङ्ग-राजादिभ्यः कर्मणि च' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[चित्रगुः]** चित्रा गावो यस्याऽसौ । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । 'परतः स्त्री पुम्वत्०' (३।२।४९) पुंवत् ।

**[राजपुरुषः]** राज्ञः पुरुषः ।

**[पुत्रीयति]** पुत्रमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य । 'क्यनि' (४।३।११२) अवर्ण० → ई । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[पुत्रकाम्यति]** पुत्रमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) काम्यप्र० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[कुम्भकारः]** कुम्भं करोतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[औपगवः]** उपगोरपत्यम् । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।।छ।।

## न नाम्येकस्वरात् खित्युत्तरपदेऽमः ।।३।२।९।।

**[न]** न प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[नाम्येकस्वरात्]** नामी च एकस्वरश्च = नाम्येकस्वरम्, तस्मात् ।

**[खिति]** ख् इदनुबन्धो यस्य सः = खित्, तस्मिन् ।

**[उत्तरपदे]** समा(सा)रम्भकमन्त्यं पदमुत्तरपदम्, तस्मिन् ।

**[स्त्रीमन्यः]** बुधिं (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन् । 卐卐 स्त्रीं मन्यते ।

**[श्रियंमन्यः]** श्रियं मन्यते ।

**[भुवंमन्यः]** भुवं मन्यते ।

**[नरंमन्यः]** नरं मन्यते ।

**[रायंमन्यः]** रायं मन्यते ।

---

卐 मध्यमवृत्तौ - स्वः अतिक्रान्ताः । अत्र जसः अतिस्वःशब्दसंबंधित्वात् न लुप् ।

P. 卐卐 स्त्रियमात्मानं मन्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[गांमन्यः]** गां मन्यते ।

**[नावंमन्यः]** नावं मन्यते । 'कर्तुः खश्' (५।१।११७) खश्प्र० → अ । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[श्रियंमन्यं कुलम्]** श्रियं मन्यते । 'कर्तुः खश्' (५।१।११७) खश्प्र० → अ । 'खित्यनव्ययाऽरुषो मोऽन्तो ह्रस्वश्च' (३।२।१११) मोऽन्तः-ह्रस्वत्वं च ।

**[ज्ञंमन्यः]** ज्ञं-कोविदमात्मानं मन्यते ।

**[क्ष्मंमन्यः]** 'क्षमौच् सहने' (१२३५) क्षम् । क्षाम्यतीति । 'अच्' (५।१।४९) अच्प्र० → अ । 'पृषोदरादयः' (३।२।१५५) उपान्त्यस्याऽस्य लोपः । 'आत्' (२।४।१८) आप्प्र० → आ । क्ष्मामात्मानं मन्यते । 'कर्तुः खश्' (५।१।११७) खश्प्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) ह्रस्वत्वं-मकारागमश्च ।

**[वाग्मन्यः]** वाचं-वाणीमात्मानं मन्यते । 'कर्तुः खश्' (५।१।११७) खश्प्र० → अ ।

**[हरिणिंमन्या]** हरिणीं मन्यते ।

**[वधुंमन्या]** वधूं मन्यते । 'कर्तुः खश्' (५।१।११७) खश्प्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः-ह्रस्वश्च ।

**[स्त्रीमानी]** स्त्रीं मन्यते । 'मन्याण्णिन्' (५।१।११६) णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । प्र० सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः ।।छ।।

**असत्त्वे ङसे** ।।३।२।१०।।

**[असत्त्वे]** न सत्त्वं = असत्त्वम् । 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् ।

**[स्तोकान्मुक्तः-अल्पान्मुक्तः-कृच्छ्रान्मुक्तः-कतिपयान्मुक्तः]** स्तोकान्मुक्तः, इत्यादिषु । 'स्तोका-ऽल्प-कृच्छ्र-कतिपयादसत्त्वे करणे' (२।२।७९) पञ्चमी । 'मुच्लृंती मोक्षणे' (१३२०) मुच् । मुच्यते स्म । '-क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'च-जः क-गम्' (२।१।८६) च० → क० ।

**[अन्तिकादागतः-अभ्याशादागतः-सविधादागतः-दूरादागतः-विदूरादागतः-विप्रकृष्टादागतः]** अन्तिकादागत इत्यत्र 'असत्त्वारादर्थात् टा-ङसि-ङ्यम्' (२।२।१२०) इति पञ्चमी । 'क्तेनाऽसत्त्वे' (३।१।७४) तत्पुरुषः समासः । अम (३९२)-द्रम (३९३)-हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम्, आङ्पूर्व० । आगम्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'यमि-रमि-नमि-गमि०' (४।२।५५) मलोपः ।

**[स्तोकभयम्]** स्तोकाद्भयम् । 'पञ्चमी भयाद्यैः' (३।१।७३) तत्पुरुषः समासः ।

**[स्तोकापेतः]** स्तोकादपेता(तः) ।

**[निःस्तोकः]** निष्क्रान्तः स्तोकान्निःस्तोकः । 'प्रात्यव-परि-निरादयो गत-क्रान्त-क्रुष्ट-ग्लान-क्रान्ताद्यर्थाः प्रथमाद्यन्तैः' (३।१।४७) इत्यादिना तत्पुरुषः समासः ।।छ।।

**ब्राह्मणाच्छंसी** ।।३।२।११।।

**[ब्राह्मणाच्छंसी]** ब्राह्मणाद् ग्रन्थादादाय शंसति । 卐 'ग्रहादिभ्यो णिन्' (५।१।५३) णिन्प्र० → इन् । 'पञ्चम्यपादाने' (२।२।६९) पञ्चमी । अनेन निपातः ।

P. 卐 'व्रता-ऽऽभीक्ष्ण्ये' (५।१।१५७) णिन्प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ब्राह्मणाच्छंसिनौ]** ब्राह्मणाद् ग्रन्थादादाय शंसतः । 'ग्रहादिभ्यो णिन्' (५।१।५३) णिन्प्र० → इन् । प्र० औ । अनेन निपातः ।

**[ब्राह्मणशंसिनी स्त्री]** 'स्त्रियां नृतोऽस्वस्त्रादेर्ङीः' (२।४।१) ङी ॥छ॥

**ओजो-ऽञ्जः-सहो-ऽम्भस्-तमस्-तपसष्टः ॥३।२।१२॥**

**[ओजोऽञ्जःसहोऽम्भस्तमस्तपसः]**卐 ओजश्च अञ्जश्च सहश्च अम्भश्च तमश्च तपश्च = ओजोऽञ्जःसहोऽम्भस्तमस्तपः, तस्मात् ।

**[टः]** टा षष्ठी ङस् । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः ।

**[ओजसाकृतम्]** ओजसा क्रियते स्म=ओजसाकृतम् । 'क्तयोरसदाधारे' (२।२।९१) इति षष्ठीनिषेधः । 'कारकं कृता' (३।१।६८) इति समासः, एवं सर्वत्रापि ।

**["सततनैशतोमवृतमन्यतः"]** निशायां भवम् । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । नैशं च तत् तमश्च = नैशतमः, सततं च नैशतमश्च = सततनैशतमः, सततनैशतमसा वृतं = सततनैशतमोवृतम् ।

**[ओजोभावः]** भवनं = भावः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । ओजसो भावः = ओजोभावः ॥छ॥

**पुं-जनुषोऽनुजा-ऽन्धे ॥३।२।१३॥**

**[पुंजनुषः]** पुमांश्च जनुश्च = पुंजनुः, तस्मात् ।

**[अनुजाऽन्धे]** अनुजश्च अन्धश्च = अनुजान्धम्, तस्मिन् ।

**[पुंसानुजः]** अनु 'जनैचि प्रादुर्भावे' (१२६५) जन् । अनु जायते । 'अनुज(अनोर्ज)नेर्डः' (५।१।१६८) डप्र० । 'डित्यन्त्य स्वरादेः' (२।१।११४) अन्लोपः । पुंसा करणेनानुजः = पुंसानुजः ।

**[जनुषान्धः]** जनुषा-जन्मनाऽन्धः = जनुषान्धः ।

**[पुमनुजा]** पुमांसमनुजाता । 卐卐 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्र० सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ॥छ॥

**आत्मनः पूरणे ॥३।२।१४॥**

**[आत्मनाद्वितीयः]** द्वयोः पूरणः = द्वितीयः । 'द्वेस्तीयः' (७।१।१६५) तीयप्र० ।

**[आत्मनाचतुर्थः]** चतुर् । चतुर्णां पूरणः । 'चतुरः' (७।१।१६३) थट्प्र० → थ ।

**[आत्मनापञ्चमः]** पञ्चन् । पञ्चानां पूरणः । 'नो मट्' (७।१।१५९) मट्प्र० → म । 'ऊनार्थपूर्वाद्यैः' (३।१।६७) इत्यनेन तत्पुरुषः समासः ।

**[आत्मनाषष्ठः]** षष् । षण्णां पूरणः । 'षट्-कति-कतिपयात् थट्' (७।१।१६२) थट्प्र० → थ । 'तवर्गस्य श्चवर्ग०' (१।३।६०) थ० → ठ० । 'ऊनार्थपूर्वाद्यैः' (३।१।६७) इत्यनेन तत्पुरुषः समासः ।

---

P. 卐 ओजाश्च अञ्जाश्च सहाश्च अम्भाश्च तमाश्च तपाश्च = तत्, तस्मात् ।

P. 卐卐 'अनोर्जनेर्डः' (५।१।१६८) डप्र० । 'आत्' (२।४।१८) आप्प्र० → आ० । 'श्रितादिभिः' (३।१।६२) तत्पुरुषः समासः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[आत्मनैकादशः] एकेनाऽधिका दश । ततो मध्यस्थः समासः ।।छ।।

मनसश्चाऽऽज्ञायिनि ।।३।२।१५।।

[आज्ञायिनि] आ 'ज्ञांश् अववोधने' (१५४०) ज्ञा । जानातीत्येवंशीलः । 'अजातेः शीले' (५।१।१५४) णिन्प्र० → इन् । 'आत ऐः कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । सप्तमी ङि ।

[मनसाज्ञायी] मनसा आज्ञातुं शीलमस्य ।

[आत्मनाज्ञायी] आत्मना आज्ञातुं शीलमस्य सः । 'अजातेः शीले' (५।१।१५४) णिन्प्र० → इन् । 'आत ऐः कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । प्र० सि । 'नि दीर्घः' (१।४।८५) दीर्घः (?) ('इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः) ।।छ।।

नाम्नि ।।३।२।१६।।

[मनसादेवी] 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव् । मनसा दीव्यादित्याशास्यमाना । 'तिक्कृतौ नाम्नि' (५।१।७१) अच्प्र० (?) ('लिहादिभ्यः' (५।१।५०) अच्प्र०) । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी ।

[मनसागुप्ता]卐 'गुपच् व्याकुलत्वे' (११९२) गुप् (?) ('गुपौ रक्षणे' (३३२) गुप्) । मनसा गुप्ता(प्या)-दित्याशास्यमाना । 'तिक्कृतौ नाम्नि' (५।१।७१) अच्प्र०(?) (क्तप्र० → त) ।

[मनसादत्ता] 'डुदांग्क् दाने' (११३८) दा । मनसा दासीष्ट इत्याशास्यमाना । 'तिक्कृतौ नाम्नि' (५।१।७१) क्तप्र० → त । 'दत्' (४।४।१०) दा० → ददादेशः । 'आत्' (२।४।१८) आप्प्र० → आ ।

[मनसासंगता] अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम्, संपूर्व० । मनसा संगंषीष्ट इत्याशास्यमाना । 'तिक्कृतौ नाम्नि' (५।१।७१) क्तप्र० → त । 'यमि-रमि-नमि०' (४।२।५५) मलोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।

[मनोदत्ता कन्या]卐卐 मनसा दत्ता ।।छ।।

परा-ऽऽत्मभ्यां ङेः ।।३।२।१७।।

[पराऽऽत्मभ्याम्] परश्च आत्मा च = पराऽऽत्मानौ, ताभ्याम् ।

[परस्मैपदम्] परार्थं पदं = परस्मैपदम् । पर चतुर्थी ङे । 'सर्वादेः स्मै-स्मातौ' (१।४।७) स्मै । 'तादर्थ्ये' (२।२।५४) चतुर्थी ।

[परस्मैभाषा] 'भाषि व्यक्तायां वाचि' (८३२) भाष् । परस्मै भाषणम् । 'अच्' (५।१।४९) अच्प्र० → अ ।

[आत्मनेपदम्] आत्मार्थं पदमात्मनेपदम् । 'तादर्थ्ये' (२।२।५४) चतुर्थी ।

[आत्मनेभाषा] आत्मने भाषणम् । 'अच्' (५।१।४९) अच्प्र० → अ । 'हितादिभिः' (३।१।७१) इत्यनेन तत्पुरुषः समासः ।

[परहितम्] परस्मै हितं = परहितम् । 'हितादिभिः' (३।१।७१) तत्पुरुषः समासः । 'ऐकार्थ्ये' (३।२।८) विभक्तिलोपः ।

---

卐 'गुपच् व्याकुलत्वे' क्ते गुपितः । 'गुपौ रक्षणे' क्ते 'वेटोऽपतः' (४।४।६२) वेटि गुप्तः ।

P. 卐卐 मनसा दीयते स्म । 'तिक्कृतौ नाम्नि' (५।१।७१) क्तप्र० → त । 'दत्' (४।४।१०) दत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[आत्महितम्]** आत्मने हितम् । 'हितादिभिः' (३।१।७१) तत्पुरुषः समासः । 'ऐकार्थ्ये' (३।२।८) विभक्तिलोपः ॥छ॥

**अद्-व्यञ्जनात् सप्तम्या बहुलम् ॥३।२।१८॥**

**[अद्व्यञ्जनात्]** अच्च व्यञ्जनं च = अद्व्यञ्जनम्, तस्मात् ।

**[अरण्येतिलकाः]** तिल । तिलः प्रकार एषाम् । 'कोऽण्वादेः' (७।२।७६) कप्र० ।

**[अरण्येमाषकाः]** माष । माषः प्रकार एषाम् । 'कोऽण्वादेः' (७।२।७६) कप्र० ।

**[वनेकशेरुकाः]** कसे(शे)रु । कसे(शे)रूणां तुल्यः । 'तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः' (७।१।१०८) कप्र० ।

**[वनेबल्वजाः]** व(ब)ल्वजानां तुल्यः । 'तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः' (७।१।१०८) कप्र० ।

**[कूपेपिशाचिकाः]** पिशाच(ची) । पिशाच(ची) एव । स्वार्थे 'यावादिभ्यः कः' (७।३।१५) कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'ङ्यादीदूतः के' (२।४।१०४) ह्रस्वः ।

**[पूर्वाह्णेस्फोटकाः]** पूर्व । अहन् । पूर्वमह्नः । 'सर्वां-ऽश-संख्या-ऽव्ययात्' (७।३।११८) अट्समासान्तोऽह्नाऽऽदेशश्च । 'अतोऽह्नस्य' (२।३।७३) णत्वम् । सप्तमी ङि ।

**[मध्याह्नेस्फोटकाः]** मध्यमह्नः । 'सर्वां-ऽश-संख्या-ऽव्ययात्' (७।३।११८) अट्समासान्तोऽह्नाऽऽदेशश्च । ततो मध्यस्थो वाक्यः(यम्) ।

**[युधिष्ठिरः]** युधिष्ठिर इत्यत्र 'गवि-युधेः स्थिरस्य' (२।३।२५) षत्वम् ।

क्वचिद् (विकल्पे) लुप् स्यात्-

**[त्वचिसारः, त्वक्सारः]** 'सृं गतौ' (२५ ) सृ । सरतीति । 'सर्त्तेः स्थिर-व्याधि-बल-मत्स्ये' (५।३।१७) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[जलकुक्कुटः]** जले कुर्कु(क्कु)टः ।

**[ग्रामसूकरः]** ग्रामे सूकरः ।

**[भूमिपाशः]**卐 भूमौ पाशः ।

**[नदीकुक्कुटिका]** नद्यां कुक्कुटिका ।

**[तीर्थकाकः]** तीर्थे काक इव । 'काकाद्यैः क्षेपे' (३।१।९०) इति तत्पुरुषः समासः ।

**[नगरवायसः]** नगरे वायस इव ।

**[अक्षशौण्डः]** अक्षेषु प्रशक्तः शौण्डः ।

**[गौरखरः]** गौरश्च खरश्च ॥छ॥

**प्राक्कारस्य व्यञ्जने ॥३।२।१९॥**

**[प्राक्कारस्य]** प्राचां कारः = 卐卐 प्राक्कारस्तस्य ।

---

P. 卐 भूमौ पाश इव ।

P. 卐卐 कुर्वन्त्यनेनेति करः । 'पुन्नाम्नि घः' (५।३।१३०) घप्र० → अ । 'प्रज्ञादिभ्योऽण्' (७।२।१६५) अण् स्वार्थिकः । प्राचां-पूर्वदिक् राज्ञां कारः = प्राक्कारस्तस्य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[मुकुटेकार्षापणः]** मुकुटे (२) कार्षापणो दातव्यः ।

**[स्तूपेशाणः]** स्तूपे (२) शाणौ(णो) दातव्यः । 'नाम्नि' (३।१।९४) इति तत्पुरुषः समासः ।

**[हलेद्विपदिका]** हले(२) द्वौ पादौ ददाति । 'संख्याऽऽदेः पादादिभ्यो दान-दण्डे चाऽकल् लुक् च' (७।२।१५२) अकल्प्र० → अक-प्रकृतेरन्तस्य लुक् च । 'य-स्वरे पादः पदणि-क्य-घुटि' (२।१।१०२) पाद्० → पद्० । 'आत्' (२।४।१८) आप्प्र० → आ० । 'अस्याऽयत्-तत्-क्षिपकादीनाम्' (२।४।१११) इ ।

**[हलेत्रिपदिका]** हले(२) त्रीन् पादान् ददाति । 'संख्याऽऽदेः पादा०' (७।२।१५२) अकल्प्र० → अक-प्रकृतेरन्तस्य लुक् च । 'य-स्वरे पादः पदणि-क्य-घुटि' (२।१।१०२) पाद्० → पद्० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्०' (२।४।१११) इ ।

**[दृषदिमाषकः]** दृषदि माषकः ।

**[समिधिमाषकः]** समिधि माषकः ।

**[यूथवृषः]** यूथे (२) देयो वृषः ।

**[अविकटोरणः]** अवि । अवीनां संघातोऽविकटं(टः) । 'अवेः संघात-विस्तारे कट-पटम्' (७।१।१३२) कटप्र० । अविकटे (२) ऊरणो दातव्यः । 'ऐकार्थ्ये' (३।२।८) वाक्यमध्ये विभक्तिलोपः ।

**[नध्री(दृध्री)दोहः]** 'णहींच् बन्धने' (१२८५) णह् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नह् । नह्यतीति । 'नी-दाव्-शसू-यु-युज-स्तु-तुद-सि-सिच-मिह-पत-पा-नहस्त्रट्' (५।२।८८) त्रट्प्र० → त्र । 'नहाहोर्ध-तौ' (२।१।८५) ह० → ध० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त्र० → ध्र० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ध० → द० । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलोपः । नध्र्यां(नद्ध्र्यां) नध्र्यां(नद्ध्र्यां) दोहो दातव्यः = नध्री(द्ध्री)दोहः ।।छ।।

### तत्पुरुषे कृति ।।३।२।२०।।

**[तत्पुरुषे]** स(ः) चासौ पुरुषश्च = तत्पुरुषस्तस्मिन् ।

**[स्तम्बेरमः]** स्तम्ब सप्तमी ङि । 'रमिं क्रीडायाम्' (९८९) रम् । स्तम्बे रमते । 'शोकापनुद-तुन्दपरिमृज-स्तम्बेरम-कर्णेजपं प्रिया-ऽलस-हस्ति-सूचके' (५।१।१४३) कप्र० निपात्यते । 'ङस्युक्तं कृता' (३।१।४९) तत्पुरुषः समासः ।

**[कर्णेजपः]** कर्ण सप्तमी ङि । 'जप मानसे च' (३३८) जप् । कर्णे जपते(ति) । 'शोकापनुद-तुन्दपरिमृज-स्तम्बेरम-कर्णेजपं प्रियाऽलस-हस्ति-सूचके' (५।१।१४३) कप्र० निपात्यते ।

**[प्रवाहेमूत्रितम्]** प्र 'वहीं प्रापणे' (९९६) वह् । प्रवहन्त्यस्मिन्निति । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । सप्तमी ङि । 'मूत्रण् सूत्रणे(प्रस्रवणे)' (१९००) मूत्र् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । मूत्र्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् → इ । 'णेरनिटि' (४।३।८३) णिच्लोपः । प्रवाहे सू(मू)त्रितम् । 'क्तेन' (३।१।९२) इति तत्पुरुषः समासः ।

**[उदकेविशीर्णम्]** वि कॄ(१५२९)-मॄ (१५३०) - 'शॄश् हिंसायाम्' (१५३१) शॄ । विशीर्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'रदादमूर्च्छ-मदः क्तयोर्दस्य च' (४।२।६९) त० → न० । 'रषृवर्णान्नो ण०' (२।३।६३) न० → ण० । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । 'र्हादर्ह-स्वरस्याऽनु नवा' (१।३।३१)

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

द्वित्वम् । उदके विशीर्ण्णम् । 'क्तेन' (३।१।९२) इति तत्पुरुषः समासः ।

**[अवतप्तेनकुलस्थितम्]** अव 'तपं सन्तापे' (३३३) तप् । अवतप्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त, तस्मिन् । अवतप्ते नकुलस्थितम् । 'क्तेन' (३।१।९२) इति तत्पुरुषः समासः ।

**[भस्मनिमीढम्]** भस्मनि मीढम् । 'क्तेन' (३।१।९२) इत्यनेन तत्पुरुषः समासः ।

**[गोषुचरः]** 'चर भक्षणे च' (४१०) चर् । गोषु चरतीति । 'ङस्युक्तं कृता' (३।१।४९) तत्पुरुषः समासः । 'चरेष्टः' (५।१।१३८) टप्र० → अ ।

**[मद्रचरः]** मद्रेषु चरतीति । 'चरेष्टः' (५।१।१३८) टप्र० → अ ।

**[ग्रामकारकः]** ग्रामे करोतीति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[खेचरः, खचरः]** खे-आकाशे चरतीति । 'चरेष्टः' (५।१।१३८) टप्र० → अ ।

**[वनेचरः, वनचरः]** वने चरतीति । 'चरेष्टः' (५।१।१३८) टप्र० → अ ।

**[पङ्केरुहम्, पङ्करुहम्]** 'रुहं जन्मनि' (९८८) रुह् । पङ्के रोहतीति । 'मूलविभुजादयः' (५।१।१४४) कप्र० → अ ।

**[सरसिरुहम्, सरोरुहम्]** सरसि रोहतीति । 'मूलविभुजादयः' (५।१।१४४) कप्र० → अ । सि-अम् ।

**[हृदिस्पृक्]** 'स्पृशंत् संस्पर्शे' (१४१२) स्पृश् । हृदयं स्पृशतीति । 'स्पृशोऽनुदकात्' (५।१।१४९) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'ऋत्विज्'० (२।१।६९) श्० → ग्० । 'दन्त-पाद-नासिका०' (२।१।१०१) इति हृदादेशः । द्वितीयार्थेऽत्र सप्तमी । 'विरामे वा' (१।३।५१) ग्० → क्० ।

**[दिविस्पृक्]** दिवि स्पृशतीति । 'स्पृशोऽनुदकात्' (५।१।१४७) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'ऋत्विज्०' (२।१।६९) श्० → ग्० । 'विरामे वा' (१।३।५१) ग्० → क्० ।

**[धन्वकारकः]** धन्वनि-मरुदेशे कारको यस्य सः = धन्वकारकः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[कल्याणाभिनिवेशः]** कल्याणेऽभिनिवेशो यस्य सः । 'उष्ट्रमुखादयः' (३।१।२३) बहुव्रीहिः समासः ।

**[धर्मरुचिः]** धर्मे रोचनं(रुचिर्यस्य सः) । 'इ-कि-श्तिव् स्वरूपाऽर्थे' (५।३।१३८) इप्र० ।

**[अक्षशौण्डः]** अक्षेषु प्रशक्तः शौण्डः ।

**[अक्षकितवः]** अक्षेषु प्रशक्तः कितवः ।

**[कुरुचरः]** कुरुषु चरतीति । 'चरेष्टः' (५।१।१३८) टप्र० → अ ।

**[रात्रिचरः]** रात्रिं(त्रौ) चरतीति । 'चरेष्टः' (५।१।१३८) टप्र० → अ ।

**[नदीचरः]** नद्यां चरतीति । 'चरेष्टः' (५।१।१३८) टप्र० → अ ॥छ॥

### मध्या-ऽन्ताद् गुरौ ॥३।२।२१॥

**[मध्याऽन्तात्]**卐 मध्यं च अन्तश्च = मध्यान्तम्, तस्मात् ।

---

P. 卐 मध्यश्च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[मध्येगुरुः]** मध्ये गुरुरस्य सः ।

**[अन्तेगुरुः]** अन्ते गुरुरस्य सः । 卐अत्र समासविशेषस्याऽनुपादानाद् यथा तत्पुरुषे लुप् न भवति तथा बहुव्रीहावपि ।।छ।।

**अमूर्द्ध-मस्तकात् स्वाङ्गादकामे ।।३।२।२२।।**

**[अमूर्द्धमस्तकात्]** मूर्द्धा च मस्तकं च = मूर्द्धमस्तकम्, न मूर्द्धमस्तकं = अमूर्द्धमस्तकम् । 'नञत्' (३।२।१२५) न० → अ०, तस्मात् ।

**[स्वाङ्गादकामे]** स्वकीयमङ्गं यस्य तत्, तस्मात् । न कामोऽकामस्तस्मिन् ।

**[उदरेमणिः]** उदरे मणिरस्य सः ।

**[वहेगडुः]** वहे गडुरस्य सः ।

**[पुतेवलिः]** पुते वलिरस्य सः ।

**[उरसिलोमा]** उरसि लोमान्यस्य सः ।

**[शिरसिशिखः]** उरसि(शिरसि) शिखा यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । एतेषूदाहरणेषु उष्ट्रमुखादित्वात् समासः ।

**[मूर्द्धशिखः]** मूर्द्धनि शिखा यस्य सः ।

**[मस्तकशिखः]** मस्तके शिखा यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[मुखपुरुषा शाला]** मुखे पुरुषो यस्यां सा ।

**[मुखकामः]** मुखे कामोऽस्य सः ।

**[अङ्गुलिव्रणः]** अङ्गुलौ व्रणं यस्य सः ।

**[जङ्घावलिः]** जङ्घायां वलिरस्य सः ।

**[करकमलम्]** करे कमलं यस्य तत् ।

**[गलरोगः]** 'रुजोंत् भङ्गे' (१३५०) रुज् । रुजत्यरुजत्-रुरोज वा रोगः । 'पद-रुज-विश-स्पृशो घञ्' (५।३।१६) घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) ज० → ग० । गले रा(रो)गो यस्य सः ।

**[गलव्रणः]** गले व्रणं यस्य सः । बहुलाधिकाराद्विभक्तिलोपः ।।छ।।

**बन्धे घञि नवा ।।३।२।२३।।**

**[चक्रेबन्धः, चक्रबन्धः]** चक्रे वन्धश्चक्रेवन्धोऽस्येति वा = चक्रबन्धः ।

**[पुटपाकः]** 'डुपचींष् पाके' (८९२) पच् । पचनं = पाकः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति'

P. 卐 अत्र विशेषशब्दसमासस्याऽनुपादानात् यदा बहुव्रीहिस्तदा 'उष्ट्रमुखादयः' (३।१।२३) इत्यनेन वे(वै)यधिकरणे सर्वत्र समासः । अग्रेऽप्येवम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(४।३।५०) उपान्त्यवृद्धिः आ । 'क्तेऽनिटश्चजोः क-गौ घिति' (४।१।१११) च० → क० । पुटे पाकोऽस्य सः ।

**[मनोरोगः]** 'रञ्जीं रागे' (८९६) रञ्ज् । रञ्जनं = रागः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'घञि भाव-करणे' (४।२।५२) नलोपः । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'क्तेऽनिटश्च-जोः०' (४।१।१११) ज० → ग० । मनसि रा(रो)गो यस्य सः ।

**[चक्रबन्धः]** बध्नातीति बन्धः । 'अच्' (५।१।४९) अच्प्र० → अ । चक्रे बन्धः ।

**[हस्तबन्धः]** हस्ते बन्धः ।

**[चारकबन्धः]** चार एव = चारकः । 'यावादिभ्यः कः' (७।३।१५) कप्र० । चारके बन्धः ।

**[गुप्तिबन्धः]** गुप्तौ बन्धः ।

**[कारावन्धः]** कारायां बन्धः । 'ऐकार्थ्ये' (३।२।८) विभक्तिलोपः ।।छ।।

**कालात् तन-तर-तम-काले** ।।३।२।२४।।

**[तनतरतमकाले]** तनश्च तरश्च तमश्च कालश्च = तनतरतमकालम्, तस्मिन् ।

**[पूर्वाह्णेतनः, पूर्वाह्णतनः]** पूर्व । अहन् । पूर्वमह्नः = पूर्वाह्णः । 'सर्वांऽश-संख्या-ऽव्ययात्' (७।३।११८) अट्समासान्तोऽह्नाऽऽदेशश्च । 'अतोऽह्नस्य' (२।३।७३) णत्वम् । सप्तमी ङि । पूर्वाह्णे भवः । 'पूर्वाह्णा-ऽपराह्णात् तनट्' (६।३।८७) तनट्प्र० → तन ।

**[अपराह्णेतनः, अपराह्णतनः]** अपर । अहन् । अपरमह्नोऽपराह्णः । 'सर्वा-ऽश-संख्या-ऽव्ययात्' (७।३।११८) अट्समासान्तोऽह्नाऽऽदेशश्च । 'अतोऽह्नस्य' (२।३।७३) णत्वम् । सप्तमी ङि । अपराह्णे भवः । 'पूर्वाह्णा-ऽपराह्णात् तनट्' (६।३।८७) तनट्प्र० → तन ।

**[पूर्वाह्णेतराम्, पूर्वाह्णतरे]** द्वयोर्मध्ये प्रकृष्टे पूर्वाह्णे = पूर्वाह्णेतराम् । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । यत्र विभक्तिलोपस्तत्र 'किं-त्याद्येऽव्ययादसत्त्वे तयोरन्तस्याऽऽम्' (७।३।८) आम् न भवति ।

**[पूर्वाह्णेतमाम्, पूर्वाह्णतमे]** प्रकृष्टं(टे) पूर्वाह्णे । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । 'किं-त्याद्येऽव्ययात्०' (७।३।८) आमन्ते । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[पूर्वाह्णेकाले, पूर्वाह्णकाले]** पूर्वाह्णे च तस्मिन् काले च ।

**[अपराह्णेकाले, अपराह्णकाले]** अपराह्णे च तस्मिन् काले च ।

**[शुक्लतरे]**卐 द्वयोर्मध्ये शुक्लः = शुक्लतरः । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर ।

**[शुक्लतमे]** प्रकृष्टः शुक्लः = शुक्लतमः । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम ।

**[रात्रितरायाम्]**+ द्वयोर्मध्ये प्रकृष्टा रात्रिः । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर ।

**[निशातमायाम्]** प्रकृष्टा निशा । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम ।

---

P. 卐 द्वयोर्मध्ये प्रकृष्टे शुक्ले = शुक्लतरे ।

P. + द्वयोर्मध्ये प्रकृष्टायां रात्र्यां = रात्रितरायाम् । 'आत्' (२।४।१८) आप्प्र० → आ । सप्तमी ङि । याम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[रात्रिकाले] रात्रौ च तस्मिन् काले च ।।छ।।

**शय-वासि-वासेष्वकालात्** ।।३।२।२५।।

[**शयवासिवासेषु**] शयश्च वासी च वासश्च = शयवासिवासाः, तेषु ।

[**अकालात्**] न कालोऽकालस्तस्मात् ।

[**बिलेशयः, बिलशयः**] 'शीङ्क् स्वप्ने' (११०५) शी । बिले शेते । 'आधारात्' (५।१।१३७) अप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

[**खेशयः, खशयः**] खे-आकाशे शेते । 'आधारात्' (५।१।१३७) अप्र० । शेषं पूर्ववत् ।

[**वनेवासी, वनवासी**] वने वसतीत्येवंशीलः ।

[**अन्तेवासी, अन्तवासी**] अन्ते वसतीत्येवंशीलः । 'अजातेः शीले' (५।१।१५४) णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । प्र० सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

[**ग्रामेवासः, ग्रामवासः**] 'वसं निवासे' (९९९) वस् । वसनं = वासः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । ग्रामे वासः ।

[**मनसिशयः**] मनसि शेते ।

[**कुशेशयम्**] कुशे शेते । 'आधारात्' (५।१।१३७) अप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए० । 'एदैतोऽयाय्' (१।२।२३) अय् ।

[**हृच्छयः**] हृदि शेते ।

[**चित्तशयः**] चित्ते शेते ।

[**पूर्वाह्णशयः**] पूर्वाह्णे शेते ।

[**अपराह्णशयः**] अपराह्णे शेते ।

[**भूमिशयः**] भूमौ शेते ।

[**गुहाशयः**] गुहायां शेते । सर्वत्र 'आधारात्' (५।१।१३७) अप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । प्रथमा सि । 'ऐकार्थ्ये' (३।२।८) विभक्तिलोपः ।।छ।।

**वर्ष-क्षर-वरा-ऽप्सरः-शरोरो-मनसो जे** ।।३।२।२६।।

[**वर्षक्षरवराऽप्सरःशरोरोमनसः**]卐 वर्षं च क्षरं च वरश्च अप्सर(रा)श्च (आपश्च सरश्च) शरश्च उरश्च मनश्च = वर्ष-क्षरवराऽप्सरःशरोरोमनः, तस्मात् ।

[**वर्षेजः, वर्षजः**] वर्ष 'जनैचि प्रादुर्भावे' (१२६५) जन् । वर्षे जातः ।

[**क्षरेजः, क्षरजः**] क्षरे जातः ।

P. 卐 वर्षश्च क्षरश्च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[वरेजः, वरजः] वरे जातः ।

[अप्सुजम्, अब्जम्] अप्सु जातः(तम्) । 'धुटस्तृतीयः' (२।१।७६) प० → ब० ।

[सरसिजम्, सरोजम्] सरसि जातम् ।

[शरेजः, शरजः] शरे जातः ।

[उरसिजः, उरोजः] उरसि जातः ।

[मनसिजः, मनोजः] मनसि जातः । सर्वत्र 'सप्तम्याः' (५।१।१६९) डप्र० → अ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लोपः ।।छ।।

**द्यु-प्रावृड्-वर्षा-शरत्-कालात्** ।।३।२।२७।।

[द्युप्रावृड्वर्षाशरत्कालात्] द्यौश्च प्रावृट् च वर्षा च शरच्च कालश्च = द्युप्रावृड्वर्षाशरत्कालम्, तस्मात् ।

[दिविजः] 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव् । दीव्यतीति । 'दिवेर्डिव्' (उणा० ९४९) डिद् इव्प्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) इव्लोपः । दिवि जातः ।

[प्रावृषिजः] प्रावृषि जातः ।

[वर्षासुजः] वर्षासु जातः ।

[शरदिजः] शरदि जातः ।

[कालेजः] काले जातः । सर्वत्र 'सप्तम्याः' (५।१।१६९) डप्र० → अ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लोपः ।।छ।।

**अपो य-योनि-मति-चरे** ।।३।२।२८।।

[ययोनिमतिचरे] यश्च योनिश्च मतिश्च चरश्च = ययोनिमतिचरम्, तस्मिन् ।

[अप्सव्यः] अप्सु भवः । 'दिगादिदेहांशाद् यः' (६।३।१२४) यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

[अप्सुयोनिः] अप्सु योनिरस्य ।

[अप्सुमतिः] अप्सु मतिरस्य ।

[अप्सुचरः] 'चर भक्षणे च' (४१०) चर् । अप्सु चरतीति । 'चरेष्टः' (५।१।१३८) टप्र० → अ ।।छ।।

**नेन्-सिद्ध-स्थे** ।।३।२।२९।।

[इन्सिद्धस्थे] इन् च सिद्धश्च स्थाश्च = इन्सिद्धस्थम् । 'क्लीवे' (२।४।९७) ह्रस्वः, तस्मिन् । नञाधिकारे पुनः नञ्ग्रहणं प्रकृत्यर्थं गमयति । 'द्वौ नञौ प्रकृतमर्थं गमयतः' (न्या० स० वक्ष०(२) सूत्र(६०) ) ।

[स्थण्डिलवर्ती] 'वृतूङ् वर्तने' (९५५) वृत् ।卐 स्थण्डिले वर्तितुं शीलमस्य सः । 'अजातेः शीले' (५।१।१५४) णिन्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

P. 卐 स्थण्डिले वर्त्तते इत्येवंशीलः । 'व्रता-ऽऽभीक्ष्ण्ये' (५।१।१५७) णिन्प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[स्थण्डिलशायी]** स्थण्डिले शयितुं शीलमस्य सः । 'अजातेः शीले' (५।१।१५४) णिन्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । प्र० सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[सांकाश्यसिद्धः]** संकाश । संकाशेन निर्वृत्तम् । 'सुपन्थ्यादेर्ज्यः' (६।२।८४) ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णवर्णस्य' (७।४।६८) अलोपः । सांकाश्ये सिद्धः ।

**[काम्पील्यसिद्धः]** काम्पील्ये सिद्धः ।

**[समस्थः]** 'ष्ठां गतिनिवृत्तौ' (५ ) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे०' (न्या०स० वक्ष०(१) सूत्र(२९) ) स्था । समे तिष्ठतीति । 'स्था-पा-स्ना-त्रः कः' (५।१।१४२) कप्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलोपः ।

**[विषमस्थः]** विषमे तिष्ठतीति । 'स्था-पा-स्ना-त्रः कः' (५।१।१४२) कप्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलोपः ।।छ।।

**षष्ठ्याः क्षेपे ।।३।२।३०।।**

**[ब्राह्मणकुलम्]** ब्राह्मणस्य कुलम् ।

**[चौरकुलम्]** चुरण् स्तेये' (१५६८) चुर् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । चोरणं = चुरा । 'भिदादयः' (५।३।१०८) अङ्प्र० । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'अङ्स्थाच्छत्राऽऽदेरञ्' (६।४।६०) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ । 'अवर्णवर्णस्य' (७।४।६८) आलोपः । चौरस्य कुलम् ।

**[दासभार्या]** दासस्य भार्या ।

**[वृषलीपतिः]** वृषल्याः पतिः ।।छ।।

**पुत्रे वा ।।३।२।३१।।**

**[ब्राह्मणपुत्रः]** ब्राह्मणस्य पुत्रः ।

**[दासीपुत्रः]** दास्याः पुत्रः ।।छ।।

**पश्यद्-वाग्-दिशो हर-युक्ति-दण्डे ।।३।२।३२।।**

**[पश्यद्वाग्दिशः]** पश्यंश्च वाग् च दिग् च = पश्यद्वाग्दिक्, तस्मात् ।

**[हरयुक्तिदण्डे]** हरश्च युक्तिश्च दण्डश्च = हरयुक्तिदण्डम्, तस्मिन् ।

**[पश्यतोहरः]** 'दृशृं प्रेक्षणे' (४९५) दृश् । पश्यतीति । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु०' (४।२।१०८) पश्य आदेशः । अनादरे षष्ठी ङस् ।卐 पश्यतो हरः । 'याजकादिभिः' (३।१।७८) तत्पुरुषः समासः ।

**[वाचोयुक्तिः]** 'युजूंपी योगे' (१४७६) युज् । योजनम् । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । 'क्तेऽनिटश्च-जोः०' (४।१।१११) ज० → ग० (?) ('च-जः क-गम्' (२।१।८६) ज० → ग०) । 'अघोषे प्रथमोऽशिटः' (१।३।५०)

P. 卐 पश्यतो हरतीति । 'अच्' (५।१।४९) अच्प्र० → अ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग० → क० ।

**[दिशोदण्डः]** वाचो युक्तिः । दिशो दण्डः । सम्बन्धषष्ठ्यौ ।।छ।।

**अदसोऽकञायनणोः** ।।३।२।३३।।

**[अकञायनणोः]** अकञ् च आयनण् च = अकञायनणौ, तयोः = अकञायनणोः । सप्तमी ओस् ।

**[आमुष्यपुत्रिका]** अदस् षष्ठ्यैकवचनं ङस् । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । 'टा-ङसोरिन-स्यौ' (१।४।५) स्य । 'मादुवर्णोऽनु' (२।१।४७) उ । अग्रे पुत्र । अमुष्य पुत्रस्य भावः ।+ 'चौरादिभ्योऽकञ्' (७।१।७३) अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्-क्षिपकादीनाम्' (२।४।१११) इ ।

**[आमुष्यकुलिका]** अमुष्य कुलस्य भावः ।++ 'चौरादिभ्योऽकञ्' (७।१।७३) अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ ।

**[आमुष्यायणः]** अमुष्यापत्यम् । *'नडादेरायनण्' (६।१।५३) आयनण्प्र० → आयन । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।।छ।।

**देवानांप्रियः** ।।३।२।३४।।

**[देवानांप्रियः]** देवानां प्रियः ।

कथं देवप्रिय[ः]? एकत्व-द्वित्वयोर्बहुव्रीहौ वा भविष्यति ।।छ।।

**शेप-पुच्छ-लाङ्गूलेषु नाम्नि शुनः** ।।३।२।३५।।

**[शेपपुच्छलाङ्गूलेषु]**卐 शेपश्च पुच्छं च लाङ्गूलं च=शेपपुच्छलाङ्गूलानि, तेपु ।

**[शुनःशेपः]** शुनः शेपमिव शेपमस्य सः ।

**[शुनःपुच्छः]** शुनः पुच्छमिव पुच्छमस्य सः ।

**[शुनोलाङ्गूलः]** शुनो लाङ्गूलमिव लाङ्गूलमस्य सः ।

**[श्वशेपम्]** शुनः शेपः ।

**[श्वपुच्छम्]** शुनः पुच्छम् ।

**[श्वलाङ्गूलम्]** शुनो लाङ्गूलम् ।।छ।।

**वाचस्पति-वास्तोष्पति-दिवस्पति-दिवोदासम्** ।।३।२।३६।।

**[वाचस्पतिवास्तोष्पतिदिवस्पतिदिवोदासम्]** वाचस्पतिश्च वास्तोष्पतिश्च दिवस्पतिश्च दिवोदासश्च = वाचस्पति-

---

+ लघुवृत्तौ- 'चोरादेः' ।

++ लघुवृत्तौ - 'चोरादेः' ।

* लघुवृत्तौ - 'नडादिभ्य आयनण्' ।

P. 卐 शेपश्च पुच्छश्च लाङ्गूलश्च = ते, तेपु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वास्तोष्पतिदिवस्पतिदिवोदासम् । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[वाचस्पतिः]** वाचः पतिः ।

**[वास्तोष्पतिः]** वास्तोः पतिः ।

**[दिवस्पतिः]** दिवः पतिः ।

**[दिवोदासः]** दिवो दासः । अनेन निपातः ।

**[वाक्पतिः]** वाचः पतिः ।

**[वास्तुपतिः]** वास्तोः पतिः ।

**[द्युपतिः]** दिवः पतिः ।

**[द्युदासः]** दिवो दासः । 'ऐकार्थ्ये' (३।२।८) विभक्तिलोपः ।।छ।।

**ऋतां विद्या-योनिसंबन्धे** ।।३।२।३७।।

**[विद्यायोनिसंबन्धे]** विद्या च योनिश्च = विद्यायोनी, विद्यायोनिभ्यां सम्बन्धः = विद्यायोनिसम्वन्धस्तस्मिन् ।

**[होतुः पुत्रः]** होतुः पुत्रः ।

**[होतुरन्तेवासी]** 'वसं निवासे' (९९९) वस् । अन्ते वसितुं शीलमस्य । 'अजातेः शीले' (५।१।१५४) णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । होतुरन्तेवासी । प्र० सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[पितुरन्तेवासी]** 'वसं निवासे' (९९९) वस् । अन्ते वसितुं शीलमस्य । 'अजातेः शीले' (५।१।१५४) णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । पितुरन्तेवासी । प्र० सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[आचार्यपुत्रः]** आचार्यस्य पुत्रः ।

**[मातुलान्तेवासी]** मातृ । मातुर्भ्राता । 'पितृ-मातुर्व्य-डुलं भ्रातरि' (६।२।६२) डुलप्र० → उल । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः । मातुलस्याऽन्तेवासी ।

**[भर्तृगृहम्]** भर्तुर्गृहम् ।

**[भर्तृशिष्यः]** भर्तुः - स्वामिनः शिष्यः ।

**[होतृधनम्]** होतुर्धनम् ।

**[पितृगृहम्]** पितुर्गृहम् ।।छ।।

**स्वसृ-पत्योर्वा** ।।३।२।३८।।

**[स्वसृपत्योः]** स्वसा च पतिश्च = स्वसृपती । तयोः = स्वसृपत्योः । सप्तमी ओस् ।

**[होतुःस्वसा, होतृस्वसा]** होतुः स्वसा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[पितुःष्वसा, पितुःस्वसा, पितृष्वसा] पितुः स्वसा । 'षष्ठ्ययत्नाच्छेषे' (३।१।७६) तत्पुरुषः समासः । 'अलुपि वा' (२।३।१९) विकल्पेन षत्वम् ।

[मातुःस्वसा, मातुःष्वसा, मातृष्वसा] मातुः स्वसा । तेनैव षत्वम् ।

[दुहितुःपतिः, दुहितृपतिः] दुहितुः पतिः ।

[स्वसुःपतिः, स्वसृपतिः] स्वसुः पतिः ।

[ननान्दुःपतिः, ननान्दृपतिः] ननान्दुः पतिः ।

[भर्तृस्वसा] भर्तुः स्वसा ।

[होतृपतिः] होतुः पतिः ।।छ।।

आ 卐 द्वन्द्वे ।।३।२।३९।।

[नेष्टोद्गातारौ] नेष्टा च उद्गाता च ।

[प्रशास्ताप्रतिहर्तारौ] प्रशास्ता च प्रतिहर्ता च ।

[मातादुहितरौ] माता च दुहिता च ।

[ननान्दायातरौ] ननान्दा च याता च । औ । अनेन सर्वत्र आकारः ।

[गुरुशिष्यौ] गुरुश्च शिष्यश्च । औ ।

[पितृपितामहौ] पितृ । पितुः पिता = पितामहः । 'पित्रोर्डामहट्' (६।२।६३) डामहट्प्र० → आमह । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरलोपः । पिता च पितामहश्च । प्रथमा औ ।

[कर्तृकारयितारौ] 'डुकृंग् करणे' (८८८) कृ । कुर्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । कारयत इति । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । 'स्ताद्यशितो-ऽत्रोणादेरिट्' (४।४।३२) इट् → इ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । कर्ता च कारयिता च । प्र० औ । 'तृ-स्वसृ-नप्तृ-नेष्टृ०' (१।४।३८) आर् ।

[चैत्रस्य स्वसृदुहितरौ] स्वसा च दुहिता च । प्र० औ ।

[चैत्रस्य पितृभ्रातरौ] पिता च भ्राता च । प्र० औ ।

[मातापितरौ] माता च पिता च ।

[होतापोतारौ] होता च पोता च । प्र० औ । अनेन आ । 'तृ-स्वसृ-नप्तृ०' (१।४।३८) आर् ।

[स्वसादुहितरौ] स्वसा च दुहिता च । प्र० औ । तन्मते आ ।।छ।।

पुत्रे ।।३।२।४०।।

[मातापुत्रौ] माता च पुत्रश्च ।

---

P. 卐 वन्द्यते शिष्यैरिति द्वन्द्व उणादिनिपातनात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[पितापुत्रौ] पिता च पुत्रश्च ।

[होतापुत्रौ] होता च पुत्रश्च ।

卐 [दुहितापुत्रौ] दुहिता च पुत्रश्च । प्र० औ । अनेन आ ।।छ।।

वेदसहश्रुताऽवायुदेवतानाम् ।।३।२।४१।।

[वेदसहश्रुताऽवायुदेवतानाम्] सह श्रूयन्ते स्म इति श्रुताः, वेदे सह श्रुताः = वेदसहश्रुताः । न वायवोऽवायवः । अवायवश्च ता देवताश्च = अवायुदेवताः । वेदसहश्रुताश्च ता अवायुदेवताश्च = वेदसहश्रुताऽवायुदेवतास्तासाम् । सहश्रुतानां प्रसिद्धानामित्यर्थः ।

[इन्द्रासोमौ] इन्द्रश्च सोमश्च ।

[इन्द्रावरुणौ] इन्द्रश्च वरुणश्च ।

[इन्द्रापूषणौ] इन्द्रश्च पूपा च ।

[इन्द्राबृहस्पती] इन्द्रश्च बृहस्पतिश्च ।

[शुनासीरौ] शुनश्च सीरश्च = शुनासीरौ ।

[अग्नामरुतौ] अग्निश्च मरुच्च ।

[अग्नेन्द्रौ] अग्निश्च इन्द्रश्च ।

[अग्नाविष्णू] अग्निश्च विष्णुश्च ।

[सोमारुद्रौ] सोमश्च रुद्रश्च ।

[सूर्याचन्द्रमसौ] सूर्यश्च चन्द्रमसश्च(चन्द्रमाश्च) ।

[मित्रावरुणौ] मित्रश्च वरुणश्च । अनेन आ सर्वत्र ।

[शिववैश्रवणौ] विश्रवस् । विश्रवसोऽपत्यम् । 'णश्च विश्रवसो विश्लुक् च वा' (६।१।६५) अण्प्र० → अ-णश्च-. विकल्पे विश्लुक् । 'प्रायोऽव्ययस्य' (७।४।६५) अस्लुक् । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ, वैश्रवण इति निष्पन्नः । शिवश्च वैश्रवणश्च ।

[स्कन्दविशाखौ] स्कन्दः-स्वामिकार्त्तिकेयः, विशाखो याचके-स्कन्दे । स्कन्दश्च विशाखश्च ।

[ब्रह्मप्रजापती] ब्रह्मा च प्रजापतिश्च ।

[विष्णुशक्रौ] विष्णुश्च शक्रश्च ।

[चन्द्रसूर्यौ] चन्द्रश्च सूर्यश्च ।

[दिवाकरनिशाकरौ] दिवाकरश्च निशाकरश्च ।

[अग्निवायू] अग्निश्च वायुश्च ।

---

卐 न विद्यते इदमुदाहरणं बृहद्वृत्तौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[वाय्वग्नी]** वायुश्च अग्निश्च ।

***[यूपचषालौ]*** *यूपश्च चषालश्च ।*

**[उलूखलमुशले]** उलूखलं च मुस(श)लं च । औ ।।छ।।

**ईः षोम-वरुणेऽग्नेः ।।३।२।४२।।**

**[षोमवरुणे]**卐 सोमश्च वरुणश्च = सोमवरुणम्, तस्मिन् ।

**[अग्नीषोमौ]*** अग्निश्च सोमश्च । औ । अनेन ष-ईश्च निपात्यते ।

**[अग्नीवरुणौ]** अग्निश्च वरुणश्च । औ । अनेन ई ।

**[अग्नेन्द्रौ]** अग्निश्च इन्द्रश्च । औ । 'वेदसहश्रुताऽवायुदेवतानाम्' (३।२।४१) आ ।

**[अग्निसोमौ माणवकौ]**+ अग्निश्च सोमश्च । औ ।।छ।।

**इर्वृद्धिमत्यविष्णौ ।।३।२।४३।।**

**[वृद्धिमत्यविष्णौ]** वृद्धिर्विद्यते यस्याऽसौ । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत्, तस्मिन् । न विष्णुरविष्णुस्तस्मिन् ।

**[आग्निवारुणीमनड्वाहीमालभेत]** अग्निश्च वरुणश्च । अग्नीवरुणौ देवता(ते) अस्याः । 'देवता' (६।२।१०१) अण्प्र० । 'देवतानामात्वादौ' (७।४।२८) उभयपदवृद्धिः । 'अणञेयेकण्'० (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलोपः । अनडुह् गौरादित्वात् ङी- वादेशश्च ।

**[आग्निसौमं कर्म]** अग्नीषोमौ देवता(ते)ऽस्य तत् । देवतानामात्वादौ' (७।४।२८) उभयपदवृद्धिः ।

**[आग्निमारुतं कर्म]** अग्निश्च मरुच्च । अग्नामरुतौ देवतेऽस्य । 'देवता' (६।२।१०१) अण्प्र० → अ । 'देवतानामात्वादौ' (७।४।२८) उभयपदवृद्धिः ।

**[अग्नीवरुणौ]** अग्निश्च वरुणश्च । 'ईः षोम-वरुणेऽग्नेः' (३।२।४२) ई ।

**[अग्नामरुतौ]** अग्निश्च मरुच्च । 'वेदसहश्रुताऽवायुदेवतानाम्' (३।२।४१) आ ।

**[आग्नेन्द्रं कर्म]** अग्ना(ग्नि)श्च इन्द्रश्च । 'वेदसहश्रुता०' (३।२।४१) आ । अग्नेन्द्रौ देवता(ते)ऽस्य तत् । 'देवता' (६।२।१०१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ ।

**[आग्नावैष्णवं चरुं निर्वपेत्]** अग्निश्च विष्णुश्च = अग्नाविष्णू । 'वेदसहश्रुता०' (३।२।४१) आ । अग्नाविष्णू देवता(ते)ऽस्य तत् । 'देवता' (६।२।१०१) अण्प्र० → अ । 'देवतानामात्वादौ' (७।४।२८) उभयपदवृद्धिः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'डुवपीं बीजसन्ताने' (९९५) वप् । सप्तमी यात् । 'यः सप्तम्याः' (४।२।१२२) या० → इ० । 'अवर्णस्ये०' (१।२।६) ए ।।छ।।

---

P. 卐 षोमश्च वरुणश्च, तत्, तस्मिन् ।

* श० म० न्या० -

अत्र सोमशब्द एव कृतषत्वतया निर्दिष्टो न षोमशब्दोऽन्यः कश्चिदित्याह-षोमेति निर्देशादिति विशिष्य षत्वविधाने वाक्यभेदापत्तेः, पृथक्-सूत्रविधाने च स्पष्टमेव गौरवमिति कृतषत्वनिर्देश एवाश्रितः, तच्चेदं षत्वमीकारादेशसन्नियोगशिष्टं तत्सत्त्व एव भवति, तदभावे न भवति, "सन्नियोगशिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः" इति न्यायात् ।

P. + अग्निरिव अग्निः । सोम इव सोमः । अग्निश्चासौ सोमश्च = अग्निसोमौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**दिवो द्यावा** ।।३।२।४४।।

**[द्यावाक्षमे]** द्यौश्च क्षमा च । औ । 'औता' (१।४।२०) ए ।

**[द्यावानक्ते]** द्यौश्च नक्तं च । औ । 'औरीः' (१।४।५६) ई । अनेन द्यावा आदेशः ।।छ।।

**दिवस् दिवः पृथिव्यां वा** ।।३।२।४५।।

**[दिवस् दिवः]** दिवश्च दिवश्च । औ । सूत्रत्वात् लोपः ।

**[दिवस्पृथिव्यौ, दिवःपृथिव्यौ, द्यावापृथिव्यौ]** द्यौश्च पृथिवी च । औ । अनेन दिवस्-दिवः आदेशः । 'दिवो द्यावा' (३।२।४४) द्यावा आदेशः ।

**उषासोषसः** ।।३।२।४६।।

**[उषासोषसः]** उषासा । प्र० सि । सूत्रत्वात्.... । उषस् षष्ठी ङस् ।

**[उषासानक्तम्]** उषस् । नक्तम् । उषाश्च नक्तं च । सि-अम् । अनेन "उषासा" आदेशः ।।

**[उषासानक्ते]** उषाश्च नक्तं च । औ । 'औरीः' (१।४।५६) ई । अनेन 'उषासा' आदेशः ।।छ।।

**मातरपितरं वा** ।।३।२।४७।।

**[मातरपितरम्]** मातरश्च पितरश्च = मातरपितरम् ।

**[मातरपितरौ, मातापितरौ, पितरौ]** माता च पिता च, तौ । पक्षे 'आ द्वन्द्वे' (३।२।२९) आ । 'स्यादावसंख्येयः' (३।१।११९) एकशेषे पितरौ ।

**[मातरपितराभ्याम्, मातापितृभ्याम्]** माता च पिता च, ताभ्याम् । पक्षे 'आ द्वन्द्वे' (३।२।३९) आ ।

**[मातरपितरयोः, मातापित्रोः]** माता च पिता च, तयोः । पक्षे 'आ द्वन्द्वे' (३।२।३९) आ ।।छ।।

**वर्चस्कादिष्ववस्करादयः** ।।३।२।४८।।

**[वर्चस्कादिषु]** वर्चस् । कुत्सितं वर्चः = वर्चस्कम् । 'कुत्सिता-ऽल्पा-ऽज्ञाते' (७।३।३३) कप्प्र० → क । 'सो रुः' (२।१।७२) स० → र० । 'प्रत्यये' (२।३।६) र० → स० । वर्चस्क आदिर्येषां ते, तेषु ।

**[अवस्करादयः]** अवस्कर आदिर्येषां ते ।

**["अवस्करोऽन्नमलम्", अवकरोऽन्यः]** 'कृत् विक्षेपे' (१३३४) कृ, अवपूर्व० । अवकीर्यते । 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः' (५।३।२८) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । अनेन स० ।

**["अपस्करो रथाङ्गे," अपकरोऽन्यः]** अपकीर्यतेऽपस्करः । 'युवर्ण-वृ-दृ-वश०' (५।३।२८) अल्प्र० → अ ।

**["कुस्तुम्बुरूणि", अन्यत्र कुतुम्बुरुस्तिन्दुकवृक्षः]** कुत्सिता तुम्बुरुः । अनेन स० । बाहुलकात् लिङ्गता । कुस्तुम्ब(बु)-रोरोषधेर्विकारः फलम् । 'प्राण्यौषधि-वृक्षेभ्योऽवयवे च' (६।२।३१) अण्प्र० → अ । 'फले' (६।२।५८) अणलुप् । प्र० जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**["अवरस्पराः सार्था गच्छन्ति", अन्यत्र अवरपराः सार्था गच्छन्ति]** अवरे च परे च । अपरे च परे च । अनेन स० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**["आस्पदं प्रतिष्ठायाम्", अन्यत्र आपदम्]** 'पदिंच् गतौ' (१२५७) पद्, आङ्पूर्व० । आपद्यतें = प्राप्यते सद्भिरिति । 'वर्षादयः क्लीबे' (५।३।२९) अल्प्र० → अ । अनेन स० । आ ईषत् पदम् । 'आङल्पे' (३।१।४६) तत्पुरुषः समासः । *आपदाद्वा । 'पर्यपा-ऽऽङ्-बहिरच् पञ्चम्या' (३।१।३२) अव्ययीभावः समासः ।*

**["आश्चर्यं नीला द्यौः", अन्यत्र आचर्यं कर्म शोभनम्]** 'चर भक्षणे च' (४१०) चर्, आङ्पूर्व० । आचर्यत इति । 'चरेराङस्त्वगुरौ' (५।१।३१) यप्र० । अनेन स० ।

**["ग्राममध्ये प्रवेक्ष्यामि भव मे त्वं प्रतिष्कशः" अन्यत्र प्रतिकशोऽश्वः]** प्रति 'कश शब्दे' (४९०) कश् । कशा प्रतिकशने । अनेन । कशां प्रतिगतः । अच्प्र० ।

**["मस्करो वेणुदण्डयोः", अन्यत्र मकरो ग्राहः]** मा 'डुकृंग् करणे' (८८८) कृ । मा क्रियते प्रतिषिध्यतेऽनेनेति । 'पुन्नाम्नि घः' (५।३।१३०) घप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । बाहुलकात् समासः । अनेन स्० । मकरो ग्राहः । 'ग्रहीश् उपादाने' (१५१७) ग्रह् । गृह्यत इति ग्राहः । 'वा ज्वलादि-दु-नी-भू-ग्रहा-ऽऽस्त्रोर्णः' (५।१।६२) णप्र० → अ ।

**["मस्करी परिव्राजके" स ह्याह मा कृषत कर्माणि शान्तिर्वः श्रेयसीति, अन्यत्र मकरीति समुद्रः]** मा 'डुकृंग् करणे' (८८८) कृ । अद्यतनी अन्त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'अनतोऽन्तोऽदात्मने' (४।२।११४) अन्त० → अत० ।

**["कारस्करो वृक्षे", कारकरोऽन्यः]** कार 'डुकृंग् करणे' (८८८) कृ । कारं करोति । 'संख्या-ऽह-दिवा-विभा-निशा-प्रभा०' (५।१।१०२) टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । अनेन स्० ।

**["वनस्पतिः पुष्पं विना फलवति वृक्षे", वनपतिरन्यः]** वनस्य पतिः । अनेन स्० ।

**["पारस्करो देशे", पारकरोऽन्यः]** पारं करोतीति । 'हेतुतच्छीलाऽनुकूले' (५।१।१०३) टप्र० → अ । अथवा 'लिहादिभ्यः' (५।१।५०) अच्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**["करस्करो गिरि-वृक्षयोः", करकरोऽन्यः]** 'कृत् विक्षेपे' (१३३४) कृ । कीर्यतेऽनेनेति । 'पुन्नाम्नि घः' (५।३।१३०) घप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । करं करोतीति । 'संख्या-ऽह-दिवा-विभा०' (५।१।१०२) टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । अनेन स्० ।

**["रथस्पा नद्याम्", रथपाऽन्या]** रथ 'पां पाने' (२) पा । 'पांक् रक्षणे' (१०६७) पा । रथं पिबति पाति वा = रथस्पा । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ ।

**["किष्कुरुः प्रहरणे"]** कस्य कुरुः । अनेन म० → ष० ।

**[किष्किन्ध इति गुहा-पर्वतयोः]** किम् 'डुधांगक् धारणे च' (११३९) धा । किमपा(प्य)न्तर्दधातीति । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलोपः । 'वीप्सायाम्' (७।४।८०) किम् द्विर्वचनु । अनेन म० → ष० । 'आत्' (२।४।१८) आप्प्र० → आ । किं किं दधातीति । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० । अनेन म० → ष० ।

**[तस्करश्चौरे, अन्यत्र तत्करः]** तत् डुकृंग् करणे' (८८८) कृ । तत् करोतीति । 'किम्-यत्-तद्-बहोरः' (५।१।१०१) अप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । अनेन स्० ।

**["बृहस्पतिर्देवतायाम्", अन्यत्र बृहत्पतिः]** बृहतां पतिर्बृहस्पतिः । अनेन स्० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**["प्रायश्चित्तप्रायश्चित्ती अतीचारशोधने"]** प्र-आ 'इंण्क् गतौ' (१०७५) इ । प्रकर्षेणैत्यागच्छत्यस्मादाचारधर्म इति प्रायो मुनिलोकः । 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः' (५।३।२८) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए ।卐 'चित(ति)ण् संवेदने' (१८२६) चित् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । चित्यते स्मर्यत इति । 'शी-री-भू-दू-मू-घृ-पा-धाग्-चित्यर्त्यञ्जि-पुसि-मुसि-वुसि-विसि-रमि-धुर्वि-पूर्विभ्यः कित्' (उणा० २०१) कित् तप्र० । चित्यते । 'श्वादिभ्यः' (५।३।९२) क्तिप्र० → ति । प्रायैश्चित्तं - चिन्तितं किल्बिषविशुद्धये = प्रायश्चित्तम् । प्रायैश्चित्तिः किल्बिषविशुद्धये = प्रायश्चित्तिः ।

**["शष्कुली कृतान्ने", कृतान्नादन्यत्र शकुली मत्स्यविशेषः]** शष्कुलशब्दात् गौरादित्वात् ङी । शकुली-मत्सी । 'जातेरयान्त०' (२।४।५४) ङी ।

**[गोष्पदं "गोसेविते प्रमाणे च", अन्यत्र गोपदम्]** यत्र गावः पद्यन्ते-यान्ति तत् । 'अच्' (५।१।४९) अच्प्र० → अ । प्रमाणे - "गोष्पदपूरं वृष्टो देवः" - गोष्पदस्य पूरणम् । 'पूरैचि आप्यायने' (१२६८) पूर् । 'वृष्टिमान ऊलुक् चास्य वा' (५।४।५७) णम्प्र० । "गोष्पदमात्रं क्षेत्रम्" - गोष्पदं मानमस्य स्यात् । 'मात्रट्' (७।१।१४५) मात्रट्प्र० → मात्र । अनेन ष० ।

**["अगोष्पदेष्वरण्येषु विश्वासमुपजग्मिवान्"]** विश्वसनम् । "भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । अम् । उप अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । उपजगाम । 'तत्र क्वसु-कानौ तद्वत्' (५।२।२) क्वसुप्र० → वस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "गम्" द्विर्वचनु । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'गम-हन-जन-खन-घसः स्वरेऽनङि क्ङिति लुक्' (४।२।४४) अलोपः । प्र० सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'न्समहतोः' (१।४।८६) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) सलोपः ।

卐卐 **[आवोवचम्]** 'अञ्चू गतौ च' (१०५) अञ्चु, आङ्-अवपूर्व० । आञ्चतीति अवाञ्चतीति क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । आङ् च अवाङ् च । 'चवर्ग-द-ष-हः समाहारे' (७।३।९८) अत्समासान्तः । अन्यत् निपातनात् ज्ञेयम् ।।छ।।

**परतः स्त्री पुंवत् स्त्र्येकार्थेऽनूङ् ।।३।२।४९।।**

**[परतः]** पर । परस्मात् = परतः । 'किमद्व्यादिसर्वाद्यवैपुल्यबहोः पित् तस्' (७।२।८९) तस्प्र० । प्र० सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[पुंवत्]** पुम्स् । पुमानिव । 'स्यादेरिवे' (७।१।५२) वत्प्र० । 'पदस्य' (२।१।८९) सलोपः । 'तौ मु-मो व्यञ्जने स्वौ' (१।३।१४) अनुस्वारः ।

**[स्त्र्येकार्थे]** + स्त्रियामेकार्थं = स्त्र्येकार्थम्, तस्मिन् ।

**[अनूङ्]** न ऊङ् = अनूङ् । 'अन् स्वरे' (३।२।१२९) अन् ।

---

卐 उणादौ - 'चितै संज्ञाने' । श० म० न्यासानुसन्धाने - चिन्त्यते स्मर्यते इति - चिन्तेः क्ते निपातनादिङभावे चित्तमिति, क्तौ च चित्तिरिति ततस्तृतीयातत्पुरुषः ।

卐卐 श० म० न्यासानुसन्धाने - यद्यपि मुद्रितबृहद्वृत्तौ आवोवचेति पाठः प्रतीयते, तथापि लघुन्यासधृतप्रतीकानुसारमाचोवचेति पाठः स्वीकृतः । आचोवचमित्यपठितोऽपि आचार्यवचसा तत्प्रयोगोऽनुमेयः । पाणिनीये च आचोवचमिति मयूरव्यंसकादिषु पठ्यते ।

P. + स्त्री च तद् एकार्थं च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[पटुभार्यः]** पटु । 'स्वरादुतो गुणादखरोः' (२।४।३५) ङी । पट्वी भार्या यस्य सः ।

**[कल्याणभार्यः]** कल्याण । 'नवा शोणादेः' (२।४।३१) ङी । कल्याणी भार्या यस्य सः । अनेन पुंवत् । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[प्रसूतभार्यः]** 'षूङौक् प्राणिगर्भविमोचने' (११०७) षू । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सू, प्रपूर्व० । प्रसूयते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ । प्रसूता भार्या यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[प्रजातभार्यः]** 'जनैचि प्रादुर्भावे' (१२६५) जन्, प्रपूर्व० । प्रजायते स्म । 'श्लिष-शीङ्-स्था-ऽऽस-वस-जन-रुह-जॄ-भजेः क्तः' (५।१।९) क्तप्र० → त । 'आः खनि-सनि-जनः' (४।२।६०) न० → आ० । 'आत्' (२।४।१८) आप्प्र० → आ । प्रजाता भार्या यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[एतभार्यः]** एत । 'श्येतैत-हरित-भरत-रोहिताद् वर्णात् तो नश्च' (२।४।३६) ङी-तस्य न० । एनी भार्या यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । अनेन पुंवत् ।

**[श्येतभार्यः]** श्येत । 'श्येतैत-हरित-भरत-रोहिताद् वर्णात् तो नश्च' (२।४।३६) ङी-तस्य न० । श्येनी भार्या यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । अनेन पुंवत् ।

**[युवजानिः]** युवन् स्त्री चेत् युवतिः । 'यूनस्तिः' (२।४।७७) तिप्र० । युवतिर्जायाऽस्य । 'जायाया जानिः' (७।३।१६४) "जानि" आदेशः । अनेन पुंवत् - "ति" गच्छति ।

**[द्रुणीभार्यः]** द्रुण । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । द्रुणी भार्या यस्य सः ।卐 नित्यस्त्रीत्वात् द्रुण इत्यादयो न स्युः ।

**[वरटाभार्यः]** वरटा भार्या यस्य सः ।

**[वडवाभार्यः]** वडवा भार्या यस्य सः ।

**[द्रोणीभार्यः]** द्रोणी भार्या यस्य सः ।

**[कुटीभार्यः]** कुटी भार्या यस्य सः ।

**[पात्रीभार्यः]** पात्री भार्या यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[ग्रामणिदृष्टिः]** ग्राम 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । ग्रामं नयतीति क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'ग्रामाऽग्रान्नियः' (२।३।७१) न० → ण० । ग्रामणि कुलं दृष्टिरस्य सः । 'वेदूतोऽनव्यय-य्वृदीच्-ङीयुवः पदे' (२।४।९८) ह्रस्वः । अत्र अग्रे च यदि पुंवद्भावो न स्यात् तदा ग्रामणीदृष्टिरिति स्यात् ।

**[खलपुदृष्टिः]** खलपु कुलं दृष्टिरस्य सः ।

**[गृहिणीनेत्राः]** गृहिण्येव नेत्रं- चक्षुर्येषां ते ।

**[दर्शनीयामाता]** दर्शनीयाया माता । प्र० सि । 'ऋदुशनस्-पुरुदंशो०' (१।४।८४) डा । 'डित्यन्त्यस्वरादेः'

---

P. 卐 अत्र द्रुणीशब्दो नित्यं कच्छपवाचकः, पुल्लिङ्गे द्रुणीशब्दस्याभावात्, ततो न पुंस्त्वं इत्याह बृहद्वृत्तौ- अत्र पुंवद्भावे सति अर्थतः प्रत्यासन्नो द्रुणीशब्दस्य कूर्मशब्दः स्यात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(२।१।११४) अन्त्यस्वरादिलोपः ।

**[ब्रह्मबन्धूभार्यः]** ब्रह्मन् । बन्धु । ब्रह्मा बन्धुरस्याः सा । 'उतोऽप्राणिनश्चाऽयु-रज्ज्वादिभ्य ऊङ्' (२।४।७३) ऊङ्प्र० → ऊ। ब्रह्मबन्धूर्भार्या यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । प्र० सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[करभोरूभार्यः]** करभ । ऊरु । ꣳकरभस्येव ऊरू यस्याः सा । 'उपमान-सहित-संहित-सह-शफ-वाम-लक्ष्मणाद्यूरोः' (२।४।७५) ऊङ्प्र० → ऊ। 'समानानां०' (१।२।१) दीर्घः । करभोरूर्भार्या यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । प्र० सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ऐडविडभार्या]** इड्(ड)विड् । इडविडोऽपत्यम् । 'राष्ट्र-क्षत्रियात् सरूपाद् राजाऽपत्ये द्रिरञ्' (६।१।११४) अञ्प्र० → अ । 'द्रेरञणोऽप्राच्य-भर्गादेः' (६।१।१२३) अञ्लोपः । इडविड् चासौ भार्या च । 'पुंवत् कर्मधारये' (३।२।५७) पुंवद्भावे कृते पुनरेव अञ् आगते 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । ऊङ्सदृशप्रत्ययान्तस्येत्यत्र लोपाभावात् ऊङ् साक्षात् प्रत्ययोऽन्यस्यापि साक्षात् प्रत्ययस्यैव स्यात्, न लुप्तस्य ।।छ।।

**क्यङ् - मानि-पित्तद्धिते** ।।३।२।५०।।

**[क्यङ्मानिपित्तद्धिते]** प् इदनुबन्धो यस्याऽसौ पित्, +पिच्चासौ तद्धितं च = पित्तद्धितम्, क्यङ् च मानी च *पित्तद्धितं च = क्यङ्मानिपित्तद्धितम्, तस्मिन् ।

**[श्येतायते]** श्येत । 'श्येतैत-हरित-भरत-रोहिताद् वर्णात् तो नश्च' (२।४।३६) ङी-तस्य न० । 'अस्य ङ्यां लुक्' (२।४।८६) अलोपः । श्येनी इवाचरति । 'क्यङ्' (३।४।२६) क्यङ्प्र० → य । अनेन पुंवत्-ङी गता । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[दर्शनीयमानी अयमस्याः]** बुधिं (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन् । दर्शनीयां मन्यते । 'मन्याण्णिन्' (५।१।११६) णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । प्र० सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[दर्शनीयमानिनीयमस्याः]** अग्रेतने 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

**[दर्शनीयमानिनी]** अग्रेतने 'परतः स्त्री०' (३।२।४९) पुंवत् ।

**[अजथ्यं यूथम्]** अजा । अजायै हितम् । 'अव्यजात् थ्यप्' (७।१।३८) थ्यप्प्र० → थ्य । अनेन पुंवत् ।

**[बहुतिथी]** बहु । 'स्वरादुतो गुणादखरोः' (२।४।३५) ङी । बह्वीनां पूरणी । 'पित् तिथट् बहु-गण-पूग-संघात्' (७।१।६०) पित्तिथट्प्र० → तिथ । अनेन पुंवत् । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी ।

**[पटुचरी]** भूतपूर्वा पट्वी । 'भूतपूर्वे प्चरट्' (७।२।७८) प्चरट्प्र० → चर । अनेन पुंवत्-ङीलोपः । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी ।

**[बहुतः]** बह्वीभ्यः = बहुतः । 'किमद्व्यादिसर्वाद्यवैपुल्यबहोः पित् तस्' (७।२।८९) पित् तस्प्र० । अनेन पुंवत् ।

---

P. ꣳ करभवत् ।

P. + पिच्चासौ तद्धितश्च = पित्तद्धितः ।

P. * पित्तद्धितः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[बहुत्र]** बह्वीषु = बहुत्र । 'सप्तम्याः' (७।२।९४) त्रप्प्र० → त्र ।

**[बहुशो देहि]** बह्वीभ्यो देहि = बहुशः । 'बह्वल्पार्थात् कारकादिष्टाऽनिष्टे प्शस्' (७।२।१५०) प्शस्प्र० → शस् ।

**[अल्पशो देहि]** अल्पाभ्योऽल्पशः । 'बह्वल्पार्थात् कारकादिष्टा-ऽनिष्टे प्शस्' (७।२।१५०) प्शस्प्र० → शस् ।

**[दर्शनीयपाशा]** दर्शनीया । निन्द्या दर्शनीया । 'निन्द्ये पाशप्' (७।३।४) पाशप्प्र० → पाश ।

**[पक्वतमा]** 'डुपचींष् पाके' (८९२) पच् । पच्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'क्षै-शुषि-पचो म-क-वम्' (४।२।७८) त० → व० । 'च-जः क-गम्' (२।१।८६) च० → क०, अस्मिन् कर्त्तव्ये 'क्तादेशोऽषि' (२।१।६१) इत्यनेन क्तस्यादेशो नित्यं सञ्जातः । 'आत्' (२।४।१८) आप्प्र० → आ । इयमासामतिशयेन पक्वा । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम ।

**[पक्वतरा]** इयमनयोरतिशयेन पक्वा । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[दर्शनीयरूपा]** दर्शनीय । 'आत्' (२।४।१८) आप्प्र० → आ । प्रशस्ता दर्शनीया । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० → रूप ।

**[दर्शनीयकल्पा]** ईषदपरिसमाप्ता दर्शनीया । 'अतमबादेरीषदसमाप्ते कल्पप्-देश्यप्-देशीयर्' (७।३।११) कल्पप्प्र० → कल्प ।

**[दर्शनीयदेश्या]** ईषदपरिसमाप्ता दर्शनीया । 'अतमबादेरीषदसमाप्ते कल्पप्-देश्यप्-देशीयर्' (७।३।११) देश्यप्प्र० → देश्य ।

**[दर्शनीयका]** ह्रस्वा दर्शनीया । 'प्राग् नित्यात् कप्' (७।३।२८) कप्प्र० → क । 'आत्' (२।४।१८) आप्प्र० → आ । असंदेहार्थं 'अस्याऽयत्-तत्-क्षिपकादीनाम्' (२।४।१११) इति इकारो न ।

**[दारदिका]** दरद् । दरदो राज्ञोऽपत्यं स्त्री । 'पुरु-मगध-कलिङ्ग-सूरमस-द्विस्वरादण्' (६।१।११६) अण्प्र० । 'द्रेरञणोऽप्राच्य-भर्गादेः' (६।१।१२३) अण्लोपः । कुत्सिता दरत् । 'प्राग् नित्यात् कप्' (७।३।२८) कप्प्र० → क । अनेन पुंवद्भावे कृते पुनरेव अण् आगते 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । अनेन सर्वत्र पुंवत् ।

**[पट्विका]** पटु । 'स्वरादुतो गुणादखरोः' (२।४।३५) ङी । कुत्सिता पट्वी । 'कुत्सिता-ऽल्पा-ऽज्ञाते' (७।३।३३) कप्प्र० → क । 'आत्' (२।४।१८) आप्प्र० → आ । 'ङ्यादीदूतः के' (२।४।१०४) ह्रस्वः ।

**[मृद्विका]** मृदु । 'स्वरादुतो गुणादखरोः' (२।४।३५) ङी । कुत्सिता मृद्वी । 'कुत्सिता-ऽल्पा-ऽज्ञाते' (७।३।३३) कप्प्र० → क । 'आत्' (२।४।१८) आप्प्र० → आ । 'ङ्यादीदूतः के' (२।४।१०४) ह्रस्वः ।

**[पट्वीरूप्यम्]** पट्व्या आगतम् । 'नृ-हेतुभ्यो रूप्य-मयटौ वा' (६।३।१५६) रूप्यप्र० ।

**[पट्वीमयम्]** पट्व्या आगतम् । 'नृ-हेतुभ्यो रूप्य-मयटौ वा' (६।३।१५६) मयट्प्र० → मय ।

**[कुमारी ब्राह्मणः]** कुमार । 'वयस्यनन्त्ये' (२।४।२१) ङी । कुमारीवाऽऽचरति । 'कर्तुः क्विप्, गल्भ-क्लीव-होडात्तु ङित्' (३।४।२५) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अथवा 'क्यङ्' (३।४।२६) क्यङ्प्र० → य । अनेन पुंवत् । कुमारीयतीति । क्विप्प्र० । 'अतः' (४।३।८२) अलोपः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः । कुमारी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चासौ ब्राह्मणश्च ।

**[पञ्चगर्गः]** गर्ग । गर्गस्याऽपत्यं वृद्धं स्त्री । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'यञो डायन् च वा' (२।४।६७) ङी-डायन् विकल्पे आयन् । 'अस्य ङ्यां लुक्' (२।४।८६) अलोपः । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलोपः । 'रषृवर्णान्नो ण०' (२।३।६३) न० → ण० । पञ्चभिर्गार्गीभिः गार्ग्यायणीभिर्वा क्रीतः । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) इकण्लोपः । अनेन पुंवत्, ङी-आयन् गतः । 'यञञोऽश्यापर्णान्त-गोपवनादेः' (६।१।१२६) यञ्लोपः ।

**[गतगता]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । गम्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'यमि-रमि-नमि-गमि०' (४।२।५५) मलोपः । 'आत्' (२।४।१८) आप्प्र० → आ । स् । 'वीप्सायाम्' (७।४।८०) "गतास्" द्विर्वचनु । 'आबाधे' (७।४।८५) इत्यनेन स्लुप् इति कोऽर्थः ? आदेः स्लुप्, पित इत्यर्थः, पित्त्वादनेन पुंवत्, अग्रे 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।।छ।।

**जातिश्च णि-तद्धितय-स्वरे ।।३।२।५१।।**

**[णितद्धितयस्वरे]** 卐 यश्च स्वरश्च = यस्वरौ, तद्धितश्च तौ यस्वरौ च = तद्धितयस्वरौ, णिश्च तद्धितयस्वरौ च = णितद्धितयस्वरम्, तस्मिन् ।

**[पटयति]** पटु । 'स्वरादुतो गुणादखरोः' (२।४।३५) ङी । पट्वीमाचष्टे । + 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० → इ । अनेन पुंवत् । 'त्र्यन्त्यस्वरादेः' (७।४।४३) उलोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[लघयति]** लघु । 'स्वरादुतो गुणादखरोः' (२।४।३५) ङी । लघ्वीमाचष्टे । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० → इ । अनेन पुंवत् । 'त्र्यन्त्यस्वरादेः' (७।४।४३)' अन्त्यस्वरादिलोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[एतयति]** एत । 'श्येतैत-हरित-भरत-रोहिताद् वर्णात् तो नश्च' (२।४।३६) ङी - तस्य न० । एनीमाचष्टे । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० → इ । अनेन पुंवत् । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[श्येतयति]** श्येत । 'श्येतैत-हरित०' (२।४।३६) ङी-तस्य न० । श्येनीमाचष्टे । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० → इ । अनेन पुंवत् । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[एत्यः]** एन्यां साधुः । अनेन पुंवत्, ततः 'तत्र साधौ' (७।१।१५) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[श्येत्यः]** श्येन्यां साधुः । अनेन पुंवत्, ततः 'तत्र साधौ' (७।१।१५) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ऐत्यम्]** एन्या भावः । 'वर्ण-दृढादिभ्यष्ट्यण् च वा' (७।१।५९) ट्यण्प्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । अनेन पुंवत्, ततः ट्यण्प्र० → य ।

---

P. 卐 यश्च स्वरश्च = यस्वरम्, तद्धितं च तद् यस्वरं च = तद्धितयस्वरम्, णिश्च तद्धितयस्वरं च = णितद्धितयस्वरम्, तस्मिन् ।

P. + 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः । 'त्र्यन्त्य०' (७।४।४३) इत्यनेन वृद्धौ सन्ध्यक्षरलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[श्यैत्यम्]** श्येन्या भावः । 'वर्ण-दृढादिभ्यष्ट्यण् च वा' (७।१।५९) ट्यण्प्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । अनेन पुंवत् । ततः ट्यण्प्र० → य ।

**[लौहित्यम्]** रोहित । 'श्येतैत-हरित-भरत-रोहिताद्०' (२।४।३६) ङी-तस्य न० । 'ऋफिडादीनां डश्च लः' (२।३।१०४) र० → ल० । लोहिन्या भावः । अनेन पुंवत् । 'वर्ण-दृढादिभ्यष्ट्यण् च वा' (७।१।५९) ट्यण्प्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[भावत्कम्]** 'भांक् दीप्तौ' (१०६१) भा । भातीति । 'भातेर्डवतुः' (उणा० ८८६) डवतुप्र० → अवत् । 'डित्यन्त्य-स्वरादेः' (२।१।११४) आलोपः । 'अधातूदृदितः' (२।४।२) ङीप्र० । भवत्या इदम् । पुंवद्भावे कृते 'भवतोरिकणीयसौ' (६।३।३०) इकण्प्र० → इक । 'ऋवर्णोवर्ण-दोसिसुसशश्वदकस्मात्त इकस्येतो लुक्' (७।४।७१) इकण्संबन्धिन्या इलोपः ।

**[भवदीयम्]** भवन्या इदम् । 'भवतोरिकणीयसौ' (६।३।३०) ईयसुप्र० ।

**[पटिष्ठा]** पटु । 'स्वरादुतो गुणादखरोः' (२।४।३५) ङी । इयं पट्वी (२), इयमासां मध्येऽतिशयेन पट्वी । पुंवद्भावे कृते 'गुणाङ्गाद् वेष्ठेयसौ(सू) (७।३।९) इष्ठप्र० । अनेन पुंवत् । 'त्र्यन्त्यस्वरादेः' (७।४।४३) उलोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[पटीयसी]** पटु । 'स्वरादुतो गुणादखरोः' (२।४।३५) ङी । इयं पट्वी (२), इयमासां मध्येऽतिशयेन पट्वी । पुंवद्भावे कृते 'गुणाङ्गाद् वेष्ठेयसौ(सू)' (७।३।९) ईयसुप्र० → ईयस् । अनेन पुंवत् । 'त्र्यन्त्यस्वरादेः' (७।४।४३) उलोपः । 'अधातूदृदितः' (२।४।२) ङी ।

**[दारद्यः]** दरद् । दरदोऽपत्यं स्त्री । 'पुरु-मगध-कलिङ्ग०' (६।१।११६) अण्प्र० । 'द्रेरञणोऽप्राच्य-भर्गादेः' (६।१।१२३) अण्लोपः । दरदि साधुः । अनेन पुंवद्भावे कृतेऽण् पुनरेव स आगतः, ततो 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'तत्र साधौ' (७।१।१५) यप्र० ।

**[औशिज्यः]** उसि(शि)ज् । उसि(शि)जोऽपत्यम् । 'पुरु-मगध-कलिङ्ग०' (६।१।११६) अण्प्र० । 'द्रेरञणोऽप्राच्य-भर्गादेः' (६।१।१२३) अण्लोपः । उसि(शि)जि साधुः । 'तत्र साधौ' (७।१।१५) यप्र० । अनेन पुंवत्कृतेऽण् पुनरेवाऽऽयातस्ततो 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[गार्गः]** गर्ग । गर्गस्याऽपत्यं वृद्धं स्त्री । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'यञो डायन् च वा' (२।४।६७) ङी-डायन् → आयनन्ते । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । गार्ग्यायण्याः कुत्सितमपत्यम् । 'वृद्धस्त्रियाः क्षेपे णश्च' (६।१।८७) णप्र० → अ । अनेन पुंवत् । 'तद्धितयस्वरेऽनाऽऽति' (२।४।९२) यलोपः ।

**[गार्गिकः]** गार्ग्यायण्याः कुत्सितमपत्यम् । 'वृद्धस्त्रियाः क्षेपे णश्च' (६।१।८७) इकण्प्र० → इक । अनेन पुंवत् । 'तद्धितयस्वरेऽनाऽऽति' (२।४।९२) यलोपः ।

**[हास्तिकम्]** हस्त । हस्तो विद्यते यासां ताः । 'हस्त-दन्त-कराज्जातौ' (७।२।६८) णिन्प्र० (इन्प्र०) । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'स्त्रियां नृतोऽस्वस्त्रादेर्ङीः' (२।४।१) ङी । हस्तिनां समूहः = हास्तिकम् । 'कवचि-हस्त्यचित्ताच्चेकण्' (६।२।१४) इकण्प्र० → इक । पूर्वमनेन पुंवति इकण् । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्त्यस्वरादिलोपः ।

**[हस्तिनीयति]** हस्तिनी । हस्तिनीमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य । वर्त्त० तिव् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[हस्तिन्यः]**卐 हस्तिनी अग्रे जस् ।

**[एनीयति]** एनी । एनीमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[एन्यः]** एनी अग्रे जस् ।

**[यौवतम्]** युवन् । 'यूनस्तिः' (२।४।७७) तिप्र० । युवतीनां समूहः । +'भिक्षादेरण्' (६।२।१०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । प्र० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् ।

**[कौण्डिन्यः]** कुण्डिनी । कुण्डिन्या अपत्यम् । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) ईलोपः ।

**[मानाय्यः]** मनु । मनोर्भार्या । 'मनोरौ च वा' (२।४।६१) ङीप्र० - ऐश्चान्तस्य । 'एदैतोऽयाय्' (१।२।२३) आय् । मनाय्या अपत्यम् । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) ईलोपः ।

**[सापत्नः]** समानः पतिरस्याः सा । 'सपत्न्यादौ' (२।४।५०) ङीप्र० - न् च । 'समानस्य धर्माऽऽदिषु' (३।२।१४९) सभावः । सपत्न्या अपत्यम् । 'शिवादेरण्' (६।१।६०) अण्प्र० । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलोपः । सपत्नी भार्या यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । सपत्नी । सपत्न्यास्तुल्याः । 'अः सपत्न्याः' (७।१।११९) अप्र० । सपत्न्या अयम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अन्त्यस्वरलोपः ।

**[पाटवम्]** पट्वी । पट्व्या भावः । अनेन पुंवति 'भवे' (६।३।१२३) अण्प्र० । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि-अम् ।

**[पट्वीरूप्यम्]** पट्व्या आगतम् । 'नृ-हेतुभ्यो रूप्य-मयटौ वा' (६।३।१५६) रूप्यप्र० ।

**[पट्वीमयम्]** पट्व्या आगतम् । 'नृ-हेतुभ्यो रूप्य-मयटौ वा' (६।३।१५६) मयट्प्र० → मय ।।छ।।

**एयेऽग्नायी ।।३।२।५२।।**

**[एये]** एय सप्तमी ङि ।

**[अग्नायी]** अग्नायी । प्र० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[आग्नेयः]** अग्नि । अग्नेर्भार्या । 'पूतक्रतु-वृषाकप्यग्नि-कुसित-कुसीदादै च' (२।४।६०) ङीप्र० - ऐश्चाऽन्तस्य । 'एदैतोऽयाय्' (१।२।२३) आय् । अग्नाय्या अपत्यम् । 'कल्यग्नेरेयण्' (६।१।१७) एयण्प्र० → एय० । अनेन पुंवत् - अग्नि । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः ।

---

P. 卐 हस्तिनीयतीति क्विप् । 'अतः' (४।३।८२) अलोपे 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपे च जसि 'योऽनेकस्वरस्य' (२।१।५६) यत्वे च सिद्धम् ।

\+ लघुवृत्तौ - 'भिक्षादेः' ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

**[आग्नेयः स्थालीपाकः]** अग्नायी देवताऽस्य सः । 'कल्यग्नेरेयण्' (६।१।१७) एयण्प्र० → एय । अनेन पुंवत्-अग्नि । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः ।

**[श्यैनेयः]** श्येत । 'श्येतैत-हरित-भरत-रोहिताद् वर्णात् तो नश्च' (२।४।३६) ङी-तस्य न० । श्येन्या अपत्यम् । 'द्विस्वरादनद्याः' (६।१।७१) एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अन्त्यस्वरलोपः ।

**[रौहिणेयः]** रोहित । 'श्येतैत-हरित-भरत०' (२।४।३६) ङीप्र० - तस्य न० । 'रषृवर्णान्नो ण०' (२।३।६३) न० → ण० । रोहिण्या अपत्यम् । 'ङ्याप्-त्यूङः' (६।१।७०) एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अन्त्यस्वरादिलोपः ॥छ॥

### नाऽप्-प्रियाऽऽदौ ॥३।२।५३॥

**[न]** न प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[अप्प्रियाऽऽदौ]**卐 प्रिय आदिर्यस्याऽसौ प्रियादिः । अप् च प्रियादिश्च = अप्प्रियादिस्तस्मिन् ।

**[कल्याणीपञ्चमा रात्रयः]** कल्याण । 'नवा शोणादेः' (२।४।३१) ङी । पञ्चन् । पञ्चानां पूरणी । 'नो मट्' (७।१।१५९) मट्प्र० → म । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । कल्याणी पञ्चमी आसां ताः । 'पूरणीभ्यस्तत्प्राधान्येऽप्' (७।३।१३०) अप् । 'अवर्णेवर्णस्य' (७।४।६८) ईलोपः । 'आत्' (२।४।१८) आप् । प्रथमाबहु० जस् ।

**[कल्याणीदशमा रात्रयः]** दशन् । दशानां पूरणी । 'नो मट्' (७।१।१५९) मट्प्र० → म । 'अणञेयेकण्०' (२।४।२०) ङी । कल्याणी दशमी आसां ताः । 'पूरणीभ्यस्तत्प्राधान्येऽप्' (७।३।१३०) अप् । ''अवर्णेवर्णस्य' (७।४।६८) ईलोपः । 'आत्' (२।४।१८) आप्प्र० → आ । प्रथमाबहु० जस् ।

**[बह्वृचश्चरणः]** वहु । 'स्वरादुतो गुणादखरोः' (२।४।३५) ङी । 'इवर्णादे०' (१।२।२१) व० । वह्व्य ऋचो यस्य सः । 'नञ्-बहोर्ऋचो माणव-चरणे (७।३।१३५) अप्प्र० → अ । 'परतः स्त्री०' (३।२।४९) पुंवत् ।

**[भव्याप्रियः]** भव्या प्रिया अस्य सः ।

**[भव्यामनोज्ञः]** भव्या मनोज्ञा यस्य सः ।

**[प्रियाकल्याणीकः]** प्रिया कल्याणी यस्य सः । 'ऋन्नित्यदितः' (७।३।१७१) कच्प्र० → क ।

**[प्रियासुभगः]** प्रिया सुभगा यस्य सः ।

**[कल्याणीदुर्भगः]** कल्याणी दुर्भगा यस्य सः ।

**[कल्याणीस्वः]** कल्याणी स्वा यस्य सः ।

**[प्रियाक्षान्तः]** प्रिया क्षान्त्या(क्षान्ता) यस्य सः ।

**[प्रियाचपलः]** प्रिया चपला यस्य सः ।

**[प्रियाबालः]** प्रिया बाला यस्य सः ।

**[कल्याणीतनयः]** कल्याणी तनया यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

---

P. 卐 प्रिय आदिर्येषां ते = प्रियादयः । अप् च प्रियादयश्च, तस्मिन् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[कल्याणीदुहितृकः]** कल्याणी दुहिता यस्य सः । 'ऋन्नित्यदितः' (७।३।१७१) कच्प्र० → क ।

**[कल्याणीभक्तिः]** कल्याणी भक्तिरस्य सः ।

**[दृढभक्तिः]** दृढं भक्तिरस्य सः ।

**[स्थिरभक्तिः]** स्थिरं भक्तिरस्य सः ।

**[शोभनभक्तिः]** शोभनं भक्तिरस्य सः ।

**[परिपूर्णभक्तिः]** परिपूर्णं भक्तिरस्य सः ।

दृढमित्यत्र सामान्यविवक्षायां नपुंसकत्वम् ।

**[कल्याणप्रमाणाः]** कल्याणी प्रमाणी येषां ते । 'प्रमाणी-संख्या०' (७।३।१२८) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[प्रियावामः]** प्रिया वामा यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।।छ।।

**तद्धिताककोपान्त्यपूरण्याख्याः ।।३।२।५४।।**

**[तद्धिताककोपान्त्यपूरण्याख्याः]** तद्धितश्च अकश्च = तद्धिताकौ, तद्धिताकयोः कः = तद्धिताककः, तद्धिताकक उपान्त्यो येषां ते = तद्धिताककोपान्त्याः, तद्धिताककोपान्त्याश्च पूरण्यश्च आख्याश्च = तद्धिताककोपान्त्यपूरण्याख्याः, प्रथमाबहु० जस् ।

**[मद्रिकाभार्यः]** मद्र । मद्रेषु भवा । भवेऽर्थे 'वृजि-मद्राद् देशात् कः' (६।३।३८) कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्-क्षिपकादीनाम्' (२।४।१११) इ । मद्रिका भार्या यस्य सः ।

**[वृजिकाभार्यः]** वृजि । वृजिषु भवा । भवेऽर्थे 'वृजि-मद्राद् देशात् कः' (६।३।३८) कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । वृजिका भार्या यस्य सः ।

**[लाक्षिकीभार्यः]** लाक्षा । लाक्षया रक्ता । रक्तेऽर्थे 'लाक्षा-रोचनादिकण्' (६।२।२) इकण्प्र० → इक । 'अवर्णेवर्णस्य' (७।४।६८) आलोपः । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'अस्य ङ्या लुक्' (२।४।८६) अलोपः । लाक्षिकी भार्या यस्य सः ।

**[लाक्षिकीबृहतिकः]** बृहत् । 'अधातूदृदितः' (२।४।२) ङी । बृहत्येव । 'तनु-पुत्रा-ऽणु-बृहती-शून्यात् सूत्र-कृत्रिम-निपुणा-ऽऽच्छादन०' (७।३।२३) कप्र० । 'ङ्यादीदूतः के' (२।४।१०४) ह्रस्वः । 'आत्' (२।४।१८) आप्प्र० → आ । लाक्षिकी बृहतिका यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[लाक्षिकीदेश्या]** ईषदपरिसमाप्ता लाक्षिकी । 'अतमबादेरीषदसमाप्ते कल्पप्-देश्यप्-देशीयर्' (७।३।११) देश्यप्प्र० → देश्य । 'आत्' (२।४।१८) आप्प्र० → आ ।

卐 **[रौचनिकीकल्पा]** 'रुचि अभिप्रीत्यां च' (९३८) रुच् । रुच्यते । 'अनट्' (५।३।१२४) अनट्प्र० → अन । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'आत्' (२।४।१८) आप्प्र० → आ । रोचनया रक्ता । 'लाक्षा-रोचनादिकण्' (६।२।२) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ । अवर्णेवर्णस्य (७।४।६८) आलोपः । 'अणञेयेकण्०' (२।४।२०) ङी । ईषदपरिसमाप्ता रौचनिकी । 'अतमबादेरीषदसमाप्ते कल्पप्०' (७।३।११) कल्पप्प्र० → कल्प । 'आत्' (२।४।१८) आप्प्र० → आ ।

卐 बृहद्वृत्तौ-रौचनिकीचरी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

卐 **[रौचनिकीरूपा]** प्रशस्ता रौचनिकी । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० → रूप । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[मद्रिकायते]** मद्रिका इवाऽऽचरति । 'क्यङ्' (३।४।२६) क्यङ्प्र० → य । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[वृजिकामानिनी]** बुधिं (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन्, वृजिकापूर्व० । वृजिकां (आत्मानं) मन्यते । 'मन्याण्णिन्' (५।१।११६) णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'स्त्रियां नृतोऽस्वस्त्रादेर्डीः' (२।४।१) डी ।

**[कारिकाभार्यः]** 'डुकृंग् करणे' (८८८) कृ । करोतीति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । कारिका भार्या यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[हारिकाभार्यः]** 'हृंग् हरणे' (८८५) हृ । हरतीति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । हारिका भार्या यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[वैलेपिकम्]** 'लिपींत् उपदेहे' (१३२४) लिप्, विपूर्व० । विलिम्पतीति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । विलेपिक-(का)या धर्म्यम् । 'षष्ठ्या धर्म्ये' (६।४।५०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । 'अवर्णवर्णस्य' (७।४।६८) अन्त्यस्वरादिलोपः ।

**[आनुलेपिकम्]** अनुलेपिक(का)या धर्म्यम् । 'ऋन्नरादेरण्' (६।४।५१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ ।

**[कारिकाकल्पा]** ईषदपरिसमाप्ता कारिका । 'अतमबादेरीषदसमाप्ते०' (७।३।११) कल्पप्प्र० → कल्प । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[पाचिकारूपा]** 'डुपचींष् पाके' (८९२) पच् । पचतीति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । प्रशस्ता पाचिका । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० → रूप । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[कारिकायते]** कारिका इवाऽऽचरति । 'क्यङ्' (३।४।२६) क्यङ्प्र० → य । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[पाचिकामानिनी]** बुधिं (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन्, पाचिकापूर्व० । आत्मानं पाचिकां मन्यते । 'मन्याण्णिन्' (५।१।११६) णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'स्त्रियां नृतोऽस्वस्त्रादेर्डीः' (२।४।१) डी ।

**[द्वितीयाभार्यः]** द्वि । द्वयोः पूरणी । 'द्वेस्तीयः' (७।१।१६५) तीयप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । द्वितीया भार्या यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

---

卐 इदमुदाहरणं बृहद्वृत्तौ नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[पञ्चमीभार्यः]** पञ्चन् । पञ्चानां पूरणी । 'नो मट्' (७।१।१५९) मट्प्र० ⟶ म । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।१११) अलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । पञ्चमी भार्या यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[द्वितीयाकल्पा]** ईषदपरिसमाप्ता द्वितीया । 'अतमबादेरीषदसमाप्ते०' (७।३।११) कल्पप्प्र० ⟶ कल्प । 'आत्' (२।४।१८) आप्प्र० ⟶ आ ।

**[पञ्चमीदेश्या]** ईषदपरिसमाप्ता पञ्चमी । 'अतमबादेरीषदसमाप्ते कल्पप्-देश्यप्-देशीयर्' (७।३।११) देश्यप्प्र० ⟶ देश्य । 'आत्' (२।४।१८) आप्प्र० ⟶ आ ।

**[पञ्चमीयते]** पञ्चमी । पञ्चमीवाऽऽचरति । 'क्यङ्' (३।४।२६) क्यङ्प्र० ⟶ य । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[षष्ठीमानिनी]** बुधिं (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन् । षष्ठीं मन्यते । 'मन्याण्णिन्' (५।१।११६) णिन्प्र० ⟶ इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

**[दत्ताभार्यः]** 'डुदांग्क् दाने' (१।१।३८) दा । देयादेनाम् । 'तिक्कृतौ नाम्नि' (५।१।७१) क्तप्र० ⟶ त । 'दत्' (४।४।१०) दा० ⟶ दत्० । 'आत्' (२।४।१८) आप्प्र० ⟶ आ । दत्ता भार्या यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[गुप्ताभार्यः]** 'गुपच् व्याकुलत्वे' (११९२) गुप् (?) ('गुपौ रक्षणे' (३३२) गुप्) । गोपाय्यादेनां = गुप्ता । 'तिक्कृतौ नाम्नि' (५।१।७१) क्तप्र० ⟶ त । 'आत्' (२।४।१८) आप्प्र० ⟶ आ । गुप्ता भार्या यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[दत्तारूपा]** प्रशस्ता दत्ता । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० ⟶ रूप । 'आत्' (२।४।१८) आप्प्र० ⟶ आ ।

**[गुप्तापाशा]** निन्द्या गुप्ता । 'निन्द्ये पाशप्' (७।३।४) पाशप्प्र० ⟶ पाश । 'आत्' (२।४।१८) आप्प्र० ⟶ आ ।

**[गुप्तामानिनी]** बुधिं (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन् । गुप्तां मन्यते । 'मन्याण्णिन्' (५।१।११६) णिन्प्र० ⟶ इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

**[पाकभार्यः]** 'डुपचींष् पाके' (८९२) पच् । पचनम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० ⟶ अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'क्तेऽनिटश्चजोः क-गौ घिति' (४।१।१११) च० ⟶ क० । 'आत्' (२।४।१८) आप्प्र० ⟶ आ । पाका भार्या यस्य सः । 'परतः स्त्री०' (३।२।४९) पुंवत् । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[मूकभार्यः]** 'मूङ् बन्धने' (६०१) मू । वाचं मवत इति । 'विचि-पुषि-मुषि-शुष्यवि-सृ-वृ-शु-सु-भू-धू-मू-नी-वीभ्यः कित्' (उणा० २२) कित् कप्र० । 'आत्' (२।४।१८) आप्प्र० ⟶ आ । मूका भार्या यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[जल्पाकभार्यः]** रप (३३५) - लप (३३६) - 'जल्प व्यक्ते वचने' (३३७) जल्प् । जल्पतीत्येवंशीला । 'वृङ् - भिक्षि-लुण्टि-जल्पि-कुट्टाट्टाकः' (५।२।७०) टाकप्र० ⟶ आक । 'आत्' (२।४।१८) आप्प्र० ⟶ आ । जल्पाका भार्या यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[कामुककल्पा]** 'कमूङ् कान्तौ' (७८९) कम् । 'कमेर्णिङ्' (३।४।२) णिङ्प्र० → इ । कामयते । 'शॄ-कम-गम-हन-वृष-भू-स्थ उकण्' (५।२।४०) उकण्प्र० → उक । 'णेरनिटि' (४।३।८३) णिङ्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ । ईषदपरिसमाप्ता कामुका । 'अतमबादेरीषदसमाप्ते कल्पप्०' (७।३।११) कल्पप्प्र० → कल्प । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[जागरूकरूपा]** 'जागृक् निद्राक्षये' (१०९३) जागृ । जागर्त्तीत्येवंशीला । 'जागुः' (५।२।४८) ऊकप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'आत्' (२।४।१८) आप्प्र० → आ । प्रशस्ता जागरूका । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० → रूप । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[लुण्टाकायते]** लुण्टतीत्येवंशीला । 'वृङ्-भिक्षि-लुण्टि-जल्पि-कुट्टाट्टाकः' (५।२।७०) टाकप्र० → आक । 'आत्' (२।४।१८) आप्प्र० → आ । लुण्टाका इवाऽऽचरति । 'क्यङ्' (३।४।२६) क्यङ्प्र० → य । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव्प्र० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[कुट्टाकंमानिनी]** कुट्टाकां मन्यते । 'मन्याण्णिन्' (५।१।११६) णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

एषु चतुर्ष्वपि 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) पुंवत् ॥छ॥

तद्धितः स्वरवृद्धिहेतुररक्त-विकारे ॥३।२।५५॥

**[स्वरवृद्धिहेतुररक्तविकारे]** स्वरस्य वृद्धिः = स्वरवृद्धिः, स्वरवृद्धेर्यो हेतुः = स्वरवृद्धिहेतुः । रक्तश्च विकारश्च = रक्तविकारम्, न रक्तविकारं = अरक्तविकारम्, 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् ।

**[माथुरीभार्यः]** मथुरायां भवा । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलोपः । 'अणञेयेकण्०' (२।४।२०) ङी । माथुरी भार्या यस्य सः ।

**[स्रौघ्नीभार्यः]** सुघ्नदेशेषु भवा । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'अणञेयेकण्०' (२।४।२०) ङी । स्रौघ्नी भार्या यस्य सः ।

**[वैदिशीभार्यः]** विदिशा । विदिशायां भवा । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलोपः । 'अणञेयेकण्०' (२।४।२०) ङी । वैदिशी भार्या यस्य सः ।

**[वैदर्भीभार्यः]** विदर्भा । विदर्भायां भवा । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलोपः । 'अणञेयेकण्०' (२।४।२०) ङी । वैदर्भी भार्या यस्य सः ।

**[सौतङ्गमीभार्यः]** सुतङ्गम । सुतङ्गमस्याऽपत्यं स्त्री । 'सुतङ्गमादेरिञ् (६।२।८५) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'इञ इतः' (२।४।७१) ङी । सौतङ्गमी भार्या यस्य सः ।

**[कार्तवीर्यीभार्यः]** कृतवीर्य । कृतवीर्यस्याऽपत्यम् । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आर् । 'अणञेयेकण्०' (२।४।२०) ङी । कार्तवीर्यी भार्या यस्य सः ।

**[माथुरीदेश्या]** ईषदपरिसमाप्ता माथुरी । 'अतमबादेरीषदसमाप्ते०' (७।३।११) कल्पप्प्र० → कल्प(?) (देश्यप्प्र० → देश्य) । 'आत्' (२।४।१८) आप्प्र० → आ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

卐 **[नादेयीरूपा]** नदी । नद्यां भवा । 'नद्यादेरेयण्' (६।३।२) एयण्प्र० ⟶ एय । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलोपः । 'अणञेयेकण्०' (२।४।२०) ङी । प्रशस्ता नादेयी । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० ⟶ रूप । 'आत्' (२।४।१८) आप्प्र० ⟶ आ ।

**[सौतङ्गमीयते]** सौतङ्गमी । सौतङ्गमीवाऽऽचरति । 'क्यङ्' (३।४।२६) क्यङ्प्र० ⟶ य । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[वैदर्भीमानिनी]** वैदर्भी मन्यते । 'मन्याण्णिन्' (५।१।११६) णिन्प्र० ⟶ इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । प्र० सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलोपः ।

**[स्रौघ्नीमानिनी]** स्रौघ्नीं मन्यते । 'मन्याण्णिन्' (५।१।११६) णिन्प्र० ⟶ इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । प्र० सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[काण्डलावभार्यः]** 'लूग्श् छेदने' (१५१९) लू । काण्डं लुनातीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० ⟶ अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'अणञेयेकण्०' (२।४।२०) ङी । काण्डलावी भार्या यस्य सः । 'परतः स्त्री०' (३।२।४९) पुंवत् । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[अर्द्धप्रस्थभार्यः]** अर्द्धप्रस्थे भवा । 'भवे' (६।३।१२३) अण्प्र० ⟶ अ । 'अर्द्धात् परिमाणस्याऽनतो वा त्वादेः' (७।४।२०) उभयपदवृद्धिनिषेधः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'अणञेयेकण्०' (२।४।२०) ङी ।+ अर्द्धप्रस्थी भार्या यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[शोभनतरभार्यः]** शोभनतरा भार्या यस्य सः ।

**[मध्यमभार्यः]** मध्यमा भार्या यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । 'परतः स्त्री पुंवत् स्त्र्येकार्थेऽनूङ्' (३।२।४९) पुंवत् ।

**[वैयाकरणभार्यः]** व्याकरण । व्याकरणं वेत्त्यधीते वा । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० ⟶ अ । 'लोकात्' (१।१।३) व् पाठउ विश्लेषियइ । 'य्वः पदान्तात् प्रागैदौत्' (७।४।५) "ऐत्" आगमः । 'अणञेयेकण्०' (२।४।२०) ङी । वैयाकरणी भार्या यस्य सः । अत्र स्वरस्थाने न वृद्धिः, किन्तु वृद्धिरागमः । 'परतः स्त्री०' (३।२।४९) पुंवत् ।

**[काषायबृहतिकः]** कषाय । कषायेण रक्ता । 'रागाट्टो रक्ते' (६।२।१) अण्प्र० ⟶ अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'अणञेयेकण्०' (२।४।२०) ङी । बृहृ (५५९) -卐卐'बृहु शब्दे च' (५६०) बृह् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) बृन्ह् । बृंहतीति । 'द्रुहि-बृहि-महि-पृषिभ्यः कतृः' (उणा० ८८४) किद् अतृप्र० ⟶ अत् । 'अधातूदृदितः' (२।४।२) ङी । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः । बृहत्येव । 'तनु-पुत्रा-ऽणु-बृहती-शून्यात्-सूत्र-कृत्रिम-निपुणा-ऽऽच्छादन०' (७।३।२३) कप्र० । 'आत्' (२।४।१८) आप्प्र० ⟶ आ । 'ङ्यादीदूतः के' (२।४।१०४) ह्रस्वः । काषायी बृहतिका अस्य सः ।

**[माञ्जिष्ठबृहतिकः]** मञ्जिष्ठा । मञ्जिष्ठया रक्ता । 'रागाट्टो रक्ते' (६।२।१) अण्प्र० ⟶ अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलोपः । 'अणञेयेकण्०' (२।४।२०) ङी । बृहतिका पूर्ववत् । माञ्जिष्ठी बृहतिका यस्य सः ।

---

卐 बृहद्वृत्तौ - नादेयीचरी । P. + अर्द्धप्रस्था ।

卐卐 उणादौ-धातुपारायणे च 'बृह वृद्धौ' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[लौहेषः]** लोह । लोहस्य विकारः । 'विकारे' (६।२।३०) अण्प्र० । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ । 'अणञेयेकण्०' (२।४।२०) ङी । लौही ईषा यस्य सः ।

**[खादिरेषः]** खदिरस्य विकारः । 'विकारे' (६।२।३०) अण्प्र० । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अणञेयेकण्०' (२।४।२०) ङी । खादिरी ईषा यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । 'परतः स्त्री०' (३।२।४९) पुंवत् ॥छ॥

**स्वाङ्गान्ङीर्जातिश्चाऽमानिनि ॥३।२।५६॥**

**[स्वाङ्गात्]** स्वं च तद् अङ्गं च = स्वाङ्गम्, तस्मात् ।

**[अमानिनि]**卐 न मानी = अमानी, तस्मिन् ।

**[दीर्घकेशीभार्यः]** दीर्घाः केशा यस्यां(याः) सा । 'असह-नञ्-विद्यमानपूर्वपदात् स्वाङ्गादक्रोडादिभ्यः' (२।४।३८) ङी । दीर्घकेशी भार्या यस्य सः ।

**[चन्द्रमुखीभार्यः]** चन्द्रवत् मुखं यस्याः सा । 'नख-मुखादनाम्नि' (२।४।४०) ङी । चन्द्रमुखी भार्या यस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[कलकण्ठीदेश्या]** कलकण्ठ । कलः कण्ठो यस्याः सा । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । ईषदपरिसमाप्ता कलकण्ठी । 'अतमबादेरीषदसमाप्ते कल्पप्-देश्यप्-देशीयर्' (७।३।११) देश्यप्प्र० → देश्य । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[तनुगात्रीचरी]** तनु-सूक्ष्मं गात्रं यस्याः सा । 'वयस्यनन्त्ये' (२।४।२१) ङी । भूतपूर्वा तनुगात्री । 'भूतपूर्वे प्चरट्' (७।२।७८) प्चरट्प्र० → चर । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[चन्द्रमुखीयते]** चन्द्रमुखी इवाऽऽचरति । 'क्यङ्' (३।४।२६) क्यङ्प्र० → य । वर्त्त० ते ।

**[कठीभार्यः]** कठ । कठं (कठेन प्रोक्तं) वेत्त्यधीते वा । 'तद्वेत्त्यधीते' (६।२।११७) अण्प्र० (?) । ('तेन प्रोक्ते' (६।३।१८१) अण्प्र०) । 'प्रोक्तात्' (६।२।१२९) अण्लोपः । 'जातेरयान्त-नित्यस्त्री-शूद्रात्' (२।४।५४) ङी । कठी भार्या यस्य सः ।

**[बह्वृचीभार्यः]** बहु । 'स्वरादुतो गुणादखरोः' (२।४।३५) ङी । बह्व्य ऋचो यस्याः सा । 'परतः स्त्री पुंवत्०' (३।२।४९) पुंवत् । 'जातेरयान्त-नित्यस्त्री-शूद्रात्' (२।४।५४) ङी । बह्वृची भार्या यस्य सः ।

**[बह्वृचीचरी]** भूतपूर्वा बह्वृची । 'भूतपूर्वे प्चरट्' (७।२।७८) प्चरट्प्र० → चर । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[शूद्राभार्यः]** शूद्रा भार्या यस्य सः ।

**[क्षत्रियाभार्यः]** क्षत्रिया भार्या यस्य सः ।

**[शूद्रापाशा]** निन्द्या शूद्रा । 'निन्द्ये पाशप्' (७।३।४) पाशप्प्र० → पाश । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[क्षत्रियादेश्या]** ईषदपरिसमाप्ता क्षत्रिया । 'अतमबादेरीषदसमाप्ते०' (७।३।११) देश्यप्प्र० → देश्य । 'आत्' (२।४।१८) आप्प्र० → आ ।

---

P. 卐 न मानिन् = अमानिन्, तस्मिन् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[पटुभार्यः]** पटु । 'स्वरादुतो गुणादखरोः' (२।४।३५) ङी । पट्वी भार्या यस्य सः । 'परतः स्त्री०' (३।२।४९) पुंवत् ।

**[सकेशभार्यः]** सह केशैर्वर्त्तते । 'भाज-गोण-नाग-स्थल०' (२।४।३०) ङी । 卐 सकेशी भार्या यस्य सः । 'परतः स्त्री०' (३।२।४९) पुंवत् ।

**[दीर्घकेशमानिनी]** दीर्घकेशीं मन्यते । 'मन्याण्णिन्' (५।१।११६) णिन्प्र० → इन् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।२०) ङी । 'क्यङ्-मानि-पित्तद्धिते' (३।४।२६) पुंवत् ।

**[कठमानिनी]** बुधिं (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन् । कठीं मन्यते । 'मन्याण्णिन्' (५।१।११६) णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) वृद्धिः । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी । 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) पुंवत् ।।छ।।

**पुंवत् कर्मधारये ।।३।२।५७।।**

**[पुंवत्]** पुम्स् । पुमानिव । 'स्यादेरिवे' (७।१।५२) वत्प्र० । 'पदस्य' (२।१।८९) सलोपः । 'तौ मु-मो व्यञ्जने स्वौ' (१।३।१४) अनुस्वारः ।

**[कर्मधारये]** कर्मणो धारयः = कर्मधारयस्तस्मिन् ।

**[कल्याणमनोज्ञा]** कल्याण । 'नवा शोणादेः' (२।४।३१) ङी । कल्याणी चासौ मनोज्ञा च । अनेन पुंवत् ।

**[मद्रिकभार्या]** मद्र । मद्रेषु भवा । 'वृजि-मद्राद् देशात् कः' (६।३।३८) कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्-क्षिपकादीनाम्' (२।४।१११) इ । मद्रिका चासौ भार्या च ।

**[लाक्षिकबृहतिका]** लाक्षिका चासौ बृहतिका च ।

**[पाचकवृन्दारिका]** वृन्दमस्याऽस्ति । 'वृन्दादारकः' (७।२।११) आरकप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । पाचिका चासौ वृन्दारिका च ।

**[कारकवृन्दारिका]** कारिका चासौ वृन्दारिका च ।

**[पञ्चमवृन्दारिका]** पञ्चमी चासौ वृन्दारिका च ।

**[षष्ठवृन्दारिका]** षष्ठी चासौ वृन्दारिका च ।

**[दत्तवृन्दारिका]** दत्ता चासौ वृन्दारिका च ।

**[गुप्तवृन्दारिका]** गुप्ता चासौ वृन्दारिका च ।

**[स्रौघ्नवृन्दारिका]** स्रौघ्नी चासौ वृन्दारिका च ।

**[दीर्घकेशवृन्दारिका]** दीर्घकेशी चासौ वृन्दारिका च ।

**[कठवृन्दारिका]** कठी चासौ वृन्दारिका च ।

---

卐 श० म० न्यासानुसंधाने - 'असह-नञ्०' (२।४।३८) इति सूत्रे सहपूर्वस्य पर्युदासत्वात् ततो ङीर्न भवतीति सकेशा भार्या यस्येति आबन्तस्यैव विग्रहे पुवद्भावो भवत्येव ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[बह्वृचवृन्दारिका]** बह्वृची चासौ वृन्दारिका च । अनेन सर्वत्र पुंवत् ।

**[वातण्ड्यवृन्दारिका]** वतण्ड । वतण्डस्याऽपत्यं वृद्धं आङ्गिरसः । 'वतण्डात्' (६।१।४५) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'यञो डायन् च वा' (२।४।६७) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलोपः । 'स्त्रियां लुप्' (६।१।४६) यञ्लुप् । वतण्डी चासौ वृन्दारिका च । अनेन पुंवति सः पुनरेव यञ् आगतस्ततो वृद्धिः ।

**[गार्ग्यवृन्दारिका]** गर्ग । गर्गस्याऽपत्यम् । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'यञो डायन् च वा' (२।४।६७) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलोपः । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलोपः । गार्गी चासौ वृन्दारिका च । अनेन पुंवति सः पुनरेव यञ् आगतस्ततो वृद्धिः ।

**[कापोतपाक्यवृन्दारिका]** कपोतपाक । कपोतपाक एव । 'व्रातादस्त्रियाम्' (७।३।६१) ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ, स्त्री चेत् क(का)पोतपाका चासौ वृन्दारिका च । अनेन पुंवति यञ्(?)ञ्य आगतस्ततो वृद्धिः ।

**[कौञ्जायन्यवृन्दारिका]** कुञ्जस्याऽपत्यं स्त्री । 'स्त्रीबहुष्वायनञ्' (६।१।४८) आयनञ्प्र० → आयन । 'वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'जातेरयान्त-नित्यस्त्री-शूद्रात्' (२।४।५४) ङी । कौञ्जायनी चासौ वृन्दारिका च । अनेन पुंवद्भावे कृते 'कुञ्जादेर्ञायन्यः' (६।१।४७) ञायन्यप्र० → आयन्य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ ।

**[आङ्गवृन्दारिकाः]** अङ्ग । अङ्गस्याऽपत्यानि । 'पुरु-मगध-कलिङ्ग०' (६।१।११६) अण्प्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) अण्लुप् । 'स्वाङ्गादेरकृत-मित-जात-प्रतिपन्नाद् बहुव्रीहेः' (२।४।४६) ङी । आङ्ग्यश्च ता वृन्दारिकाश्च, अनेन पुंवत् ।

**[गर्ग्यवृन्दारिकाः]** गर्ग । गर्गस्यापत्यम् । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'यञो डायन् च वा' (२।४।६७) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलोपः । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलोपः-गार्गी । गार्ग्यश्च ता वृन्दारिकाश्च ।

**[ऐडविडवृन्दारिका]** इडविड् । इडविडोऽपत्यम् । 'राष्ट्र-क्षत्रियात् सरूपात् राजाऽपत्ये द्रिरञ्' (६।१।११४) अञ्प्र० । द्रेरञणोऽप्राच्य-भर्गादेः' (६।१।१२३) अञ्लुप् । इडविट् चासौ वृन्दारिका च । अनेन पुंवति पुनः अञ् आगते वृद्धिः ।

**[पार्थवृन्दारिका]** पृथ् । पृथोऽपत्यम् । 'राष्ट्र-क्षत्रियात् सरूपात् राजाऽपत्ये द्रिरञ्' (६।१।११४) अञ्प्र० । 'द्रेरञणोऽप्राच्य-भर्गादेः' (६।१।१२३) अञ्लुप् । पृथ् चासौ वृन्दारिका च । अनेन पुंवति पुनः अञ् आगते वृद्धिः ।

**[दारदवृन्दारिका]** दरद् । दरदोऽपत्यम् । 'पुरु-मगध-कलिङ्ग०' (६।१।११६) अण्प्र० । 'द्रेरञणोऽप्राच्य-भर्गादेः' (६।१।१२३) अण्लुप् । दरच्चासौ वृन्दारिका च । अनेन पुंवति पुनः अण् आगते वृद्धिः ।

**[औशिजवृन्दारिका]** उसि(शि)ज् । उसि(शि)जोऽपत्यम् । 'पुरु-मगध-कलिङ्ग०' (६।१।११६) अण्प्र० । 'द्रेरञणोऽप्राच्य-भर्गादेः' (६।१।१२३) अण्लुप् । उसि(शि)ज्(क्) चासौ वृन्दारिका च । अनेन पुंवति पुनः अण् आगते वृद्धिः ।

**[खट्वावृन्दारिका]** खट्वा चासौ वृन्दारिका च ।

**[ब्रह्मबन्धूवृन्दारिका]** ब्रह्मन् । बन्धु । ब्रह्मा बन्धुरस्याः सा । 'उतोऽप्राणिनश्चाऽयु-रज्ज्वादिभ्य ऊङ्' (२।४।७३) ऊङ्प्र० → ऊ । 'समानानां०' (१।२।१) दीर्घः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । ब्रह्मबन्धूः चासौ वृन्दारिका च ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## रिति ॥३।२।५८॥

**[रिति]** र् इदनुबन्धो यस्याऽसौ रित्, तस्मिन् ।

**[पटुजातीया]** पटु । 'स्वरादुतो गुणादखरोः' (२।४।३५) ङी । 'इवर्णादे०' (१।२।२१) व० । पट्वी प्रकाराऽस्याः सा । 'प्रकारे जातीयर्' (७।२।७५) जातीयर्प्र० → जातीय । अनेन पुंवत् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[पटुदेशीया]** ईषदपरिसमाप्ता पट्वी । 'अतमबादेरीषदसमाप्ते०' (७।३।११) देश्यप्प्र० → देश्य । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[मद्रकजातीया]** मद्रिका प्रकाराऽस्याः सा । 'प्रकारे जातीयर्' (७।२।७५) जातीयर्प्र० → जातीय । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[मद्रकदेशीया]** ईषदपरिसमाप्ता मद्रिका । 'अतमबादेरीषदसमाप्ते०' (७।३।११) देशीयर्प्र० → देशीय । 'आत्' (२।४।१८) आप्प्र० → आ । अनेन पुंवत् ।

**[पाचकजातीया]** पाचिका प्रकाराऽस्याः सा । 'प्रकारे जातीयर्' (७।२।७५) जातीयर्प्र० → जातीय । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[पाचकदेशीया]** ईषदपरिसमाप्ता पाचिका । 'अतमबादेरीषदसमाप्ते०' (७।३।११) देशीयर्प्र० → देशीय । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[पञ्चमजातीया]** पञ्चमी । पञ्चमी प्रकाराऽस्याः सा । 'प्रकारे जातीयर्' (७।२।७५) जातीयर्प्र० → जातीय । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[षष्ठदेशीया]** षट्(ष्) । षण्णां पूरणी = षष्ठी । 'षट्-कति-कतिपयात् थट्' (७।१।१६२) थट्प्र० → थ । 'तवर्गस्य श्चवर्ग०' (१।३।६०) थ० → ठ० । 'अणञेयेकण्०' (२।४।२०) ङी । ईषदपरिसमाप्ता षष्ठी । 'अतमबादेरीषदसमाप्ते०' (७।३।११) देशीयर्प्र० → देशीय । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[दत्तजातीया]** 'डुदांग्क् दाने' (११३८) दा । देयादेनाम् । 'तिक्कृतौ नाम्नि' (५।१।७१) क्तप्र० → त । 'दत्' (४।४।१०) दा० → दत्० । 'आत्' (२।४।१८) आप्प्र० → आ । दत्ता प्रकाराऽस्याः सा । 'प्रकारे जातीयर्' (७।२।७५) जातीयर्प्र० ।

**[गुप्तदेशीया]** 'गुपौ रक्षणे' (३३२) गुप् । गोपाय्यादेनाम् । 'तिक्कृतौ नाम्नि' (५।१।७१) क्तप्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ । ईषदपरिसमाप्ता गुप्ता । 'अतमबादेरीषदसमाप्ते०' (७।३।११) देशीयर्प्र० → देशीय ।

**[माथुरजातीया]** मथुरा । मथुरायां भवा । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'अणञेयेकण्०' (२।४।२०) ङी । माथुरी प्रकाराऽस्याः सा । 'प्रकारे जातीयर्' (७।२।७५) जातीयर्प्र० ।

**[स्रौघ्नदेशीया]** स्रुघ्नदेशेषु भवा । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ । 'अणञेयेकण्०' (२।४।२०) ङी । ईषदपरिसमाप्ता स्रौघ्नी । 'अतमबादेरीषदसमाप्ते०' (७।३।११) देशीयर्प्र० → देशीय । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[दीर्घकेशजातीया]** दीर्घाः केशा यस्यां(याः) सा । 'भाज-गोण-नाग०' (२।४।३०) ङी । दीर्घकेशी प्रकाराऽस्याः सा । 'प्रकारे जातीयर्' (७।२।७५) जातीयर्प्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[चन्द्रमुखदेशीया]** चन्द्रवन्मुखं यस्याः सा । 'नख-मुखादनाम्नि' (२।४।४०) ङी । ईषदपरिसमाप्ता चन्द्रमुखी । 'अतमबादे०' (७।३।११ देशीयर्प्र० → देशीय । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[कठजातीया]** कठ । कठेन प्रोक्तं वेत्त्यधीते वा । 'तद्वेत्त्यधीते' (६।२।११७) अण्प्र० (?) ('तेन प्रोक्ते' (६।३।१८१) अण्प्र०) । 'प्रोक्तात्' (६।२।१२९) अण्लुप् । 'जातेरयान्त-नित्यस्त्री-शूद्रात्' (२।४।५४) ङी । कठी प्रकाराऽस्याः सा । 'प्रकारे जातीयर्' (७।२।७५) जातीयर्प्र० → जातीय । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[बह्वृचदेशीया]** बह्वृची । ईषदपरिसमाप्ता बह्वृची । 'अतमबादेरीषदसमाप्ते०' (७।३।११) देशीयर्प्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[वातण्ड्यजातीया]** वतण्डी । वतण्डी प्रकाराऽस्याः सा । 'प्रकारे जातीयर्' (७।२।७५) जातीयर्प्र० । अनेन पुंवति पुनरेव यञि आगते वृद्धिः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[गार्ग्यदेशीया]** गार्गी । ईषदपरिसमाप्ता गार्गी । 'अतमबादेरीषदसमाप्ते०' (७।३।११) देशीयर्प्र० । अनेन पुंवत् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[कापोतपाक्यजातीया]** कपोत । 'डुपचींष् पाके' (८९२) पच् । कपोतं पचतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'न्यङ्कूद्ग-मेघाऽऽदयः' (४।१।११२) निपातः । कपोतपाक एव = क(का)पोतपाक्यः । 'व्रातादस्त्रियाम्' (७।३।६१) ञ्यप्र०, स्त्री चेत् क(का)पोतपाका प्रकाराऽस्याः सा । 'प्रकारे जातीयर्' (७।२।७५) जातीयर्प्र० । अनेन पुंवति पुनरेव ञ्ये आगते वृद्धिः ।

**[कौञ्जायन्यदेशीया]** कौञ्जायनी । ईषदपरिसमाप्ता को(कौ)ञ्जायनी । 'अतमबादेरीषदसमाप्ते०' (७।३।११) देशीयर्प्र० । 'आत्' (२।४।१८) आप्प्र० → आ । अनेन पुंवति 'कुञ्जादेर्ञायन्यः' (६।१।४७) ञायन्यप्र० → आयन्य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ।

**[अङ्गजातीया]** अ(आ)ङ्गी । आङ्गी प्रकाराऽस्याः सा । 'प्रकारे जातीयर्' (७।२।७५) जातीयर्प्र० ।

**[गर्गदेशीया]** गार्गी । ईषदपरिसमाप्ता गार्गी । 'अतमबादेरीषदसमाप्ते०' (७।३।११) देशीयर्प्र० । अनेन पुंवति 'यञञोऽश्यापर्णान्तगोपवनादेः' (६।१।१२६) यञ्लुप् ।

**[ऐडविडजातीया]** इडविट्(ड्) । इडविड् प्रकाराऽस्याः सा । 'प्रकारे जातीयर्' (७।२।७५) जातीयर्प्र० ।

**[पार्थदेशीया]** पृथ् । ईषदपरिसमाप्ता पृथ् । 'अतमबादेरीषदसमाप्ते०' (७।३।११) देशीयर्प्र० → देशीय । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[दारदजातीया]** दरद् प्रकाराऽस्याः सा । 'प्रकारे जातीयर्' (७।२।७५) जातीयर्प्र० → जातीय । 'आत्' (२।४।१८) । आप्प्र० → आ ।

**[औशिजदेशीया]** उसि(शि)ज् । ईषदपरिसमाप्ता उसि(शि)ज्(क्) । 'अतमबादेरीषदसमाप्ते०' (७।३।११) देशीयर्प्र० → देशीय । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[कुटीजातीया]** कुट । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङीप्र० । कुटी प्रकाराऽस्याः सा । 'प्रकारे जातीयर्' (७।२।७५) जातीयर्प्र० → जातीय ।

**[द्रुणीदेशीया]** द्रुण । 'जातेरयान्त०' (२।४।५४) ङी । ईषदपरिसमाप्ता द्रुणी । 'अतमबादेरीषदसमाप्ते०' (७।३।११)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देशीयर्प्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[करभोरूजातीया]** करभ । ऊरू । करभस्येव ऊरू यस्याः सा । 'उपमान-सहित-संहित-सह-शफ-वाम-लक्ष्मणाद्यूरोः' (२।४।७५) ऊङ्प्र० → ऊ । करभोरूः प्रकाराऽस्याः सा । 'प्रकारे जातीयर्' (७।२।७५) जातीयर्प्र० ।

**[मद्रबाहूदेशीया]** मद्रे बाहू यस्याः सा । 'बाह्वन्त-कद्रु-कमण्डलोर्नाम्नि' (२।४।७४) ऊङ्प्र० → ऊ । ईषदपरिसमाप्ता मद्रबाहूः । 'अतमबादेरीषदसमाप्ते०' (७।३।११) देशीयर्प्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।।छ।।

**त्व-ते-गुणः** ।।३।२।५९।।

**[त्वते]** त्वश्च तश्च, तस्मिन् ।

**[पटुत्वम्, पटुता]** पट्वी । पट्व्याः भावः । 'भावे त्व-तल्' (७।१।५५) त्व-तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ । अनेन पुंवत् ।

**[एतत्वम्, एतता]** एत । 'श्येतैत-हरित-भरत-रोहिताद् वर्णात् तो नश्च' (२।४।३६) ङी - तस्य न० । एन्याः भावः । 'भावे त्व-तल्' (७।१।५५) त्व-तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० आ । अनेन पुंवत् ।

**[श्येतत्वम्, श्येतता]** श्येत । 'श्येतैत-हरित०' (२।४।३६) ङी-तस्य न० । श्येन्या भावः । 'भावे त्व-तल्' (७।१।५५) त्व-तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ । अनेन पुंवत् ।

**[पट्वीरूप्यम्]** पट्व्या आगतम् । 'नृ-हेतुभ्यो रूप्य-मयटौ वा' (६।३।१५६) रूप्यप्र० । सि-अम् ।

**[पट्वीमयम्]** पट्व्या आगतम् । 'नृ-हेतुभ्यो रूप्य-मयटौ वा' (६।३।१५६) मयट्प्र० → मय । सि-अम् ।

**[कठीत्वम्, कठीता]** कठ्या भावः ।

**[दत्तात्वम्, दत्ताता]** दत्ताया भावः ।

**[कर्त्रीत्वम्, कर्त्रीता]** 'डुकृंग् करणे' (८८८) कृ । करोतीति । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी । कर्त्र्या भावः । 'भावे त्व-तल्' (७।१।५५) त्व-तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[पाचकत्वम्, पाचकता]** पाचिकायाः भावः ।

**[मद्रकत्वम्, मद्रकता]** मद्रिकायाः भावः ।

**[आनुकूलिकत्वम्, आनुकूलिकता]** अनुकूल । अनुकूलं वर्त्तते । 'तं प्रत्यनोर्लोमेप-कूलात्' (६।४।२८) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । आनुकूलिक्या भावः ।

**[आक्षिकत्वम्, आक्षिकता]** अक्ष । अक्षैरिन्द्रियैश्चरति । 'चरति' (६।४।११) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अणञेयेकण्०' (२।४।२०) ङी । आक्षिक्याः भावः ।

**[द्वितीयत्वम्, द्वितीयता]** द्वितीयायाः भावः ।

**[पञ्चमत्वम्, पञ्चमता]** पञ्चम्याः भावः ।

**[माथुरत्वम्, माथुरता]** माथुर्याः भावः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[स्रौघ्नत्वम्, स्रौघ्नता]** स्रौघ्न्याः भावः ।

**[चन्द्रमुखत्वम्, चन्द्रमुखता]** चन्द्रमुख्याः भावः ।

**[सुकेशत्वम्, सुकेशता]** सुकेश्याः भावः । 'भावे त्व-तल्' (७।१।५५) त्व-तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ ।

"**सैन्याः** श्रियामनुपभोग**निरर्थकत्व**-मिथ्यापवादममृजन् वननिम्नगानाम् ।
सस्नुः पयः पपुरनेनिजुरम्बराणि जक्षुर्बिसं धृतविकाशिबिसप्रसूनाः" ॥१॥ [शिशुपालवधे - ४ सर्गे]

**[सैन्याः]** सेना । सेनां समवयति । 'सेनाया वा' (६।४।४८) ण्यप्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलोपः । प्र० जस् ।

**[निरर्थकत्व]** निरर्थका आनुभागः । निरर्थकाया भावः । 'भावे त्व-तल्' (७।१।५५) त्वप्र० ।

तदवितथमवादीर्यन्मम त्वं प्रियेति प्रियजनपरिभुक्तं यद् दुकूलं दधानः ।
卐 तदधिवसतिमागाः कामिनां मण्डनश्रीर्व्रजति हि **सफलत्वं** वल्लभालोकनेन ॥२॥ **[माघे]**

**[सफलत्वम्]** सफली । सफल्या भावः । 'भावे त्व-तल्' (७।१।५५) त्वप्र० । सि-अम् । मतान्तरे पुंवत् ।

**[रसवत्या धूमवत्त्वम्]** धूम । धूमं(मो) विद्यते यस्याः सा । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तो०' (२।१।९४) म० → व० । 'अधातूदृदितः' (२।४।२) ङी । धूमवत्या भावः । 'भावे त्व-तल्' (७।१।५५) त्वप्र० । मतान्तरे पुंवत् ।

**[शालाया दण्डित्वम्]** दण्ड । दण्डो विद्यते यस्यां सा । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'स्त्रियां नृतोऽस्वस्रादेर्डीः' (२।४।१) ङी । दण्डिन्या भावः । 'भावे' त्व-तल्' (७।१।५५) त्वप्र० । मतान्तरे पुंवत् ॥छ॥

**च्वौ क्वचित्** ॥३।२।६०॥

लक्ष्यानुरोधेन शिष्टप्रयोगानुसारेणेत्यर्थः ।

**[महद्भूता कन्या]** महत् । 'अधातूदृदितः' (२।४।२) ङी । 'भू सत्तायाम्' (१) भू । भवति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ । अमहती महतीभूता । 'कृ-भ्वस्तिभ्यां कर्म-कर्तृभ्यां प्रागतत्तत्त्वे च्विः' (७।२।१२६) च्विप्र० । अनेन पुंवत् ।

**[गोमतीभूता]** गो । गावो विद्यते(न्ते) यस्याः सा । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'अधातूदृदितः' (२।४।२) ङी । अगोमती गोमतीभूता । अत्र न पुंवत् ।

**[पट्वीभूता, पटूभूता]** पट्वी । अपट्वी पट्वीभूता । 'कृ-भ्वस्तिभ्यां कर्म-कतृभ्यां०' (७।२।१२६) च्विप्र० । मतान्तरे विकल्पे पुंवति । 'ईश्च्वाववर्णस्याऽनव्ययस्य' (४।३।१११) ऊ(?) ('दीर्घश्च्वि-यङ्०' (४।३।१०८) ऊ) ।

**[मृद्वीकृता, मृदूकृता]** मृद्वी । अमृद्वी मृद्वीभूता(कृता) । 'कृ-भ्वस्तिभ्यां कर्म-कर्तृभ्यां०' (७।२।१२६) च्विप्र० । मतान्तरे विकल्पे पुंवति 'ईश्च्वाववर्णस्याऽनव्ययस्य' (४।३।१११) ऊ(?) ('दीर्घश्च्वि-यङ्०' (४।३।१०८) ऊ) ॥छ॥

---

卐 श० म० न्यासानुसन्धाने - तदधिवसतिमित्यस्य स्थाने मदधिवसतिमिति पाठः समुचितः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सर्वादयोऽस्यादौ** ।।३।२।६१।।

**[सर्वादयः]** सर्व आदिर्येषां ते ।

**[अस्यादौ]** सि(:) आदिर्यस्याऽसौ स्यादिः, न स्यादिरस्यादिस्तस्मिन् ।

**[सर्वस्त्रियः]** सर्व । 'आत्' (२।४।१८) आप्प्र० → आ, स्त्री । सर्वासां स्त्रियः ।

**[भवत्पुत्रः]** भवत्याः पुत्रः ।

**[एकक्षीरम्]** एक । 'आत्' (२।४।१८) आप्प्र० → आ । एकस्याः क्षीरम् ।

**[एकरूप्यम्]** एकस्या आगतम् । 'नृ-हेतुभ्यो रूप्य-मयटौ वा' (६।३।१५६) रूप्यप्र० । अनेन पुंवत् ।

**[एकमयम्]** एकस्या आगतम् । 'नृ-हेतुभ्यो रूप्य-मयटौ वा' (६।३।१५६) मयट्प्र० → मय । अनेन पुंवत् ।

**[तथा]** तद् । तृतीया टा । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'आत्' (२।४।१८) आप्प्र० → आ । 'टौस्येत्' (१।४।१९) आ० → ए० । 'एदैतोऽयाय्' (१।२।२३) अय् । तया प्रकृत्या । 'प्रकारे था' (७।२।१०२) थाप्र० । 'ऐकार्थ्ये' (३।२।८) टालोपः । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[यथा]** यद् । तृतीया टा । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'आत्' (२।४।१८) आप्प्र० → आ । 'टौस्येत्' (१।४।१९) आ० → ए० । 'एदैतोऽयाय्' (१।२।२३) अय् । यया प्रकृत्या । 'प्रकारे था' (७।२।१०२) थाप्र० । 'ऐकार्थ्ये' (३।२।८) टालोपः । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[तदा]** तद् । सप्तमी ङि → इ । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'आत्' (२।४।१८) आप्प्र० → आ । 'आपो ङितां यै-यास्-यास्-याम्' (१।४।१७) ङि० → याम् । 'सर्वादेर्डस्पूर्वाः' (१।४।१८) डस्याम् → अस्याम् । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलोपः । तस्यां वेलायाम् । 'किम्-यत्-तत्-सर्वैका-ऽन्यात् काले दा' (७।२।९५) दाप्र० । 'ऐकार्थ्ये' (३।२।८) ङिलोपः ।

**[यदा]** यद् । सप्तमी ङि → इ । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'आत्' (२।४।१८) आप्प्र० → आ । 'आपो ङितां यै-यास्-यास्-याम्' (१।४।१७) ङि० → याम् । 'सर्वादेर्डस्पूर्वाः' (१।४।१८) डस्याम् → अस्याम् । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलोपः । यस्यां वेलायाम् । 'किम्-यत्-तत्०' (७।२।९५) दाप्र० । 'ऐकार्थ्ये' (३।२।८) ङिलोपः ।

**[कदा]** किम् । सप्तमी ङि → इ । 'किमः कस्तसादौ च' (२।१।४०) किम्० → क० । 'आत्' (२।४।१८) आप्प्र० → आ । 'आपो ङितां यै०' (१।४।१७) याम् । 'सर्वादेर्डस्पूर्वाः' (१।४।१८) डस्याम् → अस्याम् । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलोपः । कस्यां वेलायाम् । 'किम्-यत्-तत्०' (७।२।९५) दाप्र० । 'ऐकार्थ्ये' (३।२।८) ङिलोपः ।

**[सर्वदा]** सर्व । 'आत्' (२।४।१८) आप्प्र० → आ । सप्तमी ङि → इ । 'आपो ङितां यै०' (१।४।१७) याम् । 'सर्वादेर्डस्पूर्वाः' (१।४।१८) डस्याम् → अस्याम् । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलोपः । सर्वस्यां वेलायाम् । 'किम्-यत्-तत्०' (७।२।९५) दाप्र० । ऐकार्थ्ये (३।२।८) ङिलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अन्यदा]** अन्य । 'आत्' (२।४।१८) आप्प्र० → आ । सप्तमी ङि → इ । 'आपो ङितां यै-यास्०' (१।४।१७) याम् । 'सर्वादेर्डस्पूर्वाः' (१।४।१८) डस्याम् → अस्याम् । 'ङित्यन्त्यस्वरादेः' (२।१।११४) आलोपः । अन्यस्यां वेलायाम् । 'किम्-यत्-तत्-सर्वैका०' (७।२।९५) दाप्र० । 'ऐकार्थ्ये (३।२।८) ङिलोपः ।

**[तर्हि]** तस्यामनद्यतनायां वेलायाम् । 'अनद्यतने र्हिः' (७।२।१०१) र्हिप्र० । 'ऐकार्थ्ये' (३।२।८) ङिलोपः ।

**[यर्हि]** यस्यामनद्यतनायां वेलायाम् । 'अनद्यतने र्हिः' (७।२।१०१) र्हिप्र० । 'ऐकार्थ्ये' (३।२।८) ङिलोपः ।

**[कर्हि]** कस्यामनद्यतनायां वेलायाम् । 'अनद्यतने र्हिः' (७।२।१०१) र्हिप्र० । 'ऐकार्थ्ये' (३।२।८) ङिलोपः । अनेन पुंवति ततस्तथैव ।

**[सर्वकाम्यति]** सर्वा । सर्वामिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) काम्यप्र० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[भवत्काम्यति]** भवती । भवतीमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) काम्यप्र० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[एककाम्यति]** एका । एकामिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) काम्यप्र० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[सर्वप्रियः]** सर्वा प्रियाऽस्य सः । अनेन पुंवत् । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[सर्वमनोज्ञः]** सर्वा मनोज्ञाऽस्य सः । अनेन पुंवत् । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[सर्वकभार्यः]** कुत्सिता सर्वा । 'कुत्सिता-ऽल्पा-ऽज्ञाते' (७।३।३३) कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । सर्विका भार्या यस्य सः । अनेन पुंवत् । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[विश्वकभार्यः]** कुत्सिता विश्वा । 'कुत्सिता-ऽल्पा-ऽज्ञाते' (७।३।३३) कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । विश्विका भार्या यस्य सः । अनेन पुंवत् । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[कन्यापुरम्]** कन्यायाः पुरम् ।

**[कुमारीनिवासः]** कुमार्या निवासः ।

**[उत्तरपूर्वस्यै]** उत्तरा च पूर्वा च । अनेन पुंवत् । तस्यै, 'आपो ङितां०' (१।४।१७) यै । 'सर्वादेर्डस्पूर्वाः' (१।४।१८) डस्पूर्वा० यै । 'ङित्यन्त्य०' (२।१।११४) आलोपः ।

**[दक्षिणोत्तरपूर्वाणाम्]** दक्षिणा च उत्तरा च पूर्वा च = दक्षिणोत्तरपूर्वाः, तेषाम् । अनेन पुंवत् । 'न सर्वादिः' (१।४।१२) द्वन्द्वसमासे सर्वादित्वाऽभावः ।।छ।।

**मृगक्षीरादिषु वा ।।३।२।६२।।**

**[मृगक्षीरादिषु]** मृगक्षीर आदिर्येषां ते = मृगक्षीरादयस्तेषु ।

**[मृगक्षीरम्, मृगीक्षीरम्]** मृग्याः क्षीरम् ।

**[मृगपदम्, मृगीपदम्]** मृग्याः पदम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[मृगशावः, मृगीशावः]** मृग्याः शावः ।

**[कुक्कुटाण्डम्, कुक्कुट्यण्डम्]** कुक्कुट । 'जातेरयान्त-नित्यस्त्री-शूद्रात्' (२।४।५४) ङी । कुक्कुट्या अण्डम् ।

**[मयूराण्डम्, मयूर्यण्डम्]** मयूर्या अण्डम् ।

**[काकाण्डम्, काक्यण्डम्]** काक्या अण्डम् ।

**[काकशावः, काकीशावः]** काक्याः शावः ।।छ।।

**ऋदुदित्-तर-तम-रूप-कल्प-ब्रुव-चेलट्-गोत्र-मत-हते वा ह्रस्वश्च ।।३।२।६३।।**

**[ऋदुदित्]** ऋच्च उच्च = ऋदुतौ, ऋदुतावितावनुबन्धौ यस्याऽसौ ऋदुदित् ।

**[तरतमरूपकल्पब्रुवचेलट्गोत्रमतहते]** तरश्च तमश्च रूपश्च कल्पश्च ब्रुवश्च चेलट् च गोत्रं च मतश्च हतश्च = तरतमरूपकल्पब्रुवचेलट्गोत्रमतहतम्, तस्मिन् ।

**[पचन्तितरा, पचत्तरा, पचन्तीतरा]** 'डुपचींष् पाके' (८९२) पच् । पचतीति । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० ⟶ अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्य-शवः' (२।१।११६) अन्त्० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'अधातूदृदितः' (२।४।२) ङी । द्वयोर्मध्ये प्रकृष्टा पचन्ती । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० ⟶ तर । 'आत्' (२।४।१८) आप्प्र० ⟶ आ । अनेन ह्रस्वः - विकल्पे पुंवत् ।

**[श्रेयसितरा, श्रेयस्तरा, श्रेयसीतरा]** 'शंसू स्तुतौ च' (५५०) शंस्, प्रपूर्व० । प्रशस्यत इति । 'कृ-वृषि-मृजि-शंसि-गुहि-दुहि-जपो वा' (५।१।४२) क्यप्प्र० ⟶ य । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः । इदं प्रशस्यं (२), इदमनयोर्मध्येऽतिशयेन प्रशस्यं = श्रेयः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) ईयसुप्र० ⟶ ईयस् । 'प्रशस्यस्य श्रः' (७।४।३४) श्रः । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए । 'अधातूदृदितः' (२।४।२) ङी । द्वयोर्मध्ये प्रकृष्टा श्रेयसी । 'द्वयोर्विभज्ये०' (७।३।६) तरप्प्र० ⟶ तर । 'आत्' (२।४।१८) आप्प्र० ⟶ आ । अनेन ।

**[विदुषितरा, विद्वत्तरा, विदुषीतरा]** 'विदक् ज्ञाने' (१०९९) विद् । वेत्तीति । 'वा वेत्तेः क्वसुः' (५।२।२२) क्वसुप्र० ⟶ वस् । 'अधातूदृदितः' (२।४।२) ङी । 'क्वसुष्मतौ च' (२।१।१०५) वस्० ⟶ उष्० । इयमनयोर्मध्ये प्रकृष्टा विदुषी । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० ⟶ तर । 'आत्' (२।४।१८) आप्प्र० ⟶ आ । अनेन ह्रस्वः - पुंवत् । 'स्रंस्-ध्वंस्-क्वस्सनडुहो दः' (२।१।६८) स० ⟶ द०, न तु 'सो रुः' (२।१।७२) स० ⟶ र०, अस्य तद्बाधकत्वात् ।

**[पचन्तितमा, पचत्तमा, पचन्तीतमा]** प्रकृष्टा पचन्ती । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० ⟶ तम । 'आत्' (२।४।१८) आप्प्र० ⟶ आ । अनेन ह्रस्वः – पुंवत् ।

**[श्रेयसितमा, श्रेयस्तमा, श्रेयसीतमा]** प्रकृष्टा श्रेयसी । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० ⟶ तम । 'आत्' (२।४।१८) आप्प्र० ⟶ आ । अनेन ह्रस्वः – पुंवत् ।

**[विदुषितमा, विद्वत्तमा, विदुषीतमा]** प्रकृष्टा विदुषी । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० ⟶ तम । 'आत्' (२।४।१८) आप्प्र० ⟶ आ । अनेन ह्रस्वः-पुंवत् । 'स्रंस्-ध्वंस्-क्वस्सनडुहो दः' (२।१।६८) स० ⟶ द० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० ⟶ त० ।

**[पचन्तिरूपा, पचद्रूपा, पचन्तीरूपा]** प्रशस्ता पचन्ती । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० ⟶ रूप । 'आत्' (२।४।१८) आप्प्र० ⟶ आ । अनेन ह्रस्वः - पुंवत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[श्रेयसिरूपा, श्रेयोरूपा, श्रेयसीरूपा]** प्रशस्ता श्रेयसी । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० → रूप । 'आत्' (२।४।१८) आप्प्र० → आ । अनेन ह्रस्वः - पुंवत् ।

**[विदुषिरूपा, विद्वद्रूपा, विदुषीरूपा]** प्रशस्ता विदुषी । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० → रूप । 'आत्' (२।४।१८) आप्प्र० → आ । अनेन ह्रस्वः - पुंवत् ।

**[पचन्तिकल्पा, पचत्कल्पा, पचन्तीकल्पा]** ईषदपरिसमाप्ता पचन्ती । 'अतमबादेरीषदसमाप्ते कल्पप्०' (७।३।११) कल्पप्प्र० → कल्प । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[विदुषिकल्पा, विद्वत्कल्पा, विदुषीकल्पा]** ईषदपरिसमाप्ता विदुषी । 'अतमबादेरीषदसमाप्ते०' (७।३।११) कल्पप्प्र० → कल्प । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[पचन्तिब्रुवा, पचद्ब्रुवा, पचन्तीब्रुवा]** 'ब्रूंग्क् व्यक्तायां वाचि' (११२५) ब्रू । ब्रवीतीति । 'ब्रुवः' (५।१।५१) इत्यनेन अच्प्रत्ययान्तो निपात्यते । पचन्ती चासौ ब्रुवा च ।

**[श्रेयसिब्रुवा, श्रेयोब्रुवा, श्रेयसीब्रुवा]** श्रेयसी चासौ ब्रुवा च ।

**[विदुषिब्रुवा, विद्वद्ब्रुवा, विदुषीब्रुवा]** विदुषी चासौ ब्रुवा च ।

**[पचन्तिचेली, पचच्चेली, पचन्तीचेली]** चेल । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । पचन्ती चासौ चेली च ।

**[श्रेयसिचेली, श्रेयश्चेली, श्रेयसीचेली]** श्रेयसी चासौ चेली च ।

**[विदुषिचेली, विद्वच्चेली, विदुषीचेली]** विदुषी चासौ चेली च ।

**[पचन्तिगोत्रा, पचद्गोत्रा, पचन्तीगोत्रा]** पचन्ती चासौ गोत्रा च ।

**[श्रेयसिगोत्रा, श्रेयोगोत्रा, श्रेयसीगोत्रा]** श्रेयसी चासौ गोत्रा च ।

**[विदुषिगोत्रा, विद्वद्गोत्रा, विदुषीगोत्रा]** विदुषी चासौ गोत्रा च ।

**[पचन्तिमता, पचन्मता, पचन्तीमता]** बुधिं (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन् । मन्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'यमि-रमि-नमि-गमि-हनि-मनि-वनति-तनादेर्धुटि क्ङिति' (४।२।५५) नलोपः । 'आत्' (२।४।१८) आप्प्र० → आ । पचन्ती चासौ मता च ।

**[श्रेयसिमता, श्रेयोमता, श्रेयसीमता]** श्रेयसी चासौ मता च ।

**[विदुषिमता, विद्वन्मता, विदुषीमता]** विदुषी चासौ मता च ।

**[पचन्तिहता, पचद्धता, पचन्तीहता]** 'हनंक् हिंसा-गत्योः' (११००) हन् । हन्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'यमि-रमि-नमि-गमि-हनि०' (४।२।५५) नलोपः । 'आत्' (२।४।१८) आप्प्र० → आ । पचन्ती चासौ हता च ।

**[श्रेयसिहता, श्रेयोहता, श्रेयसीहता]** श्रेयसी चासौ हता च ।

**[विदुषिहता, विद्वद्धता, विदुषीहता]** विदुषी चासौ हता च । अनेन ह्रस्वः-पुंवद्वा । हतशब्दस्य पापादित्वेऽपि सूत्रत्वात् बाहुलकाद्वा समासः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[सुदतितरा]** सु । दन्त । शोभना दन्ता यस्याः सा । 'वयसि दन्तस्य दतृः' (७।३।१५१) दतृ→दत् । 'अधातूदृदितः' (२।४।२) ङी । इयमनयोर्मध्येऽतिशयेन दती । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । 'आत्' (२।४।१८) आप्प्र० → आ ।

ब्रुवादयः कुत्साशब्दाः तदा 'निन्द्यं कुत्सनैरपापाद्यैः' (३।१।१००) इति समासः ।

**[कुमारितरा]** कुमार । 'वयस्यनन्त्ये' (२।४।२१) ङी । इयमनयोर्मध्ये प्रकृष्टा कुमारी । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । 'आत्' (२।४।१८) आप्प्र० → आ । 'ङ्यः' (३।२।६४) ह्रस्वः ।

**[किशोरितमा]** किशोर । 'वयस्यनन्त्ये' (२।४।२१) ङी । प्रकृष्टा किशोरी । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । 'आत्' (२।४।१८) आप्प्र० → आ । 'ङ्यः' (३।२।६४) ह्रस्वः ।

**[पचत्पाशा]** पचन्ती । निन्द्या पचन्ती । 'निन्द्ये पाशप्' (७।३।४) पाशप्प्र० → पाश । 'आत्' (२।४।१८) आप्प्र० → आ । 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) पुंवत् ।

**[विद्वद्वृन्दारिका]** विदुषी चासौ वृन्दारिका च । 'परतः स्त्री पुम्वत्०' (३।२।४९) पुंवत् ।।छ।।

ङ्यः ।।३।२।६४।।

**[गौरितरा]** गौर । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । इयमनयोर्मध्येऽतिशयेन गौरी । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[गौरितमा]** गौर । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । प्रकृष्टा गौरी । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[नर्त्तकिरूपा]** 'नृतैच् नर्तने' (११५२) नृत् । नृत्यत इत्येवंशिल्पिनी । 'नृत्-खन्-रञ्जः शिल्पिन्यकट्' (५।१।६५) अकट्प्र० → अक । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'अणञेयेकण्०' (२।४।२०) ङी । प्रशस्ता नर्त्तकी । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० → रूप । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[कुमारिकल्पा]** कुमार । 'वयस्यनन्त्ये' (२।४।२१) ङी । ईषदपरिसमाप्ता कुमारी । 'अतमबादेरीषदसमाप्ते कल्पप्०' (७।३।११) कल्पप्प्र० → कल्प । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ब्राह्मणिब्रुवा]** ब्राह्मण । 'जातेरयान्त-नित्यस्त्री-शूद्रात्' (२।४।५४) ङी । ब्राह्मणी चासौ ब्रुवा च ।

**[गार्गिमता]** गर्ग । गर्गस्य अपत्यं वृद्धं स्त्री । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'यञो डायन् च वा' (२।४।६७) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलोपः । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलोपः । गार्गी चासौ मता च ।

**[गौरिहता]** गौरी चासौ हता च ।

**[मद्रिकातरा]** इयमनयोर्मध्येऽतिशयेन मद्रिका । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[कारिकातमा]** प्रकृष्टा कारिका । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । 'आत्' (२।४।१८) आप्प्र० → आ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[दत्तारूपा]** प्रशस्ता दत्ता । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० → रूप । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[सेनानीरूपा]** सेना । 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । सेनां नयतीति क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रशस्ता सेनानीः । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० → रूप । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ग्रामणीकल्पा]** ग्राम 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । ग्रामं नयतीति क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'ग्रामाऽग्रान्नियः' (२।३।७१) न० → ण० । ईषदपरिसमाप्ता ग्रामणीः । 'अतमबादेरीषदसमाप्ते०' (७।३।११) कल्पप्प्र० → कल्प । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[बदरीतरा]** बदर । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । इयमनयोर्मध्ये प्रकृष्टा बदरी । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[आमलकीतरा]** आमलक । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । इयमनयोर्मध्ये प्रकृष्टा आमलकी । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । 'आत्' (२।४।१८) आप्प्र० → आ ॥छ॥

**भोगवद्-गौरिमतोर्नाम्नि** ॥३।२।६५॥

**[भोगवद्गौरिमतोः]** 卐 भोगवच्च गौरिमच्च = भोगवद्गौरिमतौ, तयोः = भोगवद्गौरिमतोः । षष्ठी ओस् ।

**[भोगवतितरा]** भोग । भोगा विद्यन्ते यस्यां सा । 'नद्यां मतुः' (६।२।७२) मतुप्र० → मत् । 'अधातूदृदितः' (२।४।२) ङी । 'नाम्नि' (२।१।९५) मस्य वत्वम् । इयमनयोर्मध्ये प्रकृष्टा भोगवती । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[गौरिमतितमा]** गोर । गोरस्याऽपत्यं = गौरिः । 'अत इञ' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'नुर्जातेः' (२।४।७२) ङी । प्रकृष्टा गौरवती(?) (गौरिमती) । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[भोगवतिरूपा]** प्रशस्ता भोगवती । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० → रूप ।

**[गौरिमतिकल्पा]** ईषदपरिसमाप्ता गौरिमती । 'अतमबादेरीषदसमाप्ते०' (७।३।११) कल्पप्प्र० → कल्प । 'आत्' (२।४।१८) आप्प्र० → आ सर्वत्र ।

**[भोगवतिब्रुवा]** भोगवती चासौ ब्रुवा च ।

**[गौरिमतिचेली]** गौरिमती चासौ चेली च ।

**[भोगवतिगोत्रा]** भोगवती चासौ गोत्रा च ।

**[गौरिमतिमता]** गौरिमती चासौ मता च ।

**[भोगवतिहता]** भोगवती चासौ हता च ।

**[गौरिमतिहता]** गौरिमती चासौ हता च । अनेन ह्रस्वः ।

**[भोगवतितरा, भोगवत्तरा, भोगवतीतरा]** इयमनयोर्मध्ये [प्रकृष्टा] भोगवती । 'द्वयोर्विभज्ये च तरप्' (७।३।६)

P. 卐 भोगवांश्च गौरिमांश्च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तरप्प्र० → तर । 'आत्' (२।४।१८) आप्प्र० → आ । 'ऋदुदित्-तर-तम-रूप०' (३।२।६३) ह्रस्वः - पुंवद्भावश्च ।

**[गौरिमतितरा, गौरिमत्तरा, गौरिमतीतरा]** इयमनयोर्मध्ये [प्रकृष्टा] गौरिमती । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । 'आत्' (२।४।१८) आप्प्र० → आ । 'ऋदुदित्-तर-तम-रूप०' (३।२।६३) ह्रस्वः-पुंवद्भावश्च ।।छ।।

**नवैकस्वराणाम्** ।।३।२।६६।।

**[एकस्वराणाम्]** एकः स्वरो येषां ते = एकस्वरास्तेषाम् ।

**[स्त्रितरा, स्त्रीतरा]** स्त्री । इयमनयोर्मध्ये प्रकृष्टा स्त्री । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । 'आत्' (२।४।१८) आप्प्र० → आ । अनेन वा ह्रस्वः ।

**[ज्ञितमा, ज्ञीतमा]** ज्ञस्य भार्या = ज्ञी । 'धवाद् योगादपालकान्तात्' (२।४।५९) ङी । बहूनां मध्ये प्रकृष्टा ज्ञी । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[इरूपा, ईरूपा]** अ । अस्याऽपत्यं = इ-कामः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'इञ इतः' (२।४।७१) ङी । प्रशस्ता ई । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० → रूप ।

**[किकल्पा, कीकल्पा]** क । कस्य भार्या । 'धवाद् योगादपालकान्तात्' (२।४।५९) ङी । ईषदपरिसमाप्ता की । 'अतमबादेरीषदसमाप्ते कल्पप्० (७।३।११) कल्पप्प्र० → कल्प । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ज्ञिबुवा, ज्ञीबुवा]** ज्ञी चासौ बुवा च ।

**[इचेली, ईचेली]** ई चासौ चेली च ।

**[किगोत्रा, कीगोत्रा]** की चासौ गोत्रा च ।

**[स्त्रिमता, स्त्रीमता]** स्त्री चासौ मता च ।

**[स्त्रिहता, स्त्रीहता]** स्त्री चासौ हता च । अनेन वा ह्रस्वः ।

**[कुटीतरा]** कुट । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । द्वयोर्मध्ये [प्रकृष्टा] कुटी । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर ।

**[द्रुणीतमा]** द्रो(द्रु)ण । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । प्रकृष्टा द्रो(द्रु)णी । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[आमलकीतरा]** द्वयोर्मध्ये [प्रकृष्टा] आमलकी । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[बदरीतमा]** प्रकृष्टा बदरी । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[कुवलीरूपा]** प्रशस्ता कुवली । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० → रूप । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[श्रीतरा]** इयमनयोर्मध्ये [प्रकृष्टा] श्रीः । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । 'आत्' (२।४।१८) आप्प्र० → आ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ह्रीतमा]** 'ह्रींक् लज्जायाम्' (११३३) ह्री । ह्रीयत इति । 'भ्यादिभ्यो वा' (५।३।११५) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रकृष्टा ह्रीः । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[धीरूपा]** प्रशस्ता धीः । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० → रूप । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[आमलकितरा]** द्वयोर्मध्ये प्रकृष्टा आमलकी । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । 'आत्' (२।४।१८) आप्प्र० → आ । मतान्तरे ह्रस्वः ।

**[बदरितमा]** प्रकृष्टा बदरी । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । 'आत्' (२।४।१८) आप्प्र० → आ । मतान्तरे ह्रस्वः ।

**[कुवलिरूपा]** प्रशस्ता कुवली । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० → रूप । 'आत्' (२।४।१८) आप्प्र० → आ । मतान्तरे ह्रस्वः ।

**[लक्ष्मिकल्पा]** ईषदपरिसमाप्ता लक्ष्मीः । 'अतमबादेरीषदसमाप्ते०' (७।३।११) कल्पप्प्र० → कल्प । 'आत्' (२।४।१८) आप्प्र० → आ । मतान्तरे ह्रस्वः ।

**[तन्त्रितरा]** द्वयोर्मध्ये प्रकृष्टा तन्त्रीः । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । 'आत्' (२।४।१८) आप्प्र० → आ । मतान्तरे ह्रस्वः ॥छ॥

ऊङः ॥३।२।६७॥

[ऊङः] ऊङ् षष्ठी ङस् ।

**[ब्रह्मबन्धुतरा, ब्रह्मबन्धूतरा]** ब्रह्मन् । बन्धु । ब्रह्मा बन्धुरस्याः सा । 'उतोऽप्राणिनश्चाऽयु-रज्ज्वादिभ्य ऊङ्' (२।४।७३) ऊङ्प्र० → ऊ। 'समानानां०' (१।२।१) दीर्घः । द्वयोर्मध्ये प्रकृष्टा ब्रह्मबन्धूः । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[वामोरुतमा, वामोरूतमा]** वामे ऊरू यस्याः सा । 'उपमान-सहित-संहित-सह-शफ-वाम-लक्ष्मणाद्यूरोः' (२।४।७५) ऊङ्प्र० → ऊ। 'समानानां०' (१।२।१) दीर्घः । प्रकृष्टा वामोरूः । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[मद्रबाहुरूपा, मद्रबाहूरूपा]** मद्रे प्रधाने बाहू यस्याः सा । 'बाह्वन्त-कद्रु-कमण्डलोर्नाम्नि' (२।४।७४) ऊङ्प्र० → ऊ। प्रशस्ता मद्रबाहूः । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० → रूप ।

**[कमण्डलुकल्पा, कमण्डलूकल्पा]** कमण्डलु । 'बाह्वन्त-कद्रु-कमण्डलोर्नाम्नि' (२।४।७४) ऊङ्प्र० → ऊ। ईषदपरिसमाप्ता कमण्डलूः । 'अतमबादेरीषदसमाप्ते०' (७।३।११) कल्पप्प्र० → कल्प । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[कद्रुब्रुवा, कद्रूब्रुवा]** कद्रु । 'बाह्वन्त-कद्रु-कमण्डलोर्नाम्नि' (२।४।७४) ऊङ्प्र० → ऊ। कद्रूः चासौ ब्रुवा च ।

**[पङ्गुचेली, पङ्गूचेली]** पङ्गु । नारी-सखी-पङ्गू-श्वश्रू (२।४।७६) पङ्गू निपात्यते । पङ्गू(:) चासौ चेली च ।

**[श्वश्रुगोत्रा, श्वश्रूगोत्रा]** श्वश्रु । नारी-सखी-पङ्गू-श्वश्रू (२।४।७६) श्वश्रू निपात्यते । श्वश्रूः चासौ गोत्रा च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[कुरुमता, कुरूमता]** कुरु । कुरोरपत्यम् । 'दु-नादि-कुर्वित्-कोशलाऽजादाञ्ञ्यः' (६।१।११८) ञ्यप्र० । 'कुरोर्वा' (६।१।१२२) ञ्यलुप् ।

**[भीरुहता, भीरूहता]** भीरूः चासौ हता च ।।छ।।

**महतः कर-घास-विशिष्टे डाः ।।३।२।६८।।**

**[करघासविशिष्टे]** करश्च घासश्च विशिष्टश्च = करघासविशिष्टम्, तस्मिन् ।

**[महाकारः, महत्कारः]** कर । कर एव = कारः । 'प्रज्ञादिभ्योऽण्' (७।२।१६५) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । महतः कारः ।

**[महाघासः, महद्घासः]** महतो घासः ।

**[महाविशिष्टः, महद्विशिष्टः]** महतो विशिष्टः । अनेन डा । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[राजकरः]** राज्ञः करः ।।छ।।

**स्त्रियाम् ।।३।२।६९।।**

**[महाकरः]** महत् । 'अधातूदृदितः' (२।४।२) ङी । महत्याः करः ।

**[महाघासः]** महत्या घासः ।

**[महाविशिष्टः]** महत्या विशिष्टः । अनेन डा → आ । 'डित्यन्त्यस्वरादेः (२।१।११४) अन्त्यस्वरादिलोपः ।।छ।।

**जातीयैकार्थेऽच्वेः ।।३।२।७०।।**

**[जातीयैकार्थे]** जातीयश्च 卐 एकार्थश्च = जातीयैकार्थम्, तस्मिन् ।

**[अच्वेः]** न च्विरच्विस्तस्य ।

**[महाजातीयः]** महान् प्रकारोऽस्य सः । 'प्रकारे जातीयर्' (७।२।७५) जातीयर्प्र० → जातीय । अनेन डाप्र० → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[महाजातीया]** महान् प्रकारोऽस्याः सा । 'प्रकारे जातीयर्' (७।२।७५) जातीयर्प्र० → जातीय । अनेन डाप्र० → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[महावीरः]** महांश्चासौ वीरश्च ।

**[महामुनिः]** महांश्चासौ मुनिश्च ।

**[महायशाः]** महत् यशोऽस्य सः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः ।

**[महादेवी]** महती चासौ देवी च ।

**[महाराज्ञी]** महती चासौ राज्ञी च ।

**[महाकीर्तिः]** महती कीर्त्तिरस्य सः ।

---

P. 卐 एकार्थं च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[महास्तुतिः]** महती स्तुतिरस्य सः ।

**[महाकरः]** महांश्चासौ करश्च ।

**[महाघासः]** महांश्चासौ घासश्च ।

**[महाविशिष्टः]** महांश्चासौ विशिष्टश्च ।

**[महामानी]** बुधिं (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन्, महत्पूर्व० । महान्तमात्मानं मन्यते । 'मन्याण्णिन्' (५।१।११६) ण्निन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । प्र० सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । अनेन डा । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[महत्तरः]** महत् । 卐 प्रकृष्टो महान् । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० ।

**[महतीपुत्रः]** महत्याः पुत्रः ।

**[महतीपतिः]** महत्याः पतिः ।

**[महद्भूतश्चन्द्रमाः]** अमहान् महान्संपन्नः । 'कृ-भ्वस्तिभ्यां कर्मकर्तृभ्या०' (७।२।१२६) च्विप्र० । 'अप्रयोगीत्' (१।१।३७) च्विलोपः ।

**[महद्भूता कन्या]** महत् । 'अधातूदृदितः' (२।४।२) ङी । +अमहती महतीसंपन्ना । 'कृ-भ्वस्तिभ्यां कर्म-कर्तृभ्यां०' (७।२।१२६) च्विप्र० । 'च्वौ क्वचित्' (३।२।६०) पुंवत् । 'अप्रयोगीत्' (१।१।३७) च्विलोपः ।।छ।।

**न पुंवन्निषेधे** ।।३।२।७१।।

**[न]** न प्रथमा सि ।

**[पुंवन्निषेधे]** पुंवदित्येतस्य निषेधः = पुंवन्निषेधस्तस्मिन् ।

**[महतीप्रियः]** महती प्रियाऽस्य सः । 'नाप्–प्रियादौ' (३।२।५३) इति पुंवन्निषेधः ।

**[महतीमनोज्ञः]** महती मनोज्ञाऽस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।।छ।।

**इच्यस्वरे दीर्घ आच्च** ।।३।२।७२।।

**[अस्वरे]** न स्वरोऽस्वरस्तस्मिन् ।

**[बाहूबाहवि, बाहाबाहवि व्यासजेताम्]** बाहु । बाहु । बाहुषु च (२) मिथो गृहीत्वा व्यासक्तम् । 'इच् युद्धे' (७।३।७४) इच्समासान्तः → इ । अनेन । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'षञ्जं सङ्गे' (१७३) षञ्ज् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सञ्ज्, वि-आङ्पूर्व० । ह्यस्तनी आताम् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'आतामाते-आथामाथे आदिः' (४।२।१२१) आत्० → इ० । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए ।

**[केशाकेशि]** केशेषु च (२) मिथो गृहीत्वा कृतं युद्धम् । 'इच् युद्धे' (७।३।७४) इच्समासान्तः → इ । सर्वत्र अनेन दीर्घः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[मुष्टीमुष्टि, मुष्टामुष्टि]** मुष्टिभिश्च (२) मिथः प्रहृत्य कृतं युद्धम् । 'इच् युद्धे' (७।३।७४) इच्समासान्तः →

---

P. 卐 द्वयोर्मध्ये प्रकृष्टो महान् = महत्तरः ।

P. + अमहती महतीभूता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इ । अनेन । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः ।

**[यष्टीयष्टि, यष्टायष्टि]** यष्टिभिश्च (२) मिथः प्रहृत्य कृतं युद्धम् । 'इच् युद्धे' (७।३।७४) इच्समासान्तः → इ । अनेन । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः ।

**[दण्डादण्डि]** दण्डैश्च (२) मिथः प्रहृत्य कृतं युद्धम् । 'इच् युद्धे' (७।३।७४) इच्समासान्तः → इ । अनेन दीर्घः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[दोर्दोषि]** दोस् २ । दोर्भिश्च (२) मिथः प्रहृत्य कृतं युद्धम् । 'इच् युद्धे' (७।३।७४) इच्समासान्तः → इ । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[धनुर्धनुषि]** धनुस् २ । धनुर्भिश्च (२) मिथः प्रहृत्य कृतं युद्धम् । 'इच् युद्धे' (७।३।७४) इच्समासान्तः → इ । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[अस्यसि]** असिभिश्च (२) मिथः प्रहृत्य कृतं युद्धम् ।

**[इष्विषवि]** इषुभिश्च (२) मिथः प्रहृत्य कृतं युद्धम् । 'इच् युद्धे' (७।३।७४) इच्समासान्तः → इ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।।छ।।

**हविष्यष्टनः कपाले** ।।३।२।७३।।

**[अष्टनः]** अष्टन् षष्ठी ङस् ।

**[अष्टाकपालं हविः]** अष्टन् । कपाल । अष्टसु कपालेषु संस्कृतम् । 'संस्कृते भक्ष्ये' (६।२।१४०) अण्प्र० । 'द्विगोरनपत्ये य-स्वराऽऽदेर्लुबद्विः' (६।१।२४) अण्लुप् । अनेन दीर्घः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[अष्टकपालम्]** अष्टानां कपालानां समाहारः = अष्टकपालम् । सि-अम् ।

**[अष्टपात्रं हविः]** अष्टसु पात्रेषु संस्कृतम् । 'संस्कृते भक्ष्ये' (६।२।१४०) अण्प्र० । 'द्विगोरनपत्ये०' (६।१।२४) अण्लुप् ।।छ।।

**गवि युक्ते** ।।३।२।७४।।

**[अष्टागवं शकटम्]** अष्टन् । गो । अष्टौ गावो युक्ता अस्मिन्निति । 'गोस्तत्पुरुषात्' (७।३।१०५) अट्समासान्तः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । अनेन दीर्घः । अथवा अष्टानां गवां समाहारः = अष्टगवम् । 'गोस्तत्पुरुषात्' (७।३।१०५) अट्समासान्तः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । अष्टगवेन युक्तम् । अनेन आ । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[अष्टतुरगो रथः]** अष्टौ तुरगा 卐 अस्य सः ।

**[अष्टगवं ब्राह्मणधनम्]** अष्टानां गवां समाहारः । 'गोस्तत्पुरुषात्' (७।३।१०५) अट्समासान्तः → अ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि-अम् । ब्राह्मणस्य धनम् ।

**[अष्टगुश्चैत्रः]** अष्टौ गावो यस्याऽसौ । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।।छ।।

卐 मध्यमवृत्तौ - श० म० न्यासानुसन्धाने - अस्मिन् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**नाम्नि ॥३।२।७५॥**

**[अष्टापदः कैलाशः]** अष्टन् । पद । 卐 अष्टौ पदान्यत्र सः = अष्टापदः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[अष्टापदं सुवर्णम्]** अष्टसु लोहेषु पदं(पदेषु) प्रतिष्ठाऽस्य तत् ।

**[अष्टावक्रो मुनिः]** अष्टौ वक्राण्यस्याऽसौ ।

**[अष्टाविटपो नाम कश्चित्]** अष्टौ विटपा अस्याऽसौ ।

**[अष्टदण्डः(दंष्ट्रः)]** अष्टौ दंष्ट्रा अस्याऽसौ । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[अष्टगुणमैश्वर्यम्]** अष्टौ गुणा यत्र तत् । उभयत्र दीर्घो न नामाभावात् ॥छ॥

**कोटर-मिश्रक-सिध्रक-पुरग-सारिकस्य वणे ॥३।२।७६॥**

**[कोटरमिश्रकसिध्रकपुरगसारिकस्य]** कोटरश्च मिश्रकश्च सिध्रकश्च पुरगश्च सारिका च = कोटरमिश्रकसिधकपुरगसारिकम् । 'क्लीबे' (२।४।९६) ह्रस्वः, तस्य ।

**[कोटरावणम्]** कोटराणां वनम् ।

**[मिश्रकावणम्]** मिश्रकाणां वनम् ।

**[सिध्रकावणम्]** सिध्रकाणां वनम् ।

**[पुरगावणम्]** पुर । अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । पुरं गच्छतीति । 'नाम्नो गमः खड्-डौ०' (५।१।१३१) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अम्लोपः । पुरगाणां वनम् ।

**[सारिकावणम्]** सारोऽस्त्येषाम् । 'अतोऽनेकस्वरात्' (७।२।६) इकप्र० । सारि कायन्तीति वा सारिका वृक्षाः । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । सारिकाणां वनम् । अनेन आ-णत्वं च ।

**[कुबेरवनम्]** कुबेरस्य वनम् ।

**[शतधारवनम्]** शतधारस्य वनम् । उभयत्र णत्वं न ॥छ॥

**अञ्जनादीनां गिरौ ॥३।२।७७॥**

**[अञ्जनादीनाम्]** अञ्जन आदिर्येषां ते = अञ्जनादयः, तेषाम् ।

**[गिरौ]** गिरि सप्तमी ङि । 'ङिडौ' (१।४।२५) डौ० → औ० ।

**[अञ्जनागिरिः]** अञ्जनानां गिरिः ।

**[भाञ्जनागिरिः]** 'भञ्जोंप् आमर्दने' (१४८६) भञ्ज् । भज्यतेऽनेन । 'अनट्' (५।३।१२४) अनट्प्र० → अन । भञ्जने कुशलः । 'कुशले' (६।३।९५) अणप्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । भाञ्जनानां गिरिः ।

**[किंशुकागिरिः]** किंशुमा(का)नां गिरिः ।

---

P. 卐 अष्टौ पदान्यस्य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[किंशुलकागिरिः]** किंशुलकानां गिरिः । न्यासकारः- किंशृ (?) (शु)लुक इति मन्यते ।

**[साल्वागिरिः]** साल्वानां गिरिः ।

**[लोहितागिरिः]** लोहितानां गिरिः ।

**[कुक्कुटागिरिः]** कुक्कुटानां गिरिः ।

卐 **[खड्नागिरिः]** खड्नानां गिरिः ।

**[नलागिरिः]** नलानां गिरिः ।

**[पिङ्गलागिरिः]** पिङ्गलानां गिरिः । सर्वत्र अनेन दीर्घः—आ ।

**[कृष्णगिरिः]** कृष्णस्य गिरिः ।

**[श्वेतगिरिः]** श्वेतस्य गिरिः ।।छ।।

### अनजिरादिबहुस्वर-शरादीनां मतौ ।।३।२।७८।।

**[अनजिरादिबहुस्वरशरादीनाम्]** अजिर आदिर्येषां तेऽजिरादयः । न अजिरादयोऽनजिरादयः । 卐卐 बहुः स्वरो येषां ते = बहुस्वराः । अनजिरादयश्च ते बहुस्वराश्च = अनजिरादिबहुस्वराः । शर आदिर्येषां ते = शरादयः । अनजिरादिबहुस्वराश्च शरादयश्च = अनजिरादिबहुस्वरशरादयस्तेषाम् ।

**[उदुम्बरावती]** उदुम्बराः सन्त्यस्यां सा । उदुम्बराणां निवासः । उदुम्बराणामदूरभवा । उदुम्बरैर्निर्वृत्ता । 'नद्यां मतुः' (६।२।७२) मतुप्र० → मत् । 'नाम्नि' (२।१।९५) इति मस्य व० सर्वत्र ।

**[मशकावती]** मशकाः सन्त्यस्यां सा । मशकानां निवासः । मशकानामदूरभवा । मशकैर्निर्वृत्ता । 'नद्यां मतुः' (६।२।७२) मतुप्र० → मत् ।

**[वीरणावती]** वीरणाः सन्त्यस्यां सा । वीरणानां निवासः । वीरणानामदूरभवा । वीरणैर्निर्वृत्ता । मतुप्र० → मत् ।

**[पुष्करावती]** पुष्कर । पुष्करैर्निर्वृत्ता । पुष्करशब्दाद् मत्वर्थवर्जमतुः मत्वर्थे 'पुष्करादेर्देशे' (७।२।७०) इन् प्राप्नोति ।

**[अमरावती]** अमरः सन्त्यस्याम् ।

**[शरावती]** शराः सन्त्यस्यां सा । शराणां निवासः । शरैर्निर्वृत्ता । शराणामदूरभवा । मतुप्र० → मत् ।

**[वंशावती]** वंशाः सन्त्यस्याम् । वंशानां निवासः । वंशैर्निर्वृत्ता । वंशानामदूरभवा । मतुप्र० → मत् ।

**[शुचीमती]** शुचिरस्त्यस्यां सा । शुचीनां निवासः । शुचीनामदूरभवा । शुचिभिर्निर्वृत्ता । मतुप्र० → मत् ।

**[कुशावती]** कुशाः सन्त्यस्यां सा । कुशानां निवासः । कुशानामदूरभवा । कुशैर्निर्वृत्ता । मतुप्र० → मत् ।

**[धूमावती]** धूमोऽस्त्यस्यां सा । धूमस्य निवासः । धूमानामदूरभवा । धूमेन निर्वृत्तः । मतुप्र० → मत् ।

---

卐 बृहद्वृत्तौ - खड्वनागिरिः । श० म० न्या० - खड्वनशब्दोऽप्रसिद्धचरः, क्वचिच्च "खड्न" इति पाठेऽपीति सूत्रवृत्त्यन्तप्रदर्शितगणपाठेनानुज्ञायते । पाणिनीये खड्वनशब्दः खड्नशब्दो वा न पठ्यते ।

P.卐卐 बहवः स्वरा येषां ते = बहुस्वराः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अहीवती]** अहयः सन्त्यस्यां सा । अहीनां निवासः । अहीनामदूरभवा । अहिभिर्निर्वृत्ता । मतुप्र० → मत् ।

**[कपीवती]** कपयः सन्त्यस्यां सा । कपीनां निवासः । कपीनामदूरभवा । कपिभिर्निर्वृत्ता ।

**[मुनीवती]** मुनयः सन्त्यस्यां सा । मुनीनां निवासः । मुनीनामदूरभवा । मुनिभिर्निर्वृत्ता । मतुप्र० → मत् ।

**[मणीवती]** मणयः सन्त्यस्यां सा । मणीनां निवासः । मणीनामदूरभवा । मणिभिर्निर्वृत्ता । मतुप्र० → मत् । 'अधातूदृदितः' (२।४।२) ङी । 'नाम्नि' (२।१।९५) म० → व० । अनेन दीर्घः ।

**[वार्दावान् नाम गिरिः]** वार् 'डुदांग्क् दाने' (११३८) दा । वारं ददातीति । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलोपः । ✠ वार्दाः सन्त्यत्र । 'मध्वादेः' (६।२।७३) मतुप्र० → मत् । प्र० सि । अनेन दीर्घः । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[वेटावान् नाम गिरिः]** 'विट शब्दे' (१९२) विट् । वेटन्ति पक्षिभिरिति । 'लिहादिभ्यः' (५।१।५०) अच्प्र० । वेटाः=वृक्षाः सन्त्यत्र । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । अनेन दीर्घः ।

**[ऋषीवती]** ऋषयः सन्त्यस्यां सा । ऋषीणां निवासः । ऋषीणामदूरभवा । ऋषिभिर्निर्वृत्ता ।

**[मृगावती]** मृगाः सन्त्यस्यां सा । मृगाणां निवासः । मृगाणामदूरभवा । मृगैर्निर्वृत्ता ।

**[पद्मावती]** पद्मानि सन्त्यस्यां सा । पद्मानां निवासः । पद्मानामदूरभवा । पद्मैर्निर्वृत्ता ।

**[वातावती]** वाताः सन्त्यस्यां सा । वातानां निवासः । वातानामदूरभवा । वातैर्निर्वृत्ता ।

**[भोगावती]** भोगाः सन्त्यस्यां सा । भोगानां निवासः । भोगानामदूरभवा । भोगैर्निर्वृत्ता । 'नद्यां मतुः' (६।२।७२) मतुप्र० → मत् । 'अधातूदृदितः' (२।४।२) ङी । 'नाम्नि' (२।१।९५) वत्वम् । अनेन सर्वत्र दीर्घः ।

**[व्रीहिमती]** व्रीहयः सन्त्यस्यां सा ।

**[इक्षुमती]** इक्षवः सन्त्यस्यां सा ।

**[द्रुमवती]** द्रुम । द्रुमाः सन्त्यस्यां सा ।

**[मधुमती]** मधवः = वृक्षाः सन्त्यस्यां सा ।

**[अजिरवती]** अजिरं = प्राङ्गणमस्त्यस्यां सा ।

**[खदिरवती]** खदिराः सन्त्यस्यां सा ।

**[खपुरवती]** खपुराः सन्त्यस्यां सा ।

**[स्थविरवती]** स्थविराः सन्त्यस्यां सा ।

**[पुलिनवती]** पुलिनमस्त्यस्यां सा ।

**[मलयवती]** मलया अस्त्यस्यां सा ।

---

✠ मध्वादिगणे-पार्दा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[हंसकारण्डववती]** हंसाः(हंसकारण्डवाः) सन्त्यस्यां सा ।

**[चक्रवाकवती]** चक्रवाकाः सन्त्यस्यां सा ।

**[अलङ्कारवती]** अलङ्काराणि विद्यन्ते यस्यां सा ।

**[शशाङ्कवती]** शशाङ्कोऽस्यामस्ति ।

**[हिरण्यवती]** हिरण्यमस्त्यस्यां सा । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'अधातूदृदितः' (२।४।२) ङी । 'मावर्णान्तो०' (२।१।९४) म० → व० ।

**[वलयवती कन्या]** वलया विद्यन्ते यस्याः सा ।

**[शरवती तूणा]** शरा विद्यन्ते यस्यां सा । 'तदस्या०' (७।२।१) मतुप्र० → मत् । 'अधातूदृदितः' (२।४।२) ङी । 'मावर्णान्तो०' (२।१।९४) म० → व० ।।छ।।

## ऋषौ विश्वस्य मित्रे ।।३।२।७९।।

**[विश्वामित्रो नामर्षिः]** विश्वं मित्रमस्य सः । अनेन दीर्घः ।

**[विश्वमित्रो माणवकः]** विश्वं मित्रमस्याऽसौ, माणवकः ।

**[विश्वमित्रो मुनिः]** विश्वं मित्रमस्याऽसौ, मुनिः ।।छ।।

## नरे ।।३।२।८०।।

**[विश्वानरो नाम कश्चित्]** विश्वे नरा अस्य सः । अनेन दीर्घः ।

**[विश्वसेनः]** 卐 विश्वा सेनायामस्य सः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[विश्वनरो राजा]** विश्वे=सर्वे नरा यस्य सः, राजा ।।छ।।

## वसु-राटोः ।।३।२।८१।।

**[वसुराटोः]** वसुश्च राट् च = वसुराटौ, तयोः = वसुराटोः । सप्तमी ओस् ।

**[विश्वावसुः]** विश्वं वस्वस्य सः ।

**[विश्वाराट्]** विश्व 'राजृग् दीप्तौ' (८९३) राज् । विश्वस्मिन् राजत इति क्विप् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेन दीर्घः । 'यज-सृज-मृज-राज०' (२।१।८७) ज० → ष० । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

**[विश्वराजौ]** विश्वस्मिन् राजेते इति क्विप् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । औ ।

**[विश्वराजः]** विश्वस्मिन् राजन्ते इति क्विप् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । जस् ।।छ।।

---

卐 श० म० न्या० - विश्वा सेना यस्य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## वलच्यपित्रादेः ।।३।२।८२।।

**[वलचि]** वलच् सप्तमी ङि ।

**[अपित्रादेः]** पिता आदिर्यस्याऽसौ पित्रादिः, न पित्रादिरपित्रादिस्तस्य ।

**[आसुतीवलः]** आसवनमासुतिः । 'समिणासुगः' (५।३।९३) क्तिप्र० । आसुतिः=सुरा साऽस्याऽस्तीति ।

**[कृषीवलः]** कृषिरस्याऽस्तीति ।

**[दन्तावलः]** दन्ताः सन्त्यस्य ।

**[उत्सङ्गावलः]** उत्सङ्गोऽस्याऽस्तीति । सर्वत्र 'कृष्यादिभ्यो वलच्' (७।२।२७) वलच्प्र० → वल । अनेन दीर्घः ।

**[पुत्रावलः]** पुत्राः सन्तीति । 'कृष्यादिभ्यो वलच्' (७।२।२७) वलच्प्र० → वल । अनेन दीर्घः ।

**[पितृवलः]** पिताऽस्याऽस्तीति ।

**[भ्रातृवलः]** भ्राताऽस्याऽस्तीति ।

**[मातृवलः]** माताऽस्याऽस्तीति ।

**[उत्साहवलः]** उत्साहोऽस्याऽस्तीति । 'कृष्यादिभ्यो वलच्' (७।२।२७) वलच्प्र० → वल ।

**[कायवलम्]** काय । कायस्य वलम् ।

**[नागवलम्]** नाग । नागस्य वलम् ।।छ।।

## चितेः कचि ।।३।२।८३।।

**[एकचितीकः]** एका-चिति । 卐 एका चितिरस्य सः ।

**[द्विचितीकः]** द्वे चिती अस्याऽसौ ।

**[त्रिचितीकः]** त्रयश्चितयोऽस्याऽसौ । सर्वत्र 'शेषाद्वा' (७।३।१७५) कच्प्र० → क । अनेन दीर्घः "ई" ।।छ।।

## स्वामिचिह्नस्याऽविष्टाऽष्ट-पञ्च-भिन्न-च्छिन्न-च्छिद्र-स्रुव-स्वस्तिकस्य कर्णे ।।३।२।८४।।

**[स्वामिचिह्नस्य]** स्वामिन्-चिह्न । स्वामी चिह्न्यते येन तत् । 'स्थादिभ्यः कः' (५।३।८२) कप्र० । 'वर्षादयः क्लीबे' (५।३।२९) अल्प्र० → अ । तस्य ।

**[अविष्टाऽष्टपञ्चभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य]** विष्टश्च अष्टौ च पञ्च च भिन्नश्च छिन्नश्च छिद्रश्च स्रुवश्च स्वस्तिकश्च = विष्टाऽष्टपञ्चभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकम् । न विष्टाऽष्टपञ्चभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकम्=अविष्टाऽष्टपञ्चभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकम्, तस्य ।

**[कर्णे]** कर्ण सप्तमी ङि ।

**[दात्राकर्णः पशुः]** दात्रमिव दात्रम् । दात्रं=चिह्नं 卐卐 कर्णयोर्यस्य सः । दात्रमिव वा कर्णौ यस्य सः ।

---

卐 मध्यमवृत्तौ-श० म० न्यासानुसन्धाने - एका चितिरस्मिन् । P. 卐卐 कर्णे० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[शङ्कूकर्णः]** शङ्कुमिव कर्णौ यस्याऽसौ ।

**[द्विगुणाकर्णः]** द्विगुणाविव कर्णौ यस्याऽसौ ।

**[द्वयङ्गुलाकर्णः]** द्वे अङ्गुली प्रमाणमस्य । मात्रट् विषये 'संख्याऽव्यायदङ्गुलेः' (७।३।१२४) डः समासान्तः → अ । 'द्विगोरनपत्ये०' (६।१।२४) अलोपः(?) ('मानादसंशये लुप्' ७।१।१४३) लुप् ) । अथवा द्वयोरङ्गुल्योः समाहारः । अग्रे पूर्ववत् । अनेन सर्वत्र दीर्घत्वम् ।

**[शोभनकर्णः]** शोभनौ कर्णौ यस्य सः ।

**[लम्बकर्णः]** लम्बौ कर्णावस्य सः ।

**[अविद्धकर्णः शिशुः]** अविद्धौ कर्णौ यस्य सः ।

**[वाहनकर्णः]** वाहनस्य कर्णः ।

**[विष्टकर्णः]** 'विष्लृंकी व्याप्तौ' (११४३) विष् । विष्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त + विष्टौ कर्णौ यस्य सः ।

**[अष्टकर्णः]** अष्टौ कर्णौ(र्णाः) यस्य सः ।

**[पञ्चकर्णः]** पञ्च कर्णा यस्याऽसौ ।

**[भिन्नकर्णः]** भिन्नौ कर्णौ यस्याऽसौ ।

**[छिन्नकर्णः]** छिन्नौ कर्णौ यस्याऽसौ ।

**[छिद्रकर्णः]** छिद्रं कर्णे यस्याऽसौ ।

**[स्रुवकर्णः]** स्रुवः कर्णे यस्याऽसौ ।

**[स्वस्तिककर्णः]** स्वस्तिकं कर्णे यस्याऽसौ ।

**[चक्रसक्थः]** चक्र-सक्थि । चक्रं सक्थिन्यस्याऽसौ । 'सक्थ्यक्ष्णः स्वाङ्गे' (७।३।१२६) टः समासान्तः । 'अवर्णवर्णस्य' (७।४।६८) इलोपः ।।छ।।

## गतिकारकस्य नहि-वृति-वृषि-व्यधि-रुचि-सहि-तनौ क्वौ ।।३।२।८५।।

**[गतिकारकस्य]** गतिश्च कारकं च = गतिकारकम्, तस्य ।

**[नहिवृतिवृषिव्यधिरुचिसहितनौ]** नहिश्च वृतिश्च वृषिश्च व्यधिश्च रुचिश्च सहिश्च तनुश्च = नहिवृतिवृषिव्यधिरुचिसहितनु, तस्मिन् ।

**[उपानत्]** उप 'णहींच् बन्धने' (१२८५) णह् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नह् । उपनह्यति उपनह्यते वा । 'क्रुत्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'नहाहोर्ध-तौ' (२।१।८५) ह० → ध० । 'धुटस्तृतीयः' (२।१।७६) ध० → द० । 'विरामे वा' (१।३।५१) द० → त० ।

**[परीणत्]** परिन(ण)ह्यते । 'क्रुत्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'नहांहोर्ध-तौ' (२।१।८५) ह० → ध० । 'धुटस्तृतीयः' (२।१।७६) ध० → द० । 'विरामे वा' (१।३।५१) द० → त० ।

---

P. + विष्टं कर्ण० ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

**[नीवृत्, उपावृत्]** 'वृतूङ् वर्त्तने' (९५५) वृत्, नि-उपपूर्व० । 卐 निवर्त्तते - उपवर्त्तते । 'क्रुत्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेन दीर्घः ।

**[प्रावृट्, परीवृट्]** जिषू (५२२) - विषू (५२३) - मिषू (५२४) - निषू (५२५) - पृषू (५२६) - 'वृषू सेचने' (५२७) वृष्, प्र-परिपूर्व० । प्रवर्षन्ति मेघा अस्यां सा । परिवर्षन्ति मेघा यस्यां सा । 'क्रुत्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेन दीर्घः । 'धुटस्तृतीयः' (२।१।७६) ष० ⟶ ड० । 'विरामे वा' (१।३।५१) ड० ⟶ ट० ।

**[श्वावित्, मर्मावित्]** श्वन् । मर्मन् । 'व्यधंच् ताडने' (११५७) व्यध् । श्वानं विध्यति । मर्माणि विध्यति । 'क्रुत्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । 'ज्या-व्यधः क्ङिति' (४।१।८१) य्वृत्-विध् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'धुटस्तृतीयः' (२।१।७६) ध० ⟶ द० । 'विरामे वा' (१।३।५१) द० ⟶ त० । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[नीरुक्, अतीरुक्, अभीरुक्]** 'रुचि अभिप्रीत्यां च' (९३८) रुच्, नि-अति-अभिपूर्व० । नितरां रोचते । अतिशयेन रोचते । अभिरोचते । 'क्रुत्-संपदादि०' (५।३।११४) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्र० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'च-जः क-गम्' (२।१।८६) च० ⟶ क० ।

**[तुरासट्, ऋतीषट्]** तुर । ऋति । 'षहि मर्षणे' (९९०) षह् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सह् । तुरं सहते ।* ऋतौ सहते । क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेन दीर्घः । 'भीरुष्ठानादयः' (२।३।३३) स० ⟶ ष० । 'हो धुट्-पदान्ते' (२।१।८२) ह० ⟶ ढ० । 'धुटस्तृतीयः' (२।१।७६) ढ० ⟶ ड० । 'विरामे वा' (१।३।५१) ड० ⟶ ट० ।

**[जलासट्]** जलं सहते । क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेन दीर्घः । शेषं पूर्ववत् ।

**[परीतत्]** 'तनूयी विस्तारे' (१४९९) तन्, परिपूर्व० । परितन्यत इति । 'क्रुत्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । 'गमां क्वौ' (४।२।५८) नलोपः । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । अनेन दीर्घः ।

**[पटुरुक्]** 'रुचि अभिप्रीत्यां च' (९३८) रुच् । रोचते । 'क्रुत्-संपदा०' (५।३।११४) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । पट्वी रुक् यस्य सः ।

**[तिग्मरुक्]** तिग्मा रुक् यस्य सः ।

**[तीव्ररुक्]** तीव्रा रुक् यस्य सः ।

**[श्वेतरुक्]** श्वेता रुक् यस्य सः । 'परतः स्त्री पुंवत् स्त्र्येकार्थेऽनूङ्' (३।२।४९) पुंवत् ।

**[कमलरुक्]** कमलवत् रुक् यस्य सः । 'च-जः क-गम्' (२।१।८६) च० ⟶ क० ।

**[निरुक्, नीरुक्]** रुजोंत् भङ्गे' (१३५०) रुज्, निपूर्व० । नितरां रुजति । क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'च-जः क-गम्' (२।१।८६) ज० ⟶ ग० । 'विरामे वा' (१।३।५१) ग० ⟶ क० । मतान्तरे विकल्पे दीर्घः ।

**[अतिरुक्, अतीरुक्]** 'रुचि अभिप्रीत्यां च' (९३८) रुच्, अतिपूर्व० । अतिशयेन रोचते । क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'च-जः क-गम्' (२।१।८६) च० ⟶ क० । मतान्तरे विकल्पे दीर्घः ।

P. 卐 निवर्त्तनम् । * श० म० न्या० - ऋतिं = पीडां सहते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[उपनद्धम्]** उप-नह् । उपनह्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'नहाहोर्ध-तौ' (२।१।८५) ह० → ध० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ध० → द० ।

**[विततम्]** वि-तन् । वितन्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'यमि-रमि-नमि-गमि०' (४।२।५५) नलोपः ।

**[अयस्कृतम्]** अयस् 'डुकृंग् करणे' (८८८) कृ । अयस्क्रियते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त ।

**[अयस्कारः]** अयस् 'डुकृंग् करणे' (८८८) कृ । अयस्करणम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) आर् । 'सो रुः' (२।१।७२) स० → र० । 'अतः कृ-कमि-कंस-कुम्भ-कुशा-कर्णी-पात्रेऽनव्ययस्य' (२।३।५) र० → स० ।

**[अयस्कृत्]** अयस्करोतीति । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।।छ।।

## घञ्युपसर्गस्य बहुलम् ।।३।२।८६।।

**[नीक्लेदः]** नि 'क्लिदौच् आर्द्रभावे' (११७९) क्लिद् । नितरां क्लिद्यते । 'भावा-ऽकर्त्रो' (५।३।१८) घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । अनेन दीर्घः ।

**[नीमेदः]** नि 'ञिमिदाच् स्नेहने' (११८०) मिद् । नितरां मेद्यति । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । अनेन दीर्घः ।

**[नीमार्गः]** 卐 नि 'मार्गण् अन्वेषणे' (१९५०) मार्ग । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । निमार्ग्गणम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः । अनेन दीर्घः ।

**[नीवारः]** नि 'वृग्ट् वरणे' (१२९४) वृ । निव्रियते । 'नेर्वुः' (५।३।७४) घञ्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) आर् । अनेन दीर्घः ।

**[नीशारः]** कृ (१५२९) - मृ (१५३०) - 'शृश् हिंसायाम्' (१५३१) शृ, निपूर्व० । निशीर्यते इति । 'श्रो वायु-वर्ण-निवृत्ते' (५।३।२०) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) आर् । अनेन दीर्घः ।

**[निषादः]** 'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद्, निपूर्व० । 'षः सोऽष्ट्यै०' (२।३।९८) सद् । निषी(ष)दनम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[विषादः]** 'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद्, विपूर्व० । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सद् । विषी(ष)दनम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[प्रतापः]** 'तपं संतापे' (३३३) तप्, प्रपूर्व० । प्रतपनम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[प्रभावः]** 'भू सत्तायाम्' (१) भू, प्रपूर्व० । प्रभवनम् । बाहुलकात् घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[प्रहारः]** 'हृंग् हरणे' (८८५) हृ, प्रपूर्व० । प्रहरणम् । बाहुलकात् घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

---

卐 श० म० न्यासानुसंधाने - निमार्जनमित्यर्थे निपूर्वकान्मृजेर्घञ् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[प्रतीवेशः, प्रतिवेशः]** प्रति 'विशंत् प्रवेशने' (१४१५) विश् । प्रतिवेशनम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । प्र० सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः । अनेन दीर्घः ।

**[प्रतीबोधः (२)]** 'बुधिं ज्ञाने' (१२६२) बुध्, प्रतिपूर्व० । प्रतिबोधनम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः । अनेन दीर्घः ।

**[परीणामः (२)]** 'णमं प्रह्वत्वे' (३८८) णम् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नम्, परिपूर्व० । परिणमनम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । अनेन दीर्घः ।

**[प्रतीहारः (२)]** 'हृंग् हरणे' (८८५) हृ, प्रतिपूर्व० । प्रतिहरणम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) आर् । अनेन दीर्घः ।

**[प्रतीकारः (२)]** 'डुकृंग् करणे' (८८८) कृ, प्रतिपूर्व० । प्रतिकरणम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) आर् । अनेन सर्वत्र दीर्घः ।

**[अतीसारः (२)]** अति 'सृं गतौ' (२५) सृ । अतिसरणम् । 'सर्त्तेः स्थिर-व्याधि-बल-मत्स्ये' (५।३।१७) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) आर् ।

**[वीसर्पः (२)]** वि 'सृप्लृं गतौ' (३४१) सृप् । विसर्पणम् । घञ्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[प्रासादो गृहम्, प्रसादोऽन्यः]** 'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सद्, प्रपूर्व० । प्रसी(स)दनम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

**[प्राकारो वप्रः, प्रकारोऽन्यः]** प्र 'डुकृंग् करणे' (८८८) कृ । 卐 प्रकरणम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) आर् ।

**[अपामार्ग औषधिः, अपमार्गोऽन्यः]** अप 'मार्गण् अन्वेषणे' (१९५०) मार्ग । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । + अपमार्गयतीति । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'णेरनिटि' (४।३।८३) णिच्लोपः ।

**[नीहारो हिमम्, निहारोऽन्यः]** नि 'हृंग् हरणे' (८८५) हृ । निहरणम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) आर् ।

**[परीरोधो मृगावरोधः, परिरोधोऽन्यः]** परि 'रुधृंपी आवरणे' (१४७३) रुध् । परिरोधनम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[परीहारो देशानुग्रहः, परिहारोऽन्यः]** परि-हृ । परिहरणम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) आर् ।

**[वीतंसः-पक्षिबन्धनम्, वितंसोऽन्यः]** वि 'तनूयी विस्तारे' (११४९९) तन् । वितन्यते । 'व्यवाभ्यां तनेरीच्च वेः' (उणा० ५६५) सप्र० वेरीकारश्चान्तादेशः । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः । अनेन विकल्पे दीर्घः ।

---

卐 श० म० न्या० - प्रकीर्यते = परिविक्षिप्यते इति प्राकारो वप्रः ।

\+ श० म० न्या० - अपमृज्यते व्याध्यादिरनेनेति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[चन्दनसारः]** चन्दनस्य सारः ।

**[खदिरसारः]** खदिरस्य सारः ।

**[अतिमार्गः]** मार्गमतिक्रान्तः असौ ।

**[अवसायः]** 'षोंच् अन्तकर्मणि' (११५०) षो । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सो । 'आत् सन्ध्यक्षरस्य' (४।२।१) सा, अवपूर्व० । अवस्यतीति । 'अवह्-सा-संस्रोः' (५।१।६३) णप्र० → अ । 'आत ऐः कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[अवहारः]** अव-हृ । अवहरणम् । 'अवह्-सा-संस्रोः' (५।१।६३) णप्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) आर् ।

**[दक्षिणापथः]** दक्षिणा । पथिन् । दक्षिणा चासौ पन्थाश्च । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लोपः ।

**[उत्तरापथः]** उत्तरा । पथिन् । उत्तरा चासौ पन्थाश्च । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लोपः ।

**[अधीदन्तः]** अधिका दन्ता यस्य सः ।

**[अधीकर्णः]** अधिकौ कर्णौ यस्य सः ।

**[अधीकण्ठः]** अधिकः कण्ठो यस्य सः ।

**[अधीपादः]** अधिकौ पादौ यस्य सः ।

**[पूरुषः, पुरुषः]** 'पृश् पालन-पूरणयोः' (१५३२) पृ । पृणाति=पालयति परेषामर्थमिति । 'विदि-पृभ्यां कित्' (उणा० ५५८) किद् उषप्र० पुरुषनिपातः । अथवा 'ओष्ठ्यादुर्' (४।४।११७) उर् ।

**[नारकः, नरकः]** 'कैं शब्दे' (३६) कै । 'आत् सन्ध्यक्षरस्य' (४।२।१) का । नरान् कायतीति । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलोपः ।

**[अतिशायनम्, अतिशयनम्]** अति 'शीङ्क् स्वप्ने' (११०५) शी । अतिशय्यते । 'अनट्' (५।३।१२४) अनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । बहुलवचनाद् दीर्घः ।

**[नीकाशः, निकाशः]** नि 'काशृङ् दीप्तौ' (८३०) काश् । निकाशनम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । बहुवचनाद् दीर्घो वा ।

**[प्रतीकाशः, प्रतिकाशः]** प्रति 'काशृङ् दीप्तौ' (८३०) काश् । प्रतिकाशनम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । बहुलवचनाद् दीर्घो वा ।।छ।।

## नामिनः काशे ।।३।२।८७।।

**[नीकाशः]** 'काशृङ् दीप्तौ' (८३०) काश्, निपूर्व० । नितरां काशते, निकाश्यते इति वा । 'अच्' (५।१।४९) अच्प्र० → अ । अनेन दीर्घः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[वीकाशः]** विकाशते । 'अच्' (५।१।४९) अच्प्र० → अ । अनेन दीर्घः ।

**[अनूकाशः]** अनुकाशते । 'अच्' (५।१।४९) अच्प्र० → अ । अनेन दीर्घः ।।छ।।

## दस्ति ॥३।२।८८॥

**[दस्ति]** दा षष्ठी ङस् । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः । तृ सप्तमी ङि ।

**[नीत्तम्]** नि 'डुदांग्क् दाने' (११३८) दा ।卐 निदातुमारेभे । सर्वत्र क्तप्र० → त । 'नि-वि-स्वन्ववात्' (४।४।८) दा० → त्त्० । 'धुटो धुटि स्वे वा (१।३।४८) त्लोपः । अनेन दीर्घः, त्लोपात् पूर्वम् ।

**[परीत्तम्]** परिदातुमारब्धम् । 'आरम्भे' (५।१।१०) क्तप्र० → त । 'स्वरादुपसर्गाद् दस्ति कित्यधः' (४।४।९) दा० → त्त्० । अनेन दीर्घः । 'धुटो धुटि स्वे वा' (१।३।४८) त्लोपः ।

**[परीत्तवान्]** परिददाति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । 'स्वरादुपसर्गाद् दस्ति कित्यधः' (४।४।९) दा० → त्त्० । अनेन दीर्घः । 'धुटो धुटि स्वे वा' (१।३।४८) त्लोपः ।

**[परीत्त्रिमम्]** 'डुदांगक् दाने' (११३८) दा, परिपूर्व० । परिदानेन निर्वृत्तम् । 'ड्वितस्त्रिमक् तत्कृतम्' (५।३।८४) त्रिमक्प्र० → त्रिम । 'स्वरादुपसर्गाद्०' (४।४।९) दा० → त्त्० । अनेन दीर्घः । 'धुटो धुटि स्वे वा' (१।३।४८) त्-लोपः ।

**[प्रणीत्त्रिमम्]** प्रणिदानेन निर्वृत्तम् । 'ड्वितस्त्रिमक् तत्कृतम्' (५।३।८४) त्रिमक्प्र० → त्रिम । 'स्वरादुपसर्गाद्०' (४।४।९) दा० → त्त्० । 'धुटो धुटि स्वे वा' (१।३।४८) त्लोपः ।

**[वितीर्णम्]** 'तॄ प्लवन-तरणयोः' (२७) तॄ, विपूर्व० । वितीर्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'ऋतां क्ङितीर्' (४।४।११६) इर् । 'ॠ-ल्वादेरेषां तो नोऽप्रः' (४।२।६८) त० → न०, पूर्वं क्रियते । 'पदान्ते' (२।१।६४) दीर्घः । 'रषृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[सुदत्तम्]** सु 'डुदांग्क् दाने' (११३८) दा । सुदीयते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० →,त । 'दत्' (४।४।१०) दा० → दत् ।

**[प्रत्तम्]** प्रदातुमारभते स्म । 'आरम्भे' (५।१।१०) क्तप्र० → त । 'प्राद् दागस्त आरम्भे क्ते' (४।४।७) दा० → त्त्० । 'धुटो धुटि स्वे वा' (१।३।४८) त्लोपः । सि-अम् ।

**[अवत्तम्]** अवदातुमारब्धम् । 'आरम्भे' (५।१।१०) क्तप्र० → त । 'नि-वि-स्वन्ववात्' (४।४।८) दा० → त्त्० । 'धुटो धुटि स्वे वा' (१।३।४८) त्लोपः । सि-अम् ।।छ।।

## अपील्वादेर्वहे ॥३।२।८९॥

**[अपील्वादेः]** पीलु(ः) आदिर्यस्याऽसौ पील्वादिः, न पील्वादिरपील्वादिस्तस्मात् (?) (तस्य) ।

**[वहे]** वह सप्तमी ङि ।

**[ऋषीवहम्]** 'वहीं प्रापणे' (९९६) वह् । वहतीति । 'अच्' (५।१।४९) अच्प्र० । ऋषीणां वहम् ।

---

P. 卐 निदातुमारब्धम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[मुनीवहम्]** मुनीनां वहम् ।

**[कपीवहम्]** कपीनां वहम् ।

**[ऋषीवहः]** वहन्त्यनेनेति । 'गोचर-संचर-वह-व्रज-व्यज-खला-ऽऽपण-निगम-बक-भग-कषा-ऽऽकष-निकषम्' (५।३।१३१) घप्र० → अ । ऋषीणां वहः ।

**[मुनीवहः]** मुनीनां वहः ।

**[कपीवहः]** कपीनां वहः ।

**[पीलुवहम्]** पीलूनां वहम् ।

**[दारुवहम्]** दारूणां वहम् ।

**[पिण्डवहम्]** पिण्डस्य वहम् ।

**[काष्ठवहम्]** काष्ठस्य वहम् ।।छ।।

## शुनः ।।३।२।९०।।

**[शुनः]** श्वन् षष्ठी ङस् । 'श्वन्-युवन्-मघोनो ङीस्याद्यघुट्स्वरे व उः' (२।१।१०६) व० → उ० ।

**[श्वादन्तः]** शुनो दन्तः ।

**[श्वादंष्ट्रा]** शुनो दंष्ट्रा ।

**[श्वाकर्णः]** शुनः कर्णः ।

**[श्वाकर्दः]** शुनः कर्दः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । अनेन दीर्घः ।

**[श्वापुच्छम्, श्वपुच्छम्]** शुनः पुच्छम् । बहुलाधिकारात् विकल्पे दीर्घः ।

**[श्वापदं व्याघ्रादिः]** शुनः पदमिव पदमस्य । श्वापदं देहिनामत्वात् पुंस्त्वे प्राप्ते बाहुलकात् नपुंसकत्वम् ।

**[श्वपदम्]** शुनः पदम् ।

**[श्वफल्कः]** पल (९८२) - 'फल गतौ' (९८३) फल् । फलन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । श्वानं फालयतीति । 'निष्क-तुरुष्कोदर्काऽलर्क-शुल्क-श्वफल्क-किञ्जल्कोल्का-वृक्क-च्छेक-केका-यस्काऽऽदयः' (उणा० २६) कप्र० निपात्यते ।

**[श्वमुखः]** शुनो मुखमिव मुखमस्य सः ।।छ।।

## एकादश षोडश षोडन् षोढा षड्ढा ।।३।२।९१।।

**[एकादशषोडशषोडन्षोढाषड्ढा]** एकादशा च षोडशा च षोडन् च षोढा च षड्ढा च । जस् । सूत्रत्वात् लोपः ।

**[एकादश]** एक-दशन् । एकोत्तरा दश । एकेनाधिका दश । 'मयूरव्यंसकेत्यादयः' (३।१।११६) समासः । एकं च दश च वा । अनेन दीर्घः ।

**[षोडश]** षष्-दशन् । षडुत्तरा दश । षट् च दश च वा । अनेन षषोऽन्तस्योत्वम्-दस्य डत्वम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[षोडन्]** षष्-दन्त । षड् दन्ता अस्य । 'वयसि दन्तस्य दतृः' (७।३।१५१) दत्रादेशः-दत् । षषोऽन्तस्य उत्वम्-डस्य उत्वं (?) (दस्य डत्वं) च । प्र० सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[षोडन्तौ]** षड् दन्ता ययोः, तौ ।

**[षोडन्तः]** षड् दन्ता येषां, ते ।

**[षोडनी]** स्त्रियां तु 'अधातूदृदितः' (२।४।२) ङी ।

**[षोडीयति]** षड् दन्ता अस्य । मतान्तरे "षोडन्" निपातः । षोडानमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । 'क्यनि' (४।३।११२) ई । षोडीयतीति सिद्ध्यति, स्वमते षोडत्य(न्य)ति ।

**[षोढा]** षष् । षड्भिः प्रकारैः । 'संख्याया धा' (७।२।१०४) धाप्र० । अनेन षषोऽन्तस्य उत्वम्-धस्य ढत्वम् ।

**[षड्ढा]** षष् । षड्भिः प्रकारैः । 'संख्याया धा' (७।२।१०४) धाप्र० । द्वितीये षषोऽन्तस्य उत्वं न । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) षस्य ड० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) धस्य ढत्वम् ।

**[षड्धा]** षष् 'डुधांग्क् धारणे च' (११३९) धा । 'ट्धें पाने' (२८) धे । 'आत् सन्ध्यक्षरस्य' (४।२।१) धा । षड् दधाति धयति वा । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।।छ।।

### द्वि-त्र्यष्टानां द्वा-त्रयो-ऽष्टाः प्राक् शतादनशीति-बहुव्रीहौ ।।३।२।९२।।

**[द्वित्र्यष्टानाम्]** 卐 द्वौ च त्रयश्च अष्टौ च = द्वित्र्यष्टानस्तेषाम् = द्वित्र्यष्टानाम् । षष्ठी आम् । 'संख्यानां ष्र्णाम्' (१।४।३३) नाम् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । 'दीर्घो नाम्यतिसृ-चतसृ-ष्रः' (१।४।४७) दीर्घः ।

**[द्वात्रयोष्टाः]** द्वा च त्रयश्च अष्टा च, जस् ।

**[प्राक्]** प्राक् । प्र० सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[शतादनशीतिबहुव्रीहौ]** अशीतिश्च बहुव्रीहिश्च = अशीतिबहुव्रीहिः, न अशीतिबहुव्रीहिरनशीतिबहुव्रीहिः । 'अन् स्वरे' (३।२।१२९) अन्, तस्मिन् ।

**[द्वादश]** द्वि । दशन् । द्वाभ्यामधिका दश, द्वौ च दश च वा ।

**[द्वाविंशतिः]** द्वाभ्यामधिका विंशतिः ।

**[द्वात्रिंशत्]** द्वाभ्यामधिका त्रिंशत् ।

**[त्रयोदश]** त्रिभिरधिका दश ।

**[त्रयोविंशतिः]** त्रिभिरधिका विंशतिः ।

**[त्रयस्त्रिंशत्]** त्रिभिरधिका त्रिंशत् ।

---

P. 卐 द्विश्च त्रिश्च अष्टा च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अष्टात्रिंशत्]**卐 अष्टभिरधिका त्रिंशत् । अनेन द्वा-त्रयस्-अष्टा निपातः ।

**[पञ्चदश]** पञ्चन् । दशन् । पञ्चभिरधिका दश । प्र० जस् । 'डतिष्णः संख्याया लुप्' (१।४।५४) जस्लुप् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[द्विशतम्]** द्वाभ्यामधिकं शतम् ।

**[त्रिशतम्]** त्रिभिरधिकं शतम् ।

**[अष्टशतम्]** अष्टभिरधिकं शतम् ।

**[द्विसहस्रम्]** द्वाभ्यामधिकं सहस्रम् ।

**[त्रिसहस्रम्]** त्रिभिरधिकं सहस्रम् ।

**[अष्टसहस्त्रम्]** अष्टभिरधिकं सहस्रम् ।

**[द्व्यशीतिः]** द्वाभ्यामधिका अशीतिः ।

**[त्र्यशीतिः]** त्रिभिरधिका अशीतिः ।

**[द्वित्राः]** द्वौ वा त्रयो वा = द्वित्राः । 'सुज्-वाऽर्थे संख्या संख्येये संख्यया बहुव्रीहिः' (३।१।१९) इति बहुव्रीहिः । 'प्रमाणी-संख्या०' (७।३।१२८) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) इलोपः ।

**[त्रिचतुराः]** त्रयो वा चत्वारो वा । 'नञ्-सु-व्युप-त्रेश्चतुरः' (७।३।१३१) अप्समासान्तः ।

**[अष्टनवाः]** अष्टौ वा नवा(व) वा ।

**[द्विदशाः]** द्विर्दश । 'प्रमाणी-संख्या०' (७।३।१२८) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लोपः । जस् ।

**[त्रिदशाः]** त्रिर्दश । 'प्रमाणी-संख्या०' (७।३।१२८) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लोपः । जस् ।

**[द्वैमातुरः]** द्वि । मातृ । द्वयोर्मात्रोरपत्यम् । 'संख्या-सं-भद्रान्मातुर्मातुर्च' (६।१।६६) अण्प्र० - मातुर् च आदेशः । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ।

**[त्रैमातुरः]** तिसृणां मातृणामपत्यम् । 'संख्या-सं-भद्रान्मातुर्मातुर्च' (६।१।६६) अण्प्र० - मातुर् च आदेशः । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ।

**[आष्टमातुरः]** अष्टानां मातृणामपत्यम् । 'संख्या-सं-भद्रान्मातुर्मातुर्च' (६।१।६६) अण्प्र० - मातुर् च आदेशः । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ।

**[द्विमुनि व्याकरणस्य]** द्वौ मुनी कर्त्तारौ व्याकरणस्य ।

**[त्रिमुनि व्याकरणस्य]** त्रयो मुनयः कर्त्तारो व्याकरणस्य । 'ऐकार्थ्ये' (३।२।८) वाक्यमध्यस्था विभक्तिलोपः ॥छ॥

---

P. 卐 अष्टाभिरधिका त्रिंशत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## चत्वारिंशदादौ वा ॥३।२।९३॥

[चत्वारिंशदादौ] चत्वारिंशत् आदिर्यस्याऽसौ, तस्मिन् ।

[द्वाचत्वारिंशत्, द्विचत्वारिंशत्] द्वि । चत्वारिंशत् । द्वाभ्यामधिका चत्वारिंशत्, द्वौ च चत्वारिंशच्चेति वा ।

[त्रयश्चत्वारिंशत्, त्रिचत्वारिंशत्] त्रिभिरधिका चत्वारिंशत् ।

[द्वापञ्चाशत्, द्विपञ्चाशत्] द्वाभ्यामधिका पञ्चाशत् ।

[त्रयःपञ्चाशत्, त्रिपञ्चाशत्] त्रिभिरधिका पञ्चाशत् ।

[अष्टापञ्चाशत्, अष्टपञ्चाशत्] अष्टभिरधिका पञ्चाशत् ।

[द्वाषष्टिः, द्विषष्टिः] द्वाभ्यामधिका षष्टिः ।

[त्रयःषष्टिः, त्रिषष्टिः] त्रिभिरधिका षष्टिः ।

[अष्टाषष्टिः, अष्टषष्टिः] अष्टाभिरधिका षष्टिः ।

[द्वासप्ततिः, त्रिसप्ततिः] द्वाभ्यामधिका सप्ततिः ।

[त्रयःसप्ततिः, त्रिसप्ततिः] त्रिभिरधिका सप्ततिः ।

[अष्टासप्ततिः, अष्टसप्ततिः] अष्टाभिरधिका सप्ततिः ।

[द्वानवतिः, द्विनवतिः] द्वाभ्यामधिका नवतिः ।

[त्रयोनवतिः, त्रिनवतिः] त्रिभिरधिका नवतिः ।

[अष्टानवतिः, अष्टनवतिः] अष्टाभिरधिका नवतिः । अनेन द्वा-त्रयस्-अष्टा आदेशः ।

[द्व्यशीतिः] द्वाभ्यामधिका अशीतिः ।

[त्र्यशीतिः] त्रिभिरधिका अशीतिः ।

[द्विचत्वारिंशाः] द्विश्चत्वारिंशत् । द्वौ वारावस्य द्विः । 'द्वि-त्रि-चतुरः सुच्' (७।२।११०) सुच्प्र० → स्, ततः पाश्चात्यः समासः । 'प्रमाणी-संख्या०' (७।३।१२८) डप्र० → अ । 'डित्यन्त्य०' (२।१।११४) अत्लोपः । प्रथमाबहु० जस् ।

[त्रिचत्वारिंशाः] त्रयो वारा अस्य । 'द्वि-त्रि-चतुरः सुच्' (७।२।११०) सुच्प्र० → स्, ततः पाश्चात्यः समासः । 'प्रमाणी-संख्या०' (७।३।१२८) डप्र० → अ । 'डित्यन्त्य०' (२।१।११४) अत्लोपः । प्रथमाबहु० जस् ।

[अष्टचत्वारिंशत्] अष्टौ चत्वारिंशतोऽस्मिन् ॥छ॥

## हृदयस्य हृल्लास-लेखा-ऽण्-ये ॥३।२।९४॥

[लासलेखाऽण्ये] लासश्च लेखश्च अण् च यश्च = लासलेखाऽण्यम्, तस्मिन् ।

[हृल्लासः] 'लस श्लेषण-क्रीडनयोः' (५४३) लस् । लसनं = लासः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । हृदयस्य लासः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[हृल्लेखः]** 'लिखत् अक्षरविन्यासे' (१३३६) लिख् । हृदयं ले(लि)खतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । अनेन हृत् ।

**[हृदयलेखः]** हृदयस्य लेखः ।

**[हार्दम्]** हृदयस्येदम् । 'तस्येदम्' (६।३।१६०) अण्प्र० । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । अनेन पूर्वं हृदादेशस्ततो वृद्धिः आर् ।

**[सौहार्दम्]** शोभनं हृदयं यस्य । सुहृदयस्य भावः । 'युवादेरण्' (७।१।६७) अण्प्र० । 'हृद्-भग-सिन्धोः' (७।४।२५) उभयपदवृद्धिः ।

**[दौर्हार्दम्]** दुष्टं हृदयं यस्य । दुर्हृदयस्य भावः । 'युवादेरण्' (७।१।६७) अण्प्र० । 'हृद्-भग-सिन्धोः' (७।४।२५) उभयपदवृद्धिः ।

**[हृद्यः]** हृदयस्य प्रियः । हृद्य-पद्य-तुल्य-मूल्य-वश्य-पथ्य-वयस्य-धेनुष्या-गार्हपत्य-जन्य-धर्म्यम् (७।१।११) यप्र० ।

**[हृद्यः]** हृदयस्य बन्धनो मन्त्रः । 'हृद्य-पद्य-तुल्य-मूल्य०' (७।१।११) यप्र० ।

**[हृद्यम्]** हृदयाय हितम् । 'प्राण्यङ्ग-रथ-खल-तिल-यव-वृष-ब्रह्म-माषाद् यः' (७।१।३७) यप्र० । अनेन हृदादेशः ।

**[सौहार्द्यम्]** सुहृदो भावः । 'पति-राजान्त०' (७।१।६०) ट्यण्प्र० । 'हृद्-भग-सिन्धोः' (७।४।२५) उभयपदवृद्धिः ।

**[सौहृदय्यम्]** सुहृदयस्य भावः । पति-राजान्तगुणाङ्गराजादिभ्यः कर्मणि च' (७।१।६०) ट्यण्प्र० → य ।

**[हृच्छोकः, हृदयशोकः]** हृदयस्य शोकः ।

**[हृद्रोगः, हृदयरोगः]** हृदयस्य रोगः ।

**[हृच्छङ्कुः, हृदयशङ्कुः]** हृदयस्य शङ्कुः ।

**[हृच्छूलम्, हृदयशूलम्]** हृदयस्य मू(शू)लम् ।

**[हृच्छल्यम्, हृदयशल्यम्]** हृदयस्य शल्यम् ।

**[हृद्दाहः, हृदयदाहः]** हृदयस्य दाहः ।

**[हृद्दुःखम्, हृदयदुःखम्]** हृदयस्य दुःखम् ।

**[हृत्कमलम्, हृदयकमलम्]** हृदयस्य कमलम् ।

**[हृत्पुण्डरीकम्, हृदयपुण्डरीकम्]** हृदयस्य पुण्डरीकम् । मतान्तरेऽनेनैव हृदादेशः ।।छ।।

### पदः पादस्या-ऽऽज्या-ऽऽति-गोपहते ।।३।२।९५।।

**[आज्याऽऽतिगोपहते]** आजिश्च आतिश्च गश्च उपहतश्च = आज्याऽऽतिगोपहतम्, तस्मिन् ।

**[पदाजिः]** पाद । 'अज क्षेपणे च' (१३९) अज् । पादाभ्यामजति । 'पादाच्चात्यजिभ्याम्' (उणा० ६२०) णिद् इप्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । अनेन पदादेशः ।

**[पदातिः]** पाद । 'अत सातत्यगमने' (२७९) अत् । पादाभ्यामतति । 'पादाच्चात्यजिभ्याम्' (उणा० ६२०) णिद्

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

इप्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । अनेन पदादेशः ।

**[पदगः]** पाद । अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । पादाभ्यां गच्छति । 'नाम्नो गमः खड्-डौ च०' (५।१।१३१) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अम्लोपः ।

**[पदोपहतः]** पाद । 'हनंक् हिंसा-गत्योः' (११००) हन्, उपपूर्व० । उपहन्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'यमि-रमि-नमि-गमि-हनि-मनि-वनति-तनादेर्धुटि क्ङिति' (४।२।५५) नलोपः । पादाभ्यामुपहतः । अनेन पदादेशः ।

**[दिग्धपादोपहतः]** दिग्धश्चासौ पादश्च = दिग्धपादस्तेनोपहतः = दिग्धपादोपहतः ॥छ॥

## हिम-हति-काषि-ये पद् ॥३।२।९६॥

**[हिमहतिकाषिये]** हिमं च हतिश्च काषी च यश्च = हिमहतिकाषियम्, तस्मिन् ।

**[पद्]** पद् । प्र० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[पद्धिमम्]** पादयोर्हिमम् । अनेन पद्० । 'ततो हश्चतुर्थः' (१।३।३) ह० → ध० ।

**[पद्धतिः]** 'हनंक् हिंसा-गत्योः' (११००) हन् । हननं = हतिः । ꖴ 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । 'यमि-रमि-नमि०' (४।२।५५) नलोपः । पादाभ्यां हतिः । अनेन पद्० । 'ततो हश्चतुर्थः' (१।३।३) ह० → ध० ।

**[पत्काषी]** पाद । 'कष हिंसायाम्' (५०७) कष् । पादौ कषतीत्येवंशीलः । 'अजातेः शीले' (५।१।१५४) णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । प्रथमैक० सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्या०' (१।४।४५) सिलोपः । 'नाम्नोः नोऽनह्नः' (२।१।९१) नलोपः । अनेन पद्० ।

**[परमपत्काषी]** परमश्चासौ पत्काषी च ।

**[पद्याः शर्कराः]** पादौ विध्यन्ति । 'विध्यत्यनन्येन' (७।१।८) यप्र० । प्र० जस् ।

**[पद्याः पांसवः]** पादयोर्भवाः । 'दिगादिदेहांशाद् यः' (६।३।१२४) यप्र० । प्र० जस् ।

**[पद्यं घृतम्]** पादाभ्यां हितम् । 'प्राण्यङ्ग-रथ-खल-तिल-यव-वृष-ब्रह्म-माषाद् यः' (७।१।३७) यप्र० । अनेन पद्० ।

**[पाद्यम्]** पादार्थमुदकम् । 'पाद्यार्घ्ये' (७।१।२३) पाद्यनिपातः । सि-अम् ।

**[द्विपाद्यम्]** द्वाभ्यां पादाभ्यां क्रीतम् । 'पण-पाद-माषाद् यः' (६।४।१४८) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[त्रिपाद्यम्]** त्रिभिः पादैः क्रीतम् । 'पण-पाद-माषाद् यः' (६।४।१४८) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[अध्यर्द्धपाद्यम्]** अधिकमर्द्धं यस्याऽसौ, अध्यर्द्धेन पादेन क्रीतम् । 'पण-पाद-माषाद् यः' (६।४।१४८) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[पद्गः]** पाद । अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । पादाभ्यां गच्छतीति । 'नाम्नो गमः खड्-डौ च०' (५।१।१३१) डप्र० । मतान्तरे पदादेशः ।

**[पदुपहतः]** पादाभ्यामुपहतं(तः) । मतान्तरे पदादेशः ।

---

P. ꖴ 'श्वादिभ्यः' (५।३।९२) क्तिप्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[हास्तिपदः]** हस्तिपद । हस्तिपदस्याऽपत्यम् । 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अण्प्र० । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'कौपिञ्जल-हास्तिपदादण्' (६।३।१७१) इत्यत्र हास्तिपद इति निर्देशात् ।

**[पदिकः]** पाद । पादाभ्यां चरति । 'पदिकः' (६।४।१३) पदिक इति निपातः ।।छ।।

## ऋचः श्शसि ।।३।२।९७।।

**[श्शसि]** शा उपलक्षितः शस् = श्शस्, तस्मिन् ।

**[पच्छो गायत्रीं शंसति]** पाद । पादं २ गायत्र्याः शंसति । 'संख्यैकार्थाद् वीप्सायां शस्' (७।२।१५१) शस्प्र० । 'धुटस्तृतीयः' (२।१।७६) द० → द० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) द० → ज० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ज० → च० । 'प्रथमादधुटि शश्छः' (१।३।४) श० → छ० । अम् । अनेन 卐 पदवाक्यगम्यस्य गायत्र्याः पादसंबंधस्य वृत्तौ निवृत्तत्वात्, केन निवृत्तत्वात् ? तद्धितैकार्थे इत्यनेन ।

**[पादशः कार्षापणं ददाति]** पादं पादं कार्षापणस्य ददाति ।

**[पादशः श्लोकं व्याचष्टे]** पादं (२) श्लोकस्य ददाति (व्याचष्टे) । 'संख्यैकार्थाद् वीप्सायां शस्' (७।२।१५१) शस्प्र० । 'क्रियाविशेषणात्' (२।२।४१) अम् ।।छ।।

## शब्द-निष्क-घोष-मिश्रे वा ।।३।२।९८।।

**[शब्दनिष्कघोषमिश्रे]** शब्दश्च निष्कश्च घोषश्च मिश्रश्च = शब्दनिष्कघोषमिश्रम्, तस्मिन् ।

**[पच्छब्दः, पादशब्दः]** पाद । शब्द । पादयोः शब्दः ।

**[पन्निष्कः, पादनिष्कः]** पादयोर्निष्कः ।

**[पद्घोषः, पादघोषः]** पादयोर्घोषः ।

**[पन्मिश्रः, पादमिश्रः]** पादाभ्यां मिश्रः । अनेन विकल्पे पद्० ।।छ।।

## नस् नासिकायास्तः-क्षुद्रे ।।३।२।९९।।

**[नस्]** नस् । प्र० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[नासिकायाः]** नासिका षष्ठी ङस् । 'आपो ङितां यै-यास्-यास्-याम्' (१।४।१७) यास्० ।

**[तः-क्षुद्रे]** तस् च क्षुद्रश्च = तःक्षुद्रम्, तस्मिन् ।

**[नस्तः]** नासिका । नासिकायाः । 'अहीय-रुहोऽपादाने' (७।२।८८) तस्प्र० । नासिकायां वा । 'आद्यादिभ्यः' (७।२।८४) तस्प्र० । अनेन नस् ।

**[नःक्षुद्रः]** नासिकायां नासिकाया वा क्षुद्रः । अनेन नस् ।।छ।।

## येऽवर्णे ।।३।२।१००।।

**[ये]** य सप्तमी ङि । 'अवर्णस्ये०' (१।२।६) ए ।

**[अवर्णे]** न विद्यते वर्णो यत्र तत् = अवर्णम् । 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् ।

---

P. 卐 वाक्यगम्यस्य गायत्र्याः प(पा)दसंबंधस्य वृत्तौ निवृत्तत्वात् स्वाभाविकं शंसनक्रियापेक्षं कर्मत्वं भवति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[नस्यम्]** नासिकायै हितम् । 'प्राण्यङ्ग-रथ-खल-तिल-यव-वृष-ब्रह्म-माषाद् यः' (७।१।३७) यप्र० । नासिकायां भवं वा । 'दिगादिदेहांशाद् यः' (६।३।१२४) यप्र० । अनेन नस् ।

**[नासिक्यं नगरम्]** नासिका । नासिकाऽस्त्यस्मिन्, तत् । नासिकाया निवासम् । नासिकाया अदूरभवम् । नासिकया निर्वृत्तम् । 'सुपन्थ्यादेर्ञ्यः' (६।२।८४) ञ्यप्र० → य । 'अवर्णेवर्णस्य' (७।४।६८) आलोपः ।

**[नासिक्यो वर्णः]** नासिकायां भवं(वः) । 'दिगादि०' (६।३।१२४) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलोपः ।।छ।।

## शिरसः शीर्षन् ।।३।२।१०१।।

**[शिरसः]** शिरस् षष्ठी ङस् ।

**[शीर्षन्]** शीर्षन् प्रथमा सि ।

**[शीर्षण्यः स्वरः]** शिरस् । शिरसि भवः । 'दिगादिदेहांशाद् यः' (६।३।१२४) यप्र० । अनेन शीर्षन्० । 'रषृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[शीर्षण्यं तैलम्]** शिरसे हितम् । 'प्राण्यङ्ग-रथ-खल०' (७।१।३७) यप्र० । अनेन शीर्षन्० । 'रषृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[शिरस्तः]** शिरसः । 'अहीय-रुहोऽपादाने' (७।२।८८) तसुप्र० ।

**[सशिरस्कः]** सह शिरसा वर्त्तत इति । 'सहस्य सोऽन्यार्थे' (३।२।१४३) सह → सभावः । 'शेषाद् वा' (७।३।१७५) कच्प्र० → क । 'सो रुः' (२।१।७२) स० → र० । 'प्रत्यये' (२।३।६) रस्य स० ।

**[शिरस्यति]** शिर इच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य ।

**[हास्तिशीर्ष्या]** हस्तिन् । शिरस् । हस्तिनः शिर इव शिरोऽस्याऽसौ हस्तिशिराः । हस्तिशिरसोऽपत्यम् । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'शीर्षः स्वरे तद्धिते' (३।२।१०३) शिरस्० → शीर्ष आदेशः । 'अनार्षे वृद्धेऽणिञो बहुस्वर-गुरूपान्त्यस्या-ऽन्तस्य ष्यः' (२।४।७८) इ → ष्य आदेशः । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'आत्' (२।४।१८) आप्प्र० → आ । 'अवर्णे०' (७।४।६८) शीर्षशब्दाकारस्य लोपः । अग्रेतने स्थाने ष्य आदेशो न स्यात् ।

**[पैलुशीर्ष्या]** पीलु शिरोऽस्याऽसौ पीलुशिराः । पीलुशिरसोऽपत्यम् । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'शीर्षः स्वरे तद्धिते' (३।२।१०३) शीर्ष आदेशः । 'अनार्षे वृद्धेऽणिञो बहुस्वर०' (२।४।७८) ष्य० । 'आत्' (२।४।१८) आप्प्र० → आ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) शीर्षशब्दाकारस्य लोपः ।।छ।।

## केशे वा ।।३।२।१०२।।

**[शीर्षण्याः केशाः, शिरस्याः केशाः]** शिरस् । शिरसि भवाः । 'दिगादिदेहांशाद् यः' (६।३।१२४) यप्र० । अनेन विकल्पे शीर्षन्० । 'रषृवर्णान्नो ण०' (२।३।६३) न० → ण० । प्र० जस् ।

**[शिरस्यः]** शिरसस्तुल्यः । 'शाखादेर्यः' (७।१।११४) यप्र० ।।छ।।

## शीर्षः स्वरे तद्धिते ।।३।२।१०३।।

**[हास्तिशीर्षिः]** हस्तिन् । शिरस् । हस्तिनः शिर इव शिरोऽस्याऽसौ हस्तिशिराः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । हस्तिशिरसोऽपत्यम् । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनेन शीर्ष० सर्वत्र ।

**[स्थौलशीर्षिः]** स्थूलं शिरोऽस्याऽसौ स्थूलशिराः । स्थूलशिरसोऽपत्यम् । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । अनेन शीर्ष० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लोपः ।

**[पैलुशीर्षिः]** पीलु शिर इव शिरोऽस्याऽसौ पीलुशिराः । पीलुशिरसोऽपत्यम् । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । अनेन शीर्ष० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लोपः ।

**[मार्गशीर्षी पौर्णमासी]** मृगशिरस् । मृगशिरसा चन्द्रयुक्तेन युक्ता पौर्णमासी । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलोपः ।

**[स्थौलशीर्षम्]** स्थूलशिरस इदम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ । अनेन शीर्ष आदेशः ।

**[शैर्षम्]** शिरस् । शिरसि कृतम् । 'तत्र कृत-लब्ध-क्रीत-सम्भूते' (६।३।९४) अण्प्र० → अ । अनेन शीर्ष० । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[शीर्षिकः]** शिरस् । शिरसा तरति । 'नौ-द्विस्वरादिकः' (६।४।१०) इकप्र० । अनेन शीर्ष० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[शिरस्कल्पः]** ईषदपरिसमाप्तं शिरः । 'अतमबादेरीषदसमाप्ते कल्पप्-देश्यप्-देशीयर् (७।३।११) कल्पप्प्र० → कल्प ।

**[स्थूलशिरयति]** स्थूलशिरसमाचष्टे । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० → इ । 'त्रन्त्यस्वरादेः' (७।४।४३) अस्लोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[शीर्षच्छेद्यं परिच्छिद्य]** शीर्षच्छेद । परिच्छेद । शीर्षच्छेदमर्हति । परि=समन्तात् छेदमर्हति । 'शीर्षच्छेदाद् यो वा' (६।४।१८४) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।।छ।।

### उदकस्योदः पेषं-धि-वास-वाहने ।।३।२।१०४।।

**[उदकस्य]** उदक षष्ठी ङस् ।

**[उदः]** उद प्रथमा सि ।

**[पेषंधिवासवाहने]** पेषं च धिश्च वासश्च वाहनं च = पेषंधिवासवाहनम्, तस्मिन् ।

**[उदपेषं पिनष्टि तगरम्]** उदक 'पिष्लृंप् संचूर्णने' (१४९३) पिष् । उदकेन पिनष्टि । स्व-स्नेहनार्थात् पुष-पिषः (५।४।६५) णम्प्र० → अम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । अनेन "उद" आदेशः ।

**[उदधिः घटः]** उदकं धीयतेऽस्मिन्निति । 'व्याप्यादाधारे' (५।३।८८) किप्र० → इ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलोपः । अनेन "उद" आदेशः ।

**[उदवासः]** उदकस्य वासः = उदवासः । अनेन "उद" आदेशः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[**उदवाहनः**] वहीं प्रापणे (९९६) वह् । वहन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । वाहयतीति । 'नन्द्यादिभ्योऽनः' (५।१।५२) अनप्र० । णेरनिटि (४।३।८३) णिग्लोपः । ꖾ उदकस्य वाहनः । अनेन "उद" आदेशः ॥छ॥

## वैकव्यञ्जने पूर्ये ॥३।२।१०५॥

[**वा**] वा प्रथमा सि ।

[**एकव्यञ्जने**] एकं च तद् व्यञ्जनं च = एकव्यञ्जनम्, तस्मिन् ।

[**उदकुम्भः, उदककुम्भः**] उदकस्य पूरणं कुम्भः ।

[**उदघटः, उदकघटः**] उदकस्य पूरणं घटः ।

[**उदपात्रम्, उदकपात्रम्**] उदकस्य पूरणं पात्रम् । अनेन "उद" आदेशः ।

[**उदकामत्रम्**] उदकस्यामत्रं = भाजनम् ।

[**उदकस्थालम्**] उदकस्य पूरणं स्थालम् ।

[**उदकपर्वतः**] उदकेनोपलक्षितः पर्वतः ।

[**उदकदेशः**] उदकेनोपलक्षितो देशः ॥छ॥

## मन्थौदन-सक्तु-बिन्दु-वज्र-भार-हार-वीवध-गाहे वा ॥३।२।१०६॥

[**मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहे**] मन्थश्च ओदनश्च सक्तुश्च बिन्दुश्च ꖾꖾवज्रं च भारश्च हारश्च वीवधश्च गाहश्च = मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहम्, तस्मिन् ।

[**उदमन्थः, उदकमन्थः**] + उदकस्य मन्थः ।

[**उदौदनः, उदकौदनः**] उदकेनोपसिक्त ओदनः ।

[**उदसक्तुः, उदकसक्तुः**] उदकेनोपसिक्तः सक्तुः ।

[**उदबिन्दुः, उदकबिन्दुः**] उदकस्य बिन्दुः ।

[**उदवज्रः, उदकवज्रः**] उदकं वज्र इव । 'उपमेयं व्याघ्राद्यैः साम्यानुक्तौ' (३।१।१०२) समासः ।

[**उदभारः, उदकभारः**] * उदकस्य भारः=समूहः ।

[**उदहारः, उदकहारः**] o उदकस्य हारः ।

[**उदवीवधः, उदकवीवधः**] विशेषेण वध्यत इति । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'न जन-वधः' (४।३।५४) इति दीर्घत्वं न भवति । यद्वा हननं = वधः । 'हनो वा वध् च' (५।३।४६) अल्प्र० - वधादेशश्च । विशिष्टो वधो यत्राऽसौ ।

---

ꖾ मध्यमवृत्तौ - श० म० न्या० च—उदकं वाहनमस्य ।

P. ꖾꖾ वज्रश्च ।

P. + उदकेन मथ्यत इति । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'कारकं कृता' (३।१।६८) समासः ।

P. * उदकं बिभर्तीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० ।

P. o उदकं हरतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'घञ्युपसर्गस्य बहुलम्' (३।२।८६) बाहुलकात् दीर्घः । उदकस्य वीवधः ।

**[उदगाहः, उदकगाहः]** [१]उदकस्य गाहः । अनेन "उद" आदेशः ।।छ।।

## नाम्न्युत्तरपदस्य च ।।३।२।१०७।।

**[उत्तरपदस्य]** समासारंभकमन्त्यं पदं = [२]उत्तरपदं, तस्य ।

**[औदमेघिः पुत्रः]**[३] उदकेनोपलक्षितो मेघः । अनेन "उद०" । उदमेघो नाम यस्याऽसौ । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[औदवाहिः पुत्रः]**[४] उदकस्य वाहः । अनेन "उद" आदेशः । उदवाहो नाम यस्याऽसौ । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[उदपानं निपानम्]** 'पां पाने' (२) पा । पीयतेऽनेनेति पानम् । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । उदकस्य पानम् ।

**[लवणोदः]**[५] लवणमुदकं यस्याऽसौ ।

**[कालोदः]**[६] कालमुदकं यस्याऽसौ ।

**[क्षीरोद एवंनामानः समुद्राः]** क्षीरमिव उदकं यस्य ।

**[लोहितोदा नाम नदी]** लोहितमुदकं यस्यां सा । अनेन "उद" आदेशः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[क्षीरोदा नाम नदी]** क्षीरमिव उदकं यस्यां सा । अनेन "उद" आदेशः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[अच्छोदम्]** अच्छमुदकं यत्र तत् ।

**[सितोदम्]** सितं-श्वेतमुदकं यत्र तत् ।

**[लोहितोदम्]** लोहितमुदकं यत्र तत् । अनेन "उद" आदेशः । सि - अम् ।।छ।।

## ते लुग्वा ।।३।२।१०८।।

**[ते]** तद् (२) । तच्च तच्च = ते । 'त्यदादिः' (३।१।१२०) एकशेषः । प्रथमा औ । 'आ द्वेरः' (२।१।४१) द्० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'औरीः' (१।४।५६) ई । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए ।

**[देवदत्तः, देवः, दत्तः]** देव । 'डुदांग्क् दाने' (११३८) दा । देवा एनं देयासुः । 'तिक्कृतौ नाम्नि' (५।१।७१) क्तप्र० → त । 'दत्' (४।४।१०) दा० → दत् । अनेनाऽनयोर्मध्ये यथाभावेन एकलोपः ।

**[सत्यभामा, सत्या, भामा]** सत्यभामा । अनेन एकलोपः ।।छ।।

---

P. (१) उदकं गाहते । 'कर्मणोऽण्' (५।१।७२) अण्प्र० ।
P. (२) उत्तरं च (तत्) पदं च = तत्, तस्य ।
P. (३) उदकस्य मेघः ।
P. (४) उदकं वहतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० ।
P. (५) लवणमिव उदकं यत्र सः ।
P. (६) कालमिव उदकं यत्र सः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## द्व्यन्तरनवर्णोपसर्गादप ईप् ॥३।२।१०९॥

**[द्व्यन्तरनवर्णोपसर्गात्]** न अवर्णोऽनवर्णः । 'अन् स्वरे' (३।२।१२९) अन् । अनवर्णश्चासावुपसर्गश्च = अनवर्णोपसर्गः । द्विश्च अन्तश्च अनवर्णोपसर्गश्च = द्व्यन्तरनवर्णोपसर्गम्, तस्मात् ।

**[अपः]** अप् षष्ठी ङस् ।

**[द्वीपम्]** द्वि । अप् ।卐 द्विधा गता आपो यस्मिन् तत् ।

**[अन्तरीपम्]** अन्तर् । अप् । अन्तर्गता आपोऽस्मिन् तत् ।

**[नीपम्]** नि । अप् । निवृत्ता आपोऽस्मिन् तत् ।

**[प्रतीपम्]** प्रति । अप् । प्रतिगता आपोऽस्मिन् तत् ।

**[समीपम्]** सम् । अप् । सङ्गता आपोऽस्मिन् तत् ।

**[अन्वीपम्]** अनु । अप् । अनुगता आपोऽस्मिन् तत् ।

**[वीपम्]** वि । अप् । विगता आपोऽस्मिन् तत् । अनेन अप्० → ईप्० । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः । सि-अम् ।

**[स्वापः]** शोभना आपः । प्र० जस् । 'अपः' (१।४।८८) दीर्घः ।

**[अत्यापः]** पूजिता आपः । प्र० जस् । 'अपः' (१।४।८८) दीर्घः । स्वती पूजायां नोपसर्गौ ।

**[प्रापम्]** प्र । अप् । (१) प्रगता आपो यत्र तत् ।

**[परापम्]** पर(रा) । अप् । (२) पर(रा)गता आपो यत्र तत् । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः ।

**[समापो देवयजनम्]** संश्लिष्टा-आगता आपोऽस्मिन् । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः ॥छ॥

## अनोर्देशे उप् ॥३।२।११०॥

**[अनोः]** अनु पञ्चमी ङसि ।

**[देशे]** देश सप्तमी ङि ।

**[अनूपो देशः]** (३) अनुगता आपोऽस्मिन् । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः । अनेन उप्० ।

**[अन्वीपं वनम्]** अनुगता आपो यत्र वने तत् । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः । 'द्व्यन्तरनवर्णोपसर्गादप ईप्' (३।२।१०९) ईप्० ।

**[कूपः]*** कु-पृथिवीयुता आपोऽस्मिन् सः ।

**[सूपः]+** पूजिता आपोऽस्मिन् सः । 'पृषोदरादयः' (३।२।१५५) निपात्यते ॥छ॥

---

P. 卐 द्वाभ्यां गता, द्विधा गता वा आपो यत्र तत् = द्वीपम् । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः ।

P. (१) प्रकृष्टा आपो यत्र तत् ।

P. (२) परावृत्ता आपो यत्र तत् ।

P. (३) अनुरूपा आपो यत्र सः ।

P. * श० म० न्या० - कु=ईषत् आपो यत्र सः । + श० म० न्या० - सुपेया आपो यत्र सः=सूपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## खित्यनव्यया-ऽरुषो मोऽन्तो ह्रस्वश्च ॥३।२।१११॥

**[खिति]** ख् इदनुबन्धो यस्याऽसौ खित्, तस्मिन् ।

**[अनव्ययाऽरुषोः]** न अव्ययोऽनव्ययः । अनव्ययश्च अरुस् च = अनव्ययाऽरुषौ, तयोः = अनव्ययाऽरुषोः, षष्ठी ओस् । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

**[ज्ञंमन्यः]** 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । जानाति सर्वशास्त्रार्थमिति । 'नाम्युपान्त्य-प्री-कृ-गृ-ज्ञः कः' (५।१।५४) कप्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलोपः । बुधिं (१२६२)- 'मनिंच् ज्ञाने' (१२६३) मन् । ज्ञमात्मानं मन्यते । 'कर्तुः खश्' (५।१।११७) खश्प्र० → अ । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । अनेन मोऽन्तः । प्रथमा सि ।

**[पण्डितंमन्यः]** पण्डितमात्मानं मन्यते । 'कर्तुः खश्' (५।१।११७) खश्प्र० → अ । बुधिं (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन् । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । अनेन मोऽन्तः । प्रथमा सि ।

**[क्ष्मंमन्यः]** क्ष्मा । बुधिं (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन् । क्ष्मामात्मानं मन्यते । 'कर्तुः खश्' (५।१।११७) खश्प्र० → अ । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । अनेन मोऽन्तः-ह्रस्वश्च । प्रथमा सि ।

**[खट्वंमन्या]** खट्वा । बुधिं (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन् । खट्वामात्मानं मन्यते । 'कर्तुः खश्' (५।१।११७) खश्प्र० → अ । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । अनेन मोऽन्तः-ह्रस्वश्च ।

**[महंमन्यः]** महत् । बुधिं (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन् । महान्तमात्मानं मन्यते । 'जातीयैकार्थेऽच्वेः' (३।२।७०) डाप्र० → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लोपः । अनेन मोऽन्तः - ह्रस्वश्च ।

**[रात्रिंमन्यमहः]** रात्रिमात्मानं मन्यते । अनेन मोऽन्तः, दिनम् ।

**[द्रुणिंमन्यः]** द्रुणी-कच्छपी । द्रुणीमात्मानं मन्यते ।

**[ग्रामणिंमन्यः]** ग्रामणी । बुधिं (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन् । ग्रामण्यमात्मानं मन्यते । 'कर्तुः खश्' (५।१।११७) खश्प्र० → अ । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । अनेन मोऽन्तः-ह्रस्वश्च ।

**[वधुंमन्यः]** वधूमात्मानं मन्यते । 'कर्तुः खश्' (५।१।११७) खश्प्र० → अ । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । अनेन मोऽन्तः-ह्रस्वश्च ।

**[खलपुंमन्यः]** खलपू । बुधिं (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन् । खलप्वमात्मानं मन्यते । 'कर्तुः खश्' (५।१।११७) खश्प्र० → अ । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । अनेन मोऽन्तः-ह्रस्वश्च ।

**[क्षेमङ्करः]** क्षेम । 'डुकृंग् करणे' (८८८) कृ । क्षेमं करोतीति । 'क्षेम-प्रिय-मद्र-भद्रात् खा-ऽण्' (५।१।१०५) खप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । अनेन मोऽन्तः ।

**[मेघङ्करः]** मेघ । 'डुकृंग् करणे' (८८८) कृ । मेघं करोतीति । 'मेघर्त्ति-भया-ऽभयात् खः' (५।१।१०६) खप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । अनेन मोऽन्तः ।

**[आढ्यम्भविष्णुः]** आढ्य । 'भू सत्तायाम्' (१) भू । अनाढ्य आढ्यो भवतीति । 'नग्न-पलित-प्रिया-ऽन्ध-स्थूल-सुभगा-ऽऽढ्य-तदन्ताऽच्व्यर्थेऽच्वेर्भुवः खिष्णु-खुकञौ' (५।१।१२८) खिष्णुप्र० → इष्णु । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । अनेन मोऽन्तः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[आढ्यम्भावुकः]** आढ्य । 'भू सत्तायाम्' (१) भू । अनाढ्य आढ्यो भवतीति । 'नग्न-पलित-प्रिया-ऽन्ध०' (५।१।१२८) खुकञ्प्र० → उक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । अनेन मोऽन्तः ।

**[सुभगङ्करणम्]** सुभग । 'डुकृंग् करणे' (८८८) कृ । असुभगः सुभगः क्रियतेऽनेन । 'कृगः खनट् करणे' (५।१।१२९) खनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । अनेन मोऽन्तः ।

**[आशितम्भवो वर्तते]** 'अशश् भोजने' (१५५८) अश् । अश्नाति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । क्ते सूत्रे आशित इति निर्देशात् दीर्घत्वं च, आङ्पूर्वाद्वा अविवक्षितकर्मकात् 'भू सत्तायाम्' (१) भू । आशितेन तृप्तेन भूयते । 'भावे चा-ऽऽशिताद् भुवः खः' (५।१।१३०) खप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । अनेन मोऽन्तः ।

**[मितङ्गमः]** मित । अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । मितं गच्छतीति । 'नाम्नो गमः खड्-डौ च०' (५।१।१३१) खड्प्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अम्लोपः । अनेन मोऽन्तः ।

**[विहङ्गमः]** विहायस् । 'गम्लृं गतौ' (३९६) गम् । विहायसा गच्छतीति । 'नाम्नो गमः खड्-डौ च विहायसस्तु विहः' (५।१।१३१) खड्प्र० → अ-विहायस्० → "विह" आदेशः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अम्लोपः । अनेन मोऽन्तः ।

**[पतङ्गः]** पत । 'गम्लृं गतौ' (३९६) गम् । पतं गच्छतीति । 'नाम्नो गमः खड्-डौ च०' (५।१।१३१) खड्प्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अम्लोपः । अनेन मोऽन्तः ।

**[कालिंमन्या]** काल । 'भाज-गोण-नाग-स्थल-कुण्ड-काल-कुश-कामुक-कट-कबरात्०' (२।४।३०) ङी । कालीमात्मानं मन्यते । 'कर्तुः खश्' (५।१।११७) खश्प्र० → अ । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । अनेन मोऽन्तः-ह्रस्वश्च ।

**[हरिणिंमन्या]** हरित । श्येतैत-हरित-भरत-रोहिताद् वर्णात् तो नश्च (२।४।३६) ङी → ई - तस्य न० । 'रषृवर्णान्नो ण०' (२।३।६३) न० → ण० । हरिणीमात्मानं मन्यते । 'कर्तुः खश्' (५।१।११७) खश्प्र० → अ । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । अनेन मोऽन्तः - ह्रस्वश्च ।

**[अरुंतुदः]** अरुस् । 'तुदींत् व्यथने' (१३१५) तुद् । अरुः तुदतीति । 'बहु-विध्वरुस्तिलात् तुदः' (५।१।१२४) खश्प्र० → अ । अनेन मोऽन्तः । 'संयोगस्यादौ स्कोर्लुक्' (२।१।८८) सलोपः ।

**[पण्डितमानी]** पण्डितमात्मानं मन्यते । 'मन्याण्णिन्' (५।१।११६) णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । प्र० सि० । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[सुभगमानी]** सुभगमात्मानं मन्यते । 'मन्याण्णिन्' (५।१।११६) णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । प्र० सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[दोषामन्यमहः]** दोषा आत्मानं मन्यते । 'कर्तुः खश्' (५।१।११७) खश्प्र० → अ । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । 'पदान्ते' (२।१।६४) दीर्घः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[दिवामन्या रात्रिः]** दिवसमात्मानं मन्यते । 'कर्तुः खश्' (५।१।११७) खश्प्र० → अ । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । 'पदान्ते' (२।१।६४) दीर्घः ।

**[कूलमुद्रुजः]** कूल । 'रुजोंत् भङ्गे' (१३५०) रुज्, उद्पूर्व० । कूलमुद्रुजति । 'कूलादुद्रुजोद्वहः' (५।१।१२२) खश्प्र० → अ । अनेन मोऽन्तः ।

**[कूलमुद्वहः]** कूल । 'वहीं प्रापणे' (९९६) वह्, उद्पूर्व० । कूलमुद्वहति । 'कूलादुद्रुजोद्वहः' (५।१।१२२) खश्प्र० → अ । अनेन मोऽन्तः ।।छ।।

## सत्या-ऽगदा-ऽस्तोः कारे ।।३।२।११२।।

**[सत्याऽगदाऽस्तोः]** सत्यश्च अगदश्च अस्तुश्च = सत्याऽगदाऽस्तु, 卐 तस्य ।

**[सत्यङ्कारः]** सत्य । 'डुकृंग् करणे' (८८८) कृ । सत्यं करोति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) आर् । सत्यस्य कार इति वा ।

**[अगदङ्कारः]** अगद 'डुकृंग् करणे' (८८८) कृ । अगदं करोति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) आर् ।

**[अस्तुङ्कारः]** अस्तु । 'डुकृंग् करणे' (८८८) कृ । अस्तु करोतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) आर् ।

अस्तुशब्दनिपातः क्रियापतिरूपकोऽङ्गीकारे वर्त्तते ।।छ।।

## लोकम्पृण-मध्यन्दिना-ऽनभ्याशमित्यम् ।।३।२।११३।।

**[लोकम्पृणमध्यन्दिनाऽनभ्याशमित्यम्]** लोकम्पृणश्च मध्यन्दिनं च अनभ्याशमित्यं च = लोकम्पृणमध्यन्दिनाऽनभ्याशमित्यम् ।

**[लोकम्पृणः]** लोक । 'पृणत् प्रीणने' (१३६०) पृण् । लोकं पृणतीति । 'मूलविभुजादयः' (५।१।१४४) कप्र० → अ । पृणतीति । 'नाम्युपान्त्य-प्री-कृ-गृ-ज्ञः कः' (५।१।५४) कप्र० → अ । लोकस्य पृणः वा ।

**[मध्यन्दिनम्]** मध्यं दिनस्य । 'सायाह्नादयः' (३।१।५३) अंशितत्पुरुषः । मध्यं च तद् दिनं च वा ।

**[अनभ्याशमित्यम्]** 'अशश् भोजने' (१५५८) अश्, अभिपूर्व० । अभ्यशनम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । अभ्यासं(शं) - निकटम् । न अभ्यासं(शं) = अनभ्यासं(शम्) 'अन् स्वरे' (३।२।१२९) अन् । 'इंण्क् गतौ' (१०७५) इ । ईयते = इत्यम् । 'दृ-वृग्-स्तु-जुषेति-शासः' (५।१।४०) क्यप्प्र० → य । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । अनेन मोऽन्तः सर्वत्र । अनभ्यासं(शं) दूरमित्यं गन्तव्यमस्य अनभ्यासे(शे)नेत्योऽनभ्यासं(शं) दूरेण परिहर्त्तव्यः, दूरेण प्राप्यो न त्वन्तिकेनेत्यर्थः ।

**[लोकंप्रिणः]** लोक । 'प्रींगूश् तृप्ति-कान्त्योः' (१५१०) प्री । प्रीणन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'धूग्-प्रीगोर्नः' (४।२।१८) नोऽन्तः । प्रीणयतीति । 'अच्' (५।१।४९) अच्प्र० → अ । 'णेरनिटि' (४।३।८३) णिग्लोपः । मतान्तरे ह्रस्वः । लोकस्य प्रीणः = लोकप्रिणः, ततो ह्रस्वः - अनेन मोऽन्तः । लोकस्य प्रीणक इत्यर्थः ।।छ।।

---

P. 卐 तस्मात् ।

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

## भ्राष्ट्रा-ऽग्नेरिन्धे ॥३।२।११४॥

**[भ्राष्ट्राऽग्नेः]** भ्राष्ट्रश्च अग्निश्च = 卐 भ्राष्ट्राग्निः, तस्मात् ।

**[भ्राष्ट्रमिन्धः]**+ भ्राष्ट्रस्येन्धः । अनेन मोऽन्तः ।

**[अग्निमिन्धः]** अग्नेरिन्धः । अनेन मोऽन्तः ॥छ॥

## अगिलाद् गिल-गिलगिलयोः ॥३।२।११५॥

**[अगिलात्]** न गिलोऽगिलः । 'नञत्' (३।२।१२५) न० → अ०, तस्मात् ।

**[गिलगिलगिलयोः]** गिलश्च गिलगिलश्च = गिलगिलगिलौ, तयोः ।

**[तिमिङ्गिलः]** तिमि । 'गृत् निगरणे' (१३३५) गृ । तिमिं गिलतीति । 'मूलविभुजादयः' (५।१।१४४) कप्र० । 'ऋतां क्ङितीर्' (४।४।११६) इर् । 'नवा स्वरे' (२।३।१०२) लत्वम् । अनेन मोऽन्तः ।

**[मत्स्यङ्गिलः]** मत्स्यं गिलतीति । 'मूलविभुजादयः' (५।१।१४४) कप्र० । 'ऋतां क्ङितीर्' (४।४।११६) इर् । 'नवा स्वरे' (२।३।१०२) लत्वम् । अनेन मोऽन्तः ।

**[बालङ्गिलो राक्षसः]** बालं गिलतीति । 'मूलविभुजादयः' (५।१।१४४) कप्र० । 'ऋतां क्ङितीर्' (४।४।११६) इर् । 'नवा स्वरे' (२।३।१०२) लत्वम् । अनेन मोऽन्तः । राक्षस् । रक्षोऽपत्यम् । 'प्रज्ञादिभ्योऽण्' (७।२।१६५) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ ।

**[तिमिङ्गिलगिलः]** तिमीनां गिलगिलः । अनेन मोऽन्तः ।

**[धूर्गिलः]** धुर् । 'गृत् निगरणे' (१३३५) गृ । धुरं गिलतीति । 'मूलविभुजादयः' (५।१।१४४) कप्र० । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'नवा स्वरे' (२।३।१०२) लत्वम् ।

**[तिमिंगिलगिलः]** तिमिंगिलं गिलतीति । 'मूलविभुजादयः' (५।१।१४४) कप्र० । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'नवा स्वरे' (२।३।१०२) लत्वम् ।

**[गिलगिलः]** गिलं गिलतीति । 'मूलविभुजादयः' (५।१।१४४) कप्र० । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'नवा स्वरे' (२।३।१०२) लत्वम् ॥छ॥

## भद्रोष्णात् करणे ॥३।२।११६॥

**[भद्रोष्णात्]** भद्रश्च उष्णश्च = भद्रोष्णम्, तस्मात् ।

**[भद्रंकरणम्]** भद्र । 'डुकृंग् करणे' (८८८) कृ । क्रियतेऽनेनेति । 'कृगः खनट् करणे' (५।१।१२९) खनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । भद्रस्य करणम् । अनेन मोऽन्तः ।

**[उष्णंकरणम्]** उष्णस्य करणम् । अनेन मोऽन्तः ॥छ॥

---

P. 卐 तत्, तस्मात् ।

P. + 'ञिइन्धैपि दीप्तौ' (१४९८) इन्ध् । इन्धानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । इन्धनम् । 'युवर्ण-वृ-दृ०' (५।३।२८) इत्यादिना अल् । यद्वा इध्यतेऽनेनेति । 'पुन्नाम्नि घः' (५।३।१३०) घप्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## नवाऽखित्कृदन्ते रात्रेः ॥३।२।११७॥

**[नवाऽखित्कृदन्ते]** नवा । ख् इदनुबन्धो यस्याऽसौ खित्, न खित् = अखित्, अखिच्चासौ कृच्च = अखित्कृत्, अखित्कृत् अन्ते यस्याऽसौ अखित्कृतः (अखित्कृदन्तः), तस्मिन् ।

**[रात्रिंचरः, रात्रिचरः]** रात्रि । 'चर भक्षणे च' (४१०) चर् । रात्रौ चरतीति । 'चरेष्टः' (५।१।१३८) टप्र० → अ । अनेन मोऽन्तः ।

**[रात्रिंचरी, रात्रिचरी]** रात्रौ चरतीति । 'चरेष्टः' (५।१।१३८) टप्र० → अ । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । अनेन मोऽन्तः ।

**[रात्रिमटः, रात्र्यटः]** 'अट गतौ' (१९४) अट् । अटतीति । 'अच्' (५।१।४९) अच्प्र० → अ । रात्रावटः ।

**[रात्रिमाटः, रात्र्याटः]** 'अट गतौ' (१९४) अट् । रात्रिमटतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

**[रात्रिंकरणम्, रात्रिकरणम्]** रात्रेः करणम् । अनेन विकल्पे मोऽन्तः ।

**[रात्रिंमन्यमहः]** रात्रि । बुधिं (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन् । रात्रिमात्मानं मन्यते । 'कर्तुः खश्' (५।१।११७) खश्प्र० → अ । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । 'खित्यनव्यया-ऽरुषो मोऽन्तो ह्रस्वश्च' (३।२।१११) मोऽन्तः ।

**[रात्रिसुखम्]** रात्रौ सुखम् ।

**[रात्रयिता]** रात्रि । रात्रिरिवाऽऽचरति । 'कर्तुः क्विप्, गल्भ-क्लीब-होडात्तु ङित्' (३।४।२५) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । रात्रयतीति । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् → इ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । प्र० सि । 'ऋदुशनस्-पुरुदंशो०' (१।४।८४) डा । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[तीर्थंकरः, तीर्थकरः]** तीर्थं करोतीति । 'हेतु-तच्छीलाऽनुकूलेऽशब्द-श्लोक-कलह-गाथा-वैर-चाटु-सूत्र-मन्त्र-पदात्' (५।१।१०३) टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । मतान्तरे मोऽन्तो विकल्पे "नवाऽखित्कृदन्ते" इति । "रात्रेः" इति च योगो विभजनीयः ॥छ॥

## धेनोर्भव्यायाम् ॥३।२।११८॥

**[धेनोः]** धेनु पञ्चमी ङसि ।

**[भव्यायाम्]** भव्या सप्तमी ङि । 'आपो ङितां यै-यास्-यास्-याम्' (१।४।१७) याम् ।

**[धेनुम्भव्या, धेनुभव्या]** 'भू सत्तायाम्' (१) भू । भवतीति । 'भव्य-गेय-जन्य-रम्या-ऽऽपात्या-ऽऽप्लाव्यं नवा' (५।१।७) यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'य्यक्ये' (१।२।२५) अव् । 'आत्' (२।४।१८) आप्प्र० → आ । 卐 धेनोर्भव्या ॥छ॥

P. 卐 धेनुश्चासौ भव्या च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अषष्ठीतृतीयादन्याद् दोऽर्थे ॥३।२।११९॥

**[अषष्ठीतृतीयात्]**+ षष्ठी च तृतीया च = षष्ठीतृतीये, न विद्यते षष्ठीतृतीये यत्राऽसौ, तस्मात् । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[अन्यात्]** अन्य पञ्चमी ङसि ।

**[अन्यदर्थः, अन्यार्थः]** अन्य । अर्थ । अन्यश्चासौ अर्थश्च, अन्योऽर्थोऽस्येति वा । अनेन दोऽन्तः ।

**[अन्यदर्थम्, अन्यार्थम्]** अन्यस्मै इदम् ।

**[अन्यदर्थः, अन्यार्थः]** अन्यस्मिन्नर्थः । अनेन सर्वत्र दोऽन्तः ।

**[अन्यार्थः]** अन्यस्याऽर्थः ।

**[अन्यार्थः]** अन्येनाऽर्थः ॥छ॥

## आशीराशा-ऽऽस्थिता-ऽऽस्थोत्सुकोति-रागे ॥३।२।१२०॥

**[आशीराशाऽऽस्थिताऽऽस्थोत्सुकोतिरागे]** आशीश्च आशा च आस्थितश्च आस्था च उत्सुकश्च ऊतिश्च रागश्च = आशीराशाऽऽस्थिताऽऽस्थोत्सुकोतिरागम्, तस्मिन् ।

**[अन्यदाशीः]** 'शासूक् अनुशिष्टौ' (१०९५) शास्, आङ्पूर्व० । आशासनं = आशीः । 'क्रुत्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । 'आङः' (४।४।१२०) आस्० → इस्० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'सो रुः' (२।१।७२) स० → र० । 'पदान्ते' (२।१।६४) दीर्घः । अन्या आशीः ।

**[अन्यदाशा]** 卐 अन्या आशा ।

**[अन्यदास्थितः]*** अन्यमास्थितः । 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे नैमित्तिकस्याऽप्यभावः' (न्या० स० वक्ष० (१) / सूत्र (२९)) स्था, आङ्पूर्व० । आतिष्ठते स्म । 'श्लिष-शीङ्-स्था-ऽऽस-वस-जन-रुह-जॄ-भजेः क्तः' (५।१।९) क्तप्र० → त । 'दो-सो-मा-स्थ इः' (४।४।११) आ० → इ० ।

**[अन्यदास्था]** आस्थानमास्था । 'उपसर्गादातः' (५।३।११०) अङ्प्र० । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलोपः । 'आत्' (२।४।१८) आप्प्र० → आ । ★अन्या आस्था ।

**[अन्यदुत्सुकः]** उत्-सु । उद्गतं सुष्ठु मनो यस्याऽसौ, अन्यस्मिन् उत्सुकः ।

**[अन्यदूतिः]** अवनं = ऊतिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । 'मव्यवि-श्रिवि-ज्वरि-त्वरेरुपान्त्येन' (४।१।१०९) इत्यादिना अव० → ऊट् । अन्या ऊतिः ।

**[अन्यद्रागः]** 'रञ्जीं रागे' (८९६) रञ्ज् । रज्यतेऽनेन । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'घञि भाव-करणे' (४।२।५२) नस्य लोपः । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) ज० → ग० । अन्यत्र रागः । अनेन दोऽन्तः ।

---

P. + षष्ठी च तृतीया च = षष्ठीतृतीयम्, न षष्ठीतृतीयम् = अषष्ठीतृतीयम्, तस्मात् ।

P. 卐 अन्या चासौ आशा च । P. ★ अन्या चासौ आस्था च ।

P. * अन्यः चासौ आस्थितश्च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अन्याशीः]** अन्यस्य आशीः ।

**[अन्यास्थितः]** अन्येन आस्थितः ।।छ।।

## ईय - कारके ।।३।२।१२१।।

**[ईयकारके]** ईयश्च कारकश्च = ईयकारकम्, तस्मिन् ।

**[अन्यदीयः]** अन्य । अन्यस्याऽयम् । 'गहादिभ्यः' (६।३।६३) ईयप्र० ।

**[अन्यदीयम्]** अन्यस्मै हितम् । 'तस्मै हिते' (७।१।३५) ईयप्र० । अनेन दोऽन्तः ।

**[अन्यत्कारकः]** अन्य-कारक । अन्यस्याऽन्येन वा कारकः । अनेन दोऽन्तः ।

**[अन्यत्कारिका]** अन्यस्याऽन्येन वा कारिका । अनेन दोऽन्तः ।।छ।।

## सर्वादि-विष्वग्-देवाड्डद्रिः क्व्यञ्चौ ।।३।२।१२२।।

**[सर्वादिविष्वग्देवात्]** सर्व आदिर्यस्याऽसौ सर्वादिः, सर्वादिश्च विष्वग् च देवश्च = सर्वादिविष्वग्देवम्, तस्मात् ।

**[डद्रिः]** ड् चासौ अद्रिश्च ।

**[क्व्यञ्चौ]**卐 क्वि चासौ अञ्चिश्च = क्व्यञ्चिस्तस्मिन् ।

**[सर्वद्र्यङ्]** सर्व । 'अञ्चू गतौ च' (१०५) अञ्च् । सर्वमञ्चतीति । 'क्विप्' (५।१।१४८) क्विप्प्र० । अनेन डद्रिरद्रि । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलोपः । प्र० सि । 'अचः' (१।४।६९) नोऽन्तः । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) चलोपः । 'युजञ्च-क्रुञ्चो नो ङः' (२।१।७१) न० → ङ० ।

**[सर्वद्र्यञ्चौ]** सर्वमञ्चत इति । 'क्विप्' (५।१।१४८) क्विप्प्र० । अनेन डद्रिरद्रि । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलोपः । प्र० औ । 'अचः' (१।४।६९) नोऽन्तः । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः ।

**[सर्वद्र्यञ्चः]** सर्वमञ्चन्तीति । 'क्विप्' (५।१।१४८) क्विप्प्र० । अनेन डद्रिरद्रि । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलोपः । प्र० जस् । 'अचः' (१।४।६९) नोऽन्तः । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः ।

**[सर्वद्रीचः]** सर्वमञ्चन्तीति । 'क्विप्' (५।१।१४८) क्विप्प्र० । अनेन डद्रिरद्रि । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलोपः । 'द्वि०शस् । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । 'अच्च् प्राग् दीर्घश्च' (२।१।१०४) अच्० → च्० - पूर्वस्य दीर्घः ।

**[सर्वद्रीचा]** सर्वमञ्चतीति । 'क्विप्' (५।१।१४८) क्विप्प्र० । अनेन डद्रिरदि । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलोपः । तृ० टा । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । 'अच्च् प्राग् दीर्घश्च' (२।१।१०४) अच्० → च्० - पूर्वस्य दीर्घः ।

**[सर्वद्रीची]** सर्वामञ्चतीति । 'क्विप्' (५।१।१४८) क्विप्प्र० । अनेन डद्रिरद्रि । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलोपः । ङी → ई । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । 'अच्च् प्राग् दीर्घश्च' (२।१।१०४) अच्० → च्० - पूर्वस्य दीर्घः ।

**[तद्र्यङ्]** तद् । 'अञ्चू गतौ च' (१०५) अञ्च् । तमञ्चतीति ।

P. 卐 क्विश्चासौ अञ्चुश्च = क्व्यञ्चु, तस्मिन् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[तद्य्रञ्चौ] तमञ्चत इति ।

[तद्य्रञ्चः] तमञ्चन्तीति । 'क्विप्' (५।१।१४८) क्विप्प्र० । अनेन डद्रिरागमोऽद्रि । 'डित्यन्त्यस्वरादेः' (२।१।११४) अद्लोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अग्रे पूर्ववत् ।

[अदद्य्रङ्] अदस् । 'अञ्चू गतौ च' (१०५) अञ्च् । अमुमञ्चतीति ।

[अदद्य्रञ्चौ] अमुमञ्चत इति ।

[अदद्य्रञ्चः] अमुमञ्चन्तीति । 'क्विप्' (५।१।१४८) क्विप्प्र० । अनेन डद्रिरागमोऽद्रि । 'डित्यन्त्यस्वरादेः' (२।१।११४) अस्लोपः । 'अप्रयोगीत्' (१।१।३७) क्विपलोपः । अग्रे पूर्ववत् ।

[कद्य्रङ्] किम् । 'अञ्चू गतौ च' (१०५) अञ्च् । कमञ्चतीति ।

[कद्य्रञ्चौ] कमञ्चत इति ।

[कद्य्रञ्चः] कमञ्चन्तीति ।

[व्यद्य्रङ्] द्वि 'अञ्चू गतौ च' (१०५) अञ्च् । द्वमञ्चतीति ।

[व्यद्य्रञ्चौ] द्वमञ्चत इति ।

[व्यद्य्रञ्चः] द्वमञ्चन्तीति क्विप्प्र० । अग्रे पूर्ववत् ।

[विष्वङ्] वि 'षूत् प्रेरणे' (१३३२) षू । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सू । विषुवतीति । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'अञ्चू गतौ च' (१०५) अञ्च् । विष्वमञ्चतीति क्विप् । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । प्र० सि । 'अचः' (१।४।६९) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) चलोपः । 'युजञ्च-क्रुञ्चो नो ङः' (२।१।७१) न० → ङ० ।

[विष्वद्य्रङ्] विष्वगञ्चतीति क्विप् । अनेन डद्रिरद्रि । 'डित्यन्त्यस्वरादेः' (२।१।११४) अच्लोपः ।

[विष्वद्य्रञ्चौ] विष्वगञ्चत इति क्विप् । अग्रे पूर्ववत् ।

[विष्वद्य्रञ्चः] विष्वगञ्चन्तीति क्विप् । अग्रे पूर्ववत् ।

[देवद्य्रङ्] देव । 'अञ्चू गतौ च' (१०५) अञ्च् । देवमञ्चतीति क्विप् । अग्रे पूर्ववत् ।

[देवद्य्रञ्चौ] देवमञ्चत इति क्विप् । अग्रे पूर्ववत् ।

[देवद्य्रञ्चः] देवमञ्चन्तीति क्विप् । अग्रे पूर्ववत् ।

[अश्वाची] अश्व । 'अञ्चू गतौ च' (१०५) अञ्च् । अश्वमञ्चतीति क्विप् । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । 'अञ्चः' (२।४।३) ङी । 'अच्च् प्राग् दीर्घश्च' (२।१।१०४) अच्० → च्० - पूर्वस्य दीर्घः ।

[विषूची] विषू । 'अञ्चू गतौ च' (१०५) अञ्च् । विष्वमञ्चतीति क्विप् । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । 'अञ्चः' (२।४।३) ङी । 'अच्च् प्राग् दीर्घश्च' (२।१।१०४) अच्० → च्० - पूर्वस्य दीर्घः ।

[विश्वयुक्] विश्व । 'युजूंपी योगे' (१४७६) युज् । विश्वं युनक्तीति । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'विरामे वा' (१।३।५१) ग० → क० । प्र० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[विष्वग्युक्]** विष्वग् युनक्तीति । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'विरामे वा' (१।३।५१) ग० → क० । प्र० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[देवयुक्]** देवं युनक्तीति । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'विरामे वा' (१।३।५१) ग० → क० । प्र० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[विष्वगञ्चनम्]** विष्वग् समीपेऽञ्च्यते । अनट्प्र० । सि-अम् ।।छ।।

## सह-समः सध्रि-समि ।।३।२।१२३।।

**[सहसमः]** सहश्च 卐 सम् च = सहसम्, तस्य ।

**[सध्रिसमि]** सध्रिश्च समिश्च । औ । सूत्रत्वात् लोपः ।

**[सध्र्यङ्]** सह । 'अञ्चू गतौ च' (१०५) अञ्चू । सहाञ्चतीति । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । अनेन "सध्रि" आदेशः । "अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्र० सि । 'अचः' (१।४।६९) नोऽन्तः । 'युजञ्च-क्रुञ्चो नो ङः' (२।१।७१) न० → ङ० ।

**[सध्र्यञ्चौ]** सहाञ्चत इति क्विप् । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । अनेन "सध्रि" आदेशः । प्र० औ । 'अचः' (१।४।६९) नोऽन्तः ।

**[सध्र्यञ्चः]** सहाञ्चन्तीति क्विप् । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । अनेन "सध्रि" आदेशः । प्र० जस् । 'अचः' (१।४।६९) नोऽन्तः ।

**[सध्रीचः]** सहाञ्चन्तीति क्विप् । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । अनेन "सध्रि" आदेशः । द्वि० शस् । 'अच्च् प्राग् दीर्घश्च' (२।१।१०४) अच्० → च्० - पूर्वस्य दीर्घः ।

**[सध्रीचा]** सहाऽञ्चतीति क्विप् । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । अनेन "सध्रि" आदेशः । तृ० टा । 'अच्च् प्राग् दीर्घश्च' (२।१।१०४) अच्० → च्० - पूर्वस्य दीर्घः ।

**[सध्रीची]** सहाञ्चतीति क्विप् । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । अनेन "सध्रि" आदेशः । 'अञ्चः' (२।४।३) ङी । 'अच्च् प्राग् दीर्घश्च' (२।१।१०४) अच्० → च्० - पूर्वस्य दीर्घः ।

**[सध्रीचीनः]** सध्र्यङेव । 'अदिक्स्त्रियां वाऽञ्चः' (७।१।१०७) ईनप्र० । 'अच्च् प्राग् दीर्घश्च' (२।१।१०४) अच्० → च्० - पूर्वस्य दीर्घः ।

**[सम्यङ्]** सम् 'अञ्चू गतौ च' (१०५) अञ्चू । समञ्चतीति । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । अनेन "समि" आदेशः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्र० सि । 'अचः' (१।४।६९) नोऽन्तः । 'युजञ्च-क्रुञ्चो नो ङः' (२।१।७१) न० → ङ० ।

**[सम्यञ्चौ]** समञ्चत इति क्विप् । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । अनेन "समि" आदेशः । प्र० औ । 'अचः' (१।४।६९) नोऽन्तः ।

**[सम्यञ्चः]** समञ्चन्तीति क्विप् । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । अनेन "समि" आदेशः । प्र० जस् । 'अचः' (१।४।६९) नोऽन्तः ।

---

P. 卐 समश्च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[समीचः]** समञ्चन्तीति क्विप् । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । अनेन "समि" आदेशः । द्वि० शस्'। 'अच्च् प्राग् दीर्घश्च' (२।१।१०४) अच्० → च्० - पूर्वस्य दीर्घः ।

**[समीचा]** समञ्चतीति क्विप् । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । अनेन "समि" आदेशः । तृ० टा । "अच्च् प्राग् दीर्घश्च' (२।१।१०४) अच्० → च्० - पूर्वस्य दीर्घः ।

**[समीची]** समञ्चतीति । क्विप् । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । अनेन "समि" आदेशः । 'अञ्चः' (२।४।३) ङी । 'अच्च् प्राग् दीर्घश्च' (२।१।१०४) अच्० → च्० - पूर्वस्य दीर्घः ।

**[समीचीनः]** सम्यङेव । 'अदिक्स्त्रियां वाऽञ्चः' (७।१।१०७) ईनप्र० । 'अच्च् प्राग् दीर्घश्च' (२।१।१०४) अच्० → च्० - पूर्वस्य दीर्घः ।

**[प्राङ्]** प्र 'अञ्चू गतौ च' (१०५) अञ्च् । प्राञ्चतीति क्विप् । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । प्र० सि । 'अचः' (१।४।६९) नोऽन्तः । 'युजञ्च-क्रुञ्चो नो ङः' (२।१।७१) न० → ङ० ।

**[प्राञ्चौ]** प्राञ्चत इति क्विप् । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । प्र० औ । 'अचः' (१।४।६९) नोऽन्तः ।

**[सहयुक्]** सह 'युजूंपी योगे' (१४७६) युज् । सह युनक्तीति क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्र० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'विरामे वा' (१।३।५१) ग० → क० ।

**[संयुक्]** सम् 'युजूंपी योगे' (१४७६) युज् । संयुनक्तीति क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्र० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'विरामे वा' (१।३।५१) ग० → क० ।

**[सहाञ्चनम्]** सह 'अञ्चू गतौ च' (१०५) अञ्च् । सह अञ्च्यते । 'अनट्' (५।३।१२४) अनट्प्र० → अन ।

**[समञ्चनम्]** समञ्च्यते । 'अनट्' (५।३।१२४) अनट्प्र० → अन ॥छ॥

## तिरसस्तिर्यति ॥३।२।१२४॥

**[तिरसः]** तिरस् षष्ठी ङस् ।

**[तिरि]** तिरि प्रथमा सि । सूत्रत्वात् लोपः ।

**[अति]** अत् सप्तमी ङि ।

**[तिर्यङ्]** तिरस् । 'अञ्चू गतौ च' (१०५) अञ्च् । तिरोऽञ्चतीति । 'अव्ययस्य को द् च' (७।३।३१) अक्प्र० । तिरको वा अञ्चतीति । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अने तिरस्० → तिरि० । प्र० सि । 'अचः' (१।४।६९) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) चलोपः । 'युजञ्च-क्रुञ्चो नो ङः' (२।१।७१) न० → ङ० ।

**[तिर्यञ्चौ]** तिरोऽञ्चत इति । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेन तिरस्० → तिरि० । प्र० औ । 'अचः' (१।४।६९) नोऽन्तः । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) न० → ञ० ।

**[तिर्यञ्चः]** तिरोऽञ्चन्तीति । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेन तिरस्० → तिरि० । प्र० जस् । 'अचः' (१।४।६९) नोऽन्तः । 'म्नां धुड्वर्गेऽन्त्योऽ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पदान्ते' (१।३।३९) न० → ञ० ।

**[तिर्यग्भ्याम्]** तिरोऽञ्चतीति क्विप्, ताभ्याम् । 'च-जः क-गम्' (२।१।८६) च० → क० । 'धुटस्तृतीयः' (२।१।७६) क० → ग० ।

**[तिर्यग्भिः]** तिरोऽञ्चतीति क्विप्, तैः । 'च-जः क-गम्' (२।१।८६) च० → क० । 'धुटस्तृतीयः' (२।१।७६) क० → ग० ।

**[तिर्यग्भ्यः]** तिरोऽञ्चतीति क्विप्, तेभ्यः । 'च-जः क-गम्' (२।१।८६) च० → क्र० । 'धुटस्तृतीयः' (२।१।७६) क० → ग० ।

**[तिर्यक्षु]** तिरोऽञ्चतीति क्विप्, तेषु । 'च-जः क-गम्' (२।१।८६) च० → क० । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

**[तिरश्चः]** तिरोऽञ्चतीति क्विप्, तान् । 'अच्च् प्राग् दीर्घश्च' (२।१।१०४) अच्० → च्० । 'सो रुः' (२।१।७२) स० → र० । 'च-ट-ते सद्वितीये' (१।३।७) र० → श० ।

**[तिरश्चा]** तिरोऽञ्चतीति क्विप्, तेन । 'अच्च् प्राग् दीर्घश्च' (२।१।१०४) अच्० → च्० । 'सो रुः' (२।१।७२) स० → र० । 'च-ट-ते सद्वितीये' (१।३।७) र० → श० ।

**[तिरश्ची]** तिरोऽञ्चतीति क्विप् । 'अञ्चः' (२।४।३) ङी → ई । 'अच्च् प्राग् दीर्घश्च' (२।१।१०४) अच्० → च्० । 'सो रुः' (२।१।७२) स० → र० । 'च-ट-ते सद्वितीये' (१।३।७) र० → श० ।

**[तिरश्चीनः]** तिर्यङ् एव । 'अदिक्स्त्रियां वाऽञ्चः' (७।१।१०७) ईनप्र० । 'अच्च् प्राग् दीर्घश्च' (२।१।१०४) अच्० → च्० । 'सो रुः' (२।१।७२) स० → र० । 'च-ट-ते सद्वितीये' (१।३।७) र० → श० ।।छ।।

## नञत् ।।३।२।१२५।।

**[अचौरः पन्थाः]** 'चुरण् स्तेये' (१५६८) चुर् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । चौ(चो)रणं = चुरा । 'भिदादयः' (५।३।१०८) अङ्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः । चुरा शीलमस्य । 'अङ्स्थाच्छत्राऽऽदेरञ्' (६।४।६०) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः-चौ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लोपः । न विद्यन्ते चौरा यस्मिन् असौ । अनेन न० → अ० ।

**[अमक्षिको देशः]** न विद्यन्ते मक्षिका अस्मिन् देशे सः । अनेन न० → अ० सर्वत्र । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । प्रथमा सि ।

**[अमशकं वर्तते]** मशकानामभावः ।

**[अमक्षिकं वर्तते]** मक्षिकाणामभावः । 'क्लीबे' (२।४।९७) ह्रस्वः । प्र० सि । 'अमव्ययीभावस्याऽतोऽपञ्चम्याः' (३।२।२) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[अहिंसा]** 'हिसु हिंसायाम्' (१४९४) हिस् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । हिंसनम् । 'अच्' (५।१।४९) अच्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ । न हिंसा ।

**[अस्तेयम्]** स्तेन । स्तेनस्य भावः । 'स्तेनान्नलुक् च' (७।१।६४) यप्र० - नस्य लुक् च । न स्तेयम् । अनेन अ० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[पामनपुत्रः]** पामाऽस्याऽस्तीति । 'नोऽङ्गादेः' (७।२।२९) नप्र० । 'ङ्यापो बहुलं नाम्नि' (२।४।९९) पुंवत् (ह्रस्वः) । अथवा पामनशब्दः प्रकृतिः । 卐 पामनश्चासौ पुत्रश्च ।

**[न भुङ्क्ते]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । वर्त्त० ते । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) श्नप्र० → न । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अलोपः । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) न० → ङ० ।।छ।।

## त्यादौ क्षेपे ।।३।२।१२६।।

**[त्यादौ]**+ तिरादिर्यस्याऽसौ त्यादिस्तस्मिन् ।

**[अपचसि त्वं जाल्म !]** 'डुपचींष् पाके' (८९२) पच् । वर्त्त० सिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । न पचसि । युष्मद् । प्र० सि । 'त्वमहं सिना प्राक् चाऽकः' (२।१।१२) त्वम् ।

**[न पाचको जाल्मः]** पच् । पचतीति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।।छ।।

## नगोऽप्राणिनि वा ।।३।२।१२७।।

**[अप्राणिनि]** न प्राणी = अप्राणी । 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् ।

**[नगः पर्वतः, अगः पर्वतः]** न अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । न गच्छतीति । 'नाम्नो गमः खड्-डौ च०' (५।१।१३१) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अम्लोपः । अनेन वा नगनिपातः । 'नञत्' (३।२।१२५) न० → अ० । पर्वन् । पर्वाण्यस्य सन्ति । 'मरुत्-पर्वणस्तः' (७।२।१५) तप्र० । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[नगाः-वृक्षाः, अगाः-वृक्षाः]** न गच्छन्तीति । 'नाम्नो गमः खड्-डौ च०' (५।१।१३१) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अम्लोपः । अनेन निपातः । प्रथमाबहु० जस् ।

**[अगो वृषलः शीतेन]** न गच्छतीति । 'नाम्नो गमः खड्-डौ च०' (५।१।१३१) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अम्लोपः । 'नञत्' (३।२।१२५) न० → अ० । प्र० सि ।।छ।।

## नखादयः ।।३।२।१२८।।

**[नखादयः]** नख आदिर्येषां ते । प्र० जस् । 'जस्येदोत्' (१।४।२२) इ० → ए० । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[नखः]** 'खनूग् * विदारणे' (९१३) खन् । खन्यते इति खम् । 'खनो ड-डरेकेकवक-घं च' (५।३।१३७) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लोपः । नास्य खमस्तीति ।

**[नभ्राट्]** न राजृग् (८९३) - 'टुभ्राजि दीप्तौ' (८९४) भ्राज् । न भ्राजते इति । 'दिद्युद्-ददृद्-जगज्जुहू-वाक्-पाट्-धी-श्री-द्रू-स्रू-ज्वायतस्तू-कटपू-परिव्राट्-भ्राजादयः क्विप्' (५।२।८३) क्विपप्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्र०

---

卐 श० म० न्या० - पामनस्य पुत्रः ।

P. + तिरादिर्यस्य तत्, तस्मिन् ।

* लघुवृत्तौ- धातुपारायणे च-अवदारणे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'यज-सृज-मृज-राज०' (२।१।८७) ज० → ष० । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

**[नपात्]** न 'पांक् रक्षणे' (१०६७) पा । न पातीति । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत् । निपातनात्तु नाभावः ।

**[नवेदाः]** न 'विदक् ज्ञाने' (१०९९) विद् । न वेत्तीति । 'अस्' (उणा० ९५२) असप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'अभ्वादेर०' (१।४।९०) दीर्घः ।

**[असत्यः]** सत्सु साधुः । 'तत्र साधौ' (७।१।१५) यप्र० । न सत्योऽसत्यः ।

**[नासत्यः]** नासत्योऽनेन निपातः ।

**[नासत्यौ]** नासत्यौ अनेन निपातः ।

**[नमुचिः]** न 'मुच्लृंती मोक्षणे' (१३२०) मुच् । न मुञ्चतीति । 'नाम्युपान्त्य-कृ-गृ-शृ-पृ-पूङ्भ्यः कित्' (उणा० ६०९) किद् इप्र० ।

**[नकुलः]** नास्य कुलमस्तीति । अनेन नकुलनिपातः ।

**[नभ्राट्]** न न भ्राजते किन्तु भ्राजत एव ।

**[नपात्]** न न पातीति किन्तु पाति ।

**[नवेदाः]** न न वेत्तीति किन्तु वेत्त्येव ।

**[नकुलः]** न न कुलमस्त्यस्य ।

**[नपुंसकम्]** न पुम्स् । न स्त्री । न पुमान्, न स्त्रीति । 'स्त्रियाः पुंसो द्वन्द्वाच्च' (७।३।९६) अत्समासान्तः । 'पृषोदरादयः' (३।२।१५५) निपातनात् नपुंसकं पाश्चात्येषु एको नलोपो निपातः पृषोदरादित्वात् ।

**[नक्षत्रम्]** 'क्षिं क्षये' (१०) क्षि । 'क्षर संचलने' (९७१) क्षर्, नपूर्व० । न क्षीयते - न क्षरति वा । 卐 उणादयः त्रट्प्र० → त्र ।

**[नक्रः]** 'क्रमू पादविक्षेपे' (३८५) क्रम् । 'डुक्रींग्श् द्रव्यविनिमये' (१५०८) क्री, नपूर्व० । न क्रामति, न क्रीणाति वा । अनेनैव निपातनात् डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[नाकः]** न । अक । नास्मिन्नकं = दुःखमस्ति ।

**[नग्नः]** न । ग्न । न विद्यन्ते ग्नाः = श्रियः छन्दांसि वाऽस्य ।

**[नागः]** न अगः-नागः ।

**[नभागः]** न विद्यते भागोऽस्य ।

**[नाराचः]** न । अर । 'अञ्चू गतौ च' (१०५) अञ्च् । न अरमत्यर्थमञ्चन्ति(ति) । 'मूलविभुजादयः' (५।१।१४४) कप्र० → अ । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः ।

---

卐 'त्रट्' (उणा० ४४६) सूत्रेण सर्वधातुभ्यस्त्रट्प्रत्ययो भवति । 'वृग् - नक्षि-पचि-वच्यमि-नमि-वमि-वपि-वधि-यजि-पति- कडिभ्योऽत्रः' (उणा० ४५६) सूत्रेण 'णक्ष गतौ' धातोः अत्रप्रत्यये नक्षत्रं सिद्धं भवति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[नापितः]** न 'आप्लृंट् व्याप्तौ' (१३०७) आप् । नाप्यतेऽसौ । 'नञ आपेः' (उणा० २११) इतप्र० ।

**[नमेरुः]** न 'मींग्श् हिंसायाम्' (१५१२) मी । न मीयतेऽसौ । 'शिगु-मेरु-नमेर्वादयः' (उणा० ८११) रुप्र० *निपात्यते ।*

**[ननान्दा]** अभि 'टुनदु समृद्धौ' (३१२) नद् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नन्द् । नाभिनन्दति वधूमिति । 'यति-ननन्दिभ्यां दीर्घश्च' (उणा० ८५६) ऋप्र० - दीर्घश्च ।

**[नान्तरीयकम्]** न । अन्तर । नान्तरेण भवति । नान्तरेणेत्यकर्थं न सप्तम्यन्तात् । 'गहादिभ्यः' (६।३।६३) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । पश्चात् 'यावादिभ्यः कः' (७।३।१५) कप्र० ।

***[नाचिकेतः]*** 'कितक् ज्ञाने' (११४३/७) कित्, न नपूर्व० । न न चिकेत्ति । 'अच्' (५।१।४९) अच्प्र० → अ । नाम्नि 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव्प्र० । 'हवः शिति' (४।१।१२) कित् द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) तलोपः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

एतेषु सर्वेषु अनेनैव निपातः ।

**[नास्तिकः]** न । अस्ति । न विद्यतेऽस्ति यस्याऽसौ । 'नास्तिका-ऽऽस्तिक-दैष्टिकम्' (६।४।६६) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः ।

**[नभः]** न 'भसक् भर्त्सन-दीप्त्योः' (११४३/५) भस् । न बभस्तीति क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[नारङ्गम्]** न 'रञ्जीं रागे' (८९६) रञ्ज् । रज्यते । घञ्प्र० → अ । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) ज० → ग० । न न रङ्गोऽस्तीति नारङ्गः । पाश्चात्येऽनेनैवाऽत्र निपातः ॥छ॥

## अन् स्वरे ॥३।२।१२९॥

**[अनन्तो जिनः]** न । अन्त । न विद्यतेऽन्तोऽस्येति । अनेन अन् ।

**[अनादिः]** न विद्यते आदिरस्याऽसौ ।

**[अनजम्]** न । अज । अजानामभावः । अनेन अन् । प्र० सि । 'अमव्ययीभावस्याऽतोऽपञ्चम्याः' (३।२।२) अम् ।

**[अनश्वः]** न अश्वः ॥छ॥

## कोः कत् तत्पुरुषे ॥३।२।१३०॥

**[कोः]** कु षष्ठी ङस् ।

**[कत्]** कत् प्र० सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[तत्पुरुषे]** स(:) चासौ पुरुषश्च = तत्पुरुषस्तस्मिन् ।

**[कदश्वः]** कु । अश्व । कुत्सितोऽश्वः ।

**[कदुष्ट्रः]** कु । उष्ट्र । कुत्सित उष्ट्रः ।

**[कदन्नम्]** कुत्सितमन्नम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[कदशनम्]** कुत्सितमशनम् । अनेन सर्वत्र कु० → कद्० ।

**[कूष्ट्रो देशः]** कुत्सिता उष्ट्रा अस्मिन् देशे ।

**[कुब्राह्मणः]** 卐 कुत्सितो ब्राह्मणः ॥छ॥

## रथ-वदे ॥३।२।१३१॥

**[रथवदे]** रथश्च वदश्च = रथवदम्, तस्मिन् ।

**[कद्रथः]** कु । रथ । कुत्सितो रथः । कुत्सितो रथोऽस्य ।

**[कद्वदः]** कु । वद । वदतीति वदः । 'अच्' (५।१।४९) अच्प्र० → अ । कुत्सितो वदः । कुत्सितो वदोऽस्य सः । अनेन कु० → कद्० ।

**[कुरथो राजा]** कुत्सितो रथो अस्य ।

**[कुवदो मूर्खः]** कुत्सितो वदोऽस्य, + सूर्यः (?) ॥छ॥

## तृणे जातौ ॥३।२।१३२॥

**[कत्तृणा नाम रौहिषाख्या तृणजातिः]** कु । तृण । कुत्सितं तृणमस्याः सा । अनेन कु० → कद्० । 'रुहेर्वृद्धिश्च' (उणा० ५४८) इषप्र० - वृद्धिश्च रौहिषमित्याख्या यस्याः सा = रौहिषाख्या ।

**[कुतृणानि]** कुत्सितानि तृणानि ॥छ॥

## कत्त्रि ॥३।२।१३३॥

**[कत्]** कत् प्रथमा सि ।

**[त्रि]** त्रि सप्तमी ङि । सूत्रत्वात् लोपः ।

**[कत्त्रयः]** कु-किम् त्रि(२) । कुत्सितास्त्रयः-के वा त्रयः । अनेन कु-किम्→कद्० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० ।

**[कत्त्रिः]** कुत्सितास्त्रयोऽस्य सः । के वा त्रयोऽस्य । अनेन कद्० ।

**[किंत्रयः]** के वा त्रयः । प्र० जस् । 'जस्येदोत्' (१।४।२२) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ॥छ॥

## का-ऽक्ष-पथोः ॥३।२।१३४॥

**[का]** का प्र०सि । सूत्रत्वात् लोपः ।

**[अक्षपथोः]** अक्षश्च पन्थाश्च=अक्षपन्थानम्, तयोः=अक्षपथोः । सप्तमी ओस् । 'इन् ङी-स्वरे लुक्' (१।४।७९) इन्लुक् ।

**[काक्षः पाशकादिः]** कु 'अक्षौ व्याप्तौ च' (५७०) अक्ष् । अक्ष्यत इति । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । कुत्सितोऽक्षः, पाशकादिः ।

---

P. 卐 निन्द्यो ब्राह्मणः ।

P. + कुवमः = सूर्यः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[काक्षम्]** अक्षतीति । 'अच्' (५।१।४९) अच्प्र० → अ । कुत्सितमक्षमिन्द्रियम् ।

**[काक्षो रथः]** कुत्सितोऽक्षोऽस्य ।

**[काक्षः]** कुत्सितमक्षमक्षि वाऽस्य । 'सक्थ्यक्ष्णः स्वाङ्गे' (७।३।१२६) टः समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः ।

**[कापथो देशः]** कु । पथिन् । कुत्सितः पन्था अस्मिन् । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लोपः । प्रथमा सि ।

**[काक्षः]** कु 'लोकात्' (१।१।३) क् पाठउ विश्लेषियइ । 'त्यादि-सर्वादेः स्वरेष्वन्त्यात् पूर्वोऽक्' (७।३।२९) अक्प्र० । ककुः-कुत्सितोऽक्षः ।

**[कापथः]** ककुः-कुत्सितः पन्थाः । अनेन कु० → का० ।

**[कुपथः]** कुत्सितः पथः ।

**[कुपथं वनम्]** कुत्सितः पथो यत्र वने तत् = कुपथं वनम् ।।छ।।

## पुरुषे वा ।।३।२।१३५।।

**[कापुरुषः, कुपुरुषः]** कुत्सितः पुरुषः ।

**[कापुरुषो ग्रामः, कुपुरुषो ग्रामः]** कुत्सिताः पुरुषा अस्मिन् । अनेन कु० → का० ।

**[कापुरुषः, कुपुरुषः]** ईषत् पुरुषः । मतान्तरे विकल्पेन कु० → का० ।।छ।।

## अल्पे ।।३।२।१३६।।

**[कामधुरम्]** कु । मधुर । ईषन्मधुरम् ।

**[कालवणम्]** कु । लवण । ईषल्लवणम् । अनेन कु० → का० ।

**[काम्लम्]** ईषदम्लम् ।

**[काच्छम्]** ईषदच्छम् । अनेन "का" आदेशः ।।छ।।

## का-कवौ वोष्णे ।।३।२।१३७।।

**[काकवौ]** काश्च कवश्च = काकवौ ।

**[कोष्णम्, कवोष्णम्]** ईषत् कुत्सितं वा उष्णम् । अनेन कु० → का - कव० ।

**[कोष्णः, कवोष्णो देशः]** ईषत् कुत्सितं वा उष्णमत्र सः । अनेन कु० → का-कव० ।

**[कदुष्णम्]** कुत्सितं ईषद्वा उष्णम् । 'कोः कत् तत्पुरुषे' (३।२।१३०) कु० → कद्० ।

**[कूष्णो देशः]**卐 कुत्सितमुष्णं यस्मिन् देशे सः ।

**[काग्निः, कवाग्निः, कदग्निः]** ईषत् कुत्सितोऽग्निः । मतान्तरे कु० → का-कव० । 'कोः कत् तत्पुरुषे' (३।२।१३०) कद्० ।।छ।।

---

P. 卐 कुत्सितमुष्णं यत्र सः = कूष्णः । 'मयूरव्यंसकेत्यादयः' (३।१।११६) समासः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## कृत्येऽवश्यमो लुक् ॥३।२।१३८॥

**[अवश्यमः]** अवश्यम् षष्ठी ङस् ।

**[अवश्यकार्यम्]** अवश्यम् 'डुकृंग् करणे' (८८८) कृ । अवश्यं क्रियते । 'ऋवर्ण-व्यञ्जनाद्-घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । अनेन मलोपः ।

**[अवश्यस्तुत्यम्]** अवश्यम् 'ष्टुंग्क् स्तुतौ' (११२४) ष्टु । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्तु । 'निमित्ताभावे नैमित्तिकस्याऽप्यभावः' (न्या० स० वक्षस्कार(१) /सूत्र(२९)) स्तु । अवश्यं स्तूयते । 'दृ-वृग्-स्तु-जुषेति-शासः' (५।१।४०) क्यप्प्र० → य । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । अनेन मलोपः ।

**[अवश्यदेयम्]** 'डुदांग्क् दाने' (११३८) दा । अवश्यं दीयते । 'य एच्चातः' (५।१।२८) यप्र० - आ० → ए० । अनेन मलोपः ।

**[अवश्यकर्तव्यम्]** अवश्यं क्रियते । 'तव्या-ऽनीयौ' (५।१।२७) तव्यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । अनेन मलोपः ।

**[अवश्यकरणीयम्]** अवश्यं क्रियते । 'तव्या-ऽनीयौ' (५।१।२७) अनीयप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । अनेन मलोपः ।

**[अवश्यंलावकः]** 'लूग्श् छेदने' (१५१९) लू । अवश्यंपूर्व० । अवश्यं लुनातीति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।।छ।।

## समस्तत-हिते वा ॥३।२।१३९॥

**[समः]** सम् षष्ठी ङस् ।

**[ततहिते]**卐 ततश्च हितं च = ततहितम्, तस्मिन् ।

**[सततम्, संततम्]** सम् 'तनूयी विस्तारे' (१४९९) तन् । संतन्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'यमि-रमि-नमि-गमि-हनि-मनि-वनति-तनादेर्धुटि क्ङिति' (४।२।५५) नलोपः । सम्यक् ततम् ।

**[सहितम्, संहितम्]** सम् 'डुधांग्क् धारणे च' (११३९) धा । संधीयते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'धागः' (४।४।१५) "हि" आदेशः । सम्यग् हितम् । अनेन मलोपः । सि-अम् ।।छ।।

## तुमश्च मनः-कामे ॥३।२।१४०॥

**[तुमः]** तुम् षष्ठी ङस् ।

**[च]** च प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[मनःकामे]** मनश्च कामश्च = मनःकामम्, तस्मिन् ।

**[भोक्तुमनाः]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भोजनाय । 'क्रियायां क्रियार्थायां तुम्-णकच् भविष्यन्ती' (५।३।१३) तुम्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० । भोक्तुं मनो यस्याऽसौ । प्र० सि । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः ।

P. 卐 ततश्च हितश्च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[गन्तुकामः]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । गमनाय । 'क्रियायां क्रियार्थायां०' (५।३।१३) तुम्प्र० । गन्तुं कामोऽस्याऽसौ । अनेन मलोपः ।

**[समनाः]** सम् । मनस् । सम्यक् मनो यस्याऽसौ ।

**[सकामः]** सम्यक् कामोऽस्याऽसौ । अनेन मलोपः ॥छ॥

## मांसस्याऽनड् - घञि पचि नवा ॥३।२।१४१॥

**[मांसस्य]** मांस षष्ठी ङस् ।

**[अनड्घञि]** अनट् च घञ् च = अनड्घञ्, तस्मिन् ।

**[पचि]** पच् सप्तमी ङि ।

**[नवा]** नवा प्रथमा सि ।

**[मांस्पचनम्, मांसपचनम्]** 'डुपचींष् पाके' (८९२) पच् । पच्यते । 'अनट्' (५।३।१२४) अनट्प्र० → अन । मांसस्य पचनम् ।

**[मांस्पचनी, मांसपचनी]** पच्यते । 'अनट्' (५।३।१२४) अनट्प्र० → अन । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । मांसस्य पचनी ।

**[मांस्पाकः, मांसपाकः]** पच् । पचनम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) च० → क० । मांसस्य पाकः । अनेन विकल्पे अलोपः ।

**[मांसपक्तिः]** पच् । पचनम् । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । '(गा-पा-पचो भावे' (५।३।९५) क्तिप्र० → ति) । 'च-जः क-गम्' (२।१।८६) च० → क० । मांसस्य पक्तिः ।

**[मांसदाहः]** 'दहं भस्मीकरणे' (५५२) दह् । दहनम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । मांसस्य दाहः ।

**[मांसदहनी]** 'दहं भस्मीकरणे' (५५२) दह् । दह्यते । 'अनट्' (५।३।१२४) अनट्प्र० → अन । 'अणञेयेकण्०' (२।४।२०) ङी । मांसस्य दहनी ॥छ॥

## दिक्शब्दात् तीरस्य तारः ॥३।२।१४२॥

**[दिक्शब्दात्]** दिशि दृष्टः शब्दः = दिक्शब्दस्तस्मात् ।

**[तीरस्य]** तीर षष्ठी ङस् ।

**[तारः]** तार प्रथमा सि ।

**[दक्षिणतारम्, दक्षिणतीरम्]** दक्षिणा । तीर । दक्षिणस्या दिशः तीरम् । दक्षिणस्य देशस्य तीरम् । 'सर्वादयोऽस्यादौ' (३।२।६१) पुंवत् । अनेन तीर० → तार० ।

**[उत्तरतारम्, उत्तरतीरम्]** उत्तरस्या दिशस्तीरम् । उत्तरस्य देशस्य तीरम् । 'सर्वादयोऽस्यादौ' (३।२।६१) पुंवत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनेन तीर० → तार० ।

**[पश्चिमतारम्, पश्चिमतीरम्]** पश्चिमस्या दिशस्तीरम् । पश्चिमस्य देशस्य वा तीरम् । अनेन तीर० → तार० ।

**[पूर्वतारम्, पूर्वतीरम्]** पूर्वस्या दिशस्तीरम् । पूर्वस्य देशस्य वा तीरम् । 'सर्वादयोऽस्यादौ' (३।२।६१) पुंवत् । अनेन तीर० → तार० ।

**[गङ्गातीरम्]** गङ्गायास्तीरम् ।।छ।।

### सहस्य सोऽन्यार्थे ।।३।२।१४३।।

**[सहस्य]** सह षष्ठी ङस् ।

**[सः]** स प्रथमा सि ।

**[अन्यार्थे]** अन्योऽर्थो यस्याऽसौ अन्यार्थस्तस्मिन् ।

**[सपुत्र आगतः, सहपुत्र आगतः]** सह । पुत्र । सह पुत्रेणाऽऽगतः ।

**[सशिष्यः, सहशिष्य आगतः]** सह । शिष्य । सह शिष्यैरागतः ।

**[सलोमकः, सहलोमकः]** सह । लोमन् । सह लोम्ना वर्त्तते । 'शेषाद्वा' (७।३।१७५) कच्प्र० → क । अनेन सह० → स० ।

**[सहयुध्वा]** सह 'युधिंच् सम्प्रहारे' (१२६०) युध् । सह युद्धवान् । 'सह-राजभ्यां कृग्-युधेः' (५।१।१६७) क्वनिप्प्र० → वन् । प्र० सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[सहकृत्वा]** सह 'डुकृंग् करणे' (८८८) कृ । सह कृतवान् । 'सह-राजभ्यां कृग्-युधेः' (५।१।१६७) क्वनिप्प्र० → वन् । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । प्र० सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[सहजः]** 'जनैचि प्रादुर्भावे' (१२६५) जन्, सहपूर्व० । सह जातः । 'क्वचित्' (५।१।१७१) डप्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[सहकृत्वप्रियः]** सहकृत्वा प्रियोऽस्य ।

**[प्रियसहकृत्वा]** प्रियः सहकृत्वाऽस्य सः । बहुव्रीहौ यदुत्तरपदं तस्मात् पूर्वः सहशब्दो नास्ति, तदा सादेशो न स्यात् ।।छ।।

### नाम्नि ।।३।२।१४४।।

**[नाम्नि]** नामन् सप्तमी ङि । 'ई-ङौ वा' (२।१।१०९) अलोपः ।

**[साश्वत्थम्]** सह अश्वत्थेन वर्त्तते ।

**[सपलाशम्]** सह पलाशैर्वर्त्तते ।

**[सशिंशपम्]** सह शिंशपाभिर्वर्त्तते । अनेन सह० → स० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[सरसा दूर्वा]** सह रसेन वर्त्तते । अनेन सह० → स० ।

**[सहचरः कुरण्टकः]** सह 'चर भक्षणे च' (४१०) चर् । सह चरतीति । 'चरेष्टः' (५।१।१३८) टप्र० → अ० ।

**[सहदेवः कुरुः]** सह 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव् । सह दीव्यतीति । *'अच्' (५।१।४९) अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[सहदेवा ओषधिः]** सह दीव्यतीति । 'अच्' (५।१।४९) अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[सहजन्या अप्सराः]** सह 'जनैचि प्रादुर्भावे' (१२६५) जन् । सह जायते । 'भव्य-गेय-जन्य-रम्य०' (५।१।७) निपातः । 'आत्' (२।४।१८) आप्प्र० → आ । अप् 'सृं गतौ' (२५) सृ । अद्भिः स्रियते । 卐 'अस्' (उणा० ९५२) अस्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) अर् । प्रथमा सि । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।।छ।।

## अदृश्या-ऽधिके ।।३।२।१४५।।

**[अदृश्याऽधिके]** 'दृशृं प्रेक्षणे' (४९५) दृश् । दृश्यत इति । 'ऋदुपान्त्यादकृपि-चदृचः' (५।१।४१) क्यप्प्र० → य । न दृश्योऽदृश्यः । 'नञत्' (३।२।१२५) न० → अ० । अदृश्यश्च +अधिकं च = अदृश्याऽधिकम्, तस्मिन् ।

**[साग्निः कपोतः]** सह । अग्नि । सहाऽग्निना वर्त्तत इति । अनेन सह० → स०, कपोतः ।

**[सपिशाचा वात्या]** सह । पिशाच । सह पिशाचेन वर्त्तते । अनेन सह० → स० । 'आत्' (२।४।१८) आप्प्र० → आ । वात । वातानां समूहः = वात्या । 'पाशादेश्च ल्यः' (६।२।२५) ल्यप्र० → य । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[सराक्षसी(सि)का विद्युत्]** सह । राक्षस । ★सह राक्षसेन वर्त्तते । 'शेषाद्वा' (७।३।१७५) कच्प्र० → क । अनेन सह० → स० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्-क्षिपकादीनाम्' (२।४।१११) इ ।

**[समुशलो व्रीहिकंसः]** सह मुस(श)लेन वर्त्तते । अनेन सह० → स०, व्रीहिकंसः ।

**[सद्रोणा खारी]** सह द्रोणेन वर्त्तत इति । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[समाषः कार्षापणः]** सह माषेण वर्त्तत इति ।

**[सकाकणीको माषः]** सह काकण्या वर्त्तत इति । अनेन सह० → स० ।।छ।।

## अकालेऽव्ययीभावे ।।३।२।१४६।।

**[अकाले]** न कालोऽकालस्तस्मिन् ।

**[अव्ययीभावे]** अनव्ययस्य अव्ययस्य भवनम् । 'कृ-भ्वस्तिभ्यां कर्मकर्तृभ्यां प्रागतत्तत्त्वे च्विः' (७।२।१२६) च्विप्र० ।

---

P. * 'लिहादिभ्यः' (५।१।५०) अच्प्र० ।        P. + अधिकश्च ।

卐 'अस्' (उणा० ९५२) सूत्रेण अस्प्रत्यये सरः जलाशयविशेषः । 'आपोऽपाप्ताप्सराब्जाश्च' (उणा० ९६४) 'आप्लृंट् व्याप्तौ' धातोः अस्प्रत्यये अप्सरादेशे अप्सराः भवति । धातुपारायणे 'सृं गतौ' धातोः टिप्पनकेऽपि इदमेव सूत्रं उक्तम् ।

P. ★ श० म० न्यासानुसन्धाने - विद्युत् मेघप्रभवं ज्योतिः, सा च कयाचन राक्षस्याधिष्ठितेति प्रसिद्धिरिति तद्वलादेव राक्षस्या सह वर्त्तमानत्वव्यवहारः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'ईश्च्वाववर्णस्या-ऽनव्ययस्य' (४।३।१११) ई ।'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलिहलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव्, तस्मिन् ।

**[सब्रह्म साधूनाम्]** सह । ब्रह्मन् । ब्रह्मणः संपत् । प्र० सि । 'अमव्ययीभावस्याऽतोऽपञ्चम्याः' (३।२।२) अम् । 'अनतो लुप्' (३।२।६) अम्लोपः ।

**[सवृत्तं सुविहितानाम्]** वृत्तस्य संपत् ।

**[सक्षत्रं यदूनाम्]** क्षत्रस्य संपत् । अनेन सह० → स० । यदोरपत्यानि । 'पुरु-मगध-कलिङ्ग-सूरमस-द्विस्वरादण्' (६।१।११६) अण्प्र० । 'द्रेरञणोऽप्राच्य-भर्गादेः' (६।१।१२३) अण्लोपः, तेषाम् = यदूनाम् ।

**[सचक्रं धेहि]** सह । चक्र । युगपच्चक्रेण युगपच्चक्राणि वा धेहि ।

**[सधुरं प्राज]** सह धुरा = युगपद्धुरा । 'धुरोऽनक्षस्य' (७।३।७७) अत्समासान्तः । अनेन सह० → स० ।

**[सतृणमभ्यवहरति]** सह । तृण । तृणैः सह ।

**[समूलघातं हन्ति]** सह मूलेन वर्त्तते । अनेन सह० → स० । 'हनंक् हिंसागत्योः' (११००) हन् । समूलस्य हननम् । 'हनश्च समूलात्' (५।४।६३) णम्प्र० → अम् । 'ञ्णिति घात्' (४।३।१००) हन्० → घात्० ।

**[सषड्जीवनिकमधीते श्रावकः]** सह । षड्जीवनिका । षड्जीवनिकामन्तमवसानं कृत्वाऽधीते । अनेन सह० → स० । 'क्लीबे' (२।४।९७) ह्रस्वः । प्रथमा सि । 'अमव्ययीभावस्याऽतोऽपञ्चम्याः' (३।२।२) अम् ।

**[सलोकबिन्दुसारमधीते पूर्वधरः]** सह । लोकबिन्दुसार । आ(स)लोकबिन्दुसारमन्तमवसानं कृत्वाऽधीते । 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । वर्त्त० ते । पूर्व 'धृंग् धारणे' (८८७) धृ । पूर्वान् धरते । 'आयुधाऽऽदिभ्यो धृगोऽदण्डादेः' (५।१।९४) अच्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[सहपूर्वाह्णं शेते]** पूर्व । अहन् । पूर्वमह्नः । 'सर्वां-ऽश-संख्या-ऽव्ययात्' (७।३।११८) अट्समासान्तः - अह्न आदेशश्च । 'अतोऽह्नस्य (२।३।७३) णत्वम् । सह पूर्वाह्णमन्तमवसानं कृत्वा शेते । सप्तमी ङि । 'सप्तम्या वा' (३।२।४) अम् ।

**[सहापराह्णं भुङ्क्ते]** अपरमह्नः । 'सर्वां-ऽश-संख्या-ऽव्ययात्' (७।३।११८) अट्समासान्तः-अह्न आदेशश्च । 'अतोऽह्नस्य' (२।३।७३) णत्वम् । सह अपराह्णमन्तमवसानं कृत्वा भुङ्क्ते । सप्तमी ङि । 'सप्तम्या वा' (३।२।४) अम् ।

**[सहयुध्वा]** सह युद्धवान् । 'सह-राजभ्यां कृग्-युधेः' (५।१।१६७) क्वनिप्प्र० → वन् । प्र० सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।।छ।।

## ग्रन्थान्ते ।।३।२।१४७।।

**[ग्रन्थान्ते]** ग्रन्थस्याऽन्तः = ग्रन्थान्तस्तस्मिन् ।

**[सकलं ज्योतिषमधीते]** सह । कला । कलामन्तं कृत्वा । 'क्लीबे' (२।४।९७) ह्रस्वः । अम् । ज्योतिस् । ज्योतींषि अधिकृत्य कृतो ग्रन्थः । 'ज्योतिषम्' (६।३।१९९) इत्यनेन ज्योतिष इति निपातः । अम् ।

**[सकाष्ठम्]** सह । काष्ठ । काष्ठामन्तं कृत्वा । 'क्लीबे' (२।४।९७) ह्रस्वः ।

**[समुहूर्त्तम्]** मुहूर्त्तमन्तं कृत्वा । अनेन सह० → स० ।।छ।।

## नाशिष्यगो-वत्स-हले ।।३।२।१४८।।

**[अगोवत्सहले]** गौश्च वत्सश्च हलश्च = गोवत्सहलम्, न गोवत्सहलम् = अगोवत्सहलम् । 'नञत्' (३।२।१२५)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न० → अ०, तस्मिन् ।

**[स्वस्ति राज्ञे सहराष्ट्राय]** सह राष्ट्रेण वर्त्तत इति, तस्मै ।

**[स्वस्ति गुरवे सहशिष्याय]** सह शिष्येण वर्त्तत इति, तस्मै ।

**[भद्रं सहसङ्घायाचार्याय]** सह सङ्घेन वर्त्तत इति, तस्मै ।

**[सपुत्रः, सहपुत्र आगतः]** सह पुत्रेणाऽऽगतः । 'सहस्य सोऽन्यार्थे' (३।२।१४३) विकल्पेन सह० → स० ।

**[स्वस्ति भवते सगवे, सहगवे]** सह गोभिर्वर्त्तत इति, तस्मै ।

**[स्वस्ति भवते सवत्साय, सहवत्साय]** सह वत्सेन वर्त्तत इति, तस्मै ।

**[स्वस्ति भवते सहलाय, सहहलाय]** सह हलेन वर्त्तत इति, तस्मै । सर्वत्र 'सहस्य सोऽन्यार्थे' (३।२।१४३) सह० → स० विकल्पेन ।।छ।।

## समानस्य धर्मादिषु ।।३।२।१४९।।

**[समानस्य]** समान । मान । समानं = तुल्यं मानं = परिमाणं यस्याऽसौ समानस्तस्य = समानस्य । षष्ठी ङस् । 'टा-ङसोरिन-स्यौ' (१।४।५) स्य ।

**[धर्मादिषु]** धर्म आदिर्येषां ते = धर्मादयस्तेषु ।

**[सधर्मा]** समान । धर्म । समानो धर्मोऽस्य सः । 'द्विपदाद् धर्मादन्' (७।३।१४१) अन्समासान्तः । 'अवर्णवर्णस्य' (७।४।६८) अलोपः । प्र० सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । अनेन समानस्य स० ।

**[सधर्मः]** समानो धर्मः । अनेन समानस्य स० ।

**[सजातीयः]** समाना जातिरस्य । 'जातेरीयः सामान्यवति' (७।३।१३९) ईयप्र० ।

**[सनामा]** समानं नामाऽस्यासौ ।

**[सनाम]** समानं नाम । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः । अनेन समानस्य स० ।

**[सगोत्रः, समानगोत्रः]** समानं गोत्रमस्याऽसौ ।

**[सरूपः, समानरूपः]** समानं रूपं यस्याऽसौ ।

**[सवर्णः, समानवर्णः]** समानो वर्णो यस्याऽसौ ।

**[सवयाः, समानवयाः]** समानं वयो यस्याऽसौ ।

**[सवचनः, समानवचनः]** समानं वचनं यस्याऽसौ । मतान्तरेण विकल्पे समानस्य सभावः ।

**[सोदर्यः]** समान । उदर । समानोदरे जातः । 'सोदर्य-समानोदर्यौ' (६।४।७८) सोदर्य निपातः ।।छ।।

**[सतीर्थ्यः]** समान । तीर्थ । समाने तीर्थे वसति । 'सतीर्थ्यः' (६।४।७८) इत्यनेन निपातः ।

## सब्रह्मचारी ।।३।२।१५०।।

**[सब्रह्मचारी]** समान । ब्रह्मन् । 'चर भक्षणे च' (४१०) चर् । समाने ब्रह्मणि आगमे गुरुकुले वा व्रतं चरतीति । अनेन निपातनादेव व्रतशब्दस्य लोपः । समानो ब्रह्मचारी वा, अनेन निपातः ।।छ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## दृग्-दृश-दृक्षे ॥३।२।१५१॥

**[दृग्दृशदृक्षे]** दृग् च दृशश्च दृक्षश्च = दृग्दृशदृक्षम्, तस्मिन् ।

**[सदृक्]** समान । 'दृशूं प्रेक्षणे' (४९५) दृश् । समान इव दृश्यते । 'त्यदाद्यन्य-समानादुपमानाद् व्याप्ये दृशः टक्-सकौ च' (५।१।१५२) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् । 'ऋत्विज्-दिश्-दृश्-स्पृश्-स्रज्-दधृषुष्णिहो गः' (२।१।६९) श० ⟶ ग० । 'विरामे वा' (१।३।५१) ग० ⟶ क० ।

**[सदृशः]** समान इव दृश्यते । 'त्यदाद्यन्य-समानादुपमानाद्०' (५।१।१५२) टक्प्र० ⟶ अ । प्रथमा सि ।

**[सदृक्षः]** समान इव दृश्यते । 'त्यदाद्यन्य-समानादुपमानाद्०' (५।१।१५२) सक्प्र० । 'यज-सृज-मृज-राज०' (२।१।८७) श० ⟶ ष० । 'ष-ढोः कस्सि' (२।१।६२) ष० ⟶ क० । 'नाम्यन्तस्था०' (२।३।१५) स० ⟶ ष० । क-षसंयोगे क्ष० । अनेन समानस्य स० ।

**[समानदृक्]** दर्शनं = दृक् । 'क्रुत्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । समाना दृक् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'ऋत्विज्-दिश्-दृश्-स्पृश्-स्रज्-दधृषुष्णिहो गः' (२।१।६९) श० ⟶ ग० । 'विरामे वा' (१।३।५१) ग० ⟶ क० ॥छ॥

## अन्य-त्यदादेराः ॥३।२।१५२॥

**[अन्यत्यदादेः]** त्यद् आदिर्यस्याऽसौ त्यदादिः, अन्यश्च त्यदादिश्च = अन्यत्यदादिस्तस्य ।

**[आः]** आ प्रथमा सि ।

**[अन्यादृक्, अन्यादृशः, अन्यादृक्षः]** अन्य । 'दृशूं प्रेक्षणे' (४९५) दृश् । अन्य इव दृश्यते । 'त्यदाद्यन्य-समानादुपमानाद् व्याप्ये दृशः टक् सकौ च' (५।१।१५२) क्विप्-टक्-सक्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेन दीर्घः ।

**[त्यादृक्, त्यादृशः, त्यादृक्षः]** त्यद् । 'दृशूं प्रेक्षणे' (४९५) दृश् । स्य इव दृश्यते ।

**[तादृक्, तादृशः, तादृक्षः]** तद् । 'दृशूं प्रेक्षणे' (४९५) दृश् । स इव दृश्यते ।

**[यादृक्, यादृशः, यादृक्षः]** यद् । 'दृशूं प्रेक्षणे' (४९५) दृश् । य इव दृश्यते । 'त्यदाद्यन्य-समानादुपमानाद्०' (५।१।१५२) क्विप्-टक्-सक्प्र० । 'आ द्वेरः' (२।१।४१) द० ⟶ अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन दीर्घः ।

**[अमूदृक्, अमूदृशः, अमूदृक्षः]** अदस् । 'दृशूं प्रेक्षणे' (४९५) दृश् । असाविव दृश्यते । 'त्यदाद्यन्य-समानादुपमानाद्०' (५।१।१५२) क्विप्-टक्-सक्प्र० । 'आ द्वेरः' (२।१।४१) स० ⟶ अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० ⟶ म० । अनेन दीर्घः । 'मादुवर्णोऽनु' (२।१।४७) ऊ ।

**[भवादृक्, भवादृशः, भवादृक्षः]** भवत् । 'दृशूं प्रेक्षणे' (४९५) दृश् । भवानिव दृश्यते । 'त्यदाद्यन्य-समानादुपमानाद्०' (५।१।१५२) क्विप्-टक्-सक्प्र० । अनेन दीर्घः आ ।

**[त्वादृक्, त्वादृशः, त्वादृक्षः]** युष्मद् । त्वमिव दृश्यते । 'त्यदाद्यन्य-समानादुपमानाद्०' (५।१।१५२) क्विप्-टक्-सक्प्र० । 'त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्' (२।१।११) "त्व" आदेशः । अनेन दीर्घः आ ।

**[मादृक्, मादृशः, मादृक्षः]** अस्मद् । अहमिव दृश्यते । 'त्यदाद्यन्य-समानादुपमानाद्०' (५।१।१५२) क्विप्-टक्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सक्प्र० । 'त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्' (२।१।११) "म" आदेशः । अनेन दीर्घः आ ।

**[एकादृक्, एकादृशः, एकादृक्षः]** एक इव दृश्यते ।

**[द्वादृक्, द्वादृशः, द्वादृक्षः]**卐 द्विरिव दृश्यते ।

**[युष्मादृक्, युष्मादृशः, युष्मादृक्षः]** यूयमिव दृश्यते ।

**[अस्मादृक्, अस्मादृशः, अस्मादृक्षः]** वयमिव दृश्यते । 'त्यदाद्यन्य-समानादुपमानाद्०' (५।१।१५२) क्विप्-टक्-सक्प्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । अनेन दीर्घः आ ।

**[यावान्]** यद् । यत्परिमाणमस्याऽसौ ।

**[तावान्]** तद् । तत्परिमाणमस्याऽसौ ।

**[एतावान्]** एतद् । एतत्परिमाणमस्याऽसौ । 'यत्-तदेतदो डावादिः' (७।१।१४९) अतुप्र० → अत् - "डाव्" आदिः → आव् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अद्लोपः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।।छ।।

## इदं-किमीत्-की ॥३।२।१५३॥

**[इदंकिमीत्की]** इदं च किं च । ईच्च कीश्च । उभयत्र औ । सूत्रत्वात् लोपः ।

**[ईदृक्, ईदृशः, ईदृक्षः]** इदम् । 'दृशृं प्रेक्षणे' (४९५) दृश् । अयमिव दृश्यते । 'त्यदाद्यन्य-समानादुपमानाद्०' (५।१।१५२) क्विप्-टक्-सक्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'यज-सृज-मृज०' (२।१।८७) श० → ष० । 'ष-ढोः कस्सि' (२।१।६२) ष० → क० । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । क-षसंयोगे क्ष० । अनेन इदम्० → ई० ।

**[कीदृक्, कीदृशः, कीदृक्षः]** किम् । 'दृशृं प्रेक्षणे' (४९५) दृश् । क इव दृश्यते । 'त्यदाद्यन्य-समानादुपमानाद्०' (५।१।१५२) क्विप्-टक्-सक्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'यज-सृज-मृज०' (२।१।८७) श० → ष० । 'ष-ढोः कस्सि' (२।१।६२) ष० → क० । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । क-षसंयोगे क्ष० । अनेन किम्० → की० ।

**[इयान्]** इदम् । इदं परिमाणमस्य । 'इदं-किमोऽतुरिय्-किय् चास्य' (७।१।१४८) अतुप्र० → अत् - इदम्० → इय्० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[कियान्]** किम् । किं परिमाणमस्य । 'इदं-किमोऽतुरिय्-किय् चास्य' (७।१।१४८) अतुप्र० → अत्- किम्० → किय्० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।।छ।।

## अनञः क्त्वो यप् ॥३।२।१५४॥

**[अनञः]** न नञ् = अनञ् । 'नञत्' (३।२।१२५) न० → अ०, तस्य (?) (तस्मात्) ।

**[क्त्वः]** क्त्वा षष्ठी ङस् । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः ।

卐 श० म० न्यासानुसन्धाने - द्वाविव ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[यप्]** यप् प्रथमा सि ।

**[प्रकृत्य]** प्र 'डुकृंग् करणे' (८८८) कृ । प्रकरणं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । अनेन यप् । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः ।

**[प्रहृत्य]** प्र 'हृंग् हरणे' (८८५) हृ । प्रहरणं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । अनेन यप् । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः ।

**[उच्चैःकृत्य]** उच्चैः करणम् । 'कृगोऽव्ययेनाऽनिष्टोक्तौ क्त्वा-णमौ' (५।४।८४) क्त्वाप्र० → त्वा । अनेन यप् । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः ।

**[नानाकृत्य]** नाना करणम् । 'स्वाङ्गतश्च्व्यर्थे नाना-विना-धाऽर्थेन भुवश्च' (५।४।८६) क्त्वाप्र० → त्वा । अनेन यप् । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः ।

**[अकृत्वा]** न करणं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'नञत्' (३।२।१२५) न० → अ० ।

**[अहृत्वा]** न हरणं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'नञत्' (३।२।१२५) न० → अ० ।

**[परमकृत्वा]** 卐 परमकरणं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा ।

**[अलं कृत्वा]** अलं करणेन । 'निषेधेऽलं-खल्वोः क्त्वा' (५।४।४४) क्त्वाप्र० → त्वा ।

**[खलु कृत्वा]** खलु करणेम । 'निषेधेऽलं-खल्वोः क्त्वा' (५।४।४४) क्त्वाप्र० → त्वा ।।छ।।

**पृषोदरादयः ।।३।२।१५५।।**

**[पृषोदरादयः]** पृषोदर आदिर्येषां ते । प्रथमा जस् । 'जस्येदोत्' (१।४।२२) इ० → ए० । 'एदैतोऽयाय्' (१।२।२३) अय् । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[पृषोदरः]** पृषत् । उदर । पृषदुदरमुदरे वाऽस्याऽसौ । अनेन तलोपो निपातः ।

**[पृषोदरम्]** पृषत उदरम् । अनेन तलोपो निपातः ।

**[पृषोद्वानम्]** पृषत उद्वानम् ।

**[पृषोद्धारम्]** पृषत् 'धृंग् धारणे' (८८७) धृ । पृषतमुद्धर इति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । अनेन तलोपो निपातः । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'अवर्णस्ये०' (१।२।६) ओ ।

+ **[पृषोद्वारम्]** पृषत्-उत् 'वृग्ट् वरणे' (१२९४) वृ । पृषतमुद्वृणोतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । अनेन तलोपो निपातः । अवर्णस्येवर्णादिनैदोदरल् (१।२।६) ओ ।

**[जीमूतः]** जीवन । मूत । जीवनस्य-जलस्य मूतः=पुटबन्धः । अनेन वनलोपो निपातः ।

**[बलाहकः]** वारि । वाहक । वारिणो वाहकः । पूर्वपदस्य "ब", उत्तरपदादेश्च "ल" आदेशो निपातोऽनेनैव ।

---

P. 卐 परमं च तत् कृत्वा च ।

\+ न विद्यते इदमुदाहरणं बृहद्वृत्तौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[आढ्यः]** 'ध्यैं चिन्तायाम्' (३०) ध्यै । 'आत् सन्ध्यक्षरस्य' (४।२।१) ध्या, आङ्पूर्व० । आध्यायन्ति तमिति । 'स्थादिभ्यः कः' (५।३।८२) कप्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलोपः । अनेन धस्य "ढ्य" निपातः ।

**[दूडासः]** दुस् 'दासृग् दाने' (९३३) दास् । कृच्छ्रेण दास्यते । अथवा दुष्टो दासः । 'दुः-स्वीषतः कृच्छ्रा-ऽकृच्छ्रार्थात् खल्' (५।३।१३९) खल्प्र० → अ । अनेन उत्तरपदादेश्च डत्वं निपातः ।

**[दूणासः]** दुस् 'नशौच् अदर्शने' (१२०२) नश् । नश्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । कृच्छ्रेण नाश्यते । अथवा दुष्टो नाशः । 'दुःस्वीषतः कृच्छ्रा-ऽकृच्छ्रार्थात् खल्' (५।३।१३९) खल्प्र० → अ । अनेन णत्वं निपातः ।

**[दूडभः]** दुस् 'दम्भूट् दम्भे' (१३०९) दम्भ् । कृच्छ्रेण दभ्यते, अथवा दुष्टो दम्भः । 'दुः-स्वीषतः०' (५।३।१३९) खल्प्र० → अ । अनेन दम्भेर्नलोपः - दस्य डत्वं च निपातः ।

**[दूढ्यः]** दुस् 'ध्यैं चिन्तायाम्' (३०) ध्यै । 'आत् सन्ध्यक्षरस्य' (४।२।१) ध्या । दुष्टं ध्यायति । 'स्थादिभ्यः कः' (५।३।८२) कप्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलोपः । अनेन धस्य ढत्वं निपातः ।

**[मयूरः]** मही टुक्षु (१०८४) - 'रु शब्दे' (१०८५) रु । मह्यां रौति । अनेन महीशब्दस्य मयूनिपातः ।

**[महिषः]** मही 'शीङ्क् स्वप्ने' (११०५) शी । मह्यां शेते । 'क्वचित्' (५।१।१७१) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) ईलोपः । अनेन पूर्वपदस्य ह्रस्वः-शस्य षत्वं च निपातः ।

**[पिशाचः]** पिशित 'अशश् भोजने' (१५५८) अश् । पिशितमश्नाति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । अनेन पिशितस्य पिशादेशेऽश्नातेः शस्य च चादेशः ।

**[श्मशानम्]** शव 'शीङ्क् स्वप्ने' (११०५) शी । शय्यते । 'अनट्' (५।३।१२४) अनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । शवानां शयनम् । अनेन पूर्वपदस्य श्मादेशः-शयनस्य च शानादेशो निपातः ।

**[वृसी]** बुवन् 'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सद् । बुवन्तोऽस्यां सीदन्ति निषीदन्ति । अनेन पूर्वपदस्य वृभावः ।

**[उदूखलम्]** ऊर्ध्व । ख । बिल । ऊर्ध्वं खं बिलं वाऽस्य । अनेन ऊर्ध्वस्य उदूभाव उत्तरपदस्य च खलाऽऽदेशो निपातः ।

**[उलूखलम्]** ऊर्ध्वं खं बिलं वाऽस्य । अनेन ऊर्ध्वस्य उलूभावः-उत्तरपदस्य च खलाऽऽदेशो निपातः ।

**[दिवौकसः]** दिव् । ओकस् । दिवि द्यौर्वा ओकः = गृहमेषां ते । अनेन अकारागमः । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ । प्रथमा जस् ।

**[अश्वत्थः]** अश्व 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सौऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे नैमित्तिकस्याप्यभावः' (न्या० सं० वक्षस्कार(१) सूत्र (२९)) । स्था । अश्व इव तिष्ठतीति ।

**[कपित्थः]** कपिरिव तिष्ठतीति, कपयोऽस्मिंस्तिष्ठन्तीति वा ।

**[दधित्थः]** दध्नि तिष्ठतीति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[महित्थः]** मह्यां तिष्ठतीति । 'स्था-पा-स्ना-त्रः कः' (५।१।१४२) कप्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलोपः । अनेन एषु तिष्ठतेः सकारस्य तकारः ।

**[मुसलम्]** मुहुस् । स्वन । 'लांक् आदाने' (१०६८) ला । मुहुः स्वनं लातीति । 'लस श्लेषण-क्रीडनयोः' (५४३) लस् । मुहुर्मुहुर्लसतीति वा । अनेन मुहुःशब्दस्य मुभावः-स्वनस्य सभावः । 'क्वचित्' (५।१।१७१) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । पक्षान्तरे लसयोर्विपर्ययश्च ।

**[उलूकः]** ऊर्ध्व । कर्ण । ऊर्ध्वौ कर्णावस्य । अनेन ऊर्ध्वशब्दस्य "उल्" आदेशः-कर्णस्य च ऊकादेशः ।

**[मेखला]** मेहन । ख । माला । मेहनस्य खं = मेहनखम्, तस्य माला । अनेनाऽत्र मेहनस्य हनस्य लोपः-मालाशब्दस्य च "मा" लोपः ।

**[कुञ्जरः]** कु 'जृषृच् जरसि' (११४५) जृ । कौ जीर्यति । 'अच्' (५।१।४९) अच्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । अनेन मोऽन्तः ।

**[आशीविषः]** आशु । विष । आश्वस्य विषमस्ति । अनेन आशुशब्दस्य आशीभावः ।

**[बलीवर्दः]** बल 'वर्धण् छेदन-पूरणयोः' (१६६१) वर्ध् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । बलं वर्धयति । अनेन बलस्याऽन्ते ई-वर्धधकारस्य च दकारः, अच्प्र० → अ ।

**[मनीषी]** मनस् 'ईशिक् ऐश्वर्ये' (१११६) ईश् । मनस ईष्टे । 'ग्रहादिभ्यो णिन्' (५।१।५३) णिन्प्र० → इन् । अनेनाऽत्र मनसोऽन्त्यस्वरादिलोपः ईशेः शस्य च षः ।

**[बिडालः]** बिल 'दॄश् विदारणे' (१५३५) दॄ । दृणन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । बिलं दारयतीति । 'अच्' (५।१।४९) अच्प्र० → अ । अत्र बिलस्य ललोपः-दारस्य च डालादेशः ।

**[मृणालः]** मृद 'लींङ्च् श्लेषणे' (१२४८) ली, आङ्पूर्व० । मृदमालीयते । 'क्वचित्' (५।१।१७१) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) ईलोपः । अनेन मृदो दस्य णः ।

**[सृगालः]** असृग् 'लींङ्च् श्लेषणे' (१२४८) ली, आङ्पूर्व० । असृगालीयते । 'क्वचित्' (५।१।१७१) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) ईलोपः । अनेनाऽऽदेरस्य लोपः । असृग् 'गृत् निगरणे' (१३३५) गृ । असृग् गिलति वा । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । अनेन असृज आद्यन्तोऽज्लोपः ।

**[पुरोडाशः]** पुरस् 'दाशृग् दाने' (९२२) दाश् । पुरो दाश्यते । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । अनेन दस्य डः ।

**[वडवा]** अश्व । अम्बा । अश्वस्याऽम्बा । अनेन अश्वस्याऽशो लोपोऽन्ते ड्- मकारस्य लोपो बकारस्य वकारादेशश्च ।

**[शकन्धुः]** शा(श)क । अन्धु । शा(श)कस्याऽन्धुः । अत्र पूर्वपदस्याऽन्तस्य उत्तरपदादेर्वा अलोपः ।

**[कर्कन्धुः]** कर्कस्याऽन्धुः । अनेन पूर्वपदान्तस्य अलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[कुलटा]** 'अट गतौ' (१९४) अट् । अटतीति । 'अच्' (५।१।४९) अच्प्र० ⟶ अ । 'आत्' (२।४।१८) आप्प्र० ⟶ आ । कुलानामटा । अनेन अलोपः ।

**[अवटः]** अव 'अञ्चू गतौ च' (१०५) अञ्च् । अवाञ्चतीति क्विप् । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेन "अव" निपातः । 'अट गतौ' (१९४) अट् । अटन्त्यस्मिन्निति । 'पुन्नाम्नि घः' (५।३।१३०) घप्र० ⟶ अ । अनेन निपातः ।

**[सिंहः]** 'हिसु हिंसायाम्' (१४९४) हिस् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) हिन्स् । हिनस्तीति । अच्प्र० । अनेन सकार-हकारयोर्विपर्ययः ।

**[कृकलाशः]** कृतक पल (८९२) - फल (९८३) - 'शल गतौ' (९८४) शल् । कृतकेन शलति । 'वा ज्वलादि-दु-नी-भू-ग्रहा-ऽऽस्रोर्णः' (५।१।६२) णप्र० । अनेन तलोपः - श-लयोर्विपर्ययश्च । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

**[भ्रमरः]** भ्रमत् । टुक्षु (१०८४) - 'रु शब्दे' (१०८५) रु । भ्रमन् रौति । 'क्वचित्' (५।१।१७१) डप्र० ⟶ अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) उलोपः । अनेन तलोपः ।

**[मुहूर्त्तम्]** मुहुस् । 'ऋंक् गतौ' (११३५) ऋ । मुहुरियर्त्ति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० । धातोर्लोपः, मुहुरित्युपान्त्योकारस्य दीर्घो गणपाठत् ।

**[आरग्वधः]** अर = अत्यर्थं बध्नातीति । अच्प्र० । अनेन निपातः ।

**[अश्वत्थाम]** अश्वस्य स्थाम । अनेन स० ⟶ त० ।

**[निर्लयनी]** निर् 'लूग्श् छेदने' (१५१९) लू । निर्लूयते । 'अनट्' (५।३।१२४) अनट्प्र० ⟶ अन । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । अनेन निपातः । सर्पकञ्चुलिका ॥छ॥

## वाऽवा-ऽप्योस्तनि-क्री धाग्-नहोर्व-पी ॥३।२।१५६॥

**[वा]** वा प्रथमा सि ।

**[अवाऽप्योः]** अवश्च अपिश्च = अवापी, तयोः = अवाऽप्योः षष्ठी ओस् ।

**[तनिक्रीधाग्नहोः]** तनिश्च क्रीश्च = तनिक्री, धाग् च नह् च = धाग्नह्, तनिक्रीश्च धाग्नह् च = तनिक्रीधाग्नहौ, तयोः = तनिक्रीधाग्नहोः, सप्तमी ओस् ।

**[वपी]** वश्च पिश्च = वपी । औ । 'इदुतोऽस्त्रेरीदूत्' (१।४।२१) ई ।

**[वतंसः, अवतंसः]** अव 'तनूयी विस्तारे' (१४९९) तन् । अवतन्यते । 'व्यवाभ्यां तनेरीच्च वेः' (उणा० ५६५) सप्र० । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः ।

**[वक्रयः, अवक्रयः]** अव 'डुक्रींग्श् द्रव्यविनिमये' (१५०८) क्री । अवक्रयणम् । 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः' (५।३।२८) अल्प्र० ⟶ अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । अनेन विकल्पेन अव० ⟶ व० । प्रथमा सि ।

**[पिहितम्, अपिहितम्]** अपि 'डुधांग्क् धारणे च' (११३९) धा । अपिधीयते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० ⟶ त । 'धागः' (४।४।१५) धा० ⟶ हि० आदेशः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[पिधानम्, अपिधानम्]** अपिधीयते । 'अनट्' (५।३।१२४) अनट्प्र० → अन ।

**[पिदधाति, अपिदधाति]** अपि-धा । वर्त्त० तिव् । 'हवः शिति' (४।१।१२) "धा" द्विर्वचनु । 'ह्रस्वः' (४।१।३९) ह्रस्वत्वम् । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) ध० → द० ।

**[पिनद्धम्, अपिनद्धम्]** अपि 'णहींच् बन्धने' (१२८५) णह् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नह् । अपिनह्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'नहाहोर्ध-तौ' (२।१।८५) ह० → ध० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ध० → द० । अनेन अव० → व० - अपि० → पि० आदेशः । प्रथमा सि । यथाप्राप्ते 'अतः स्यमोऽम्' (१।४।५४) सि० → अम्० । 'समानादमोऽतः' (१।४।४६) अलोपः ।।छ।।

**इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनवृत्तौ तृतीयस्याध्यायस्य द्वितीयपादस्यावचूरिका संपूर्णा ।।छ।।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

|| अर्हम् ||

## || अथ तृतीयाध्यायस्य तृतीयः पादः ||

### वृद्धिरारैदौत् ||३|३|१||

**[वृद्धिः]** 'वृधूङ् वृद्धौ' (९५७) वृध् । वर्धिषीष्ट इत्याशास्यमाना । 'तिक्कृतौ नाम्नि' (५|१|७१) तिक्प्र० → ति । 'अधश्चतुर्थात् तथोर्धः' (२|१|७९) ति० → धि० । 'धुटस्तृतीयः' (२|१|७६) ध० → द० (?) ('तृतीयस्तृतीय०' (१|३|४९) ध० → द०) । प्र० सि ।

**[आरैदौत्]** आश्च आर् च ऐच्च औच्च = आरैदौत् । प्रथमा सि । 'अनतो लुप्' (१|४|५९) सिलोपः ।

**[मार्ष्टि]** 'मृजौक् शुद्धौ' (१०९७) मृज् । वर्त्तमाना तिव् । 'लघोरुपान्त्यस्य' (४|३|४) गु० अर् । गुणे सति 'मृजोऽस्य वृद्धिः' (४|३|४२) वृद्धिः आ । 'यज-सृज-मृज-राज०' (२|१|८७) ज० → ष० । 'तवर्गस्य श्चवर्ग०' (१|३|६०) त० → ट० ।

**[पाकः]** 'डुपचींष् पाके' (८९२) पच् । पचनं = पाकः । 'भावा-ऽकर्त्रोः' (५|३|१८) घञ्प्र० → अ । 'ञ्णिति' (४|३|५०) उपान्त्यवृद्धिः आ । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४|१|१११) च० → क० ।

**[पाक्यम्]** पच् । पच्यत इति । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५|१|१७) घ्यण्प्र० → य । 'ञ्णिति' (४|३|५०) उपान्त्यवृद्धिः आ । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४|१|१११) च० → क० । प्रथमा सि । 'अतः स्यमोऽम्' (१|४|५७) अम् ।

**[दाक्षिः]** दक्ष । दक्षस्याऽपत्यम् । 'अत इञ्' (६|१|३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादे०' (७|४|१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७|४|६८) अलोपः । प्रथमा सि ।

**[कारयति]** 'डुकृंग् करणे' (८८८) कृ । कुर्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३|४|२०) णिग्प्र० → इ । 'नामिनोऽकलि-हलेः' (४|३|५१) वृद्धिः आर् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३|४|७१) शव्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४|३|१) गु० ए । 'एदैतोऽयाय्' (१|२|२३) अय् ।

**[कार्यम्]** कृ । क्रियत इति । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५|१|१७) घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४|३|५१) वृद्धिः आर् ।

**[आर्षम्]** ऋषि । ऋषीणामिदम् । 'तस्येदम्' (६|३|१६०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७|४|१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७|४|६८) इलोपः । प्रथमा सि । 'अतः स्यमोऽम्' (१|४|५७) अम् ।

**[नाययति]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२|३|९७)नी । नयन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३|४|२०) णिग्प्र० → इ । 'नामिनोऽकलि-हलेः' (४|३|५१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१|२|२३) आय् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३|४|७१) शव् । 'नामिनो गुणोऽक्ङिति' (४|३|१) गु० ए । 'एदैतोऽयाय्' (१|२|२३) अय् ।

**[नायकः]** नी । नयतीति । 'णक-तृचौ' (५|१|४८) णकप्र० → अक । 'नामिनोऽकलि-हलेः' (४|३|५१) वृद्धिः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ऐन्द्रम्]** इन्द्र । इन्द्रो देवताऽस्य तत् । 'देवता' (६।२।१०१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् ।

**[लावयति]** 'लूग्श् छेदने' (१५१९) लू । लुनन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[लावकः]** लू । लुनातीति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[औपगवः]** उप । गो । गोः समीपमुपगुः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । उपगोरपत्यम् । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।।छ।।

## गुणोऽरेदोत् ।।३।३।२।।

**[गुणोऽरेदोत्]** गुणो । अर् च एच्च ओच्च = अरेदोत् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः ।

गुणशब्दस्य पूर्वनिपातो मङ्गलस्यैवाऽतिशयप्रतिपादनार्थः ।

**[करोति]** 'डुकृंग् करणे' (८८८) कृ । वर्त्त० तिव् । 'कृग्-तनादेरुः' (३।४।८३) उविकरणु । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'उ-श्नोः' (४।३।२) उ० → ओ० ।

**[कर्तव्यम्]** कृ । क्रियत इति । 'तव्या-ऽनीयौ' (५।१।२७) तव्यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । सि- अम् ।

**[चेता]** 'चिंग्ट् चयने' (१२९०) चि । चिनोतीति । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । प्रथमा सि । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः ।

**[चेयम्]** चि । चीयते । 'य एच्चातः' (५।१।२८) यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । सि-अम् ।

**[स्तोता]** 'ष्टुंग्क् स्तुतौ' (११२४) ष्टु । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्तु । 'निमित्ताभावे नैमित्तिकस्याऽप्यभावः' (न्या० सं० वक्ष० (१) / सूत्र (२९)) स्तु । स्तौतीति । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । प्रथमा सि । 'ऋदुशनस्-पुरुदंशो०' (१।४।८४) डा । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ ।

**[स्तोतव्यम्]** स्तु । स्तूयते । 'तव्या-ऽनीयौ' (५।१।२७) तव्यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ ।।छ।।

## क्रियार्थो धातुः ।।३।३।३।।

**[क्रियार्थः]** 'डुकृंग् करणे' (८८८) कृ । करणं = कृतिः । कृतिः = क्रिया । 'कृगः श च वा' (५।३।१००) शप्र० → अ । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'रिः श-क्या-ऽऽशीर्ये' (४।३।११०) इति ऋकारस्य रि० । 'आत्' (२।४।१८) आप्प्र० → आ । क्रियार्थो यस्य सः = क्रियार्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[धातुः] 'डुधांग्क् धारणे च' (११३९) धा । दधाति क्रियाभिधाने शक्तिमिति । 'कृ-सि-कंम्यमि-गमि-तनि-मनि-जन्यसि-मसि-सच्यवि-भा-धा-गा-ग्ला-म्ला-हनि-हा-या-हि-क्रुशि-पूभ्यस्तुन्' (उणा० ७७३) तुन्प्र० ।

कृतिः = क्रिया, प्रवृत्तिर्व्यापार इति यावत्, **पूर्वापरीभूता** साध्यमानरुपा साऽर्थोऽभिधेयं यस्य स शब्दो धातुसंज्ञो **भवति** । पूर्वापरीभूता पूर्वावयवयोगात् पूर्वा, अपरावयवयोगादपरा, पूर्वा च सा अपरा च = पूर्वापरा । अपूर्वापरा पूर्वापरा भूता इति च्व्यर्थकल्पना इहाक्रमस्य क्रमप्राप्तिश्च्विप्रत्ययेनोच्यते, तत्र पूर्वोऽवयवोऽधिश्रयणादिरपर उदकसेकादिपाकक्रियायाः एवमन्यासामपि वेदितव्यम् ।

[भवति] 'भू सत्तायाम्' (१) भू । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

[एधते] 'एधि वृद्धौ' (७४१) एध् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

[अत्ति] 'अदं भक्षणे' (१०५९) अद् । वर्त्त० तिव् । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० ।

[दीव्यति] 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव् । वर्त्त० तिव् । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः ।

[सुनोति] 'षुंग्ट् अभिषवे' (१२८६) षु । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सु । 'स्वादेः श्नुः' (३।४।७५) श्नुप्र० → नु । 'उ-श्नोः' (४।३।२) गु० ओ ।

[तुदति] 'तुदींत् व्यथने' (१३१५) तुद् । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) शप्र० → अ ।

[रुणद्धि] 'रुधूंपी आवरणे' (१४७३) रुध् । वर्त्त० तिव् । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) श्नप्र० → न० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ध० → द० ।

[तनोति] 'तनूयी विस्तारे' (१४९९) तन् । वर्त्त० तिव् । 'कृग्-तनादेरुः' (३।४।८३) उविकरणु । 'उ-श्नोः' (४।३।२) गु० ओ ।

[क्रीणाति] 'डुक्रींग्श् द्रव्यविनिमये' (१५०८) क्री । वर्त्त० तिव् । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'रषृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

[सहति] 'षहण् मर्षणे' (१९८१) षह् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सह् । 'युजादेर्नवा' (३।४।१८) विकल्पे णिच् अत्र । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

[गोपायति] 'गुपौ रक्षणे' (३३२) गुप् । 'गुपौ-धूप-विच्छि-पणि-पनेरायः' (३।४।१) आयप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

[कामयते] 'कमूङ् कान्तौ' (७८९) कम् । 'कमेर्णिङ्' (३।४।२) णिङ्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

[ऋतीयते] 'ऋत घृणा-गति-स्पर्द्धेषु' (२८७) ऋत् । 'ऋतेर्डीयः' (३।४।३) डीयप्र० → ईय । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

[जुगुप्सते] 'गुपि गोपन-कुत्सनयोः' (७६३) गुप् । 'गुप्-तिजो गर्हा-क्षान्तौ सन्' (३।४।५) सन्प्र० → स० । 'सन्-यङश्च' (४।१।३) द्विर्वचनम् । 'व्यञ्जनस्यानादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ग-होर्जः' (४।१।४०) गु० → जु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[कण्डूयति]** 'कण्डूग् गात्रविघर्षणे' (१९९१) कण्डू । 'धातोः कण्ड्वादेर्यक्' (३।४।८) यक्प्र० → य । वर्त्त० तिव् ।

**[पापच्यते]** 'डुपचींष् पाके' (८९२) पच् । भृशं पुनः पुनर्वा पचति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) 'पच्' द्विर्वचनम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[चोरयति]** 'चुरण् स्तेये' (१५६८) चुर् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । वर्त्त० तिव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[कारयति]** (३।३।१) सूत्रवत् ।

**[चिकीर्षति]** कृ । कर्तुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० → स । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'सन्-यङश्च' (४।१।३) किर् सउं द्विर्वचनम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[पुत्रकाम्यति]** पुत्र । पुत्रमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) काम्यप्र० । वर्त्त० तिव् ।

**[पुत्रीयति]** पुत्रमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य । 'क्यनि' (४।३।११२) ई । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[अश्वति]** अश्व इवाऽऽचरति । 'कर्तुः क्विप्, गल्भ-क्लीब-होडात्तु ङित्' (३।४।२५) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[श्येनायते]** श्येन । श्येन इवाऽऽचरति । 'क्यङ्' (३।४।२६) क्यङ्प्र० → य । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः आ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[हस्तयते]** हस्त । हस्तौ निरस्यति । 'अङ्गान्निरसने णिङ्' (३।४।३८) णिङ् → इ । 'अतः' (४।३।८२) अलोपः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[मुण्डयति]** मुण्ड । मुण्डं करोति । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० → इ । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरलोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[जवनः]** 'जुं गतौ' (१९९०) जु, सौत्रोऽयं धातुः । जवतीत्येवंशीलो जवनः । 'भूषा-क्रोधार्थ-जु-सृ-गृधि-ज्वल-शुचश्चाऽनः' (५।२।४२) अनप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । ओदौतोऽवाव् (१।२।२४) अव् ।

**[स्तभ्नाति]** 'स्तम्भू स्तम्भे' सौत्रोऽयं धातुः । वर्त्त० तिव् । 'स्तम्भू-स्तुम्भू-स्कम्भू-स्कुम्भू-स्कोः श्ना च' (३।४।७८) श्नाप्र० → ना । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः ।

**[चुलुम्पांचकार]** 'चुलुम्प विनाशे' (२०५०) चुलुम्प् । परोक्षा णव्० → अ० । 'धातोरनेकस्वरादाम् परोक्षायाः,

कृभ्वस्ति चानुतदन्तम्' (३।४।४६) णव्० → आम्० । 'डुकृंग् करणे' (८८८) कृ । परोक्षा णव्० → अ० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) कृ सउं द्विर्वचनम् । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'नामिनोऽकलि-हलेः' (४।३।५१) आर् ।

**[प्रेङ्खोलयति]** आदिशब्दात् 'प्रेङ्खोलण् अन्दोलने' (२०४६) इत्यपि पठितश्चोरादिस्ततः 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

सति भावोऽन्वयः, असति अभावो व्यतिरेकः । ननु कथं प्रकृतिः प्रत्ययः समुदायोऽपि प्रकृतेरेव धातोरेव क्रियार्थत्वागम इत्याह-कारकादिति संख्यानामादिग्रहणं तुमादिभिस्तु आदिशब्दात् क्त्वा-अम्-कृत्याश्च गृह्यन्ते । सदसदादि-आदिशब्दात् प्रत्यक्ष-परोक्षम् ।

**[जायते]** 'जनैचि प्रादुर्भावे' (१२६५) जन् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'जा ज्ञा-जनोऽत्यादौ' (४।२।१०४) जन्० → "जा" आदेशः ।

**[विपरिणमते]** वि-परि 'णमं प्रह्वत्वे' (३८८) णम् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नम् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[वर्धते]** 'वृधूङ् वृद्धौ' (९५७) वृध् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[अपक्षीयते]** 'क्षिं क्षये' (१०) क्षि, अपपूर्व० । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः ।

**[विनश्यति]** 'नशौच् अदर्शने' (१२०२) नश्, विपूर्व० । वर्त्त० तिव् । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य ।

**[श्वेतते]** श्वेत इति सूत्रोऽयं धातुः । 'श्विताङ् वर्णे' (९४३) श्वि । वर्त्त० ते । शव् । गुणु ।

**[संयुज्यते]** सम् 'युजूंपी योगे' (१४७६) युज् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य ।

**[समवैति]** सम्-अव 'इंण्क् गतौ' (१०७५) इ । वर्त्त० तिव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) ऐ ।

यावत् सिद्धमसिद्धं वा, साध्यत्वेनाभिधीयते ।
**आश्रितक्रमरूपत्वात्**, तत् क्रियेति प्रतीयते ॥१॥

卐 आश्रितं क्रमरूपं येन तदाश्रितक्रमरूपम्, तद्भावस्तस्मात् । परपठितः (१) अपरपठितः (२) नामधातुः (३) सूत्रधातुः (४) आयप्रत्ययान्ताः (५) पञ्च धातवो दर्शिताः ॥छ॥

---

卐 श० म० न्या० - आश्रितं क्रमरूपं पूर्वापरीभावो यया सा = आश्रितक्रमरूपा, तस्या भावः = आश्रितक्रमरूपत्वम्, तस्मात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न प्रादिरप्रत्ययः ।।३।३।४।।

**[न]** न प्रथमा सि ।

**[प्रादिः]** प्र आदिर्यस्याऽसौ प्रादिः । प्रथमा सि ।

**[अप्रत्ययः]** न विद्यते प्रत्ययो यस्मात् असौ अप्रत्ययः । 'नञत्' (३।२।१२५) न० → अ० ।

**[अभ्यमनायत]** अभि । मनस् । अभिमुखं मनो यस्याऽसौ अभिमनाः । अनभिमना अभिमना अभवत् = अभ्यमनायत । 'च्व्यर्थे भृशादेः स्तोः' (३।४।२९) क्यङ्प्र० → य-सलुक् च । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः आ । ह्यस्तनी त । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव्प्र० → अ । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अभिमिमनायिषते]** अभिमनाय । अभिमनायितुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० → स । 'आद्योऽश एकस्वरः' (४।१।२) म सउं द्विर्वचनम् । 'सन्यस्य' (४।१।५९) इ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'अतः' (४।३।८२) अलोपः । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[अभिमनाय्य गतः]** अभिमनाय । अभिमनायनं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् → य । 'अतः' (४।३।८२) अलोपः । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[प्रासादीयत्]** 'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सद्, प्रपूर्व० । प्रसीदन्त्यस्मिन्नयनमनांसीति प्रासादः । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । सर्वत्र करणे-अधिकरणे स्यात् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) वा दीर्घः आ । प्रासादमैच्छत् । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य । 'क्यनि' (४।३।११२) ई । ह्यस्तनी दिव्० → त्० । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[प्रासिसादीयिषति]** प्रासादीय । प्रासादीयितुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० → स । 'आद्योऽश एकस्वरः' (४।१।२) सा सिउं द्विर्वचनम् । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'सन्यस्य' (४।१।५९) इ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'अतः' (४।३।८२) अलोपः । 'नाम्यन्त०' (२।३।१५) षत्वम् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[प्रासादीय्य गतः]** प्रासादीय । प्रासादीयनं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'अतः' (४।३।८२) अलोपः ।

**[अमहापुत्रीयत्]** महत् । पुत्र । महांश्चासौ पुत्रश्च = महापुत्रः । 'जातीयैकार्थेऽच्वेः' (३।२।७०) डाप्र० → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लोपः । 卐 महापुत्रमैच्छत् । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य । 'क्यनि' (४।३।११२) ई । ह्यस्तनी दिव्० → त्० । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[उत्सुकायत]** उत् । सु । उद्गतं सुष्ठु मनो यस्य सः = उत्सुकः । 'उदुत्सोरुन्मनसि' (७।१।१९२) कप्र० । उत्सुक इवाऽऽचरत् । 'क्यङ्' (३।४।२६) क्यङ्प्र० → य । 'दीर्घश्च्वि-यङ्०' (४।३।१०८) दीर्घः आ । ह्यस्तनी त । 'स्वरादेस्तासु'

P. 卐 महापुत्रमिच्छति स्म ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(४।४।३१) वृद्धिः औ । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । यद्वा अनुत्सुक उत्सुकोऽभवत् । "च्व्यर्थे भृशादेः स्तोः' (३।४।२९) क्यङ्प्र० → य । ह्यस्तनी त ।

**[उत्सुसुकायिषते]** उत्सुक । उत्सुक इवाऽऽचरति । 'क्यङ्' (३।४।२६) क्यङ्प्र० → य । 'दीर्घश्च्वि-यङ्०' (४।३।१०८) दीर्घः-आ । उत्सुकायितुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० → स ।+ 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "सु" सिउं द्विर्वचनम् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'अतः' (४।३।८२) अलोपः । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[उत्सुकायित्वा]** उत्सुकाय । उत्सुकायनं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'स्ताद्यशितो०' (४।४।३२) इट् । 'अतः' (४।३।८२) अलोपः ।

**[असंग्रामयत शूरः]** 'संग्रामणि युद्धे' (१९३३) संग्राम । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । वर्त्तमाना तिव् (?) (ह्यस्तनी त) । 'कर्त्तर्य०' (३।४।७१) शव् । 'नामिनो०' (४।३।१) ए । 'एदैतो०' (१।२।२३) अय् ॥छ॥

### अवौ दा-धौ दा ॥३।३।५॥

**[अवौ]** न । व् । न विद्यते व् ययोस्तौ = अवौ । औ । 'नञत्' (३।२।१२५) न० → अ० ।

**[दाधौ]** दाश्च धाश्च = दाधौ । औ ।

**[दा]** दा प्रथमा सि । 卐'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[प्रणिदाता]** प्र-नि 'दां दाने' (७) दा । श्वस्तनी ता ।

**[प्रणिदयते]** 'देंङ् पालने' (६०४) दे, प्र-निपूर्व० । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[प्रणिददाति]** 'डुदांग्क् दाने' (११३८) दा, प्र-निपूर्व० । वर्त्त० तिव् । 'हवः शिति' (४।१।१२) "दा" सिउं द्विर्वचनम् । 'ह्रस्वः' (४।१।३९) ह्रस्वत् ।

**[प्रणिद्यति]** 'दोंच् छेदने' (११४८) दो, प्र-निपूर्व० । वर्त्त० तिव् । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । 'ओतः श्ये' (४।२।१०३) ओलोपः ।

**[प्रणिधयति]** प्र-नि'ट्धें पाने' (२८) धे । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[प्रणिदधाति]** 'डुधांग्क् धारणे च' (११३९) धा, प्र-निपूर्व० । वर्त्त० तिव् । 'हवः शिति' (४।१।१२) "धा" सिउं द्विर्वचनम् । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) ध० → द० । सर्वत्र 'नेर्ङ्मा-दा-पत-पद-नद-गद०' (२।३।७९) न० → ण० ।

**[उपादास्त]** उप 'दींङ्च् क्षये' (१२४४) दी । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् → स् । 'यबक्ङिति' (४।२।७) दी० → दा० । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[दातं बर्हिः]** 'दांव्क् लवने' (१०७०) दा । दायते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । बर्हिस्

---

+ श० म० न्या० - 'नाम्नो द्वितीयाद् यथेष्टम्' (४।१।७) "सु" द्वित्वम् ।

P. 卐 सूत्रत्वात् सिलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सकारान्तनपुंसकदर्भवाचकं दात्वाऽभावात् दत् इति न स्यात् । बर्हिस् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः ।

**[अवदातं मुखम्]** 'दैव् शोधने' (२९) दै, अवपूर्व० । 'आत् सन्ध्यक्षरस्य' (४।२।१) दा । अवदायते स्म । 卐'क्त-क्तवतू' (५।१।१७४) क्तप्र० —> त ।

**[प्रणिदापयति]** प्र-नि 'डुदांग्क् दाने' (११३८) दा । ददन्तं(तं) प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० —> इ । 'अर्त्ति-री-व्ली-ह्री-क्नूयि०' (४।२।२१) पोऽन्तः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'नेर्ङ्मा-दा-पत-पद-नद-गद-वपी-वही-शमू०' (२।३।७९) न० —> ण० ।

**[प्रणिधापयति]** प्र-नि 'डुधांग्क् धारणे च' (११३९) धा । दधन्तं(तं) प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० —> इ । 'अर्त्ति-री-व्ली०' (४।२।२१) पोऽन्तः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'नेर्ङ्मा-दा-पत-पद-नद-गद-वपी-वही-शमू-चिग्-याति-वाति-द्राति-प्साति-स्यति-हन्ति-देग्धौ' (२।३।७९) न० —> ण० ।।छ।।

## वर्तमाना ।।३।३।६।।

**[वर्तमाना]** 'वृतूङ् वर्त्तने' (९५५) वृत् । वर्त्तत इति । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) आनशप्र० —> आन । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'अतो म आने' (४।४।११४) मोऽन्तः । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'आत्' (२।४।१८) आप्प्र० —> आ । वर्त्तमानकाल इत्यर्थः । तत्र विहिता विभक्तिरपि वर्त्तमाना । यद्वा वर्त्तिसीष्ट इत्याशास्यमाना = वर्त्तमाना । 'तिक्कृतौ नाम्नि' (५।१।७१) आनश्प्र० । शव्-गुण-'अतो म आने' (४।४।११४) मोऽन्तः । 'आत्' (२।४।१८) आप्प्र० —> आ ।

वकारानुबन्धकरणं 'शिदवित्' (४।३।२०) इत्यत्र विशेषणार्थः एवमपरत्राऽपि वकारानुबन्धकरणस्य प्रयोजनं द्रष्टव्यम् ।।छ।।

## सप्तमी ।।३।३।७।।

**[सप्तमी]** सप्तन् । सप्तानां पूरणी = सप्तमी । 'नो मट्' (७।१।१५९) मट्प्र० —> म । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । निरन्वया इयं संज्ञा ।।छ।।

## पञ्चमी ।।३।३।८।।

**[पञ्चमी]** पञ्चन् । पञ्चानां पूरणी = पञ्चमी । 'नो मट्' (७।१।१५९) मट्प्र० —> म । 'अणञेयेकण्०' (२।४।२०) ङी । शेषः(षं) पूर्ववत् ।।छ।।

## ह्यस्तनी ।।३।३।९।।

**[ह्यस्तनी]** ह्यस् । + ह्यःकल्पेऽतीते दिने भवः = ह्यस्तनः ।

तत्र विहिता विभक्तिरपि ह्यस्तनी । 'सायं-चिरं-प्राह्णे-प्रगे-ऽव्ययात्' (६।३।८८) तनट्प्र० —> तन । यद्वा ह्योऽर्थः = ह्यस्तनः पूर्ववत् । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी ।।छ।।

---

P. 卐 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० —> त ।

P. + ह्यो भवा = ह्यस्तनी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## एताः शितः ॥३।३।१०॥

*[एताः] एतद् प्रथमा जस् → अस् । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३)* अलोपः । 'आत्' (२।४।१८) आप्प्र० → आ । 'समानानां०' (१।२।१) दीर्घः । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[शितः]** श् इदनुबन्धो यासां ताः । प्रथमा जस् ।

**[भवति]** 'भू सत्तायाम्' (१) भू । वर्त्त० तिव् → ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[भवेत्]** भू । सप्तमी यात् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'यः सप्तम्याः' (४।२।१२२) या० → इ० । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए ।

**[भवतु]** भू । पञ्चमी तुव् → तु । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[अभवत्]** भू । ह्यस्तनी दिव् → त् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'अड् धातोरादि०' (४।४।२९) अट् ।।छ।।

## अद्यतनी ॥३।३।११॥

**[अद्यतनी]** 卐 अद्य भवोऽर्थोऽद्यतनस्तत्र विहिता विभक्तिरपि अद्यतनी । 'सायं-चिरं-प्राह्णे-प्रगे-ऽव्ययात्' (६।३।८८) तनट्प्र० → तन । 'अणञेयेकण्०' (२।४।२०) ङी ।।छ।।

## परोक्षा ॥३।३।१२॥

**[परोक्षा]** अक्ष । पर । अक्षाणां परः = परोक्षम् । परोक्षे काले विहिता विभक्तिरपि परोक्षा । 'राजदन्ताऽऽदिषु' (३।१।१४९) इत्यनेन परस्य पूर्वनिपातः । पृषोदरादित्वात् अक्षस्य आदेरस्य उ० । 'आत्' (२।४।१८) आप्प्र० → आ ।।छ।।

## आशीः ॥३।३।१३॥

**[आशीः]** 'शासूक् अनुशिष्टौ' (१०९५) शास्, आङ्पूर्व० । आशासनमाशीः । 'क्रुत्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । 'आङः' (४।४।१२०) "इस्' आदेशः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'पदान्ते०' (२।१।६४) इत्यनेन दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'रः पदान्ते०' (१।३।५३) विसर्गः ।।छ।।

## श्वस्तनी ॥३।३।१४॥

**[श्वस्तनी]**+ श्वःकल्पे = भविष्यद्दिने भवोऽर्थः = श्वस्तनः, तत्र विहिता विभक्तिरपि श्वस्तनी । 'सायं-चिरं-प्राह्णे-प्रगे-ऽव्ययात्' (६।३।८८) तनट्प्र० → तन । 'अणञेयेकण्०' (२।४।२०) ङी ।।छ।।

---

P. 卐 अद्य भवा = अद्यतनी ।

P. + श्वो भवा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## भविष्यन्ती ॥३।३।१५॥

**[भविष्यन्ती]** 'भू सत्तायाम्' (१) भू । भविष्यतीति । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत् - स्यसहितः । भविष्यत्काले विहिता विभक्तिरपि भविष्यन्ती । 'अधातूदृदितः' (२।४।२) ङी । 'अवर्णादश्नोऽन्तो वाऽतुरीङ्योः' (२।१।११५) अत्० → अन्त्०, ॐशव् न भवति स्येन विहितत्वात् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् → इ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ॥छ॥

## क्रियातिपत्तिः ॥३।३।१६॥

**[क्रियातिपत्तिः]** क्रिया । अति 'पत्लृ गतौ' (९६२) पत् । अतिपतनं = अतिपत्तिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । क्रियाया अतिपत्तिः = क्रियातिपत्तिः ॥छ॥

## त्रीणि त्रीण्यन्ययुष्मदस्मदि ॥३।३।१७॥

**[त्रीणि त्रीणि]** त्रि प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः । 'रषृवर्णान्नो ण०' (२।३।६३) न० → ण० । 'वीप्सायाम्' (७।४।८०) द्विर्वचनम् ।

**[अन्ययुष्मदस्मदि]** अन्यच्च युष्मच्च अस्मच्च = तत्, तस्मिन् ।

**[स पचति]** तद् प्रथमा सि । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'तः सौ सः' (२।१।४२) त० → स० ।

**[तौ पचतः]** तद् प्रथमा औ । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ ।

**[ते पचन्ति]** तद् प्रथमा जस् । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'जस इः' (१।४।९) जस्० → इ० । 'अवर्णस्ये०' (१।२।६) ए ।

**[पचति]** 'डुपचींष् पाके' (८९२) पच् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[पचतः]** पच् । वर्त्त० तस् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[पचन्ति]** पच् । वर्त्त० अन्ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[पचते]** पच् । वर्त्त० ते । 'कर्त्तर्यन०' (३।४।७१) शव् ।

**[पचेते]** पच् । वर्त्त० आते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'आतामाते-आथामाथे आदिः' (४।२।१२१) आ० → इ० । 'अवर्णस्ये०' (१।२।६) ए ।

**[पचन्ते]** पच् । वर्त्त० अन्ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[भवान् पचति]** 'भांक् दीप्तौ' (१०६१) भा । भातीति । 'भातेर्डवतुः' (उणा० ८८६) डवतुप्र० → अवत् । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलोपः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

---

P. ॐ शव् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'अधातूदृदितः' (२।४।२) ङी । 'श्य-शवः' (२।१।११६) नोऽन्तः । प्रथमा सि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[भवन्तौ पचतः]** भवत् । प्रथमा औ । 'ऋदुदितः' (१।४।७०) नोऽन्तः ।

**[भवन्तः पचन्ति]** भवत् । प्रथमा जस् । 'ऋदुदितः' (१।४।७०) नोऽन्तः ।

**[त्वं पचसि]** युष्मद् । प्रथमा सि । 'त्वमहं सिना प्राक् चाऽकः' (२।१।१२) सि सउं "त्वम्" आदेशः ।

**[युवां पचथः]** युष्मद् । प्रथमा औ । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ । 'मन्तस्य युवाऽऽवौ द्वयोः' (२।१।१०) युवादेशः । 'अमौ मः' (२।१।१६) औ० → म० । 'युष्मदस्मदोः' (२।१।६) द० → आ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[यूयं पचथ]** युष्मद् । प्रथमा जस् । 'यूयं वयं जसा' (२।१।१३) "यूयं" आदेशः ।

**[पचसि]** पच् । वर्त्त० सिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[पचथः]** पच् । वर्त्त० थस् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[पचेथे]** पच् । वर्त्त० आथे । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'आतामाते-आथामाथे आदिः' (४।२।१२१) आ० → इ० । 'अवर्णस्ये०' (१।२।६) ए ।

**[पचध्वे]** पच् । वर्त्त० ध्वे । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[अहं पचामि]** अस्मद् । प्रथमा सि । 'त्वमहं सिना प्राक् चाऽकः' (२।१।१२) सि सउं अहम् ।

**[आवां पचावः]** अस्मद् । प्रथमा औ । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ । 'मन्तस्य युवाऽऽवौ द्वयोः' (२।१।१०) आवादेशः । 'अमौ मः' (२।१।१६) औ० → म० । 'युष्मदस्मदोः' (२।१।६) द० → आ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[वयं पचामः]** अस्मद् । प्रथमा जस् । 'यूयं वयं जसा' (२।१।१३) "वयम्" आदेशः ।

**[पचामि, पचावः, पचामः]** पच् । वर्त्त० मिव्-वस्-मस् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'म-व्यस्याः' (४।२।११३) अ० → आ० ।

**[पचे]** पच् । वर्त्त० ए । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[पचावहे, पचामहे]** पच् । वर्त्त० वहे-महे । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'म-व्यस्याः' (४।२।११३) अ० → आ० ।

**[त्वद्भवति]** युष्मद् 'भू सत्तायाम्' (१) भू । अत्वं त्वं संपद्यते । 'कृभ्वस्तिभ्यां कर्म-कर्तृभ्यां प्रागततत्त्वे च्विः' (७।२।१२६) च्विप्र० । 'अप्रयोगीत्' (१।१।३७) च्विलोपः । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ । 'त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्' (२।१।११) त्व० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । ओदौतोऽवाव्' (१।२।२४) अव् ।

**[मद्भवति]** अस्मद् 'भू सत्तायाम्' (१) भू । अनहमहं संपद्यते । 'कृभ्वस्तिभ्यां०' (७।२।१२६) च्विप्र० । 'अप्रयोगीत्' (१।१।३७) च्विलोपः । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ । 'त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्' (२।१।११) म० । 'लुगस्या०' (२।१।११३) अलोपः । भवति पूर्ववत् ।

**[एहि मन्ये]** 'इंण्क् गतौ' (१०७५) इ, आङ्पूर्व० । पञ्चमी हि । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए । बुधिं (१२६२)- 'मनिंच् ज्ञाने' (१२६३) मन् । वर्त्त० ए । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । 'लुगस्यादेत्यपदे'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(२।१।११३) अलोपः ।

**[रथेन यास्यसि]** 'यांक् प्रापणे' (१०६२) या । भविष्यन्ती स्यसि ।

**[यातस्ते पितेति प्रहासे]** 'यांक् प्रापणे' (१०६२) या । याति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त ।।छ।।

**एक-द्वि-बहुषु ।।३।३।१८।।**

**[एकद्विबहुषु]** एकश्च द्वौ च बहवश्च = ते, तेषु ।।छ।।

**नवाऽऽद्यानि शतृ-क्वसू च परस्मैपदम् ।।३।३।१९।।**

**[नव]** नवन् प्रथमा जस् । 'डति-ष्णः संख्याया लुप्' (१।४।५४) जस्लोपः ।

**[आद्यानि]** आदि । आदौ भवानि = आद्यानि । 'दिगादिदेहांशाद् यः' (६।३।१२४) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[शतृक्वसू]** शता च क्वसुश्च = शतृक्वसू । औ । 'इदुतोऽस्त्रेरीदूत्' (१।४।२१) औकारेण सह उकारस्य ऊ ।

**[च]** च प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[परस्मैपदम्]** पर चतुर्थी ङे । 'सर्वादेः स्मै-स्मातौ' (१।४।७) स्मै । पद । परस्मै पदम् । 'परा-ऽऽत्मभ्यां ङेः' (३।२।१७) अलुप्समासः । परार्थं पदं = परस्मैपदमिति वा ।।छ।।

**पराणि काना-ऽऽनशौ चात्मनेपदम् ।।३।३।२०।।**

**[पराणि]** पर प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः । 'रषृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[कानाऽऽनशौ]** कानश्च आनशश्च = कानाऽऽनशौ ।

**[च]** च प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[आत्मनेपदम्]** आत्मन् चतुर्थी ङे । आत्मार्थं पदं = आत्मनेपदम् । 'परा-ऽऽत्मभ्यां ङेः' (३।२।१७) इत्यनेनाऽलुप्समासः ।।छ।।

**तत् साप्या-ऽनाप्यात् कर्म-भावे कृत्य-क्त-खलर्थाश्च ।।३।३।२१।।**

**[तत्]** तद् प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः ।

**[साप्याऽनाप्यात्]** 'आप्लृंट् व्याप्तौ' (१३०७) आप् । आप्यत इति आप्यम् । 'शकि-तकि-चति-यति-शसि-सहि-यजि-भजि-पवर्गात्' (५।१।२९) यप्र० । सह आप्येन=व्याप्येन वर्त्तते इति साप्यः । 'सहस्य सोऽन्यार्थे' (३।२।१४३) सहस्य सभावः । अविद्यमानं अविवक्षितं वा आप्यं यस्याऽसौ अनाप्यः । 'अन् स्वरे' (३।२।१२९) अन् । साप्यश्च अनाप्यश्च = साप्याऽनाप्यम्, तस्मात् = साप्याऽनाप्यात्, पञ्चमी ङसि ।

**[कर्मभावे]** कर्म च भावश्च = कर्मभावम्, तस्मिन् = कर्मभावे, सप्तमी ङि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[कृत्यक्तखलर्थाः]** खल् अर्थो येषां ते = खलर्थाः । कृत्याश्च क्तश्च खलर्थाश्च = कृत्यक्तखलर्थाः । प्रथमा जस् ।

**[च]** च प्रथमा सि ।

यथा उद्देशस्तथा निर्देशः ।

**[क्रियते कटश्चैत्रेण]** 'डुकृंग् करणे' (८८८) कृ । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'रिः श-क्या-ऽऽशीर्ये' (४।३।११०) ऋ० → रि० ।

**[क्रियमाणः]** 'डुकृंग् करणे' (८८८) कृ । क्रियते । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) आनश्प्र० → आन । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'रिः श-क्या-ऽऽशीर्ये' (४।३।११०) ऋ० → रि० । 'अतो म आने' (४।४।११४) मोऽन्तः ।

**[करिष्यमाणः]** 'डुकृंग् करणे' (८८८) कृ । करिष्यते । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) आनश्प्र० → आन - "स्य" आदिः । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् (?) ('हनृतः स्यस्य' (४।४।४९) इट्) । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अतो म आने' (४।४।११४) मोऽन्तः ।

**[चक्राणः]** 'डुकृंग् करणे' (८८८) कृ । चक्रे । 'तत्र क्वसु-कानौ तद्वत्' (५।२।२) कानप्र० → आन । 'द्विर्धातुः परोक्षा०' (४।१।१) कृ सउं द्विर्वचनु । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'इवर्णादे०' (१।२।२१) र० ।

प्रथमानि चत्वारि कर्मणि ।

**[भूयते भवता]** 'भू सत्तायाम्' (१) भू । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य ।

**[भूयमानं भवता]** भू । भूयते । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) आनश्प्र० → आन । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'अतो म आने' (४।४।११४) मोऽन्तः । सि- अम् ।

अनेन सकर्मकाद्धातोः कर्मणि आत्मनेपदं कानानशौ च स्युः ।

**[क्रियते भवता]** क्रियते पूर्ववत् ।

**[मृदु पच्यते भवता]** मृदु द्वितीया अम्, क्रियाविशेषणात् । 'अनतो लुप्' (१।४।५९) अम्लोपः ।

**[पञ्च वारान् भुज्यते भवता]** पञ्चन् द्वितीया शस् । 'डति-ष्णः संख्याया लुप्' (१।४।५४) शस्लोपः । वार द्वितीया शस् । 'शसोऽता सश्च नः पुंसि' (१।४।४९) दीर्घः - स्० → न्० । 'काला-ऽध्वनोर्व्याप्तौ' (२।२।४२) द्वितीया । 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य ।

द्वितीयानि पञ्च भावे ।

**[कार्यः कर्तव्यः करणीयो देयः कृत्यः कटो भवता]** कृ । क्रियत इति । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) आर् । क्रियत इति । 'तव्या-ऽनीयौ' (५।१।२७) तव्य-अनीयप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'डुदांग्क् दाने' (११३८) दा । दीयते । 'य एच्चातः' (५।१।२८) यप्र० – आ० → ए० ।

**[भवता शयनीयम्]** 'शीङ्क् स्वप्ने' (११०५) शी । शय्यते । 'तव्या-ऽनीयौ' (५।१।२७) अनीयप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[भवता शयितव्यम्]** 'शीङ्क् स्वप्ने' (११०५) शी । शय्यते । 'तव्या-ऽनीयौ' (५।१।२७) तव्यप्र० । 'स्ताद्यशितोऽ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्डिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[भवता शेयम्]** शी । शय्यते । 'य एच्चातः' (५।१।२८) यप्र० । 'नामिनो गुणोऽक्डिति' (४।३।१) गु० ए ।

**[भवता कार्यम्]** 'डुकृंग् करणे' (८८८) कृ । क्रियत इति । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[कर्तव्यम्]** कृ । क्रियते । 'तव्या-ऽनीयौ' (५।१।२७) तव्यप्र० । 'नामिनो गुणोऽक्डिति' (४।३।१) गु० अर् ।

**[करणीयम्]** कृ । क्रियते । 'तव्या-ऽनीयौ' (५।१।२७) अनीयप्र० । 'नामिनो गुणोऽक्डिति' (४।३।१) गु० अर् ।

**[देयं भवता]** दा । दीयते । 'य एच्चातः' (५।१।२८) यप्र० - आ० → ए० ।

**[कृत्यं भवता]** कृ । क्रियत इति । 'कृ-वृषि-मृजि-शंसि-गुहि-दुहि-जपो वा' (५।१।४२) क्यप्प्र० → य । 'ह्रस्वस्य तः पित्कृति' (५।५।११३) तोऽन्तः ।

अष्टसु उदाहरणेषु प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः । अष्टासु उदाहरणेषु भावे कृत्यप्रत्ययाः ।

**[कृतः कटो भवता]** कृ । क्रियते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त, कर्मणि ।

**[शयितं भवता]** शी । शय्यते स्म । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्डिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[कृतं भवता]** कृ । क्रियते स्म । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

त्रिषु उदाहरणेषु द्वयं भावे ।

**[ग्रामं गतं भवता]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । गम्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'यमि-रमि-नमि-गमि-हनि-मनि-वनति-तनादेर्धुटि क्डिति' (४।२।५५) मलोपः ।

**[ओदनं भुक्तं भवता]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भुज्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[सुकरः कटो भवता]** सु 'डुकृंग् करणे' (८८८) कृ । सुखेनाऽनायासेन क्रियते । 'दुःस्वीषतः कृच्छ्रा-ऽकृच्छ्रार्थात् खल्' (५।३।१३९) खल्प्र० → अ । 'नामिनो गुणोऽक्डिति' (४।३।१) गु० अर् ।

**[सुशयं भवता]** सु 'शीङ्क् स्वप्ने' (११०५) शी । सुखेनाऽनायासेन शय्यते । 'दुः-स्वीषतः कृच्छ्रा०' (५।३।१३९) खल्प्र० → अ ।

**[सुकरं भवता]** सुखेनाऽनायासेन क्रियते । 'दुः-स्वीषतः कृच्छ्रा०' (५।३।१३९) खल्प्र० → अ । 'नामिनो गुणोऽक्डिति' (४।३।१) गु० अर् ।

एतानि कर्मणि-भावे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[सुकटंकराणि वीरणानि]** सुकट । कृ । सुखेनाऽनायासेन अकटाः कटाः क्रियन्ते । 'च्व्यर्थे कर्त्राप्याद् भू-कृगः' (५।३।१४०) खल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'खित्यनव्ययाऽरुषो मोऽन्तो ह्रस्वश्च' (३।२।१११) मोऽन्तः । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः । 'रषृवर्णान्नो ण०' (२।३।६४३) न० → ण० । वीरणानि तृणविशेषाणि । 卐 यत उक्तं - "उशीरं वीरणं मूले" ।

एतत् कर्मणि ।

**[ईषदाढ्यं भवं भवता]** ईषत्+ 'ध्यैं चिन्तायाम्' (३०) ध्यै । 'आत् सन्ध्यक्षरस्य' (४।२।१) ध्या, आङ्पूर्व० । आध्यायत इति । 'शिक्यास्याढ्य-मध्य-विन्ध्य-धिष्ण्याघ्न्य-हर्म्य०' (उणा० ३६४) आढ्यनिपातः । 'भू सत्तायाम्' (१) भू । ईषदनायासेन अनाढ्येन आढ्येन भूयते । 'च्व्यर्थे कर्त्राप्याद् भू-कृगः' (५।३।१४०) खल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'खित्यनव्यया०' (३।२।१११) मोऽन्तः । एतद्भावे ।

**[सुज्ञानं तत्त्वं मुनिना]** सु 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । सुखेनाऽनायासेन ज्ञायते । 'शासू-युधि-दृशि-धृषि-मृषा-ऽऽतोऽनः' (५।३।१४१) अनप्र० । एतत् कर्मणि ।

**[सुग्लानं कृपणेन]** सु 'ग्लैं हर्षक्षये' (३१) ग्लै । 'आत् सन्ध्यक्षरस्य' (४।२।१) ग्ला । सुखेन ग्लायते । 'शासू-युधि०' (५।३।१४१) अनप्र० । एतदपि* कर्मणि ।

**[मास आस्यते]** 'आसिक् उपवेशने' (१११९) आस् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य ।

**[क्रोशो गुडधानाभिर्भूयते]** 'भू सत्तायाम्' (१) भू । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य ।

**[गोदोहः सुप्यते]** 'ञिष्वपंक् शये' (१०८८) ष्वप् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्वप् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'स्वपेर्यङ् - ङे च' (४।१।८०) व० → उ० ।

**[नदी सुप्यते]** स्वप् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'स्वपेर्यङ् - ङे च' (४।१।८०) व० → उ० ।

**[मास आसितव्यः]** 'आसिक् उपवेशने' (१११९) आस् । आस्यते । 'तव्या-ऽनीयौ' (५।१।२७) तव्यप्र० । 'स्ताद्यशि-तोऽत्रोणादेरिट्' (४।४।३२) इट् ।

**[मास आसितः]** आस् । आस्यते । क्तप्र० → त ।

**[मासो दुरासः]** दुर् । आस् । दुःखेनाऽनायासेनाऽऽस्यते । 'दुः-स्वीषतः कृच्छ्रा-ऽकृच्छ्रार्थात् खल्' (५।३।१३९) खल्प्र० । एतानि सप्त कर्मणि ।

**[मासमास्यते]** मास द्वितीया अम् ।

**[क्रोशमधीयते]** क्रोश द्वितीया अम् । 'इङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य ।

---

卐 'उशीरं वीरणीमूले' अभिधानचिन्तामणिनाममालायाम् - ११५८

+ 'शिक्यास्याढ्य-मध्य-विन्ध्य०' (उणा० ३६४) आङ्पूर्व० 'ढौकृङ् गतौ' (६२७) धातोः यप्रत्यये आढ्य इति निपातितः । 'पृषोदरादयः' (३।२।१५५) सूत्रे आङ्पूर्व० 'ध्यैं चिन्तायाम्' (३०) धातोः कप्रत्यये आढ्यो निपातितः ।

* श० म० न्या० - भावे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ओदनपाकं स्थीयते]** 'ष्ठां गतिनिवृत्तौ' (५) ष्ठ । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे०' (न्या० सं० वक्ष० (१) / सूत्र (२९) ) स्था । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'ईर्व्यञ्जनेऽयपि' (४।३।९७) आ० → ई० ।

**[कुरून् सुप्यते]** स्वप् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० । 'स्वपेर्यङ्-ङे च' (४।१।८०) व० → उ० ।

**[मासमासितव्यम्]** आस् । आस्यते । 'तव्या-ऽनीयौ' (५।१।२७) तव्यप्र० । 'स्ताद्यशितो०' (४।४।३२) इट् ।

**[मासमासितम्]** आस् । आस्यते । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'स्ताद्यशितो०' (४।४।३२) इट् ।

**[मासं स्वासम्]** सुखेनाऽनायासेनाऽऽस्यते । 'दुः-स्वीषतः कृच्छ्राऽकृच्छ्रार्थात् खल्' (५।३।१३९) खल्प्र० → अ । सि-अम् । सप्त उदाहरणानि भावे ।

**[पाकः, पाकौ, पाकाः]** 'डुपचींष् पाके' (८९२) पच् । पचनम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) च० → क० । सि-औ-जस् ।

**[पाको वर्तते]** 'वृतूङ् वर्तने' (९५५) वृत् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[पाकं करोति]** 'डुकृंग् करणे' (८८८) कृ । वर्त्त० तिव् । 'कृग्-तनादेरुः' (३।४।८३) उप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'उ-श्नोः' (४।३।२) गु० ओ ।

**[उष्ट्रासिका आस्यन्ते]** उष्ट्र 'आसिक् उपवेशने' (१११९) आस् । 卐 उष्ट्रवत् आसितुं पर्यायः । 'पर्यायाऽर्हणोत्पत्तौ च णकः' (५।३।१२०) णकप्र० → अक । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्-क्षिपकादीनाम्' (२।४।१११) इ । जस् ।

**[हतशायिकाः शय्यन्ते]** हत 'शीङ्क् स्वप्ने' (११०५) शी ।+ हतवत् शयितुं पर्यायः । 'पर्यायाऽर्हणोत्पत्तौ च णकः' (५।३।१२०) णकप्र० → अक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । जस् ।।छ।।

## इङितः कर्तरि ।।३।३।२२।।

**[इङितः]** इश्च ङ् च = इङौ, इङावितावनुबन्धौ यस्याऽसौ इङित्, *तस्य ।

**[कर्तरि]** कर्तृ । सप्तमी ङि । 'अर्डौ च' (१।४।३९) अर् ।

**[एधते]** 'एधि वृद्धौ' (७४१) एध् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[स्पर्धते]** 'स्पर्धि सङ्घर्षे' (७४२) स्पर्ध् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

---

卐 श० म० न्या० - आसनं = आसिका । 'भावे' (५।३।१२२) णकप्र० → अक ।

\+ श० म० न्या० - शयनं = शायिका । 'भावे' (५।३।१२२) णकप्र० → अक ।

* श० म० न्या० - इश्च ङ् चेत्यनयोः समाहारः - इङ्, इङ् इत् यस्येत्यर्थे बहुव्रीहिः, ततः पञ्चमी इङितः इति । अत्र यस्येति बहुव्रीहार्थघटिका षष्ठी अवयवावयविभावसम्बन्धे, सा च न घटते, इङोरनुबन्धयोर्धात्वनवयवत्वात्, यो हि यदवयवः स कदाचित् तत्रोपलभ्यते एव, अयं च न तथा लक्ष्ये क्वाप्यदर्शनात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*[एधमानः] एध् । एधते । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) आनश्प्र० → आन । शव् । 'अतो म आने' (४।४।११४) मोऽन्तः ।*

**[स्पर्धमानः]** स्पर्ध् । स्पर्धते । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) आनश्प्र० → आन । शव् । 'अतो म आने' (४।४।११४) मोऽन्तः ।

**[शेते]** 'शीङ्क् स्वप्ने' (११०५) शी । वर्त्त० ते । 'शीङ एः शिति' (४।३।१०४) ए ।

**[शयानः]** शी । शेते । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) आनश्प्र० → आन । (शव् । 'अतो म आने' (४।४।११४) मोऽन्तः ?) । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ह्नुते]** 'ह्नुंङ्क् अपनयने' (११०६) ह्नु । वर्त्त० ते ।

**[ह्नुवानः]** ह्नुते । 'शत्रानशा०' (५।२।२०) आनश्प्र० → आन । 'धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये' (२।१।५०) उव् (?) (संयोगात्' (२।१।५२) उव् ) ।

**[महीयते]** 'महीङ् वृद्धौ पूजायाञ्च' (१९९२) मही सूत्रोऽयं धातुः । 'धातोः कण्ड्वादेर्यक्' (३।४।८) यक्प्र० → य । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[महीयमानः]** मही । महीयते । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) आनश्प्र० → आन । 'अतो म आने' (४।४।११४) मोऽन्तः ।

**[कामयते]** 'कमूङ् कान्तौ' (७८९) कम् । 'कमेर्णिङ्' (३।४।२) णिङ्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[कामयमानः]** कम् । कामयते । 'शत्रानशा०' (५।२।२०) आनश्प्र० → आन । शव् । 'अतो म आने' (४।४।११४) मोऽन्तः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[श्येनायते]** श्येन । श्येन इवाऽऽचरति । 'क्यङ्' (३।४।२६) क्यङ्प्र० → य । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[श्येनायमानः]** श्येन । श्येनायते । 'शत्रानशावेष्यति०' (५।२।२०) आनश्प्र० → आन । 'अतो म आने' (४।४।११४) मोऽन्तः ।

**[पापच्यते]** 'डुपचींष् पाके' (८९२) पच् । भृशं पुनः पुनर्वा पचति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) पच् सउं द्विर्वचनम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[पापच्यमानः]** पच् । पापच्यते । 'शत्रानशा०' (५।२।२०) आनश्प्र० → आन । 'अतो म आने' (४।४।११४) मोऽन्तः ।

**[उत्पुच्छयते]** उत् - पुच्छ । उत्पुच्छं करोति । 'पुच्छादुत्-परि-व्यसने' (३।४।३९) णिङ्प्र० → इ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[उत्पुच्छयमानः]** उत्पुच्छयते । 'शत्रानशा०' (५।२।२०) आनश्प्र० → आन । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'अतो म आने' (४।४।११४) मोऽन्तः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।।छ।।

## क्रियाव्यतिहारेऽगति-हिंसा-शब्दार्थ-हसो हृ-वहश्चाऽनन्योऽन्यार्थे ।।३।३।२३।।

**[क्रियाव्यतिहारे]** क्रियाया व्यतिहारः = क्रियाव्यतिहारस्तस्मिन् ।

**[अगतिहिंसाशब्दार्थहसः]** गतिश्च हिंसा च शब्दश्च = गतिहिंसाशब्दाः, गतिहिंसाशब्दा अर्था येषां ते = गतिहिंसाशब्दार्थाः गतिहिंसाशब्दार्थाश्च हस् च = गतिहिंसाशब्दार्थहस्, पश्चान्नञा समासः, ततः पञ्चमी ।

**[हृवहः]** हृश्च वह् च = हृवह्, तस्मात् ।

**[अनन्योऽन्यार्थे]** अन्योऽन्यस्य अर्थोऽन्योऽन्यार्थः, न अन्योऽन्यार्थोऽनन्योऽन्यार्थस्तस्मिन् ।

हरणशब्देन करणमुच्यते ।

**[व्यतिलुनते]** वि-अति 'लूग्श् छेदने' (१५१९) लू । वर्त्त० अन्ते । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'श्नश्चाऽऽतः' (४।२।९६) आलोपः । 'अनतोऽन्तोऽदात्मने' (४।२।११४) इति नलोपः । 'प्वादेर्ह्रस्वः' (४।२।१०५) ह्रस्वः ।

**[व्यतिपुनते]** वि-अति 'पूग्श् पवने' (१५१८) पू । वर्त्त० अन्ते । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'श्नश्चाऽऽतः' (४।२।९६) आलोपः । 'अनतोऽन्तोऽदात्मने' (४।२।११४) नलोपः । 'प्वादेर्ह्रस्वः' (४।२।१०५) ह्रस्वः ।

**[व्यतिहरन्ते भारम्]** वि-अति 'हृंग् हरणे' (८८५) हृ । वर्त्त० अन्ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

卐 **[व्यतिवहन्ते भारम्]** वि-अति 'वहीं प्रापणे' (९९६) वह् । वर्त्त० अन्ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । लुगस्या०' (२।१।११३) अलोपः ।

**[संप्रहरन्ते राजानः]** सम्-प्र 'हृंग् हरणे' (८८५) हृ । वर्त्त० अन्ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० अर् ।

**[संविवहन्ते वर्गाः]** सम्-वि 'वहीं प्रापणे' (९९६) वह् । वर्त्त० अन्ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[लुनन्ति]** 'लूग्श् छेदने' (१५१९) लू । वर्त्त० अन्ति । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'श्नश्चाऽऽतः' (४।२।९६) आलोपः । 'प्वादेर्ह्रस्वः' (४।२।१०५) ह्रस्वः ।

**[पुनन्ति]** 'पूग्श् पवने' (१५१८) पू । वर्त्त० अन्ति । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'श्नश्चाऽऽतः' (४।२।९६) आलोपः । 'प्वादेर्ह्रस्वः' (४।२।१०५) ह्रस्वः ।

**[व्यतिगच्छन्ति]** वि-अति 'गम्लृं गतौ' (३९६) गम् । वर्त्त० अन्ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'गमिषद्यमश्छः' (४।२।१०६) म० → छ० । 'स्वरेभ्यः' (१।३।३०) द्वित्वम् । 'अघोषे प्रथमोऽशिटः' (१।३।५०) छ० → च० । लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

P. 卐 इदमुदाहरणं बृहद्वृत्तौ नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[व्यतिसर्पन्ति]** वि-अति 'सृप्लृं गतौ' (३४१) सृप् । वर्त्त० अन्ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[व्यतिहिंसन्ति]** वि-अति । 'हिसु हिंसायाम्' (१४९४) हिस् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । वर्त्त० अन्ति । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) इति नागमः (श्नप्र० → न) । 'शिड्-हेऽनुस्वारः' (१।३।४०) नस्य अनुस्वारः । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) नस्य अलोपः पूर्वं ततोऽनुस्वारः ।

**[व्यतिघ्नन्ति]** वि-अति 'हनंक् हिंसा-गत्योः' (११००) हन् । वर्त्त० अन्ति । 'गम-हन-जन-खन-घसः स्वरेऽनङि क्ङिति लुक्' (४।२।४४) अलोपः । 'हनो ह्नो घ्नः' (२।१।११२) घ्नादेशः ।

**[व्यतिजल्पन्ति]** वि-अति रप(३३५)-लप (३३६) - 'जल्प व्यक्ते वचने' (३३७) जल्प् । वर्त्त० अन्ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[व्यतिपठन्ति]** वि-अति 'पठ व्यक्तायां वाचि' (२१३) पठ् । वर्त्त० अन्ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्या०' (२।१।११३) अलोपः ।

**[व्यतिहसन्ति]** वि-अति 'हसे हसने' (५४५) हस् । वर्त्त० अन्ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[अन्योऽन्यस्य व्यतिलुनन्ति]** अन्योऽन्य षष्ठी ङस् । वि-अति 'लूग्श् छेदने' (१५१९) लू । वर्त्त० अन्ति । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'श्नश्चाऽऽतः' (४।२।९६) आलोपः । 'प्वादेर्ह्रस्वः' (४।२।१०५) ह्रस्वः ।

**[इतरेतरस्य व्यतिलुनन्ति]** इतरेतर षष्ठी ङस् । 'व्यतिलुनन्ति' पूर्ववत् ।

**[परस्परस्य व्यतिलुनन्ति]** परस्पर षष्ठी ङस् । 'व्यतिलुनन्ति' पूर्ववत् ।

**[व्यतिगम्यन्ते ग्रामाः]** वि-अति अम(३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । वर्त्त० अन्ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'लुगस्या०' (२।१।११३) अलोपः ।

**[व्यतिहन्यन्ते दस्यवः]** वि-अति 'हनंक् हिंसा-गत्योः' (११००) हन् । वर्त्त० अन्ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'लुगस्या०' (२।१।११३) अलोपः । दस्यु जस् । 'जस्येदोत्' (१।४।२२) ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । चौराः ॥छ॥

## निविशः ॥३।३।२४॥

**[निविशः]** नि-विश् । नेर्विश् = निविश्, तस्मात् = निविशः ।

**[निविशते]** नि 'विशंत् प्रवेशने' (१४१५) विश् । वर्त्त० ते । 'तुदादेः शः' (३।४।८१) शप्र० → अ ।

**[न्यविशत]** नि-विश् । ह्यस्तनी त । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'अड् धातोरादि०' (४।४।२९) अट् ॥छ॥

## उपसर्गादस्योहो वा ॥३।३।२५॥

**[उपसर्गात्]** उप 'सृजीं(जं)त् विसर्गे' (१३४९) सृज् । उपसृज्यते धातुना सह संबध्यते योऽसौ उपसर्गः । 'लिहादिभ्यः' (५।१।५०) अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'न्यङ्कूद्ग-मेघाऽऽदयः' (४।१।११२) गत्वम्, तस्मात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अस्योहः]** अस्यश्च ऊह् च = अस्योह्, तस्मात् = अस्योहः ।

**[वा]** वा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[विपर्यस्यति, विपर्यस्यते]** 'असूच् क्षेपणे' (१२२१) अस्, वि-परिपूर्व० । वर्त्त० तिव्-ते । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य ।

**[समूहति, समूहते]** 卐 'ऊहि वितर्के' (८७०) ऊह्, संपूर्व० । वर्त्त० तिव्-ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[''सन्ततं तिमिरमिन्दुरुदासे''-माघे]** उत् 'असूच् क्षेपणे' (१२२१) अस् । परोक्षा ए । द्वित्वम् । अस्याऽऽदेराः परोक्षायाम्' (४।१।६८) दीर्घः आ ।

**[''यशः समूहन्निव दिग्विकीर्णम्''-किराते]** समूहत इति । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'पदस्य' (२।१।८९) तलोपः ।

अस्यतेरप्राप्ते ऊहतेश्च नित्यं प्राप्ते उभयत्र विभाषेयम् ।

**[निरस्यति शत्रून्]** निर् 'असूच् क्षेपणे' (१२२१) अस् । वर्त्त० तिव् । 'दिवादेः श्यः' (३।४।७२) श्यप्र०→य ।

**[समूहते पदार्थान्]** सम् 'ऊहि वितर्के' (८७०) ऊह् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।।छ।।

## उत्-स्वराद् युजेरयज्ञतत्पात्रे ।।३।३।२६।।

**[उत्स्वरात्]** उच्च स्वरश्च = उत्स्वरम्, तस्मात् ।

**[युजेः]** युजि पञ्चमी ङसि ।

**[अयज्ञतत्पात्रे]**+ तस्य पात्रम् = तत्पात्रम्, यज्ञे तत्पात्रम् = यज्ञतत्पात्रम्, न यज्ञतत्पात्रम् = अयज्ञतत्पात्रम्, तस्मिन् = अयज्ञतत्पात्रे ।

**[उद्युङ्क्ते, उपयुङ्क्ते]** उत्-उप 'युजृंपी योगे' (१४७६) युज् । वर्त्त० ते । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) श्नप्र० → न । 'श्नाऽस्त्योर्लुक्' (४।२।९०) अलोपः । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) न० → ङ० ।

**[संयुनक्ति, निर्युनक्ति]** सम्-निर् 'युजृंपी योगे' (१४७६) युज् । वर्त्त० तिव् → ति । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) श्नप्र० → न । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० ।

**[द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति]** द्वि । द्वे(२) द्वितीयाद्विवचनसहितस्य द्विशब्दस्य *'रहस्य-मर्यादोक्ति-व्युत्क्रान्ति-यज्ञपात्रप्रयोगे' (७।४।८३) द्वन्द्वं निपातः । यज्ञस्य पात्राणि = यज्ञपात्राणि । द्वितीया शस् । 'युजृंपी योगे' (१४७६) युज्, प्रपूर्व० । शेषं पूर्ववत् ।।छ।।

---

卐 धातुपारायण-धातुरत्नाकर-क्रियारत्नसमुच्चयेषु - 'ऊहि तर्के' । धातुपारायणे टिप्पनके 'ऊहि वितर्के' वितर्कः सम्भावनमिति पाणिनीयाः ।

P. + तेषाम् ।

P. * 'द्वन्द्वं वा' (७।४।८२) द्वन्द्वनिपातः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## परि-व्यवात् क्रियः ॥३।३।२७॥

**[परिव्यवात्]** परिश्च विश्च अवश्च = परिव्यवम्, तस्मात् = परिव्यवात् ।

**[क्रियः]** क्री पञ्चमी ङसि । 'संयोगात्' (२।१।५२) इय् ।

**[परिक्रीणीते, विक्रीणीते, अवक्रीणीते]** परि-वि-अवपूर्व० 'डुक्रींग्श् द्रव्य-विनिमये' (१५०८) क्री । वर्त्त० ते । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'एषामी व्यञ्जनेऽदः' (४।२।९७) आ० → ई० ।

अफलवति आत्मनेपदं स्याद्वादाश्रयणात् कथञ्चिद्भेदं कथञ्चिदभेदः । अनुकार्यानुकरणयोर्भेदात् स्यादयो भवन्ति अभेदादिया-देशश्च धातुत्वादिति न विरुध्यते ।

**[उपरि क्रीणाति]** ऊर्ध्व । ऊर्ध्वे देशे वसति । 'ऊर्ध्वाद् रि-रिष्टातौ उपश्चास्य' (७।२।११४) रिप्र० - ऊर्ध्वस्य उप० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । क्रीणातीत्यत्र 'रषृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[वनं बहुवि क्रीणाति]** बहु-वि । बहवो वयो यत्र तत् । द्वितीया अम् । 'अनतो लुप्' (१।४।५९) अम्लोपः ।

**[अपचाव]** 'डुपचींष् पाके' (८९२) पच् । ह्यस्तनी व । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'म-व्यस्याः' (४।२।११३) दीर्घः-आ । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[क्रीणीवः]** 'डुक्रींग्श् द्रव्यविनिमये' (१५०८) क्री । वर्त्त० वस् । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'एषामी व्यञ्जनेऽदः' (४।२।९७) ई । 'रषृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[मुनी इत्याह]** मुनि औ । 'इदुतोऽस्त्रेरीदूत्' (१।४।२१) औ सउं ई । इत्याह प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[द्विष्पचतीत्याह]** द्वि । द्वौ वारौ = द्विः । 'द्वि-त्रि-चतुरः सुच्' (७।२।११०) सुच्प्र० → स० । अग्रे पचति । 'सो रुः' (२।१।७२) स० → र० । 'सुचो वा' (२।३।१०) र० → ष० ॥छ॥

## परा-वेर्जेः ॥३।३।२८॥

**[परावेः]** परा च विश्च = पराविः, तस्मात् ।

**[जेः]** जि पञ्चमी ङसि । 'ङित्यदिति' (१।४।२३) ए । 'एदोद्भ्यां०' (१।४।३५) र० ।

**[पराजयते, विजयते]** परा-वि 卐 'जिं जये (अभिभवे)' (८) जि । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[सेना परा जयति]** परा = प्रकृष्टा, प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । जि । वर्त्त० ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[बहुवि जयति वनम्]** बहवो वयः = पक्षिणो यत्र तद्बहुवि । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः ॥छ॥

---

卐 उक्तं च धातुपारायणे - केचित्तु 'जिं जये' इत्यकर्मकत्वार्थं पृथक् पठन्ति जयः सर्वोत्कर्षे इति च व्याचक्षते, तदयुक्तम्, उत्कर्षस्याभिभवाविशेषत्वात् सकर्मकत्वाऽकर्मकत्वयोश्च विवक्षानिबन्धनत्वात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

### समः क्ष्णोः ॥३।३।२९॥

**[समः]** सम् पञ्चमी ङसि ।

**[क्ष्णोः]** क्ष्णु पञ्चमी ङसि । 'ङित्यदिति' (१।४।२३) ओ । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[संक्ष्णुते शस्त्रम्]** सम् 'क्ष्णुक् तेजने' (१०८२) क्ष्णु । वर्त्त० ते । 'शसू हिंसायाम्' (५४९) शस् । शस्यतेऽनेनेति । 'नी-दाव्-शसू-यु-युज-स्तु-तुद-सि-सिच-मिह-पत-पा-नहस्त्रट्' (५।२।८८) त्रट्प्र० → त्र । अम् ।

**[क्ष्णौति]** क्ष्णु । वर्त्त० तिव् । 'उत औविति व्यञ्जनेऽद्वेः' (४।३।५९) औ ।

**[आयसं क्ष्णौति]** अयस इदम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः-आ । अम् ॥छ॥

### अपस्किरः ॥३।३।३०॥

**[अपस्किरः]** 卐 अपस्किरः अखण्डं पञ्चम्यन्तम् ।

**[अपस्किरते वृषभो हृष्टः]** अप 'कृत् विक्षेपे' (१३३४) कृ । 'अपाच्चतुष्पात्-पक्षि-शुनि-हृष्टा-ऽन्ना-ऽऽश्रयाऽर्थे' (४।४।९५) इत्यादिना स्सट्प्र० → स० । वर्त्त० ते । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'ऋतां क्ङितीर्' (४।४।११६) इर् । तुषं (१२१३) - 'हृषच् तुष्टौ' (१२१४) हृष् । हर्षणं = हृष्टिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । हृष्टिरस्याऽस्तीति । 'अभ्रादिभ्यः' (७।२।४६) अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । यद्वा 'हृषू अलीके' (५३५) हृष् । हर्षति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'ऊदितो वा' (४।४।४२) इत्यस्य विकल्पकत्वात् क्ते सति 'वेटोऽपतः' (४।४।६२) इत्यनेन नित्यमिट् (न) भवति ।

**[अपस्किरते कुक्कुटो भक्ष्यार्थी]** भक्ष्य 'अर्थणि उपयाचने' (१९३१) अर्थ । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । भक्ष्यमर्थयतीत्येवंशीलः । 'अजातेः शीले' (५।१।१५४) णिन्प्र० → इन् । 'णेरनिटि' (४।३।८३) णिच्लोपः । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[अपस्किरते श्वा आश्रयार्थी]** आश्रयमर्थयतीत्येवंशीलः । 'अजातेः शीले' (५।१।१५४) णिन्प्र० → इन् । 'णेरनिटि' (४।३।८३) णिच्लोपः । प्रथमा सि । शेषं पूर्ववत् ।

**[उपस्किरति]** उप 'कृत् विक्षेपे' (१३३४) कृ । 'उपात् किरो लवने' (४।४।९३) स्सट्प्र० → स० । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'ऋतां क्ङितीर्' (४।४।११६) इर् ॥छ॥

### उदश्चरः साप्यात् ॥३।३।३१॥

**[उदः]** उत् पञ्चमी ङसि ।

**[चरः]** चर् पञ्चमी ङसि ।

**[साप्यात्]** सह आप्येन वर्त्तत इति साप्यम् । 'सहस्य सोऽन्यार्थे' (३।२।१४३) सहस्य सभावः, तस्मात् ।

P. 卐 अपपूर्वः स्किर् = अपस्किर्, तस्मात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[गुरुवचनमुच्चरते]** उत् 'चर भक्षणे च' (४१०) चर् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव्प्र० → अ । गुरुवचन द्वितीया अम् ।

**[मार्गमुच्चरते]** उत् 'चर भक्षणे च' (४१०) चर् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव्प्र० → अ । मार्ग द्वितीया अम् । व्युत्क्रम्य गच्छतीत्यर्थः ।

**[ग्रासमुच्चरते]** ग्रास द्वितीया अम् ।

**[सक्तूनुच्चरते]** सक्तु द्वितीया शस् । भक्षयतीत्यर्थः ।

**[धूम उच्चरति]** धूम द्वितीया अम् । 'चर भक्षणे च' (४१०) चर् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[शब्द उच्चरति]** शब्द । उत् 'चर भक्षणे च' (४१०) चर् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । ऊर्ध्वं गच्छतीत्यर्थः ।।छ।।

## समस्तृतीयया ।।३।३।३२।।

**[समः]** सम् पञ्चमी ङसि ।

**[तृतीयया]** तृतीया तृतीया टा । 'टौस्येत्' (१।४।१९) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[अश्वेन संचरते]** अश्व तृतीया टा । सम् 'चर भक्षणे च' (४१०) चर् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**["उभौ लोकौ संचरसि, इमं चामुं च देवल !"]** उभ द्वितीया औ । लोक द्वितीया औ ।

**[किं त्वं करिष्यसि रथ्यया, संचरति चैत्रोऽरण्ये"]** अत्र तृतीयान्तेन सह संयोगाभावात् न स्यात् ।।छ।।

## क्रीडोऽकूजने ।।३।३।३३।।

**[क्रीडः]** क्रीड् पञ्चमी ङसि ।

**[अकूजने]** 卐 'कूजण् संशब्दने' ( ) कूज् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । कूज्यते । 'अनट्' (५।३।१२४) अनट्प्र० → अन । न कूजनं = अकूजनम्, तस्मिन् ।

**[संक्रीडते]** सम् 'क्रीडृ विहारे' (२४३) क्रीड् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[संक्रीडमाणः]** 'क्रीडृ विहारे' (२४३) क्रीड्, संपूर्व० । संक्रीडते । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) आनश्प्र० → आन । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'अतो म आने' (४।४।११४) मोऽन्तः । रमत इत्यर्थः ।

**[संक्रीडन्ति शकटानि]** सम्-क्रीड् । वर्त्त० अन्ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । शकटानि । अव्यक्तं शब्दं कुर्वन्तीत्यर्थः ।।छ।।

---

卐 श० म० न्या० - अव्यक्तशब्दार्थः कूजधातुर्भ्वादौ पठितस्ततो भावेऽने कूजनशब्दो व्युत्पन्नोऽव्यक्तशब्दार्थ एव भवति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

### अन्वाङ्-परेः ॥३।३।३४॥

**[अन्वाङ्परेः]** अनुश्च आङ् च परिश्च = अन्वाङ्परि, तस्मात् ।

**[अनुक्रीडते]** अनु 'क्रीड़ विहारे' (२४३) क्रीड् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[अनुक्रीडमाणः]** अनुक्रीडते । 'शत्रानशा०' (५।२।२०) आनश्प्र० → आन । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'अतो म आने' (४।४।११४) मोऽन्तः ।

**[आक्रीडते, परिक्रीडते]** आङ्-परि, क्रीड् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[माणवकमनुक्रीडति]** माणवक द्वितीया अम् । 'हेतु-सहार्थेऽनुना' (२।२।३८) इति द्वितीया । क्रीड् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । माणवकेन सह क्रीडतीत्यर्थः ।

**[उपरि क्रीडति]** ऊर्ध्व । ऊर्ध्वे देशे वसति । 'ऊर्ध्वाद् रि-रिष्टातौ उपश्चास्य' (७।२।११४) रिप्र० - ऊर्ध्वस्य च उप० । प्र० सि । 'अव्ययस्य' (३।२।७) सिलोपः ॥छ॥

### शप उपलम्भने ॥३।३।३५॥

**[शपः]** शप् पञ्चमी ङसि ।

**[उपलम्भने]**卐 उप 'डुलभिंष् प्राप्तौ' (७८६) लभ् । उपलभ्यते । 'अनट्' (५।३।१२४) अनट्प्र० → अन, तस्मिन् ।

**[मैत्राय शपते]** मैत्र चतुर्थी ङे । 'श्लाघ-ह्नु-स्था-शपा प्रयोज्ये' (२।२।६०) इति चतुर्थी । 'शपीं आक्रोशे' (९१६) शप् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । मैत्रं कञ्चिदर्थं बोधयतीत्यर्थः ।

**[मैत्राय शपते]** मैत्राय शपते इति वाचामात्रादिशरीरस्पर्शनेन मैत्रं स्वाभिप्रायं बोधयतीत्यर्थः ।

**[मैत्राय शपते]** उपलब्धो ज्ञाने सति मैत्राय शपते, प्रोषिते मैत्रे तस्य भावेऽभावे चोपलब्धे सति तदनुरुपं किञ्चिदनुतिष्ठतीत्यर्थः ।

**[मैत्रं शपति]** आक्रोशतीत्यर्थः ॥छ॥

### आशिषि नाथः ॥३।३।३६॥

**[आशिषि]** आशिष्(स्) सप्तमी ङि ।

**[नाथः]** नाथ् पञ्चमी ङसि ।

**[सर्पिषो नाथते]** सर्पिस् षष्ठी ङस् । 'नाथः' (२।२।१०) इति सूत्रेण वा कर्म । 'नाथृङ् उपतापैश्वर्याशीःषु च' (७१६) नाथ् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । सर्पिर्मे भूयादित्याशास्ते इत्यर्थः ।

**[मधुनो नाथते]** मधु षष्ठी ङस् । 'अनाम्स्वरे नोऽन्तः' (१।४।६४) नोऽन्तः । नाथते । मधु मे भूयादित्याशास्ते इत्यर्थः ।

---

卐 श० म० न्या० - उपपूर्वकाल्लभतेर्ण्यन्ताद् भावेऽनटि उपलम्भनशब्दसिद्धिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## भुनजोऽत्राणे ।।३।३।३७।।

**[भुनजः]** भुनज् पञ्चमी ङसि ।

**[अत्राणे]** न त्राणं = अत्राणम् । 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् ।

**[ओदनं भुङ्क्ते]** ओदन द्वितीया अम् । 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । वर्त्त० ते । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) श्नप्र० → न । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अलोपः । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) न० → ङ० ।

**[महीं भुनक्ति]** पृथ्वीं भुनक्ति । पालयतीत्यर्थः ।

**["अम्बरीषश्च नाभागो, बुभुजाते चिरं महीम्"]** भुज् । परोक्षा आते । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) भुज् सउं द्विर्वचनम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भु० → बु० । पालनेन महीमुपकृतवन्तौ मह्याश्रयं फलं स्वीकृतवन्ताविति वेत्यर्थः ।

**[ओष्ठौ निर्भुजति]** ओष्ठ द्वितीया औ । निर् 'भुजोंत् कौटिल्ये' (१३५१) भुज् । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) शप्र० → अ । कुटिलयतीत्यर्थः ।।छ।।

## ह्रगो गतताच्छील्ये ।।३।३।३८।।

**[ह्रगः]** ह्रग् पञ्चमी ङसि ।

**[गतताच्छील्ये]** 'गम्लृं गतौ' (३९६) गम् । गमनं = गतम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'यमि-रमि-नमि-गमि०' (४।२।५५) मलोपः । तत् शीलमस्य = तच्छीलः, तच्छीलस्य भावः कर्म वा = ताच्छील्यम् । 'पति-राजान्तगुणाङ्ग-राजादिभ्यः कर्मणि च' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । गतं च तत् ताच्छील्यं च = गतताच्छील्यम्, तस्मिन् ।

उत्पत्तेः प्रभृत्याविनाशात् तत्स्वभावत(ता) इति ताच्छील्यलक्षणं(२) । गतं प्रकारः सादृश्यमनुकरणमित्येकोऽर्थः (१) ।

**[पैतृकमश्वा अनुहरन्ते]** पितृ । पितुरागतम् । 'ऋत इकण्' (६।३।१५२) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । 'ऋवर्णोवर्ण-दोसिसुसशश्वदकस्मात्त इकस्येतो लुक्' (७।४।७१) इत्यादिना इलोपः । पैतृक द्वितीया अम् । अश्व प्रथमा जस् । 'हृंग् हरणे' (८८५) हृ, अनुपूर्व० । वर्त्त० अन्ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० अर् ।

**[मातृकं गावोऽनुहरन्ते]** मातृ । मातुरागतम् । 'ऋत इकण्' (६।३।१५२) इकण्प्र० → इक । 'ऋवर्णोवर्ण०' (७।४।७१) इलोपः ।

पितुरागतं मातुरागतं गुणविषयं क्रियाविषयं वा सादृश्यमविकलं शीलयन्तीत्यर्थः ।

**[पैतृकमश्वा अनुहरन्ते]** पैतृकमश्वा अनुहरते(न्ते) । पितुरागमनमविच्छेदेन शीलयतीत्यर्थः ।

**[पैतृकमश्वा अनुहरन्ते]** पैतृकमश्वा अनुहरन्ति(न्ते) । तद्वद् गच्छन्ति, तद्वच्छीलन्ति वेत्यर्थः ।।छ।।

## पूजा-ऽऽचार्यक-भृत्युत्क्षेप-ज्ञान-विगणन-व्यये नियः ।।३।३।३९।।

**[पूजाऽऽचार्यकभृत्युत्क्षेपज्ञानविगणनव्यये]** आचार्यस्य भावः कर्म वा । 'योपान्त्याद् गुरूपोत्तमादसुप्रख्यादकञ्' (७।१।७२) अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । पूजा च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आचार्यकं च भृतिश्च उत्क्षेपश्च ज्ञानं च विगणनं च व्ययश्च = तत्, तस्मिन् ।

**[नियः]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । पञ्चमी ङसि । 'धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये' (२।१।५०) इय् ।

**[नयते विद्वान् स्याद्वादे]** नी । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । विद्वान् स्याद्वादे । नयते = प्रमाणव्यापारवित् स्याद्वादे जीवादीन् पदार्थान् युक्तिभिः स्थिरीकृत्य शिष्यबुद्धिं प्रापयतीत्यर्थः, ते युक्तिभिः स्थिरीकृताः पूजिता भवन्ति ।

**[माणवकमुपनयते]** मनु । मनोरपत्यं = माणवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'माणवः कुत्सायाम्' (६।१।९५) णत्वम् । माणव एव = माणवकः । 'यावादिभ्यः कः' (७।३।१५) कप्र० । माणवकमुपनयते = स्वयमाचार्यो भवन् माणवकमध्ययनायाऽऽत्मसमीपं प्रापयतीत्यर्थः ।

**[कर्मकरानुपनयते]** भृतिः-वेतनम् । कर्मन् 'डुकुंग् करणे' (८८८) कृ । कर्म कुर्वन्तीति । 'भृतौ कर्मणः' (५।१।१०४) टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । कर्मकर द्वितीया शस् । उपनयते = वेतनेन मूल्येनाऽऽत्मसमीपं प्रापयतीत्यर्थः ।

**[शिशुमुदानयते]** उत्क्षेपः = ऊर्ध्वं नयनम् । शिशु द्वितीया अम् । उत्-आङ्पूर्व० नी । उत्क्षिपतीत्यर्थः ।

**[नयते तत्त्वार्थे]** ज्ञानं = प्रमेयनिश्चयः । तत्त्वभूतोऽर्थो यस्य सः = तत्त्वार्थस्तस्मिन्, नयते तत्त्वार्थे । तत्र प्रमेयं निश्चिनोतीत्यर्थः ।

**[मद्राः कारं विनयन्ते]** विगणनम् = ऋणादेः शोधनम् । मद्र प्रथमा जस् । कार द्वितीया अम् । विनयते(न्ते) = राजग्राह्यं भागं दानेन शोधयन्तीत्यर्थः ।

**[शतं विनयते]** व्ययो धर्मादिषु विनियोगः । शत द्वितीया अम् । विनयते ।

**[सहस्रं विनयते]** सहस्र द्वितीया अम् । विनयते = धर्माद्यर्थं तीर्थादिषु विनियुङ्क्त इत्यर्थः ।।छ।।

**कर्तृस्थामूर्त्ताऽऽप्यात्** ।।३।३।४०।।

**[कर्तृस्थामूर्ताप्यात्]** कर्तरि तिष्ठतीति कर्तृस्थम् । 'स्था-पा-स्ना-त्रः कः' (५।१।१४२) कप्र० । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलोपः । न मूर्त्तं = अमूर्त्तम् । कर्तृस्थं अमूर्त्तं आप्यं = कर्म यस्य सः = कर्तृस्थामूर्त्ताप्यः, तस्मात् ।

**[श्रमं विनयते]** श्रम द्वितीया अम् । वि 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । एदैतोऽयाय्' (१।२।२३) अय् ।

**[क्रोधं विनयते]** क्रोध द्वितीया अम् । विनयते पूर्ववत्, शमयतीत्यर्थः ।

> "शिव**मौपयिकं** गरीयसीं, फलनिष्पत्तिमदूषितायतिम् ।
> **विगणय्य** नयन्ति पौरुषं, विहितक्रोधरया जिगीषवः" ।।१।। [किराते]

**[औपयिकम्]** उपाय । उपाये भवम् । 'उपायाद् ध्रस्वश्च' (७।२।१७०) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । द्वितीया अम् ।

**[विगणय्य]** विगणय्य = विचिन्त्येत्यर्थः ।।छ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## शदेः शिति ।।३।३।४१।।

**[शदेः]** शदि पञ्चमी ङसि ।

**[शिति]** श् इदनुबन्धो यस्य सः = शित्, तस्मिन् = शिति ।

**[शीयते]** 'शद्लृं शातने' (९६७) शद् । वर्त्त० ते । 'कर्त्तर्यनद्‌भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा-स्था-म्ना-दाम्-दृश्यर्त्ति०' (४।२।१०८) शद्० → शीयादेशः ।

**[शत्स्यति]** शद् । भविष्यन्ती स्यति । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० ।।छ।।

## म्रियतेरद्यतन्याशिषि च ।।३।३।४२।।

**[म्रियतेः]** म्रियति पञ्चमी ङसि । 'ङित्यदिति' (१।४।२३) ए । 'एदोद्‌भ्यां ङसि-ङसो रः' (१।४।३५) र०, यतः म्रियते इति प्रकृतिः ।

**[अद्यतन्याशिषि]** अद्यतनी च आशीश्च = अद्यतन्याशीः, तस्याम् = अद्यतन्याशिषि ।

**[अमृत]** 'मृंत् प्राणत्यागे' (१३३३) मृ । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'ऋवर्णात्' (४।३।३६) सिच्‌किद्वत् । 'धुड्-ह्रस्वाल्लुगनिटस्त-थोः' (४।३।७०) सिच्‌लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[मृषीष्ट]** मृ । आशीः सीष्ट । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[म्रियते]** मृ । वर्त्त० ते । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'रिः श-क्या-ऽऽशीर्ये' (४।३।११०) ऋकारस्य रि० । 'संयोगात्' (२।१।५२) इय् ।

**[म्रियेत]** मृ । सप्तमी ईत । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'रिः श-क्या-ऽऽशीर्ये' (४।३।११०) ऋकारस्य रि० । 'संयोगात्' (२।१।५२) इय् । 'अवर्णस्ये०' (१।२।६) ए ।

**[म्रियताम्]** मृ । पञ्चमी ताम् । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'रिः श-क्या-ऽऽशीर्ये' (४।३।११०) ऋकारस्य रि० । 'संयोगात्' (२।१।५२) इय् ।

**[अम्रियत]** मृ । ह्यस्तनी त । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'रिः श-क्या-ऽऽशीर्ये' (४।३।११०) ऋकारस्य रि० । 'संयोगात्' (२।१।५२) इय् । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[ममार]** मृ । परोक्षा णव् → अ । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "मृ"द्वित्वम् । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'नामिनोऽकलि-हलेः' (४।३।५१) आर् ।

**[मर्तासि]** मृ । श्वस्तनी तासि । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[मरिष्यति]** मृ । भविष्यन्ती स्यति । 'हनृतः स्यस्य' (४।४।४९) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[अमरिष्यत्]** मृ । क्रियातिपत्तिः स्यत् । 'हनृतः स्यस्य' (४।४।४९) इट् → इ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[मर्मर्त्ति]** मृ । भृशं पुनः पुनर्वा म्रियते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

''मृ''द्विर्वचनम् । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । 'रि-रौ च लुपि' (४।१।५६) र० । वर्त्त० तिव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'र्हादर्ह-स्वरस्याऽनु नवा' (१।३।३१) द्वित्वम् ।।छ।।

## क्यङ्षो नवा ।।३।३।४३।।

**[क्यङ्षः]** क्यङ्ष् पञ्चमी ङसि ।

**[नवा]** नवा प्रथमा सि ।

**[पटपटायति, पटपटायते]** पटत् । पटत् भवति । 'अव्यक्तानुकरणा०' (७।२।१४५) डाच्प्र० → आ, तथा पटत् सउं द्विर्वचनम् । 'डाच्यादौ' (७।२।१४९) तलोपः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लोपः । अपटपटा पटपटा भवति । 'डाच्-लोहितादिभ्यः षित्' (३।४।३०) क्यङ्ष्प्र० → य । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । वर्त्त० तिव्-ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[लोहितायति, लोहितायते]** लोहित । अलोहितो लोहितो भवति । 'डाच्-लोहितादिभ्यः षित्' (३।४।३०) क्यङ्ष्प्र० → य । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । वर्त्त० तिव्-ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव्प्र० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[निद्रायति, निद्रायते]** निद्रा । अनिद्रावान् निद्रावान् भवति । 'डाच्-लोहितादिभ्यः षित्' (३।४।३०) क्यङ्ष्प्र० → य । वर्त्त० तिव्-ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।।छ।।

## द्युद्भ्योऽद्यतन्याम् ।।३।३।४४।।

**[द्युद्भ्यः]** द्युत् पञ्चमी भ्यस् । 'धुटस्तृतीयः' (२।१।७६) त० → द० ।

**[अद्यतन्याम्]** अद्यतनी सप्तमी ङि । 'स्त्रीदूतः' (१।४।२९) ङि → दाम् → आम् ।

**[व्यद्युतत्, व्यद्योतिष्ट]** 'द्युति दीप्तौ' (९३७) द्युत्, विपूर्व० । अद्यतनी दि० → त्० । 'लृदिद्-द्युतादि-पुष्यादेः परस्मै' (३।४।६४) अङ्प्र० → अ । 'अड् धातोरादि०' (४।४।२९) अट् → अ । पक्षे अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । 'अड् धातो०' (४।४।२९) अट् ।

**[अरुचत्, अरोचिष्ट]** 'रुचि अभिप्रीत्यां च' (९३८) रुच् । अद्यतनी दि० → त्० । 'लृदिद्-द्युतादि-पुष्यादेः परस्मै' (३।४।६४) अङ्प्र० → अ । 'अड् धातोरादि०' (४।४।२९) अट् । पक्षे अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । 'अड् धातो०' (४।४।२९) अट् ।

**[द्योतते]** द्युत् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।।छ।।

## वृद्भ्यः स्य-सनोः ।।३।३।४५।।

**[वृद्भ्यः]** वृत् । पञ्चमी भ्यस् । 'धुटस्तृतीयः' (२।१।७६) त० → द० ।

**[स्यसनोः]** स्यश्च सन् च = स्यसनौ, तयोः = स्यसनोः, सप्तमी ओस् ।

**[वर्त्स्यति, वर्त्तिष्यते]** 'वृतूङ् वर्तने' (९५५) वृत् । भविष्यन्ती स्यति । 'न वृद्भ्यः' (४।४।५५) वृदादिपञ्चकात् इण्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निषेधः परस्मैपदे, द्वितीये भविष्यन्ती स्यते । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[अवर्त्स्यत्, अवर्त्तिष्यत]** 'वृतूङ् वर्तने' (९५५) वृत् । क्रियातिपत्तिः स्यत् । 'न वृद्भ्यः' (४।४।५५) इण्निषेधः परस्मैपदे । 'अड् धातोरादि०' (४।४।२९) अट् । द्वितीये क्रियातिपत्तिः स्यत । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[वर्त्स्यन्, वर्तिष्यमाणः]** वर्त्स्यति-वर्त्तिष्यते । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत्, आनश्प्र० → आन-स्य आदौ । 'अतो म आने' (४।४।११४) मोऽन्तः । 'स्ताद्यशितो०' (४।४।३२) इट् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[विवृत्सति, विवर्त्तिषते]** वृत् । वर्त्तितुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० → स । 'सन्-यङश्च' (४।१।३) वृत् सिउं द्विर्वचनम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'सन्यस्य' (४।१।५९) इ । विवृत्सतीत्यत्र परस्मैपदे 'उपान्त्ये' (४।३।३४) इति सन्किद्वत्, अतो गुणो न स्यात् । 'स्ताद्यशितो०' (४।४।३२) इट् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[स्यन्त्स्यति, स्यन्दिष्यते]** 'स्यन्दौङ् स्त्रवणे' (९५६) स्यन्द् । भविष्यन्ती स्यति-स्यते । 'स्ताद्यशितो०' (४।४।३२) इट् । ('धूगौदितः' (४।४।३८) वेट्) ।

**[सिस्यन्त्सति, सिस्यन्दिषते]** स्यन्द् । स्यन्दितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० → स । 'सन्-यङश्च' (४।१।३) स्यन्द् सउं द्विर्वचनम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'सन्यस्य' (४।१।५९) इ । इट् । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० ।

**[वर्त्स्यति, वर्धिष्यते]** 'वृधूङ् वृद्धौ' (९५७) वृध् । भविष्यन्ती स्यति-स्यते । 'धुटस्तृतीयः' (२।१।७६) ध० → द० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[विवृत्सति, विवर्धिषते]** वृध् । वर्धितुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) वृध् सउं द्विर्वचनम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'सन्यस्य' (४।१।५९) इ । 'स्ताद्यशितो०' (४।४।३२) इट् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[शर्त्स्यति, शर्धिष्यते]** 'शृधूङ् शब्दकुत्सायाम्' (९५८) शृध् । भविष्यन्ती स्यति-स्यते । 'स्ताद्यशितो०' (४।४।३२) इट् । 'लघोरुपा०' (४।३।४) गु० अर् ।

**[शिशृत्सति, शिशर्धिषते]** शृध् । शर्धितुमिच्छति । 'तुमर्हादि०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) शृध् सउं द्विर्वचनम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'सन्यस्य' (४।१।५९) इ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'धुटस्तृतीयः' (२।१।७६) ध० → द० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० ।

**[कल्प्स्यति, कल्पिष्यति]** 'कृपौङ् सामर्थ्ये' (९५९) कृप् । भविष्य० स्यति-स्यते । 'स्ताद्यशितो०' (४।४।३२) इट् । ('धूगौदितः' (४।४।३८) वेट्) । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'ऋ-र लृ-लं कृपोऽकृपीटादिषु' (२।३।९९) र० → ल० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[चिक्लृप्सति, चिकल्पिषते]** कृप् । कल्पितुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'सन्-यङश्च'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(४।१।३) कृप् सउं द्विर्वचनम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'सन्यस्य' (४।१।५९) अ० → इ० । 'स्ताद्यशितो०' (४।४।३२) इट् । (धूगौदितः (४।४।३८) वेट्) । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[वर्त्तते]** वृत् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'र्हादर्ह-स्वरस्याऽनु नवा' (१।३।३१) द्वित्वम् ।

**[वर्धते]** वृध् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ॥छ॥

## कृपः श्वस्तन्याम् ॥३।३।४६॥

**[कृपः]** कृप् पञ्चमी ङसि ।

**[श्वस्तन्याम्]** श्वस्तनी सप्तमी ङि । 'स्त्रीदूतः' (१।४।२९) ङि → दाम् → आम् ।

**[कल्प्तासि, कल्पितासे]** 'कृपौङ् सामर्थ्ये' (९५९) कृप् । श्वस्तनी तासि-तासे । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'ऋ-र लृ-लं कृपोऽकृपीटादिषु' (२।३।९९) र० → ल० । द्वितीये 'धूगौदितः' (४।४।३८) इट् → इ ॥छ॥

## क्रमोऽनुपसर्गात् ॥३।३।४७॥

**[क्रमः]** क्रम् पञ्चमी ङसि ।

**[अनुपसर्गात्]**卐 न उपसर्गोऽनुपसर्गः । 'अन् स्वरे' (३।२।१२९) अन्, तस्मात् ।

**[क्रमते, क्रामति]** 'क्रमू पादविक्षेपे' (३८५) क्रम् । वर्त्त० ते-तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'क्रमो दीर्घः परस्मै' (४।२।१०९) दीर्घः आ ॥छ॥

## वृत्ति-सर्ग-तायने ॥३।३।४८॥

**[वृत्तिसर्गतायने]** वृत्तिश्च सर्गश्च तायनं च = वृत्तिसर्गतायनम्, तस्मिन् ।

वृत्तिरप्रतिबन्धः = अस्खलनमित्यर्थः ।

**[शास्त्रेऽस्य क्रमते बुद्धिः]** शास्त्र सप्तमी ङि । इदम् षष्ठी ङस् । 'आ द्वेरः' (२।१।४१) म० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'अनक्' (२।१।३६) इद० → "अ" आदेशः । 'टा-ङसोरिन-स्यौ' (१।४।५) स्य । क्रम् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । बुद्धि प्रथमा सि । तत्र न हन्यते, आत्मानं यापयतीत्यर्थः ।

**[सूत्राय क्रमते]** सूत्र चतुर्थी ङे । 'ङे-ङस्योर्याऽऽतौ' (१।४।६) ङे० → य० । 'अत आ स्यादौ जस्-भ्याम्-ये' (१।४।१) अ० → आ० । क्रम् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । तदर्थमुत्सहते, तत्परो वाऽनुज्ञातो वा ।

**[क्रमन्तेऽस्मिन् योगाः]** क्रम् । वर्त्त० अन्ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । इदम् सप्तमी ङि । 'आ द्वेरः' (२।१।४१) म० → अ० । 'लुगस्या०' (२।१।११३) अलोपः । 'अनक्' (२।१।३६) अ । 'ङेः स्मिन्' (१।४।८) "स्मिन्" आदेशः । योग प्रथमा जस् । स्फीतीभवन्तीत्यर्थः, संतन्यते पाल्यन्ते वेत्यर्थः । पृथग्योगाद् वेति निवृत्तम् ॥छ॥

---

P. 卐 न विद्यते उपसर्गो यत्र सः = अनुपसर्गः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## परोपात् ॥३।३।४९॥

**[परोपात्]** परा च उपश्च = परोपम्, तस्मात् ।

**[पराक्रमते, उपक्रमते]** क्रम्, परा-उपपूर्व० । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[अनुक्रामति]** अनु-क्रम् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'क्रमो दीर्घः परस्मै' (४।२।१०९) दीर्घः ।

**[पराक्रामति, उपक्रामति]** परा-उप, क्रम् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'क्रमो दीर्घः परस्मै' (४।२।१०९) दीर्घः ।

अन्ये तु परोपाभ्यां परात् क्रमतेर्वृत्त्याद्यर्थाभावेऽपीच्छन्ति, तेन - **पराक्रमते, उपक्रमते** इत्यात्मनेपदमेव ।

**[निष्क्रमते]** निः क्रमते ।

**[प्रतिक्रमते]** प्रति क्रमते, न प्रतिहन्यत इत्यर्थः ॥छ॥

## वेः स्वार्थे ॥३।३।५०॥

**[वेः]** वि पञ्चमी ङसि ।

**[स्वार्थे]** स्वकीयोऽर्थः = स्वार्थस्तस्मिन्, स्वश्चासावर्थश्च = स्वार्थस्तस्मिन् इति वा ।

**[साधु विक्रमते गजः]** साधु 'क्रियाविशेषणात्' (२।२।४१) द्वितीया अम् । वि-क्रम् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[अश्वेन विक्रामति]** अश्वेन विक्रामति, विक्रामत्यजिनसंधिः, स्फुटतीत्यर्थः ।

**[विक्रामति राजा]** विक्रामति राजा, उत्सहते इत्यर्थः ।

परोपात् इति नियमात् 'वृत्ति-सर्ग-तायने' (३।३।४८) इत्यनेनापि आत्मनेपदं न भवति ॥छ॥

## प्रोपादारम्भे ॥३।३।५१॥

**[प्रोपात्]** प्रश्च उपश्च = प्रोपम्, तस्मात् ।

**[आरम्भे]** 'रभिं राभस्ये' (७८५) रभ्, आङ्पूर्व० । आरम्भणं = आरम्भः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'रभोऽपरोक्षा-शवि' (४।४।१०२) नकारागमस्तस्मिन् ।

**[पक्रमते, उपक्रमते भोक्तुम्]** प्र-उप, क्रम् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् ।卐 भोजनं = भोक्तुम् । 'शक-धृष-ज्ञा-रभ-लभ-सहा-ऽर्ह-ग्ला-घटाऽस्ति-समर्थाऽर्थे च तुम्' (५।४।९०) तुम्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० । प्रारभते अङ्गीकरोति वेत्यर्थः ।

**[पूर्वेद्युः प्रक्रामति]** पूर्व । पूर्वस्मिन्नहनि । 'पूर्वा-ऽपरा-ऽधरोत्तरा-ऽन्या-ऽन्यतरेतरादेद्युस्' (७।२।९८) एद्युस्प्र० ।

---

P. 卐 भोजनाय = भोक्तुम् । 'क्रियायां क्रियार्थायां०' (५।३।१३) तुम्प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अवर्णेवर्णस्य' (७।४।६८) अलोपः । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । प्रक्रामति=गच्छतीत्यर्थः ।

**[अपरेद्युरुपक्रामति]** अपर । अपरस्मिन्नहनि । 'पूर्वा-ऽपरा-ऽधरोत्तरा-ऽन्या-ऽन्यतरेतरादेद्युस्' (७।२।९८) एद्युस्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । उपक्रामति=समीपमागच्छतीत्यर्थः ।

**[प्रक्रमते, उपक्रमते]** प्रक्रमते, उपक्रमते । पादाभ्यां गन्तुमारभत इत्यर्थः ।।छ।।

**आङो ज्योतिरुदगमे** ।।३।३।५२।।

**[आङः]** आङ् पञ्चमी ङसि ।

**[ज्योतिरुद्गमे]** ज्योतिषामुद्गतः(मः) = ज्योतिरुद्गमः, तस्मिन् ।

**[आक्रमते चन्द्रः]** क्रम्, आङ्पूर्व० । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[आक्रमते सूर्यः]** क्रम्, आङ्पूर्व० । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । उदयते इत्यर्थः ।

**[आक्रामति माणवकः कुतुपम्]** कुतपं - छागरोमकंबलमित्यर्थः, आक्रामति माणवकः । अवष्टभ्नातीत्यर्थः ।

**[धूम आक्रामति]** धूम आक्रामति । उद्गच्छतीत्यर्थः ।

**[आक्रामति धूमो हर्म्यतलम्]** आक्रामति धूमो हर्म्यतलम् उद्गच्छन् व्याप्नोतीत्यर्थः ।।छ।।

**दागोऽस्वाऽऽस्यप्रसार-विकासे** ।।३।३।५३।।

**[दागः]** दाग् पञ्चमी ङसि ।

**[अस्वाऽऽस्यप्रसारविकासे]** स्वं च तद् आस्यं च = स्वाऽऽस्यम्, स्वाऽऽस्यस्य प्रसारः = स्वाऽऽस्यप्रसारः, स्वाऽऽस्यप्रसारश्च विकाश(स)श्च = स्वाऽऽस्यप्रसारविकाशं(सम्) । न स्वाऽऽस्यप्रसारविकाशं (सं) = अस्वाऽऽस्यप्रसारविकाशं-(सम्) । 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् ।

**[विद्यामादत्ते]** विद्या द्वितीया अम् । 'डुदांग्क् दाने' (११३८) दा, आङ्पूर्व० । वर्त्त० ते । 'हवः शिति' (४।१।१२) दा सउं द्विर्वचनम् । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'श्नश्चाऽऽतः' (४।२।९६) आलोपः । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० ।

**[धनमादत्ते]** धन द्वितीया अम् । आदत्ते पूर्ववत् । गृह्णातीत्यर्थः ।

**[उष्ट्रो मुखं व्याददाति]** मुख द्वितीया अम् । 'डुदांग्क् दाने' (११३८) दा, वि-आङ्पूर्व० । वर्त्त० तिव् । 'हवः शिति' (४।१।१२) दा सउं द्विर्वचनम् । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । प्रसारयतीत्यर्थः ।

**[कूलं व्याददाति]** तटं विकसतीत्यर्थः ।

**[विपादिका व्याददाति]** 'पदिंच् गतौ' (१२५७) पद्, विपूर्व० । विपद्यते । 'नाम्नि पुंसि च' (५।३।१२१) णकप्र० → अक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्-क्षिपकादीनाम्' (२।४।१११) इ । प्रथमा सि । व्याददाति = विकसतीत्यर्थः ।।छ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## नु-प्रच्छः ॥३।३।५४॥

**[नुप्रच्छः]** नुश्च प्रच्छ् च = नुप्रच्छम्, तस्मात् ।

**[आनुते शृगालः]** 'णुक् स्तुतौ' (१०८१) णु । 'पाठे धात्वादेर्णो नः' (२।३।९७) नु, आङ्पूर्व० । वर्त्त० ते । सृ(शृ)गालः । उत्कण्ठितः शब्दं करोतीत्यर्थः, उत्कण्ठापूर्वके संशब्दने नौतेरयं विधिः शब्दशक्तिमाहात्मा(म्या)त्, न सर्वत्र ।

**[आपृच्छते गुरून्]** 'प्रछंत् ज्ञीप्सायाम्' (१३४७) प्रछ्, आङ्पूर्व० । वर्त्त० ते । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् प्र० → पृ० ।

**["आपृच्छस्व प्रियसखम्" - मेघदूते]** आप्रच्छ् । पञ्चमी स्व । 'तुदादेः शः' (३।४।८१) शप्र० । ग्रह-व्रस्च० (४।१।८४) य्वृत् प्र० → पृ० । प्रियसखि । प्रियः सखा यस्याऽसौ । 'राजन्-सखेः' (७।३।१०६) अट्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) अन्त्यस्वरादिलोपः, तम् । वियुज्यमानस्य प्रश्नेऽयं विधिः ।

**[प्रणौति]** प्र-नु । वर्त्त० तिव् । 'उत औविति व्यञ्जनेऽद्वेः' (४।३।५९) औ । 'रषृवर्णान्नो ण०' (२।३।६३) न० → ण० ॥छ॥

## गमेः क्षान्तौ ॥३।३।५५॥

**[गमेः]** गमि पञ्चमी ङसि ।

**[क्षान्तौ]** 'क्षमू(मौ)च् सहने' (१२३५) क्षम् । क्षमणं = क्षान्तिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । 'अहन्-पञ्चमस्य क्वि-क्ङिति' (४।१।१०७) दीर्घः-आ, तस्याम् ।

**[आगमयते गुरून्]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम्, आङ्पूर्व० । आगच्छति गुरुस्तं आगच्छन्तं गुरुं शिष्यः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'अमोऽकम्यमि-चमः' (४।२।२६) ह्रस्वः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । कञ्चित् कालं प्रतीक्षते ।

**[आगमयस्व तावत्]** आगमयस्व तावत् । कञ्चित् कालं सहस्वेत्यर्थः ।

**[आगमयति विद्याम्]** आ-गम् । आगच्छति विद्या, तां विद्यां आगच्छन्तीं शिरसा प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । अग्रे पूर्ववत् । विद्यां गृह्णातीत्यर्थः ।

क्षान्तिः = कालहरणम्, तत् स्वभावाद् गमिर्ण्यन्त एव वर्त्तते ॥छ॥

## ह्वः स्पर्धे ॥३।३।५६॥

**[ह्वः]** ह्वा पञ्चमी ङसि । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः ।

**[स्पर्धे]** स्पर्ध सप्तमी ङि ।

**[मल्लो मल्लमाह्वयते]** 'ह्वेंग् स्पर्धा-शब्दयोः' (९९४) ह्वे, आङ्पूर्व० । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'एदैतोऽयाय्' (१।२।२३) अय् । स्पर्धमान आकारयतीत्यर्थः । स्पर्धोपसर्जने आह्वाने धातोर्वृत्तिं दर्शयति ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सं-नि-वेः** ।।३।३।५७।।

**[संनिवेः]** सम् च निश्च विश्च = संनिविस्तस्मात् ।

ह्वः स्पर्धे (३।३।५६) सं-नि-वेः इत्येकयोगाकरणं स्पर्ध इति निवृत्त्यर्थः ।।छ।।

**उपात्** ।।३।३।५८।।

**[उपात्]** उप पञ्चमी ङसि ।

**[उपह्वयते]** ह्वे, उपपूर्व० । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'एदैतोऽयाय्' (१।२।२३) अय् ।।छ।।

**यमः स्वीकारे** ।।३।३।५९।।

**[यमः]** यम् पञ्चमी ङसि ।

**[स्वीकारे]** अस्वस्य स्वस्य करणं = स्वीकारः । 'कृ-भ्वस्तिभ्यां कर्मकर्तृभ्यां०' (७।२।१२६) च्विप्र० । 'ईश्च्वाववर्णस्याऽनव्ययस्य' (४।३।१११) ई । स्वीक्रियते = स्वीकारः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० ⟶ अ । 'नामिनोऽकलिहलेः' (४।३।५१) वृद्धिः आर्, तस्मिन् = स्वीकारे ।

**[कन्यामुपयच्छते]** उप 'यमूं उपरमे' (३८६) यम् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'गमिषद्यमश्छः' (४।२।१०६) म० ⟶ छ० । 'स्वरेभ्यः' (१।३।३०) छस्य द्वित्वम् । 'अघोषे प्रथमोऽशिटः' (१।३।५०) छ० ⟶ च०, वरयतीत्यर्थः ।

**[उपायंस्त महास्त्राणि]** उप-यम् । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः । 'अड् धातोरादि०' (४।४।२९) अट् । अनुगृह्णातीत्यर्थः । महत्-अस्त्र । महान्ति च तानि अस्त्राणि च । 'जातीयैकार्थेऽच्वेः' (३।२।७०) डाप्र० ⟶ आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लोपः । द्वितीया शस् । 'नपुंसकस्य शिः' (१।४।५५) शि० ⟶ इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः । 'रषृवर्णान्नो ण०' (२।३।६३) न० ⟶ ण० ।।छ।।

**देवाऽर्चा-मैत्री-सङ्गम-पथिकर्तृक-मन्त्रकरणे स्थः** ।।३।३।६०।।

**[देवाऽर्चामैत्रीसङ्गमपथिकर्तृकमन्त्रकरणे]** देवानामर्चा = देवार्चा । मित्रस्य इमा = मैत्री । 'तस्येदम्' (६।३।१६०) अण्प्र० ⟶ अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । सङ्गमनं = सङ्गमः । पन्थाः कर्त्ता यस्याऽसौ पथिकर्तृकः । मन्त्रः करणं यस्याऽसौ मन्त्रकरणः । देवार्चा च मैत्री च सङ्गमश्च पथिकर्तृकश्च मन्त्रकरणश्च, तत्, तस्मिन् ।

**[स्थः]** स्था पञ्चमी ङसि । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः ।

**[जिनेन्द्रमुपतिष्ठते]** उप 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था० । 'निमित्ताभावे नैमित्तिकस्याऽप्यभावः' (न्या० स० वक्ष० (१) /सूत्र (२९)) स्था । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु-पा०' (४।२।१०८) "तिष्ठ" आदेशः ।

मैवं मंस्थाः सचित्तोऽयमेषोऽपि हि यथा वयम् ।
एतदप्यस्य **कापेयं**, यदर्कमुपतिष्ठति ।।१।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[कापेयम्]** कपि । कपेर्भावः । 'कपि-ज्ञातेरेयण्' (७।१।६५) एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । द्वितीया अम् ।

मित्रतया मित्रं वा कर्तुमाचरणं मैत्री, सा उपस्थानस्य आराधनस्य हेतुः फलं वा-

**[रथिकानुपतिष्ठते]** रथ । रथेन चरति । 'नौ-द्विस्वरादिकः' (६।४।१०) इकप्र० (?) । ('पर्पादेरिकट्' (६।४।१२) इकट्प्र० → इक ।) तान् उपतिष्ठते, मैत्र्या हेतुना फलेन वाऽऽराधयतीत्यर्थः ।

**[ऐन्द्र्या गार्हपत्यमुपतिष्ठते]** इन्द्र । इन्द्रो देवताऽस्याः सा । 'देवता' (६।२।१०१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'अणञेयेकण्०' (२।४।२०) ङी । तृतीया टा, तया = करणभूतया । गृहपति । गृहपतिना संयुक्तः । 'हृद्य-पद्य-तुल्य-मूल्य-वश्य-पथ्य-वयस्य-धेनुष्या-गार्हपत्य-जन्य-धर्म्यम्' (७।१।११) गार्हपत्यनिपातः । द्वितीया अम् ।

**[सावित्र्या सूर्यमुपतिष्ठते]** सवितृ । सविता देवताऽस्याः सा । 'देवता' (६।२।१०१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'अणञेयेकण्०' (२।४।२०) ङी, तया = करणभूतया, सूर्यमुपतिष्ठते-आराधयतीत्यर्थः ॥छ॥

## वा लिप्सायाम् ॥३।३।६१॥

**[वा]** वा प्रथमा सि ।

**[लिप्सायाम्]** 'डुलभिंष् प्राप्तौ' (७८६) लभ् । लब्धुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० → स । 'रभ-लभ-शक-पत-पदामिः' (४।१।२१) अस्य इः । लिप्सनं = लिप्सा । 'शंसि-प्रत्ययात्' (५।३।१०५) अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ, तस्याम् = लिप्सायाम् । 'आपो ङितां यै-यास्-यास्-याम्' (१।४।१७) याम् ।

**[भिक्षुको दातृकुलमुपतिष्ठति उपतिष्ठते वा]** भिक्षुक प्रथमा सि । दातुः कुलं = दातृकुलम् । द्वितीया अम् । उपतिष्ठते = भिक्षां लभेयेत्यर्थः ॥छ॥

## उदोऽनूर्ध्वेहे ॥३।३।६२॥

**[उदः]** उद् पञ्चमी ङसि ।

**[अनूर्ध्वेहे]** 'ईहि चेष्टायाम्' (८५७) ईह् । ईहनमीहः । 'भावा-ऽकर्त्रो' (५।३।१८) घञ्प्र० → अ । न ऊर्ध्वोऽनूर्ध्वः । 'अन् स्वरे' (३।२।१२९) अन् । अनूर्ध्वश्चासौ ईहश्च = अनूर्ध्वेहस्तस्मिन् ।

**[मुक्तावुत्तिष्ठते]** मुक्ति सप्तमी ङि । 'ङिर्डौ' (१।४।२५) ङि → डौ । उत्तिष्ठते = मुक्त्यर्थं चेष्टते इत्यर्थः ।

**[सेनोत्तिष्ठति]** सेनोत्तिष्ठति = उत्पद्यते इत्यर्थः ॥छ॥

## सं-वि-प्रा-ऽवात् ॥३।३।६३॥

**[संविप्राऽवात्]** सम् च विश्च प्रश्च अवश्च = संविप्राऽवम्, तस्मात् । पृथग्योगादनूर्ध्वेह इति निवृत्तम् ॥छ॥

## ज्ञीप्सा-स्थेये ॥३।३।६४॥

**[ज्ञीप्सास्थेये]** ज्ञीप्सा च स्थेयश्च = ज्ञीप्सास्थेयम्, तस्मिन् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[तिष्ठते कन्या छात्रेभ्यः]** छात्र चतुर्थी भ्यस् । 'श्लाघ-ह्नु-स्था-शपा प्रयोज्ये' (२।२।६०) इति चतुर्थी ।

**[तिष्ठते वृषली ग्राम्येभ्यः]** ग्राम । ग्रामे भवाः । 'ग्रामादीनञ् च' (६।३।९) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । स्वाभिप्रायप्रकाशनेनात्मानं रोचयतीत्यर्थः ।

**["संशय्य कर्णादिषु तिष्ठते यः"-किराते]** सम् 'शीङ्क् स्वप्ने' (११०५) शी । संशयनं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० —> त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् —> य । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । कर्णादिस्थेयोपदिष्टं निर्णयतीत्यर्थः ।।छ।।

## प्रतिज्ञायाम् ।।३।३।६५।।

**[प्रतिज्ञायाम्]** प्रति 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । प्रतिज्ञानम् । 'उपसर्गादातः' (५।३।११०) अङ्प्र० —> अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलोपः । 'आत्' (२।४।१८) आप्प्र० —> आ, तस्याम् । 'आपो ङितां यै-यास्-यास्-याम्' (१।४।१७) याम् ।

**[नित्यं शब्दं आतिष्ठते]** शब्दं नित्यत्वेनाभ्युपगच्छति ।

योगविभाग उत्तरार्थः ।।छ।।

## समो गिरः ।।३।३।६६।।

**[समः]** सम् पञ्चमी ङसि ।

**[गिरः]** गिर् पञ्चमी ङसि ।

**[स्याद्वादं संगिरते]** स्याद्वाद द्वितीया अम् । सम् 'गृत् निगरणे' (१३३५) गृ । वर्त्त० ते । 'तुदादेः शः' (३।४।८१) शप्र० —> अ । 'ॠतां क्ङित्तीर्' (४।४।११६) इर् । प्रतिजानीते इत्यर्थः ।

गिर इति निर्देशाद् गृणातेर्न स्यात् ।।छ।।

## अवात् ।।३।३।६७।।

**[अवात्]** अव पञ्चमी ङसि ।

**[अवगिरते]** 'गृत् निगरणे' (१३३५) गृ, अवपूर्व० । वर्त्त० ते । 'तुदादेः शः' (३।४।८१) शप्र० —> अ । 'ॠतां क्ङित्तीर्' (४।४।११६) इर् ।

पृथग्योगात् प्रतिज्ञायामिति निवृत्तम् ।।छ।।

## निह्नवे ज्ञः ।।३।३।६८।।

**[निह्नवे]** निह्नव सप्तमी ङि ।

**[ज्ञः]** ज्ञा पञ्चमी ङसि । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः ।

**[शतमपजानीते]** शत द्वितीया अम् । अप 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । वर्त्त० ते । 'क्र्यादेः' (३।४।७९)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्नाप्र० → ना । 'एषामी व्यञ्जनेऽदः' (४।२।९७) ई । 'जा ज्ञा-जनोऽत्यादौ' (४।२।१०४) ज्ञा० → जा० आदेशः । अपह्नुत इत्यर्थः ।।छ।।

**सं-प्रतेरस्मृतौ** ।।३।३।६९।।

**[संप्रतेः]** सम् च प्रतिश्च = संप्रति, तस्मात् ।

**[अस्मृतौ]** 'स्मृं चिन्तायाम्' (१८) स्मृ । स्मरणं = स्मृतिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । न स्मृतिरस्मृतिस्तस्मिन् (?) (तस्याम्) ।

**[शतं संजानीते]** शत द्वितीया अम् । सम् 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । वर्त्त० ते । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'एषामी व्यञ्जनेऽदः' (४।२।९७) ई । 'जा ज्ञा-जनोऽत्यादौ' (४।२।१०४) ज्ञा० → जा० आदेशः । 'समो ज्ञोऽस्मृतौ वा' (२।२।५१) कर्मणि द्वितीया । अवेक्षत इत्यर्थः ।

**[शतं प्रतिजानीते]** शत द्वितीया अम् । प्रतिजानीते = अभ्युपगच्छतीत्यर्थः ।

**[शतेन संजानीते]** 'समो ज्ञोऽस्मृतौ वा' (२।२।५१) तृतीया ।

**[मातुः संजानाति]** स्मरतीत्यर्थः । 'स्मृत्यर्थ-दयेशः' (२।२।११) विकल्पेन षष्ठी ।

**[मातरं संजानाति]** स्मरतीत्यर्थः ।।छ।।

**अननोः सनः** ।।३।३।७०।।

**[अननोः]** न अनुरननुः । 'अन् स्वरे' (३।२।१२९) अन्, तस्मात् ।

**[सनः]** सन् पञ्चमी ङसि ।

**[धर्मं जिज्ञासते]** धर्म द्वितीया अम् । 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । ज्ञातुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) ज्ञा सिउं द्विर्वचनम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'सन्यस्य' (४।१।५९) इ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

सकर्मकार्थोऽयमारम्भः, अकर्मकात्तु 'ज्ञः' (३।३।८२) इत्यनेनैवाऽऽत्मनेपदस्य सिद्धत्वात् ।।छ।।

**श्रुवोऽनाङ् - प्रतेः** ।।३।३।७१।।

**[श्रुवः]** श्रु पञ्चमी ङसि ।

**[अनाङ्प्रतेः]** आङ् च प्रतिश्च = आङ्प्रति(ः), न आङ्प्रति(ः) = अनाङ्प्रतिः । 'अन् स्वरे' (३।२।१२९) अन्, तस्मात् ।

**[शुश्रूषते गुरून्]** 'श्रुंट् श्रवणे' (१२९६) श्रु । श्रोतुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः । 'सन्-यङश्च' (४।१।३) "श्रू" द्विर्वचनम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) रलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[चैत्रं प्रति शुश्रूषते]** श्रोतुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन् । शेषं पूर्ववत् । प्रतिना सम्बन्धाभावात् प्रतिषेधो न भवति ।।छ।।

## स्मृ-दृशः ।।३।३।७२।।

**[स्मृदृशः]** स्मृश्च दृश् च = स्मृदृश् तस्मात् ।

**[सूस्मूर्षते पूर्ववृत्तम्]** 'स्मृं चिन्तायाम्' (१८ ) स्मृ । स्मर्तुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'स्वर-हन-गमोः' सनि धुटि' (४।१।१०४) दीर्घः । 'ओष्ठ्यादुर्' (४।४।११७) उर् आदेशः । 'सन्-यङश्च' (४।१।३) स्मुर्द्विर्वचनम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनोऽनिट्' (४।३।३३) किद्वत् ।

**[दिदृक्षते देवम्]** 'दृशृं प्रेक्षणे' (४९५) दृश् । द्रष्टुमिच्छति । 'तुमर्हादि०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ऋतोऽत्' (४।१।३९) ऋ० → अ० । 'सन्यस्य' (४।१।५९) इ । 'यज-सृज-मृज-राज-भ्राज-भ्रस्ज-व्रस्च-परिव्राजः शः षः' (२।१।८७) श० → ष० । 'ष-ढोः कस्सि' (२।१।६२) ष० → क० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । क-षसंयोगे क्ष । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'उपान्त्ये' (४।३।३४) सन् किद्वत् ।।छ।।

## शको जिज्ञासायाम् ।।३।३।७३।।

**[शकः]** शक् पञ्चमी ङसि ।

**[जिज्ञासायाम्]** 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । ज्ञातुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) ज्ञा सउं द्विर्वचनम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'सन्यस्य' (४।१।५९) इ । जिज्ञासते = जिज्ञासा । 'शंसि-प्रत्ययात्' (५।३।१०५) अप्र० । 'अतः' (४।३।८२) अलोपः । 'आत्' (२।४।१८) आप्प्र० → आ, तस्याम् = जिज्ञासायाम् । सप्तमी ङि । 'आपो ङितां यै-यास्-यास्-याम्' (१।४।१७) याम् ।

**[विद्याः शिक्षते]** 'शक्लृंट् शक्तौ' (१३००) शक् । शक्तुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'रभ-लभ-शक-पत-पदामिः' (४।१।२१) इ० । 'नाम्यन्तस्था०' (२।३।१५) ष० । क-षसंयोगे क्ष० । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । विद्यां ज्ञातुं शक्नुयामितीच्छतीत्यर्थः ।

**[शिक्षति]** शक् । शक्तुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'रभ-लभ-शक-पत-पदामिः' (४।१।२१) इ० ।

**[शिक्षांचक्रे]** शिक्ष् । परोक्षा ए । 'धातोरनेकस्वरादाम् परोक्षायाः कृभ्वस्ति०' (३।४।४६) ए० → आम्० । 'डुकृंग् करणे' (८८८) कृ । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "कृ" द्विर्वचनम् । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'इवर्णादे०' (१।२।२१) रत् ।।छ।।

## प्राग्वत् ।।३।३।७४।।

**[प्राग्वत्]** प्रागिव । 'स्यादेरिवे' (७।१।५२) वत्प्र० । 'च-जः क-गम्' (२।१।८६) च० → क० । 'धुटस्तृतीयः' (२।१।७६) क० → ग० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पञ्चम्यर्थात् अयं प्रत्ययः ।

**[शिशयिषते]** 'शीङ्क् स्वप्ने' (११०५) शी । शयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) "शी" द्विर्वचनम् । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[एदिधिषते]** 'एधि वृद्धौ' (७४७) एध् । एधितुमिच्छति । 'तुमर्हा०' (३।४।२१) सन्प्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "धि"द्विर्वचनम् । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) ध० → द० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[लोलूयिषते]** 'लूग्श् छेदने' (१५१९) लू । भृशं पुनः पुनर्वा लुनाति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) "लू" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'आ-गुणावन्यादेः' (४।१।४८) ओ । लोलूयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'अतः' (४।३।८२) अलोपः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[शिश्येनायिषते]** श्येन । श्येन इवाऽऽचरति । 'क्यङ्' (३।४।२६) क्यङ्प्र० → य । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । श्येनायितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'आद्योऽश एकस्वरः' (४।१।२) "श्ये" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) यलोपः । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'अतः (४।३।८२) अलोपः । 'नाम्यन्तस्था०' (२।३।१५) ष० । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

उपपदेन - **[निविविक्षते]** नि 'विशंत् प्रवेशने' (१४१५) विश् । निवेष्टुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) "विश्" द्विर्वचनम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) शलोपः । 'यज-सृज-मृज-राज०' (२।१।८७) श० → ष० । 'ष-ढोः कस्सि' (२।१।६२) ष० → क० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[अश्वेन संचिचरिषते]** 'चर भक्षणे च' (४१०) चर्, संपूर्व० । संचरितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) रलोपः । 'सन्यस्य' (४।१।५९) इ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'समस्तृतीयया' (३।३।३२) आत्मनेपदम् ।

अर्थविशेषणे - **[चिक्रंसते]** 'क्रमू पादविक्षेपे' (३८५) क्रम् । क्रमितुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) "क्रम्" द्विर्वचनम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'सन्यस्य' (४।१।५९) इ । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः । वर्त्त० ते । 'कर्त्तर्य०' (३।४।७१) शव् । 'क्रमोऽनुपसर्गात्' (३।३।४७) आत्मनेपदम् ।

**[आचिक्रंसते]** क्रम्, आङ्पूर्व० । आक्रमितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) "क्रम्" द्विर्वचनम् । 'व्यञ्जनस्या०' (४।१।४४) अनादिव्यञ्जनलोपः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'सन्यस्य' (४।१।५९) इ । वर्त्त० ते । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[शिशत्सति]** 'शद्लृं शातने' (९६७) शद् । शत्तुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) "शद्" द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) दलोपः । 'सन्यस्य' (४।१।५९) इ । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[मुमूर्षति]** 'मृंत् प्राणि(ण)त्यागे' (१३३३) मृ । मर्तुमिच्छति । 'तुमर्हादि०' (३।४।२१) सन्प्र० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः । 'ओष्ठ्यादुर्' (४।४।११७) उर् । 'सन्-यङश्च' (४।१।३) मुर्द्विर्वचनम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) रलोपः । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[अनुचिकीर्षति]** 'डुकृंग् करणे' (८८८) कृ, अनुपूर्व० । अनुकर्तुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'सन्-यङश्च' (४।१।३) "किर्" द्विर्वचनम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) रलोपः । 'क-ङश्च-ञ्' (४।१।४६) क० —> च० । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् ।

**[पराचिकीर्षति]** परा । कृ । पराकर्तुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । अग्रे पूर्ववत् ।

**[तितिक्षते]** 'तिजि क्षमा-निशानयोः' (६६७) तिज् । 'गुप्-तिजो गर्हा-क्षान्तौ सन्' (३।४।५) सन्प्र० —> स । 'सन्-यङश्च' (४।१।३) "तिज्" द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) जलोपः । 'च-जः क-गम्' (२।१।८६) ज० —> ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० —> क० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । क-षसंयोगे क्ष । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[जुगुप्सते]** 'गुपि गोपन-कुत्सनयोः' (७६३) गुप् । 'गुप्-तिजो गर्हा-क्षान्तौ सन्' (३।४।५) सन्प्र० । 'सन्-यङश्च' (४।१।३) "गुप्" द्विर्वचनम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) पलोपः । 'ग-होर्जः' (४।१।४०) ग० —> ज० । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[मीमांसते]** 'मानि पूजायाम्' (७४९) मान् । 'शान्-दान्-मान्-बधान्निशाना-ऽऽर्जव-विचार-वैरूप्ये दीर्घश्चेतः' (३।४।७) सन् । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) नलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वत । 'सन्यस्य' (४।१।५९) इ । 'शान्-दान्-मान्-बधान्निशाना-ऽऽर्जव०' (३।४।७) दीर्घः ई । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्या०' (२।१।११३) अलोपः ।

**[तितिक्षयति]** तितिक्षन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'अतः' (४।३।८२) अकारलोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[मीमांसयति]** मीमांसन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'अतः' (४।३।८२) अकारलोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[तेजयति]** 'तिजि क्षमा-निशानयोः' (६६७) तिज् । तेजमानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[गोपायति]**卐 'गुपि गोपन-कुत्सनयोः' (७६३) गुप् । गोपमानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे०' (३।४।२०) णिगप्र० (?) । ('गुपौ रक्षणे' (३३२) गुप् । स्वार्थे 'गुपौ-धूप-विच्छि०' (३।४।१) आयप्र० ।) 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[मानयति]** 'मानण् पूजायाम्' (१९६९) मान् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

निरस्यति कश्चित्-रक्षति कश्चित्-पूजयति कश्चित् ॥छ॥

**आमः कृगः ॥३।३।७५॥**

**[आमः]** आम् पञ्चमी ङसि ।

**[कृगः]** कृग् पञ्चमी ङसि ।

**[ईहांचक्रे]** 'ईहि चेष्टायाम्' (८५७) ईह् । परोक्षा ए । 'गुरुनाम्यादेरनृच्छूर्णोः' (३।४।४८) ए० → आम्० । 'डुकृंग् करणे' (८८८) कृ । अनेन आत्मनेपदविधिः । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'ऋतोऽत्' (४।१।३८) कृ० → क० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'इवर्णादे०' (१।२।२१) र० ।

**[ईक्षांचक्रे]** 'ईक्षि दर्शने' (८८२) ईक्ष् । परोक्षा ए । 'गुरुनाम्यादेरनृच्छूर्णोः' (३।४।४८) ए० → आम्० । शेषं पूर्ववत् ।

**[विभयांचकार]** 'ञिभीक् भये' (११३२) भी । परोक्षा णव् → अ । 'भी-ह्री-भृ-होस्तिव्वत्' (३।४।५०) आम् । 'हवः शिति' (४।१।१२) "भी" सिउं द्वित्वम् । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'डुकृंग् करणे' (८८८) कृ । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "कृ" द्वित्वम् । 'ऋतोऽत्' (४।१।३८) कृ० → क० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[जागरांचकार]** 'जागृक् निद्राक्षये' (१०९३) जागृ । परोक्षा णव् । 'जागुष-समिन्धेर्नवा' (३।४।४९) आम्० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । चकार पूर्ववत् ।

**[बिभरांचक्रे, बिभरांचकार]** 'डुडुभृंग्क् पोषणे च' (११४०) भृ । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'पृ-भृ-मा-हाङामिः' (४।१।५८) इ० पूर्वम् । 'भी-ह्री-भृ-होस्तिव्वत्' (३।४।५०) आम्० । चक्रे – चकार पूर्ववत् ।

**[पाचयांचक्रे, पाचयांचकार]** 'डुपर्चीष् पाके' (८९२) पच् । पपाच कश्चित्, तमन्यः प्रयुयुजे । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिगप्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । परोक्षा ए । 'धातोरनेकस्वरादाम् परोक्षायाः, कृभ्वस्ति चानु तदन्तम्' (३।४।४६) आम् । 'आमन्ताऽऽल्वाऽऽय्येत्नावय्' (४।३।८५) अय् । चक्रे-चकार पूर्ववत् ।

---

卐 'गुपि गोपन-कुत्सनयोः' णिगि गोपयति भवति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ईक्षामास]** 'ईक्षि दर्शने' (८८२) ईक्ष् । परोक्षा ए । 'गुरुनाम्यादेरनृच्छूर्णोः' (३।४।४८) आम् । 'असक् भुवि' (११०२) अस् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) सलोपः । 'अस्याऽऽदेराः परोक्षायाम्' (४।१।६८) आ । 'समानानां०' (१।२।१) दीर्घः ।

**[ईक्षांबभूव]** 'ईक्षि दर्शने' (८८२) ईक्ष् । परोक्षा ए । 'गुरुनाम्यादेरनृच्छूर्णोः' (३।४।४८) आम् । 'भू सत्तायाम्' (१) भू । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'भू-स्वपोरदुतौ' (४।१।७०) उ० → अ० । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'भुवो वः परोक्षा-ऽद्यतन्योः' (४।२।४३) इति आकारस्य ऊकारः ।।छ।।

### गन्धना-ऽवक्षेप-सेवा-साहस-प्रतियत्न-प्रकथनोपयोगे ।।३।३।७६।।

**[गन्धनाऽवक्षेपसेवासाहसप्रतियत्नप्रकथनोपयोगे]** गन्धनं च अवक्षेपश्च सेवा च साहसं च प्रतियत्नश्च प्रकथनं च उपयोगश्च = तत्, तस्मिन् ।

गन्धनं = द्रोहेणाभिप्रायेण परदोषोद्घाटनम्, प्रोत्साहनादिकमन्ये अनुमननं प्रवर्त्तनम् ।

**[उत्कुरुते]** उत् 'डुकृंग् करणे' (८८८) कृ । वर्त्त० ते । 'कृग्-तनादेरुः' (३।४।८३) उ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अतः शित्युत्' (४।२।८९) अ० → उ० ।

**[उदाकुरुते माम्]** उत्-आङ्पूर्व० कृ । वर्त्त० ते । शेषं पूर्ववत् ।

**[अध्याकुरुते जिघांसुः]** अधि-आङ्पूर्व० कृ । वर्त्त० ते । शेषं पूर्ववत् । 'हनंक् हिंसा-गत्योः' (११००) हन् । हन्तुमिच्छति । 'तुमर्हादि०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) नलोपः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'सन्यस्य' (४।१।५९) इ । 'अङे हि-हनो हो घः पूर्वात्' (४।१।३४) ह० → घ० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः आ । जिघांसनं = जिघांसुः । 'सन्-भिक्षा-ऽऽशंसेरुः' (५।२।३३) उप्र० । 'अतः' (४।३।८२) अलोपः । अपकर्त्रे कथयतीत्यर्थः ।

**[दुर्वृत्तानवकुरुते कुत्सयतीत्यर्थः]** दुर्वृत्तः, दुष्टं वृत्तं येषां ते = दुर्वृत्ताः, तान्, अवकुरुते = कुत्सयतीत्यर्थः । कुत्सयतीत्यत्र आत्मनेपदस्य अनित्यत्वात् परस्मैपदम् । 'आत्मनेपदमनित्यम्' (न्या० सं० २।३७) ।

**[श्येनो वर्त्तिकामपकुरुते]** श्येन प्रथमा सि । वर्त्तिका द्वितीया अम् । उ(अ)पकुरुते । भर्त्सयत इत्यर्थः ।

**[महामात्रानुपकुरुते]** महत् । 'अधातूदृदितः' (२।४।२) ङी । महती मात्रा यस्य सः = महामात्रस्तान् । 'परतः स्त्री पुंवत्०' (३।२।४९) ङीलोपः । 'जातीयैकार्थेऽच्वेः' (३।२।७०) डाप्र० → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लोपः । द्वितीया शस् । उपकुरुते = सेवते इत्यर्थः ।

**[परदारान् प्रकुरुते]** परदारः । परेषां दाराः = परदारास्तान् प्रकुरुते । प्र 'डुकृंग् करणे' (८८८) कृ । वर्त्त० ते । 'कृग्-तनादेरुः' (३।४।८३) उ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अतः शित्युत्' (४।२।८९) अ० → उ० । विनिपातमविभाव्य तान् अभिगच्छतीत्यर्थः ।

**[एधोदकस्योपस्कुरुते]** एधश्च उदकं च = एधोदकम्, तस्य । उप 'डुकृंग् करणे' (८८८) कृ । 'उपाद् भूषा-समवाय-प्रतियत्न-विकार-वाक्याऽध्याहारे' (४।४।९२) स्सट् → स्० । वर्त्त० ते । 'कृग्-तनादेरुः' (३।४।८३) उ । गुणे सति 'अतः शित्युत्' (४।२।८९) अ० → उ० । तत्र गुणान्तरमादधातीत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[जनवादान् प्रकुरुते]** जनस्याऽपवादाः = जनापवादास्तान् प्रकुरुते । कथयितुमारभते, प्रकर्षेण कथयति वेत्यर्थः ।

**[शतं प्रकुरुते]** धर्मादौ विनियुङ्क्त इत्यर्थः ।।छ।।

**अधेः प्रसहने** ।।३।३।७७।।

**[अधेः]** अधि पञ्चमी ङसि ।

प्रहसनं = पराभिभवः परेणापराजयो वा ।

**[तं हाऽधिचक्रे]** तद् 'गौणात् समया-निकषा-हा-धिगन्तरा-ऽन्तरेणा-ऽति-येन-तेनैर्द्वितीया' (२।२।३३) द्वितीया अम् । ह प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । 'डुकृंग् करणे' (८८८) कृ, अधिपूर्व० । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "कृ" द्वित्वम् । 'ऋतोऽत्' (४।१।३८) कृ० → क० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । तं प्रसेहे, तमभिभूतवान्, तेन वा न पराजित इत्यर्थः ।।छ।।

**दीप्ति-ज्ञान-यत्न-विमत्युपसंभाषोपमन्त्रणे वदः** ।।३।३।७८।।

**[दीप्तिज्ञानयत्नविमत्युपसंभाषोपमन्त्रणे]** दीप्तिश्च ज्ञानं च यत्नश्च विमतिश्च उपसंभाषश्च उपमन्त्रणं च = तत्, तस्मिन् ।

**[वदः]** वद् पञ्चमी ङसि ।

**[वदते विद्वान् स्याद्वादे]** 'वद व्यक्तायां वाचि' (९९८) वद् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । सम्यग्ज्ञानादनाकुलकथनाच्च विकसितमुखत्वाद् दीप्यमानो वदतीति वा वदन् दीप्यते इति वा, दीप्यत एवेति वेत्यर्थः ।

**[वदते धीमांस्तत्त्वार्थे]** वदते । धीर्बुद्धिर्विद्यते यस्याऽसौ । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः । तत्त्वस्याऽर्थस्तत्त्वार्थस्तस्मिन् । ज्ञात्वा वदतीति वा, जानाति वदितुमिति वा, वदन् जानातीति वा, जानात्येव वेत्यर्थः ।

**[श्रुते वदते, तपसि वदते]** तद्विषयमुत्साहं वाचाविःकरोति, तत्रोत्सहते इति वेत्यर्थः ।

**[धर्मे विवदन्ते]** धर्म सप्तमी ङि । विवदन्ते = विमतिपूर्वकं विचित्रं भाषन्त इति वा, विविधं मन्यन्त इति वेत्यर्थः ।

**[कर्मकरानुपवदते]** कर्माणि कुर्वन्तीति । 'अच्' (५।१।४९) अच्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर्, तान् । उपवदते उप 'सान्त्वण् सामप्रयोगे' (१७०२) सान्त्व् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । उपलभते वेत्यर्थः ।

उपमन्त्रणं रहसि **उपच्छन्दनम्** ।

**[उपच्छन्दनम्]** उपच्छन्दस् । छन्दसा उपचरति । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।१७) णिच्प्र० → इ । 'त्रन्त्यस्वरादेः' (७।४।४३) अस्लोपः । उपच्छन्द्यते । 'णि-वेत्त्यास-श्रन्थ-घट्ट-वन्देरनः' (५।३।१११) अनप्र० । 'णेरनिटि' (४।३।८३) णिच्लोपः ।

**[कुलभार्यामुपवदते, परदारानुपवदते]** आभरणादीनि दास्यामि, रहस्युपलोभयतीत्यर्थः ।।छ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## व्यक्तवाचां सहोक्तौ ॥३।३।७९॥

**[व्यक्तवाचाम्]** 'अञ्जौप् व्यक्ति-म्रक्षण-गतिषु' (१४८८) अञ्ज्, विपूर्व० । व्यनक्ति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० । व्यक्ता = प्रकटाक्षरा वाग् येषां ते = व्यक्तवाचस्तासाम् ।

**[सहोक्तौ]** सह 'वचंक् भाषणे' (१०९६) वच् । सह वचनम् । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । 'यजादि-वचेः किति' (४।१।७९) य्वृत् व० → उ०, तस्याम् ।

**[संप्रवदन्ते ग्राम्याः]** ग्रामे भवाः = ग्राम्याः । 'ग्रामादीनञ् च' (६।३।९) यप्र० । संभूय भाषन्त इत्यर्थः ।

शुक-सारिकादीनामपि व्यक्तवाक्त्वात् सहोक्ताविच्छन्त्यन्ये ।

**[चैत्रेणोक्ते मैत्रो वदति]** चैत्र तृतीया टा । 'वचंक् भाषणे' (१०९६) वच् । उच्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'यजादि-वचेः किति' (४।१।७९) व० → उ० । 'च-जः क-गम्' (२।१।८६) च० → क०, तस्मिन्, मैत्रो वदति ॥छ॥

## विवादे वा ॥३।३।८०॥

**[विवादे]** विरुद्धार्थो वादः = विवादस्तस्मिन् ।

**[वा]** वा प्रथमा सि ।

**[विप्रवदन्ते विप्रवदन्ति वा मौहूर्त्ताः]** विप्रवदन्ते । मुहूर्त्तं विदन्ति अधीयते वा । 'तद्वेत्त्यधीते' (६।२।११७) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । प्रथमा जस् । परस्परप्रतिषेधेन समकालं विरुद्धं वदन्तीत्यर्थः ।

**[संप्रवदन्ते वैयाकरणाः]** सह वदन्तीत्यर्थः ।

**[संप्रवदन्ति शकुनयः]** पक्षिणो नानारुतं कुर्वन्तीत्यर्थः ॥छ॥

## अनोः कर्मण्यसति ॥३।३।८१॥

**[अनोः]** अनु पञ्चमी ङसि । 'ङित्यदिति' (१।४।२३) ओ । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[कर्मणि]** कर्मन् सप्तमी ङि ।

**[असति]** अस्तीति सन् । न सन् = असन् । 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् ।

**[अनुवदते चैत्रो मैत्रस्य]** यथा मैत्रो वदति तथा चैत्रो वदतीत्यर्थः ।

**[अनुवदते आचार्यस्य शिष्यः]** आचार्येण पूर्वमुक्ते पश्चाद् वदतीत्यर्थः ।

**[''वाचिक-षडिकौ न संवदेते'']** वाग्-आशिस् । अनुकम्पितो वागाशीः-वागाशीर्दत्तो वा । अनुकम्पितः षडंगुलिः-षडङ्गुलिर्दत्तो वा । 'अजातेर्नृनाम्नो बहुस्वरादियेकेलं वा' (७।३।३५) इकप्र० । प्रथमे 'षड्वर्जैकस्वरपूर्वपदस्य स्वरे' (७।३।४०) आशीरादिलोपः । द्वितीये 'द्वितीयाद् स्वरादूर्ध्वम्' (७।३।४१) अङ्गुलिलोप इति रूपसिद्धिः । 'धुटस्तृतीयः' (२।१।७६) ष०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

→ ड० । वाचिकश्च षडिकश्च = वाचिकषडिकौ । न प्रथमा सि । सम् 'वद व्यक्तायां वाचि' (९९८) वद् । वर्त्त० आते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'आतामाते-आथामाथे आदिः' (४।२।१२१) आ० → इ० । 'अवर्णस्ये०' (१।२।६) ए । मिथो विरुद्धयेत इत्यर्थः ॥छ॥

## ज्ञः ॥३।३।८२॥

[ज्ञः] ज्ञा पञ्चमी ङसि । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः ।

**[सर्पिषो जानीते]** सर्पिस् षष्ठी ङस् । 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । वर्त्त० ते । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'जा ज्ञा-जनोऽत्यादौ' (४।२।१०४) ज्ञा० → जा० । 'एषामी व्यञ्जनेऽदः' (४।२।९७) आ० → ई० ।

**[मधुनो जानीते]** मधु षष्ठी ङस् । 'अनाम्स्वरे नोऽन्तः' (१।४।६४) नोऽन्तः ।

सर्पिषा मधुना वा करणेन भोक्तुं प्रवर्त्तत इत्यर्थः । 'अज्ञाने ज्ञः षष्ठी' (२।२।८०) इति षष्ठी ।

**[तैलं सर्पिषो जानाति]** तैले(लं) सर्पिषो जानाति । तैल द्वितीया अम् । सर्पिस् । सर्पिषो भावः । 'भावे त्व-तल्' (७।१।५५) तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ । 'नाम्यन्तस्था०' (२।३।१६) षत्वम् । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । तया = तैलं सर्पिष्टया जानातीत्यर्थः ।

**["संभविष्याव एकस्यामभिजानासि मातरि"]** संभविष्याव इत्यत्र 'अयदि स्मृत्यर्थे भविष्यन्ती' (५।२।९) भविष्यन्ती । 'ज्ञांश् अवबोधने' (१५४०) ज्ञा, अभिपूर्व० । वर्त्त० सिव् । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'जा-ज्ञा-जनो-ऽत्यादौ' (४।२।१०४) ज्ञा० → जा० ॥छ॥

## उपात् स्थः ॥३।३।८३॥

[उपात्] उप पञ्चमी ङसि ।

[स्थः] स्था पञ्चमी ङसि । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः ।

**[भोजनकाल उपतिष्ठते]** भोजनकाल सप्तमी ङि । स्था उपपूर्व० । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु०' (४।२।१०८) तिष्ठ आदेशः ।

**[योगे योग उपतिष्ठते]** योग सप्तमी ङि । 'वीप्सायाम्' (७।४।८०) योगे सउं द्वित्वम् । उपतिष्ठते ।

**[ज्ञानमस्य ज्ञेयेषूपतिष्ठते]** संनिधीयत इत्यर्थः ॥छ॥

## समो गमृच्छि-प्रच्छि-श्रु-वित्-स्वरत्यर्त्ति-दृशः ॥३।३।८४॥

[समः] सम् पञ्चमी ङसि ।

**[गमृच्छिप्रच्छिश्रुवित्स्वरत्यर्त्तिदृशः]** गम् च ऋच्छिश्च प्रच्छिश्च श्रुश्च विच्च स्वरतिश्च अर्त्तिश्च दृश् च = तत्, तस्मात् ।

**[संगच्छते]** सम् अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'गमिषद्यमश्छः' (४।२।१०६) म० → छ० । 'स्वरेभ्यः' (१।३।३०) द्वित्वम् । 'अघोषे प्रथमोऽशिटः' (१।३।५०) छ० → च० ।

**[समृच्छते]** सम् 'ऋछत् इन्द्रियप्रलय-मूर्त्तिभावयोः' (१३४२) ऋछ् । वर्त्त० ते । 'तुदादेः शः' (३।४।८१) शप्र० →

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अ । 'स्वरेभ्यः' (१।३।३०) छस्य द्वित्वम् । 'अघोषे प्रथमोऽशिटः' (१।३।५०) छ० → च० ।

**[समृच्छिष्यते]** सम्-ऋच्छ् । भविष्यन्ती स्यते । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[संपृच्छते]** सम् 'प्रछंत् ज्ञीप्सायाम्' (१३४७) प्रछ् । वर्त्त० ते । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् प्र० → पृ० । 'स्वरेभ्यः' (१।३।३०) छस्य द्वित्वम् । 'अघोषे प्रथमोऽशिटः' (१।३।५०) छ० → च० ।

**[संशृणुते]** सम् 'श्रुंट् श्रवणे' (१२९६) श्रु । वर्त्त० ते । 'स्वादेः श्नुः' (३।४।७५) श्नुप्र० → नु । 'श्रौति-कृवु-धिवु-पा०' (४।२।१०८) श्रु० → शृ० । 'रषृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

नित्यपरस्मैपदिभिः साहचर्यात् ज्ञानार्थस्यैव विदेर्ग्रहणम्-

**[संवित्ते]** सम् 'विदक् ज्ञाने' (१०९९) विद् । वर्त्त० ते । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० ।

**[संस्वरते]** सम् 'औस्वृ शब्दोपतापयोः' (२१) स्वृ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

अर्त्तीति सामान्यनिर्देशात् भ्वादिरदादिश्च गृह्यते-

**[समृच्छते]** सम् 'ऋं प्रापणे च' (२६) ऋ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु०' (४।२।१०८) ऋ० → ऋच्छ० ।

**[समियृते]** सम् 'ऋंक् गतौ' (११३५) ऋ । वर्त्त० ते । 'हवः शिति' (४।१।१२) "ऋ" सउं द्वित्वम् । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'पृ-भृ-मा-हाङामिः' (४।१।५८) अ० → इ० । 'पूर्वस्याऽस्वे स्वरे योरियुव्' (४।१।३७) "इय्" आदेशः ।

**[संपश्यते]** सम् 'दृशृं प्रेक्षणे' (४९५) दृश् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु-पा०' (४।२।१०८) पश्य आदेशः ।।छ।।

## वेः कृगः शब्दे चानाशे ।।३।३।८५।।

**[वेः]** वि पञ्चमी ङसि ।

**[कृगः]** कृग् पञ्चमी ङसि ।

**[शब्दे]** शब्द सप्तमी ङि ।

**[च]** च प्रथमा सि ।

**[अनाशे]** न नाशोऽनाशः । 'अन् स्वरे' (३।२।१२९) अन्, तस्मिन् ।

**[विकुर्वते सैन्धवाः]** 'डुकृंग् करणे' (८८८) कृ, विपूर्व० । वर्त्त० अन्ते । 'कृग्-तनादेरुः' (३।४।८३) उविकरणु । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अतः शित्युत्' (४।२।८९) अ० → उ० । 'इवर्णादे०' (१।२।२१) उ० → व० । 'र्हादर्ह-स्वरस्यानु नवा' (१।३।३१) द्वित्वम् । 'अनतोऽन्तोऽदात्मने' (४।२।११४) नलोपः ।卐 सिन्धौ जाताः । 'जाते' (६।३।९८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । प्रथमा जस् ।

P. 卐 सिन्धुषु भवाः = सैन्धवाः । 'भवे' (६।३।१२३) अण्प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साधु दान्ताः शोभनं वल्गन्तीत्यर्थः ।

**[ओदनस्य पूर्णाश्छात्रा विकुर्वते]** ओदन षष्ठी ङस् । पूर्ण प्रथमा जस् । छात्र प्रथमा जस् । विकुर्वते । निष्फलं चेष्टन्त इत्यर्थः ।

**[क्रोष्टा विकुरुते स्वरान्]** 'क्रुशं आह्वान-रोदनयोः' (९८६) क्रुश् । क्रोशतीति । 'कृ-सि-कम्यमि-गमि-तनि-मनि-जन्यसि-मसि-सच्यवि-भा-धा-गा-ग्ला-म्ला-हनि-हा-या-हि-क्रुशि-पूभ्यस्तुन्' (उणा० ७७३) तुन्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'यज-सृज-मृज-राज०' (२।१।८७) श०→ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । पूर्वं 'क्रुशस्तुनस्तृच् पुंसि' (१।४।९१) तृजादेशः । प्रथमा सि । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८४) सि० → डा० आदेशः । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः । विकुरुते स्वरान् । नानोत्पादयतीत्यर्थः ।

**[विकरोत्यध्यायं, विकरोति शब्दम्]** विनाशयतीत्यर्थः ॥छ॥

## आङो यम-हनः, स्वेऽङ्गे च ॥३।३।८६॥

**[आङः]** आङ् पञ्चमी ङसि ।

**[यमहनः]** यमश्च हन् च = यमहन्, तस्मात् ।

**[स्वे]** स्व द्वितीया अम्(?) (सप्तमी ङि) ।

**[अङ्गे]** अङ्ग सप्तमी ङि ।

**[च]** च प्रथमा सि ।

**[आयच्छते]** 'यमूं उपरमे' (३८६) यम्, आङ्पूर्व० । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'गमिषद्यमश्छः' (४।२।१०६) म० → छ० । 'स्वरेभ्यः' (१।३।३०) द्वित्वम् । 'अघोषे प्रथमोऽशिटः' (१।३।५०) छ० → च० ।

**[आहते]** 'हनंक् हिंसा-गत्योः' (११००) हन्, आङ्पूर्व० । वर्त्त० ते । 'यमि-रमि-नमि-गमि-हनि-मनि-वनति-तनादेर्धुटि क्ङिति' (४।२।५५) नलोपः ।

**[आयच्छते पादम्]** आयच्छते पूर्ववत् । दीर्घीकरोतीत्यर्थः ।

**[आहते शिरः]** आहते पूर्ववत् । ताडयतीत्यर्थः ॥छ॥

## व्युदस्तपः ॥३।३।८७॥

**[व्युदः]** विश्च उद् च = व्युद्, तस्मात् ।

**[तपः]** तप् पञ्चमी ङसि ।

**[वितपते उत्तपते रविः]** वि-उत् 'तपं संतापे' (३३३) तप् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । दीप्यत इत्यर्थः ।

**[वितपते उत्तपते पाणिम्]** वितपते पाणिम् । उत्तपते पाणिम् । तापयतीत्यर्थः ।

**[निष्टपति]** निर्-तपति । 'निसस्तपेऽनासेवायाम्' (२।३।५५) षत्वम् ।

**[वितपति पृथिवीं सविता]** संतापयतीत्यर्थः ।

**[उत्तपति सुवर्णं सुवर्णकारः]** द्रवीकरोतीत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[**वहति नदी**] स्पन्दते इत्यर्थः । स्पन्दनाऽर्थे तु वहोऽकर्मकः ।।छ।।

**अणिक्कर्मणिक्कर्तृकाण्णिगोऽस्मृतौ** ।।३।३।८८।।

[**अणिक्कर्म**] न णिग् = अणिग् । 'नञत्' (३।२।१२५) न० → अ० । अणिगि कर्म = अणिक्कर्म ।

[**णिक्कर्तृकात्**] 卐 णिगि कर्त्ता यस्याऽसौ णिक्कर्तृकस्तस्मात् । 'ऋन्नित्यदितः' (७।३।१७१) कच्प्र० → क ।

[**णिगः**] णिग् पञ्चमी ङसि ।

[**अस्मृतौ**] न स्मृतिरस्मृतिः । 'नञत्' (३।२।१२५) न०→अ०, तस्याम् = अस्मृतौ । सप्तमी ङि । 'ङिर्डौ' (१।४।२५) ङि → डौ । 'डित्यन्त्यस्वरादेः' (२।१।११४) इलोपः ।

[**आरोहयते हस्ती हस्तिपकान्**] 'रुहं जन्मनि' (९८८) रुह्, आङ्पूर्व० । आरोहन्ति हस्तिनं हस्ति(प)काः, तान् हस्ति(प)कान् हस्तिनमारोहतः अनुकूलाचरणेन हस्त्येव प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । हस्त । हस्तोऽस्याऽस्तीति । 'हस्त-दन्त-कराज्जातौ' (७।२।६८) इन्प्र० । 'अवर्णवर्णस्य' (७।४।६८) अलोपः । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । हस्ति(प)क द्वितीया शस् । 'शसोऽता सश्च नः पुंसि' (१।४।४९) स० → न० - दीर्घश्च । आस्कन्दयते इत्यर्थः । हस्तिन उपरि आगच्छन्ति ते तान् आत्मन उपरि हस्ती आगमयतीत्यर्थः । अत्राप्यनेनैवाऽऽत्मनेपदम् ।

[**दर्शयते राजा भृत्यान् भृत्यैरिति वा**] 'दृशृं प्रेक्षणे' (४९५) दृश् । पश्यन्ति राजानं भृत्यास्तान् भृत्यान् राजानं पश्यतोऽनुकूलाचरणेन राजैव प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

[**पाययते मधु पायकान्**] 'पां पाने' (२) पा । पिबन्ति मधु पायकाः, तान् पायकान् मधुपिबतोऽनुकूलाचरणेन मध्वेव प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० → इ । 'आत ऐः कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् (?) ('पा-शा-छा-सा-वे-व्या-ह्वो यः' (४।२।२०) योऽन्तः ।) वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

[**आरोहयन्ति महामात्रेण हस्तिपकाः**] 'रुहं जन्मनि' (९८८) रुह्, आङ्पूर्व० । आरोहन्ति हस्तिनं हस्तिपकाः, तान् हस्तिपकान् हस्तिनमारोहतो महामात्रः प्रयुङ्क्ते । णिग्प्र० । तं महामात्रमारोहयन्तमनूकूलाचरणेन हस्तिपकाः प्रयुञ्जते । पुनरपि णिग् । 'णेरनिटि' (४।३।८३) पूर्वणिगूलोपः । ततो 'गति-बोधा०' (२।२।५) इत्यादिना न कर्मत्वं कर्तुः । वर्त्त० अन्ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

[**गणयते गणो गोपालकम्**] 'गणण् संख्याने' (१८७४) गण । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । 'अतः' (४।३।८२) अलोपः । गणयति गणो(णं) गोपालकः, तं गोपालकं गणं गणयन्तमनूकूलाचरणेन गोपालः(?) (गणः) प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ ।

P. 卐 णिगि कर्त्ता = णिक्कर्त्ता । अणिगवस्थायां यत् कर्म तदेव णिगवस्थायां कर्त्ता यस्य सोऽणिक्कर्मणिकर्तृकः । 'शेषाद् वा' (७।३।१७५) कच्प्र० → क । तस्मात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[दर्शयति प्रदीपो भृत्यान्]** 'दृशृं प्रेक्षणे' (४९५) दृश् । पश्यन्ति भृत्याः प्रदीपेन, तान् पश्यतोऽनुकूलाचरणेन प्रदीप एव प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । अत्र प्रदीपो भास्वरतया दर्शकः पुरुषान् प्रयुङ्क्ते इति विवक्षायां णिग् अकर्मकत्वे वा कर्मणेति कर्तुर्विकल्पेन कर्मत्वम्, सकर्मकत्वे तु 'गति-बोधा-ऽऽहारार्थ०' (२।२।५) इति कर्तुर्नित्यं कर्मत्वं ज्ञेयम् । अत्राऽऽत्मनेपदं भवत्येव णिग् इति गकारानुबन्धग्रहणात् ।

**[लावयति केदारं चैत्रः]** लुनाति केदारं चैत्रः, स एवं विवक्षिते नाहं लुनामि, अपि तु लूयते केदारः स्वयमेव, तं केदारं लूयमानं चैत्रः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । नित्याऽकर्मकत्वात् 'गति-बोधा०' (२।२।५) इति अणिक्कर्तुः कर्मत्वम् ।

**[आरोहन्ति हस्तिनं हस्तिपकाः, तानेनमारोहयति महामात्रः]** आरोहन्ति हस्तिनं हस्तिपकास्तान् हस्तिपकान् हस्तिनमारोहतो महामात्रः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । अत्राऽणिक्कर्मणो न णिगि सति कर्तृत्वं न महामात्रस्य कर्तृत्वं न हस्तिकात्(?) (पकान्) इत्यर्थः ।

**[आरोहन्ति हस्तिनं हस्तिपकाः, तानारोहयते हस्ती]** तानारोहयते हस्ती आरोहति(न्ति) हस्तिनं हस्ति(प)कास्तान् आरोहमाणान् हस्ती प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । णिगः प्राग् आत्मनेपदं मा भूदित्यर्थः ।

**[स्मरयत्येनं वनगुल्मः]** 'स्मृं चिन्तायाम्' (१८) स्मृ । स्मरति वनगुल्मं कोकिलः, तं कोकिलं वनं स्मरन्तमनुकूलाचरणेन वनगुल्मः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । 'घटादेर्ह्रस्वो दीर्घस्तु वा ञि-णम्परे' (४।२।२४) ह्रस्वः ।

**[घातयत्यात्मा]** 'हनंक् हिंसा-गत्योः' (११००) हन् । हन्ति अन्तरात्मानं बाह्यं वा चौरस्य राजा, तमेकं घ्नन्तमपरो बाह्यः-अन्तरो वा प्रयुङ्क्ते इति युक्तिः, अत्र अपरो बाह्यः शारीरलक्षणः, आत्मा-ज्ञान-माया-जीवश्चान्तर इति । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'ञ्णिति घात्' (४।३।१००) "घात्" आदेशः ।

**[शोषयते व्रीहीनातपः]** 'शुषंच् शोषणे' (१२०८) शुष् । शुष्यन्त्यातपे व्रीहयः, तान् व्रीहीनातपे शुष्यतोऽनुकूलाचरणेनाऽऽतप एव प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । कृषीवल्यादेः प्रशंसादिकं फलं फलवत्कर्त्तरि भविष्यति, रुहिरास्कन्दने वर्त्तन आरोहन्ति आस्कन्दन्ति विलगन्ति उत्कंसन्ति(ते) इत्यर्थः ।

**[लावयते केदारः]** 'लूग्श् छेदने' (१५१९) लू । लुनाति केदारं चैत्रः, स एवं विवक्षिते नाहं लुनामि, किन्तु लूयते केदारः स्वयमेव, तं केदारं लूयमानं चैत्रः प्रयुङ्क्ते । लावयति केदारं चैत्रः, स एवं विवक्षिते नाहं लावयामि, अपि तु लावयते केदारः स्वयमेव ।

**[भूषयते कन्या]** 'भूष अलंकारे' (१७५६) भूष् । भूषयति कन्यां चैत्रः, स एवं विवक्ष्यते नाहं भूषयामि, किन्तु भूष्यते कन्या स्वयमेव, तां भूषयमाणां चैत्रः प्रयुङ्क्ते । भूषयते कन्यां चैत्रः, स एवं विवक्ष्यते नाहं भूषयामि, अपि तु भूषयते कन्या स्वयमेव ।

**[कारयते कटः]** 'डुकृंग् करणे' (८८८) कृ । करोति कटं चैत्रः, स एवं विवक्षिते नाहं करोमि, किन्तु क्रियते कटः स्वयमेव ।

**[गणयते गणः]** 'गणण् संख्याने' (१८७४) गण । 'चुरादि०' (३।४।१७) णिच्प्र० → इ । गणयति गणं गोपालकः, स एवं विवक्षिते नाहं गणयामि, किन्तु गण्यते केदारः (?) (गणः) स्वयमेव, तं गणं गण्यमानं गोपालकः प्रयुङ्क्ते । गणयति गणं गोपालकः, स एवं विवक्षिते नाहं गणयामि, अपि तु गणयते गणः स्वयमेव ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[आरोहयते हस्ती स्वयमेव]** 'रुहं जन्मनि' (९८८) रुह्, आङ्पूर्व० । आरोहति हस्तिपकः, स एवं विवक्षिते नाहं आरोहामि, किन्तु आरुह्यते हस्ती स्वयमेव, तं हस्तिनमारुह्यमाणं हस्तिपकः प्रयुङ्क्ते । आरोहयति हस्तिनं हस्तिपकः स एवं विवक्षिते नाहं आरोहयामि, अपि तु आरोहयते हस्ती स्वयमेव इत्यादौ कर्मस्थक्रियात्वात् 'एकधातौ कर्मक्रिययैकाऽकर्मक्रिये' (३।४।८६) इत्यनेनैवात्मनेपदं भवति ।

**[आरुह्यते हस्ती स्वयमेव]** आरुह्यते हस्ती स्वयमेव इत्यस्यां प्रकृतौ भवः प्राकृतोऽर्थः न्यग्भवनलक्षणः णिज् इति मतान्तरेण, स्वमते तु णिग् इति ।।छ।।

## प्रलम्भे गृधि-वञ्चेः ।।३।३।८९।।

**[प्रलम्भे]** प्र 'डुलभिंष् प्राप्तौ' (७८६) लभ् । प्रलम्भनम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'उपसर्गात् खल्घञोश्च' (४।४।१०७) नोऽन्तः । सप्तमी ङि ।

**[गृधिवञ्चेः]** गृधिश्च वञ्चिश्च = गृधिवञ्चि, तस्मात् ।

वञ्चने प्रतारणे मिथ्याफलाख्याने इति यावत् ।

**[बटुं गर्धयते]** 'गृधौ(धू)च् अभिकाङ्क्षायाम्' (११८७) गृध् । गृध्यति वञ्चनायोग्यो भवति बटुस्तं 卐 गृध्यन्तमन्यः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । नित्याकर्मकत्वादणि-(क्)कर्तुः कर्मत्वम् ।

**[बटुं वञ्चयते]** 'वञ्चिण् प्रलम्भने' (१८०५) वञ्च् । 'चुरादि०' (३।४।१७) णिजि(चि) सिद्धं णिगन्तस्य तु विध्यर्थम् । वञ्च(य)ति(ते) बटुस्तं वञ्चयन्तमन्यः(?) वञ्चयमानमन्यः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । प्रतारयतीत्यर्थः ।

**[श्वानं गर्धयति]** श्वन् द्वितीया अम् । 'नि दीर्घः' (१।४।८५) दीर्घः आ । गर्धयति=विलोभयतीत्यर्थः । अत्र फलवत्त्वेऽपि नात्मनेपदम्, 'अणिगि प्राणिकर्तृकानाप्याण्णिगः' (३।३।१०७) निषेधात् ।

**[अहिं वञ्चयति]** अहि द्वितीया अम् । वञ्चयति=गमयतीत्यर्थः ।।छ।।

## लीङ्-लिनोऽर्चा-ऽभिभवे चाऽऽच्चाऽकर्त्तर्यपि ।।३।३।९०।।

**[लीङ्लिनः]**+ लीङ् च लिन् च = लीङ्लिन्, तस्मात् ।

**[अर्चाऽभिभवे]** अभिभवनं = अभिभवः । 'भू-श्र्यदोऽल्' (५।३।२३) अल्प्र० → अ । अर्चा च अभिभवश्च = अर्चाऽभिभवम्, तस्मिन् ।

**[च]** च प्रथमा सि ।

**[आत्]** आत् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[अकर्त्तरि]** न कर्त्ता = अकर्त्ता, तस्मिन् = अकर्तरि, सप्तमी ङि ।

**[अपि]** अपि प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

---

P. 卐 यजमानः ।

P. + लीङ् च लिनाश्च = लीङ्लिनाः, तस्मात् = लीङ्लिनः । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अर्चा- **[जटाभिरालापयते]** 'अर्च(र्चि)ण् पूजायाम्' (१९५४) अर्च् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । अर्चणं = अर्चा । 'क्तेटो गुरोर्व्यञ्जनात्' (५।३।१०६) अप्र० । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ । जटा तृतीया भिस् । 'लीङ्च् श्लेषणे' (१२४८) ली । 'लींश् श्लेषणे' (१५२६) ली, आङ्पूर्व० । 卐आलीयन्तं +आली(लि)नन्तं वा प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । अनेन आकारः । 'अर्त्ति-री-व्ली-ह्री०' (४।२।२१) पोऽन्तः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । परैरात्मानं पूजयतीत्यर्थः ।

**[श्येनो वर्त्तिकामपलापयते]** 'वृतूङ् वर्त्तने' (९५५) वृत् । वर्त्तते । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'वौ वर्त्तिका' (२।४।११०) इ । 'आत्' (२।४।१८) आप्प्र० → आ । अपलीयमानं अपली(लि)नन्तं वा प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । अनेन ई० → आ० । 'अर्त्ति-री-व्ली०' (४।२।२१) पोऽन्तः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । अभिभवतीत्यर्थः ।

**[कस्त्वामुल्लापयते]** किम् प्रथमा सि । 'किमः कस्तसादौ च' (२।१।४०) किम्० → क० । 'सो रुः' (२।१।७२) स० → र० । युष्मद् द्वितीया अम् । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ । 'त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्' (२।१।११) त्वादेशः । 'अमौ मः' (२।१।१६) अम्० → म्० । 'युष्मदस्मदोः' (२।१।६) द० → आ० । 'समानानां०' (१।२।१) दीर्घः । उत् 'लीङ्च् श्लेषणे' (१२४८) ली । उल्लीयसे, तं उल्लीयमानं कः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । अनेन ई० → आ० । 'अर्त्ति-री-व्ली-ह्री-क्नूयि०' (४।२।२१) पोऽन्तः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । वञ्चयत इत्यर्थः ।

**[बालकमुल्लापयति]** उल्लीयते उल्लिनाति वा कश्चित्, तं उल्लीयन्तं(मानं) उल्लिनन्तं वा अन्यः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'अर्त्ति-री-व्ली-ह्री०' (४।२।२१) पोऽन्तः । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'लि लौ' (१।३।६५) दस्य ल० । आत्ममेपदाभावे आत्वस्याऽप्यभावः प्राप्नोति तस्यप्ये(?) भ्वादिष्वेव विधानादित्याशंकार्थं कथं तर्ह्यात्वम् ?, 'लीङ्-लिनोर्वा' (४।२।९) इति चतुर्थाध्यायद्वितीयपादसूत्रेण भविष्यति ।

**[जटाभिरालाप्यते जटिलेन]** आलीयते आलिनाति वा कश्चित्, तं आलीयमानं आलिनन्तं वा अन्यः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । अनेन ई० → आ० । 'अर्त्ति-री-व्ली०' (४।२।२१) पोऽन्तः । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'णेरनिटि' (४।३।८३) णिग्लोपः । ङिच्छ्नानिर्देशो यौजादिक 'लीण् द्रवीकरणे' (१९४२) इत्यस्य निवृत्त्यर्थः ॥छ॥

**स्मिङः प्रयोक्तुः स्वार्थे** ॥३।३।९१॥

**[स्मिङः]** स्मिङ् पञ्चमी ङसि ।

**[प्रयोक्तुः]** प्रयोक्तृ पञ्चमी ङसि । 'ऋतो डुर्' (१।४।३७) डुर् ।

**[स्वार्थे]** स्वश्चासावर्थश्च = स्वार्थस्तस्मिन् ।

तत्पुरुषो वा कार्यः ।

---

P. 卐 आलीयते कश्चित्, तं आलीयमानं जटिलः प्रयुङ्क्ते ।

P. + आलिनाति कश्चित्, तं आलिनन्तं जटिलः प्रयुङ्क्ते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[जटिलो विस्मापयते-]** जटिल प्रथमा सि । 'ष्मिङ् ईषद्धसने' (५८७) ष्मि । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्मि, विपूर्व० ।卐 विस्मयमानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । अनेन इ० → आ० । 'अर्त्ति-री-व्ली-ह्री०' (४।२।२१) पोऽन्तः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[रूपेण विस्माययति]**+ विस्मयमानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[विस्मापनम्]** विस्मापि पूर्ववत् । विस्माप्यते । 'अनट्' (५।३।१२४) अनट्प्र० → अन । 'णेरनिटि' (४।३।८३) णिग्लोपः । सि-अम् ।

**[सेष्माययति]** 'ष्मिङ् ईषद्धसने' (५८७) ष्मि । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्मि । भृशं पुनः पुनर्वा स्मयते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) स्मि सउं द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) मलोपः । 'आ-गुणावन्यादेः' (४।१।४८) ए । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । सेष्मेति सेष्मयीति वा कश्चित्, तं सेष्मयन्तमन्यः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।।छ।।

### विभेतेर्भीष् च ।।३।३।९२।।

**[विभेतेः]** विभेति पञ्चमी ङसि ।

**[भीष्]** भीष् प्रथमा सि ।

**[च]** च प्रथमा सि ।

**[मुण्डो भीषयते भापयते वा]** मुण्ड प्रथमा सि । 'ञिभीक् भये' (११३२) भी । ˣ बिभ्यन्त(तं) प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । अनेन भी० → भीष्-आकारश्च । 'अर्त्ति-री-व्ली-ह्री-क्नूयि०' (४।२।२१) पोऽन्तः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[कुञ्चिकया भाययति]** भी । बिभ्यन्तं(तं) प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[भीषा भापनम्]** भी । बिभ्यन्तं(तं) प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । अनेन भीष-आकारश्च । 'अर्त्ति-री०' (४।२।२१) पोऽन्तः । ★भीषणं = भीषा । भाप्यते = भापनम् । प्रथमे 'भीषि-भूषि-चिन्ति-पूजि-कथि-कुम्बि-चर्चि-स्पृहि-तोलि-दोलिभ्यः' (५।३।१०९) अङ्प्र० → अ । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ । द्वितीये *'णि-वेत्त्यास-श्रन्थ-घट्ट-वन्देरनः' (५।३।१११) अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लोपः । सि-अम् ।

---

P. 卐 विस्मयते कश्चित्, तं विस्मयमानं अन्यः प्रयुङ्क्ते ।

P. + रूपेण विस्मयते कश्चित्, तं विस्मयमानमन्यः प्रयुङ्क्ते ।

P. x विभेति कश्चित्, तं बिभ्यन्तं(तं) मुण्डः प्रयुङ्क्ते ।

P. ★ भीष्यत इति ।

P. * 'अनट्' (५।३।१२४) अनट्प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[मुण्डो बेभाययति]** मुण्ड प्रथमा सि । 'ञिभीक् भये' (११३२) भी । भृशं पुनः पुनर्वा बिभेति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) भी सउं द्वित्वम् । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'आ-गुणावन्यादेः' (४।१।४८) ए । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । बि(बे)भेति बि(बे)भयीति वा जनस्तं बि(बे)भयन्तं(तं) मुण्डः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।।छ।।

## मिथ्याकृगोऽभ्यासे ।।३।३।९३।।

**[मिथ्याकृगः]** मिथ्यायुक्तः कृग् = मिथ्याकृग्, तस्मात् । मयूरव्यंसकादित्वात् युक्तशब्दलोपः । यद्वा मिथ्याशब्दः 'सहार्थे' (२।२।४५) तृतीयैकवचने 'लुगाऽऽतोऽनापः' (२।१।१०७) इत्यालोपः । 'अव्ययस्य' (३।२।७) इति टालोपो वा, तदा युक्तार्थस्तृतीयैव कथ्यते ।

**[अभ्यासे]** 'असूच् क्षेपणे' (१२२१) अस्, अभिपूर्व० । अभ्यसनमभ्यासः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ, तस्मिन् ।

अभ्यासः पुनः पुनः क्रियाभ्यावृत्तिः ।

**[पदं मिथ्या कारयते]** 'पदिंच् गतौ' (१२५७) पद् । पद्यते=गम्यतेऽर्थोऽनेनेति पदम् । 'वर्षादयः क्लीबे' (५।३।२९) अल्प्र० → अ । द्वितीया अम् । मिथ्या 'क्रियाविशेषणात्' (२।२।४१) अम् । 'अव्ययस्य' (३।२।७) अम्लोपः । कुर्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । अत्र कृताभीक्ष्ण्यार्थे द्विर्वचनस्य वाक्यस्यैकदेशोऽयमुक्तः, प्रयोगस्त्वेवं कर्त्तव्यः – पदं मिथ्या कारयति, पदं मिथ्या कारयते कश्चित् स्वरादिदोषदुष्टमुच्चरति, तं सभायामुपहासार्थं कश्चित् खलो वदति, पुनर्ब्रूहि पुनर्ब्रूहीति स एवमुच्यते, स्वमते तु द्विर्वचनं भवत्येव, यतः शक्तिस्वाभाव्यात् केवलेनात्मना पदेनाभ्यासो वक्तुं न शक्यते, यथा भोजं भोजं व्रजतीत्यादावाभीक्ष्ण्ये आगतोऽपि ख्णम् द्विर्वचनमाकांक्षतीति पदं मिथ्या कारयते इति प्रयोगो ज्ञेयः, वृत्तौ तु एकदेशेनोदाहारि ।

**[पदं मिथ्या वाचयति]** 'वचंक् भाषणे' (१०९६) वच् । वचन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।।छ।।

## परिमुहा-ऽऽयमा-ऽऽयस-पा-ट्धे-वद-वस-दमा-ऽऽद-रुच-नृतः फलवति ।।३।३।९४।।

**[परिमुहाऽऽयमाऽऽयसपाट्धेवदवसदमाऽऽदरुचनृतः]** 卐 परिमुहश्च आयम् च आयस् च पाश्च +ट्धे च वदश्च वसश्च दमश्च अदश्च रुचश्च नृच्च = परिमुहाऽऽयमाऽऽयसपाट्धेवदवसदमाऽऽदरुचनृत्, तस्मात् ।

**[फलवति]** पल (९८२) - 'फल गतौ' (९८३) फल् । फलतीति । 'अच्' (५।१।४९) अच्प्र० → अ । *फलमस्याऽस्तीति फलवान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तो०' (२।१।९४) म० → व०, तस्मिन् ।

---

P. 卐 परिमुह् च ।

P. + ट्धेश्च ।

P. * फलं विद्यते यस्य सः = फलवान् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[परिमोहयते चैत्रम्]** मुहौच् वैचित्त्ये' (१२३८) मुह्, परिपूर्व० । परिमुह्यति चैत्रस्तं परिमुह्यन्तं मैत्रः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । चैत्रमित्यत्र नित्याकर्मकत्वात् 'गति-बोधा-ऽऽहारार्थ०' (२।२।५) इति कर्मत्वम् ।

**[आयामयते सर्पम्]** 'यमूं उपरमे' (३८६) यम्, आङ्पूर्व० । 卐 आयच्छते सर्पस्तमायच्छमानं गारुडिकः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । कश्चित् यमः परिवेषणे इति पठति तन्मताभिप्रायेणेदम्, स्वमते तु 'यमोऽपरिवेषणे णिचि च' (४।२।२९) इत्यनेन ह्रस्वत्वं भवत्येव ।

**[आयासयते मैत्रम्]** 'यसूच् प्रयत्ने' (१२२२) यस्, आङ्पूर्व० । आयस्यति चैत्रस्तमायस्यन्तं मैत्रः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[पाययते बटुम्]** 'पां पाने' (२) पा । पिबति बटुस्तं पिबन्तं यजमानः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'पा-शा-छा-सा-वे-व्या-ह्वो यः' (४।२।२०) योऽन्तः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[धापयते शिशुम्]** 'ट्धें पाने' (२८) धे । 'आत् सन्ध्यक्षरस्य' (४।२।१) धा । धयति शिशुस्तं धयन्तं माता प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'अर्त्ति-री-व्ली०' (४।२।२१) पोऽन्तः ।

**[वादयते शिशुम्]** 'वद व्यक्तायां वाचि' (९९८) वद् । वदति शिशुस्तं वदन्तमन्यः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

**[वासयते पान्थम्]** 'वसं निवासे' (९९९) वस् । वसति पान्थस्तं वसन्तं कश्चित् प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

**[दमयतेऽश्वम्]** शमू (१२३०) - 'दमूच् उपशमे' (१२३१) दम् । दाम्यति अश्वस्तं दाम्यन्तमन्यः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'अमोऽकम्यमि-चमः' (४।२।२६) ह्रस्वः ।

**[आदयते चैत्रेण]** 'अदं भक्षणे' (१०५९) अद् । अत्ति=भक्षयति चैत्रस्तमदन्तं मैत्रः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'ञ्णिनि' (४।३।५०) उपान्त्यवृद्धिः ।

**[रोचयते मैत्रम्]** 'रुचि अभिप्रीत्यां च' (९३८) रुच् । रोचते मैत्रस्तं रोचमानं चैत्रः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[नर्त्तयते नटम्]** 'नृतैच् नर्त्तने' (११५२) नृत् । नृत्यति नटस्तं नटं नृत्यन्तमन्यः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

पिबत्यत्तिट्धेधातूनामाहारार्थत्वाद**औदासीन्यनिवृत्त्यर्थतायाम**कर्मकत्वाच्च नृतेश्चलनार्थत्वाच्च शेषाणां स्वरूपतो विवक्षातो वाऽकर्मकत्वादुत्तराभ्यां परस्मैपदे प्राप्ते वचनम् ।

**[औदासीन्यनिवृत्त्यर्थतायाम्]** औदासीन्यं-निःक्रियत्वं, तस्य निवृत्तिः-सार्थो यस्य, तस्य भावः । 'भावे त्व-तल्' (७।१।५५) तल्प्र० । 'आत्' (२।४।१८) आप्प्र० → आ, तस्याम् ।

P. 卐 आयच्छति सर्पस्तमायच्छन्तं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[वस्ते मैत्रो न नग्नः]** 'वसिक् आच्छादने' (१११७) वस् । वर्त्त० ते ।

**[वासयति मैत्रम्]** वसन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।।छ।।

## ई-गितः ।।३।३।९५।।

**[ईगितः]** ईश्च ग् च = ईगौ, ईगावितावनुबन्धौ यस्याऽसौ ईगित्, तस्मात् ।

**[यजते]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[लक्षयते]** 'लक्षीण् दर्शना-ऽङ्कनयोः' (१७१९) लक्ष् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[बिभृते]** 'डुभृंग्क् पोषणे च' (११४०) भृ । वर्त्त० ते । 'हवः शिति' (४।१।१२) भृ सउं द्वित्वम् । 'ऋतोऽत्' (४।१।३८) भृ० → भ० । 'पृ-भृ-मा-हाङामिः' (४।१।५८) इ । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० ।

**[कण्डूयते]** 'कण्डूग् गात्रविघर्षणे' (१९९१) कण्डू, सू(सौ)त्रोऽयं धातुः । 'धातोः कण्ड्वादेर्यक्' (३।४।८) यक्प्र० → य । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[गमयते]** अम (९३२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । गच्छन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'अमोऽकम्यमि-चमः' (४।२।२६) ह्रस्वः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[चोरयति]** 'चुरण् स्तेये' (१५६८) चुर् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[यजन्ति याजकाः]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । यजन्तीति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । प्रथमा जस् । 'अत आ स्यादौ जस्-भ्याम्-ये' (१।४।१) आ । 'समानानां०' (१।२।१) दीर्घः । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[पचन्ति पाचकाः]** 'डुपचींष् पाके' (८९२) पच् । पचन्तीति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । प्रथमा जस् । 'अत आ स्यादौ०' (१।४।१) आ । 'समानानां०' (१।२।१) दीर्घः । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[कुर्वन्ति कर्मकराः]** कर्म 'डुकृंग् करणे' (८८८) कृ । कर्म-कर्माणं वा कुर्वन्तीति कर्मकराः । 'भृतौ कर्मणः' (५।१।१०४) टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । प्रथमा जस् । शेषं पूर्ववत् ।

**[शोषयते व्रीहीनातपः]** 'शुषंच् शोषणे' (१२०८) शुष् । शुष्यन्त्यातपे व्रीहयः, तान् व्रीहीन् शुष्यतोऽनुकूलाचरणेनातप एव प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । शोषणक्रियाफलं हि तदुपयोगयोगयोगिनौ व्रीहिस्वामिन एव न त्वातपस्येति असद्विवक्ष(क्ष्य)ते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णिगर्थ एवेत्यत्र अनेकार्थत्वाद्धातूनां तिरस्कारपूर्वको व्यापारः, प्रेषणा-सत्कारपूर्वको व्यापारोऽध्येषणा प्रतिविधानमित्यपरं नाम यस्य [पचते] पाचयतीत्यर्थः ।

**[केशश्मश्रु वपते]** केशाश्च श्मश्रूणि च = केशश्मश्रु । द्वितीया अम् । 'प्राणि-तूर्याङ्गाणाम्' (३।१।१३७) इत्येकत्वं एव ते वापयति मुण्डयतीत्यर्थः ।

**[वेदो वैधर्म्यं विधत्ते]** वेद प्रथमा सि । धर्म । धर्मादनपेतम् । 'हृद्य-पद्य-तुल्य-मूल्य-वश्य-पथ्य-वयस्य-धेनुष्या-गार्हपत्य-जन्य-धर्म्यम्' (७।१।११) धर्म्यनिपातः । द्वितीया अम् । विधत्ते = विधापयतीत्यर्थः ।

यदाहुः - क्रीणीष्व वपते धत्ते, मिनुते चिनुतेऽपि च ।
आप्तप्रयोगा दृश्यन्ते, येषु ण्यर्थोऽभिधीयते ॥१॥ ॥छ॥

## ज्ञोऽनुपसर्गात् ॥३।३।९६॥

**[ज्ञः]** ज्ञा पञ्चमी ङसि । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः ।

**[अनुपसर्गात्]** न विद्यते उपसर्गो यस्य सः = अनुपसर्गस्तस्मात् ।

अकर्मकात् 'ज्ञः' (३।३।८२) इति सूत्रेण सिद्धे सकर्मकार्थं वचनम् ।

**[गां जानीते]** गो द्वितीया अम् । 'आ अम्-शसोऽता' (१।४।७५) आ । 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । वर्त्त० ते । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'जा ज्ञा-जनोऽत्यादौ' (४।२।१०४) जा । 'एषामी व्यञ्जनेऽदः' (४।२।९७) ई ।

**[अश्वं जानीते]** अश्व द्वितीया अम् । जानीते पूर्ववत् ॥छ॥

## वदोऽपात् ॥३।३।९७॥

**[वदः]** वद् पञ्चमी ङसि ।

**[अपात्]** अप पञ्चमी ङसि ।

**[एकान्तमपवदते]** एकान्त द्वितीया अम् । अप 'वद व्यक्तायां वाचि' (९९८) वद् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । स्वर्गापवर्गादिकं कथयन्नेकान्तं निराकरोतीत्यर्थः ।

**[अपवदति परं स्वभावतः]** स्वकीयो भावः = स्वभावः । स्वभावान्(त्) = स्वभावतः । 'आद्यादिभ्यः' (७।२।८४) तसुप्र० → तस् ॥छ॥

## समुदाङो यमेरग्रन्थे ॥३।३।९८॥

**[समुदाङः]** सम् च उद् च आङ् च = समुदाङ्, तस्मात् ।

**[यमेः]** यमि पञ्चमी ङसि ।

**[अग्रन्थे]** न ग्रन्थोऽग्रन्थस्तस्मिन् ।

**[संयच्छते व्रीहीन्, उद्यच्छते भारम्, आयच्छते वस्त्रम्]** सम्-उत्-आङ् 'यमूं उपरमे' (३८६) यम् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'गमिषद्यमश्छः' (४।२।१०६) म० → छ० । 'स्वरेभ्यः' (१।३।३०) छस्य द्वित्वम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अघोषे प्रथमोऽशिटः' (१।३।५०) छ० → च० । संबध्नाति-उत्पाटयति-दीर्घीकरोतीत्यर्थः ।

**[वैद्यश्चिकित्सामुद्यच्छति]** वैद्य प्रथमा सि । 'कित निवासे' (२८६) कित् । 'कितः संशय-प्रतीकारे' (३।४।६) सन्प्र० । 'सन्-यङश्च' (४।१।३) कित् सउं द्विर्वचनम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) तलोपः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । चिकित्स्यते अस्याः । 'शंसि-प्रत्ययात्' (५।३।१०५) अप्र० तदा बाहुलकात् स्त्रीत्वं आप्, सा चासौ ग्रन्थश्च = चिकित्साग्रन्थस्तस्मिन् उद्यमं करोतीत्यर्थः ॥छ॥

## पदान्तरगम्ये वा ॥३।३।९९॥

**[पदान्तरगम्ये]** एकस्मात् पदादन्यत्पदं = पदान्तरम्, पदान्तरेण गम्यते = पदान्तरगम्यः । 'शकि-तकि-चति-यति-शसि-सहि-यजि-भजि-पवर्गात्' (५।१।२९) यप्र०, तस्मिन् । 'परिमुहा-ऽऽयमा०' (३।३।९४) इत्यादि सूत्रं पञ्चकस्य क्रमेणोदाहरणानि दर्शयति(न्ति) ॥छ॥

## शेषात् परस्मै ॥३।३।१००॥

**[शेषात्]** शेष पञ्चमी ङसि ।

**[परस्मै]** परार्थं पदं = परस्मैपदम् । 'ते लुग्वा' (३।२।१०८) पदलोपः । अयमपि प्रत्ययनियमो न प्रकृतिनियम इति दर्शयति पूर्वप्रकरणेत्यादिनेति अनुबन्धोपलक्षिताः प्रकृतयो गृह्यन्ते इति क्रमेणोदाहरति-

**[बोभवीति]** 'भू सत्तायाम्' (१) भू । भृशं पुनः पुनर्वा भवति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) भू सउं द्वित्वम् । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । वर्त्त० तिव् । 'यङ्-तु-रु-स्तोर्बहुलम्' (४।३।६४) ईत् → ई० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[दीव्यति]** 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव् । वर्त्त० तिव् । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः ।

**[मन्तूयति]** 'मन्तु रोष-वैमनस्ययोः' (१९९६) मन्तु इति सूत्रोऽयं धातुः । 'धातोः कण्ड्वादेर्यक्' (३।४।८) यक्प्र० → य । 'दीर्घश्च्वि०' (४।३।१०८) दीर्घः ।

**[आगच्छति]** आगच्छतीत्यत्र 'समो गमृच्छि-प्रच्छि-श्रु-वित्-स्वरत्यर्त्ति-दृशः' (३।३।८४) ।

**[करोति]** करोतीत्यत्र 'गन्धना-ऽवक्षेप-सेवा-साहस-प्रतियत्न-प्रकथनोपयोगे' (३।३।७६) ।

**[नयति]** नयतीत्यत्र 'पूजा-ऽऽचार्यक-भृत्युत्क्षेप-ज्ञान-विगणन-व्यये नियः' (३।३।३९) ।

**[गृहे संचरति]** गृहे संचरत्यत्र 'समस्तृतीयया' (३।३।३२) ।

**[साधु पदं कारयति]** अत्र 'मिथ्याकृगोऽभ्यासे' (३।३।९३) ।

**[मुमूर्षति]** 'मृंत् प्राणत्यागे' (१३३३) मृ । मर्तुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः । 'ओष्ठ्यादुर्' (४।४।११७) मुर् । 'सन्-यङश्च' (४।१।३) ''मुर्''द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) रलोपः । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**परानोः कृगः** ।।३।३।१०१।।

**[परानोः]** परश्च (परा च) अनुश्च = परानु, तस्मात् ।

**[कृगः]** कृग् पञ्चमी ङसि ।।छ।।

**प्रत्यभ्यतेः क्षिपः** ।।३।३।१०२।।

**[प्रत्यभ्यतेः]** प्रतिश्च अभिश्च अतिश्च = प्रत्यभ्यति, तस्मात् ।

**[क्षिपः]** क्षिप् पञ्चमी ङसि ।

**[प्रतिक्षिपति, अभिक्षिपति, अतिक्षिपति बटुम्]** 'क्षिपींत् प्रेरणे' (१३१७) क्षिप्, प्रति-अभि-अतिपूर्व० । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) शप्र० → अ ।

**प्राद्वहः** ।।३।३।१०३।।

**[प्रात्]** प्र पञ्चमी ङसि ।

**[वहः]** वह् पञ्चमी ङसि ।

**[प्रवहति]** प्र 'वहीं प्रापणे' (९९६) वह् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।।छ।।

**परेर्मृषश्च** ।।३।३।१०४।।

**[परेः]** परि पञ्चमी ङसि ।

**[मृषः]** मृष् पञ्चमी ङसि ।

**[परिमृष्यति]** परि 'मृषींच् तितिक्षायाम्' (१२८४) मृष् । वर्त्त० तिव् । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य ।

**[परिवहति]** परि 'वहीं प्रापणे' (९९६) वह् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।।छ।।

**व्याङ्-परे रमः** ।।३।३।१०५।।

**[व्याङ्परेः]** विश्च आङ् च परिश्च = व्याङ्परि, तस्मात् ।

**[रमः]** रम् पञ्चमी ङसि ।

**[विरमति, आरमति, परिरमति]** वि-आङ्-परि 'रमिं क्रीडायाम्' (९८९) रम् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।।छ।।

**वोपात्** ।।३।३।१०६।।

**[वा]** वा प्रथमा सि ।

**[भार्यामुपरमति उपरमते वा]** भार्या द्वितीया अम् । उप 'रमिं क्रीडायाम्' (९८९) रम् । वर्त्त० तिव्-ते । 'कर्त्तर्यनद्भ्यः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शव्' (३।४।७१) शव् । भार्यामुप = संप्राप्य क्रीडति रमयतीति चे(वे)त्यर्थः ।

**[उपरमति उपरमते वा संतापः]** पुनरुपपूर्वोऽप्यकर्मको रमि दर्शयति ॥छ॥

## अणिगि प्राणिकर्तृकानाप्याण्णिगः ॥३।३।१०७॥

**[अणिगि]** न णिग् = अणिग्, तस्मिन् ।

**[प्राणिकर्तृकानाप्यात्]** 'अन प्राणने' (१०८९) अन्, प्रपूर्व० । प्राणन्ति प्राणिन एभिरिति प्राणाः । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'द्वित्वेऽप्यन्तेऽप्यनितेः, परेस्तु वा' (२।३।८१) णत्वम् । प्राणा विद्यन्ते यस्य सः = प्राणी । 'अतोऽनेकस्वरात्' (७।२।६) इन् । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । प्राणी कर्त्ता यस्याऽसौ प्राणिकर्तृकः । 'ऋन्नित्यदितः' (७।३।१७१) कच्प्र० → क । न विद्यते आप्यं=कर्म यस्याऽसौ अनाप्यः । प्राणिकर्तृकश्चासौ अनाप्यश्च = प्राणिकर्तृकानाप्यस्तस्मात् ।

**[णिगः]** णिग् पञ्चमी ङसि ।

**[आसयति चैत्रम्]** 'आसिक् उपवेशने' (१११९) आस् । आस्ते चैत्रस्तं आसीनं चैत्रं मैत्रः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ ।

**[शाययति मैत्रम्]** शेते मैत्रः, तं शयानं मैत्रं चैत्रः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ ।

**[स्वयमेवारोहयमाणं हस्तिनं प्रयुङ्क्ते आरोहयते]** आरोहन्ति गजं हस्तिपकास्ते एवं विवक्षते न वयमारोहामः, किन्तु आरुह्यते=न्यग्भवति गजः स्वयमेव, तं आरुह्यमाणं=न्यग्भवन्तं हस्तिपकाः प्रयुञ्जते । णिग्प्र० । तत आरोहयन्ति गजं हस्तिपकास्ते एवं विवक्षन्ते, न वयमारोहामः, किन्तु आरोहयते गजः स्वयमेव, तं गजं आरोहयमाणं हस्तिपकः प्रयुङ्क्ते । अन्यः पुनर्णिग् ।

**[चेतयमानं प्रयुङ्क्ते = चेतयति]** 'चितुण् स्मृत्याम्' (१६४५) चित् (?)। ('चितिण् संवेदने' (१८२६) चित्) । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । चेतयमानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'णेरनिटि' (४।३।८३) णिच्लोपः । अनेन परस्मैपदम् ।

**[शोषयते व्रीहीनातपः]** 'शुषंच् शोषणे' (१२०८) शुष् । शुष्यन्ति आतपे व्रीहयः, तान् व्रीहीन् शुष्यत आतप एव प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । अनेन न ।

**[कटं कारयते]** 'डुकृंग् करणे' (८८८) कृ । कुर्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ, अनेन न ।

अणिगवस्थायां प्राणिकर्तृकानाप्याण्णिजन्तान्मा भूत्, चेतयते 'ई-गितः' (३।३।९५) इत्यात्मनेपदस्यापवादोऽयम् ॥छ॥

## चल्याहारार्थेङ्-बुध-युध-प्रु-द्रु-स्रु-नश-जनः ॥३।३।१०८॥

**[चल्याहारार्थेङ्बुधयुधप्रुद्रुस्रुनशजनः]** 'चल कम्पने' (९७२/१०५५) चल् । चलतीति । 'इ-कि-श्तिव् स्वरूपाऽर्थे' (५।३।१३८) इति धात्वर्थे इश्वत्यायो न स्वरूपेणेत्याह-चलिश्च आहारश्च = चल्याहारौ, चल्याहारावर्थो येषां ते = चल्याहारार्थाः, चल्याहारार्थाश्च इङ् च बुधश्च युधश्च प्रुश्च द्रुश्च स्रुश्च नशश्च जन् च = चल्याहारार्थेङ्बुधयुधप्रुद्रुस्रुनशजन्, तस्मात् ।

चलिलक्षणोऽर्थः कः कम्पनमनया युक्त्या यातीति षष्ठ्या न व्याख्येयम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[चलयति]** 'चल कम्पने' (९७२/१०५५) चल् । चलन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'घटादेर्ह्रस्वो०' (४।२।२४) ह्रस्वः ।

**[कम्पयति]** कथं शिरः कम्पयते युवन्ति (?) (युवा) । णिग् द्वयमत्र ज्ञेयम् । कथं 'कपुङ् चलने' (७५७) कप् । कम्पमानं शिर आत्मा प्रयुङ्क्ते, तमात्मानं युन्त्से(?) (युवा) प्रयुङ्क्ते, इति णिग् द्वयम्, ततो नात्र कम्पनं किन्तु कप(म्प)ना, इति न परस्मै, कम्पमानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० ।

**[चोपयति शाखाम्]** 'चुप मन्दायां' (३४२) चुप् । चोपन्तं प्रयुङ्क्ते ।

**[निगारयति]** नि 'गॄत् निगरणे' (१३३५) गॄ । निगिरन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) आर् ।

**[भोजयति]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भुञ्जानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[आशयति चैत्रमन्नम्]** 'अशश् भोजने' (१५५८) अश् । अश्नन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[पय उपयोजयते चैत्रेण]** उप 'युजूंपी योगे' (१४७६) युज् । उपयुङ्क्ते चैत्रस्तं उपयुञ्जानं मैत्रः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । कारयतीत्यर्थः ।

**[सूत्रमध्यापयति शिष्यम्]** 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । अधीयानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'णौ क्री-जीङः' (४।२।१०) इ० → आ० । 'अर्त्ति-री-व्ली०' (४।२।२१) पोऽन्तः ।

**[बोधयति पद्मं रविः]** 'निरनुबन्धग्रहणे सामान्यग्रहणम्' ('सामान्येन') (न्या० स० वक्ष० (२)/सूत्र (५)) इति न्यायात् 'बुधृग् बोधने' (९१२) बुध् । 'बुध अवगमने' (९६८) बुध् । 'बुधिं ज्ञाने' (१२६२) बुध्, इति त्रयाणां ग्रहणम् । 卐 बुध्यमानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[योधयति काष्ठानि]** 'युधिंच् संप्रहारे' (१२६०) युध् । युध्यमानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

नित्याकर्मकत्वादणि(णिक्)कर्तुः कर्मत्वम् ।

**[प्रावयति राज्यम्]** च्युंङ् (५९४) - ज्युंङ् (५९५) - जुंङ् (५९६) - 'प्रुंङ् गतौ' (५९७) प्रु । प्रवमाणं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । प्रापयतीत्यर्थः ।

प्राप्तेः सकाशात् चलनमन्यत्, तथाहि- चलनं कायव्यापारविशेषः, प्राप्तेः कारणं स्यन्दनविलयिनेऽपि प्राप्तिविशेषौ ।

**[द्रावयत्ययः]** इं (११) - दुं (१२) - 'द्रुं गतौ' (१३) द्रु ।[1] द्रवन्तं प्रयुङ्क्ते । विलाययतीत्यर्थः ।

**[स्रावयति तैलम्]** 'स्रुं गतौ' (१५) स्रु ।[2] स्रवन्तं प्रयुङ्क्ते । तैलं स्पन्दयतीत्यर्थः ।

---

P. 卐 बुध्यते पद्मं, तं बुध्यमानं रविः प्रयुङ्क्ते ।

P. १. द्रवत्ययः, तत् द्रवत् कश्चित् प्रयुङ्क्ते ।  P. २. स्रवति तैलं, तत् स्रवदन्यः प्रयुङ्क्ते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[नाशयति पापम्]** 'नशौच् अदर्शने' (१२०२) नश् ।[1] नश्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[जनयति पुण्यम्]** 'जनैचि प्रादुर्भावे' (१२६५) जन् ।[2] जायमानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'कगे-वनू-जनै-जृष्-क्नस्-रञ्जः' (४।२।२५) ह्रस्वः ।।छ।।

*इति श्रीसिद्धहेमव्याकरणे बृहद्वृत्तौ*
*तृतीयस्याध्यायस्य तृतीयः पादः समाप्तः ।।*

---

P. १. नश्यति पापं, तन्नश्यदन्यः प्रयुङ्क्ते ।

P. २. जायते पुण्यं, तज्जायमानमन्यः प्रयुङ्क्ते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

## ॥ अथ तृतीयाध्यायस्य चतुर्थः पादः ॥

### गुपौ-धूप-विच्छि-पणि-पनेरायः ॥३।४।१॥

**[गुपौधूपविच्छिपणिपनेः]** गुपौ च धूपश्च विच्छिश्च पणिश्च पनिश्च = गुपौधूपविच्छिपणिपनि, तस्मात् ।

**[गोपायति]** 'गुपौ रक्षणे' (३३२) गुप् । अनेन आयप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[धूपायति]** तपं (३३३) - 'धूप संतापे' (३३४) धूप् । अनेन आयप्र० ।

**[विच्छायति]** 'विछत् गतौ' (१३४३) विछ् । अनेन आयप्र० ।

**[पणायति]** 'पणि व्यवहार-स्तुत्योः' (७१०) पण् । अनेन आयप्र० । व्यवहरति स्तौति वेत्यर्थः ।

**['न चोपलेभे वणिजां पणायाः' - भट्टिकाव्ये स०३ श्लो०२७]** उप 'डुलभिंष् प्राप्तौ' (७८६) लभ् । परोक्षा ए । 'अनादेशाऽऽदेरेकव्यञ्जनमध्येऽतः' (४।१।२४) ए । 'पणि व्यवहार-स्तुत्योः' (७१०) पण् । अनेन आयप्र० । पणायतीति । 'भृ-पणिभ्यामिज् भुर-वणौ च' (उणा० ८७५) इज्प्र० - वणादेशश्च । पणायन्तीति । 'शंसि-प्रत्ययात्' (५।३।१०५) अप्र० । 'अतः' (४।३।८२) अलोपः । प्रथमाबहु० जस् ।

**[पनायति]** 'पनि स्तुतौ' (७४८) पन् । अनेन आयप्र० ।

卐**[शतस्य पणते]** शत षष्ठी ङस् । 'विनिमेय द्यूतपणं पण-व्यवह्रोः' (२।२।१६) वा कर्म । पण् । वर्त्त० ते ।

'गुपच् व्याकुलत्वे' इत्यस्य तु धूपसाहचर्येण निरासः । ननु धूपश्चुरादिरप्यस्ति ? सत्यम् - अणिजन्तविच्छसाहचर्यात् भौवादिकस्यैव धूपस्य ग्रहणम् ।

गुपावित्यौकारो 'गुपि गोपन-कुत्सनयोः' (७६३) इत्यस्य निवृत्त्यर्थः, यङ्लुप्निवृत्त्यर्थश्च ।

**[जोगुपीति, जोगोप्ति]** 'गुपौ रक्षणे' (३३२) गुप् । भृशं पुनः पुनर्वा गोपायति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च (४।१।३) "गुप्" द्विर्वचनम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ग-होर्जः (४।१।४०) ग० → ज० । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । वर्त्त० तिव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ॥छ॥

### कमेर्णिङ् ॥३।४।२॥

**[कमेः]** कमि पञ्चमी ङसि ।

**[णिङ्]** णिङ् प्रथमा सि ।

**[कामयते]** 'कमूङ् कान्तौ' (७८९) कम् । अनेन णिङ्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ॥छ॥

---

卐 उक्तं च धातुपारायणे-धातुरत्नाकरे - 'ये तु स्तुत्यर्थादेव पणेरायमिच्छन्ति तन्मते व्यवहारार्थात् शवि अपि आयाभावे शतस्य पणते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**ऋतेर्ङीयः ॥३।४।३॥**

**[ऋतेः]** ऋति पञ्चमी ङसि ।

**[ङीयः]** ङीय प्रथमा सि ।

**[ऋतीयते]** 'ऋत घृणा-गति-स्पर्द्धेषु' (२८७) ऋत् । अनेन स्वार्थे ङीयप्र० —> ईय । ङकार आत्मनेपदाद्यर्थः, आदिशब्दात् गुणाभावार्थः ॥छ॥

**अशवि ते वा ॥३।४।४॥**

**[अशवि]** न शव् = अशव्, तस्मिन् ।

**[ते]** तद् प्रथमा जस् । 'आ द्वेरः' (२।१।४१) द० —> अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'जस इः' (१।४।९) इ । 'अवर्णस्ये०' (१।२।६) ए ।

गोपायिता इत्यादिषु श्वस्तनी ता, अनेन विकल्पेन आयादयः प्रत्ययाः ।

प्रथमे (गोपायिता[1], गोप्ता) 'धूगौदितः' (४।४।३८) वेट्, अन्यत्र सर्वत्र (धूपायिता, धूपिता, विच्छायिता, विच्छिता, पणायिता, पणिता, पनायिता, पनिता, कामयिता[2], कमिता, ऋतीयिता[3], अर्तिता) 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ॥छ॥

**गुप्-तिजो गर्हा-क्षान्तौ सन् ॥३।४।५॥**

**[गुप्तिजः]** गुप् च तिज् च = गुप्तिज्, तस्मात् ।

**[गर्हाक्षान्तौ]** गर्हा च क्षान्तिश्च, तत्, तस्मिन् ।

**[सन्]** सन् प्रथमा सि ।

**[जुगुप्सते]** 'गुपि गोपन-कुत्सनयोः' (७६३) गुप् । अत्र वाक्यं न विधीयते । अनेन सन्, ततः 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) पलोपः । 'ग-होर्जः' (४।१।४०) गु० —> जु० । 'स्वार्थे' (४।४।६०) इण्निषेधः । 'उपान्त्ये' (४।३।३४) इति सन्किद्वत् । गर्हत इत्यर्थः ।

**[तितिक्षते]** 'तिजि क्षमा-निशानयोः' (६६७) तिज् । अत्राऽपि वाक्यं न । अनेन सन्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) जलोपः । 'च-जः क-गम्' (२।१।८६) ज० —> ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० —> क० । 'नाम्यन्तस्था०' (२।३।१५) स० —> ष०, क-षसंयोगे क्ष० । सहत इत्यर्थः ।

**[गोपनम्]** गुप् ।卐 रक्ष्यते = गोपनम् । 'अनट्' (५।३।१२४) अनट्प्र० —> अन । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[गोपयति]** गुप् । रक्षन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० —> इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

---

P. गोपा[1]यतीति, कामे[2]यत इति, ऋतीये[3]त इति । 'णक-तृचौ' (५।१।४८) तृच्प्र० । अनेन आय-णिङ्-ङीयप्र० ।

P. 卐 गुप्यते-रक्ष्यते इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[तेजनम्]** तिज् । +तिज्यते = तेजनम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[तेजयति]** तिज्यन्तं (?) (तेजमानं) प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

अनेन केवलं सन्प्राक् गर्हा-क्षान्तौ च अर्थान्तरेऽपि त्यादयो न विधीयन्ते उपलक्षणत्वात्, शत्रानशावपि अभिधाने शक्तिस्वाभाव्यादिति शेषः ।।छ।।

## कितः संशय-प्रतीकारे ।।३।४।६।।

**[कितः]** कित् पञ्चमी ङसि ।

**[संशयप्रतीकारे]** उभयकोटिरवलंबीप्रत्ययः = संशयः । दुःखहेतोर्निराकरणं = प्रतीकारः । संशयश्च प्रतीकारश्च = संशयप्रतीकारम्, तस्मिन् । 'शीङ्क् स्वप्ने' (११०५) शी, सम्पूर्व० । संशयनं = संशयः । 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः' (५।३।२८) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।, प्रति 'डुकृंग् करणे' (८८८) कृ । प्रत्या(प्रति)क्रियते = प्रतीकारः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) आर् । 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) दीर्घः ।

**[विचिकित्सति]** 'कित निवासे' (२८६) कित्, विपूर्व० । अनेन सन्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) तलोपः । 'क-ङश्च-ञ्' (४।१।६४) क० → च० । संशत इत्यर्थः ।

**[व्याधिं चिकित्सति]** व्याधि द्वितीया अम् । चिकित्सति करोति = निराकरोतीत्यर्थः ।

**[क्षेत्रे चिकित्स्यः पारदारिकः]** क्षेत्र सप्तमी ङि । शरीरे चिकित्स्यते । 'य एच्चातः' (५।१।२८) यप्र० । 'अतः' (४।३।८२) अलोपः । परदारान् गच्छतीति । 'परदारादिभ्यो गच्छति' (६।४।३८) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । निग्राह्य इत्यर्थः ।

**[चिकित्स्यानि क्षेत्रे तृणानि]** चिकित्स्य द्वितीया शस् । क्षेत्र द्वितीया अम् (?) (सप्तमी ङि) । तृण द्वितीया शस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः । विनाशयितव्यानि इत्यर्थः ।

**[केतनम्]** उष्यते = केतनम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन ।

**[केतयति]** निवसन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।।छ।।

## शान्-दान्-मान्-बधान्निशाना-ऽऽर्जव-विचार-वैरूप्ये दीर्घश्चेतः ।।३।४।७।।

**[शान्दान्मान्बधात्]** शान् च दान् च मान् च बधश्च = शान्दान्मान्बधम्, तस्मात् ।

**[निशानाऽऽर्जवविचारवैरूप्ये]** ऋजु । ऋजोर्भावः । 'य्वृवर्णाल्लघ्वादेः' (७।१।६९) अण्प्र० → अ । 'वृद्धिः

P. + तिज्यते-उत्तेज्यत इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वरेष्वादे०' (७।४।१) वृ० आर् । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । निशानं च आर्जवं च विचारश्च वैरूप्यं च = निशानाऽऽर्जवविचारवैरूप्यम्, तस्मिन् । विरूपस्य भावः । 'पति-राजान्तगुणाङ्ग-राजादिभ्यः कर्मणि च' (७।१।६०) ट्यणप्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[इतः]** इत् षष्ठी ङस् ।

यदि इत्ग्रहणं न क्रियते तर्हि बधधातोः प्रथममेव अद्वित्वे सति स्वार्थिके सनि आ(अ)कारस्य दीर्घत्वं प्राप्नोति, तन्निराकरणार्थमित्करणम् ।

**[शीशांसति, शीशांसते]** 'शानी तेजने' (९१५) शान् । अनेन सन्प्र० । न पुनरेतेषु वाक्यं कर्त्तव्यम् । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) नलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'सन्यस्य' (४।१।५९) इ । अनेन दीर्घः । वर्त्त० तिव्-ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'शिङ्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः ।

**[दीदांसति, दीदांसते]** 'दानी अवखण्डने' (९१४) दान् । अनेन सन्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) नलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'सन्यस्य' (४।१।५९) इ । अनेन दीर्घः । 'शिङ्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः ।

**[मीमांसते]** 'मानि पूजायाम्' (७४९) मान् । अनेन सन्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) नलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'सन्यस्य' (४।१।५९) इ । अनेन दीर्घः । 'शिङ्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः ।

**[बीभत्सते]** 'बधि बन्धने' (७४६) बध् । अनेन सन्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) धलोपः । 'सन्यस्य' (४।१।५९) इ । अनेन दीर्घः । 'ग-ड-द-बादेश्चतुर्थान्तस्यै०' (२।१।७७) ब० → भ० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ध० → त० । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

अग्रे एते धातवो मण्ड्यन्ते, वाक्यं च एतैर्विधीयते, शान्-दान्-मान्-बध् ।

**[निशानम्]** 'शोंच् तक्षणे' (११४७) शो, निपूर्व० । निश्यतीति निशानम् । 'अच्' (५।१।४९) अच्प्र० → अ ।

**[अवदानम्]** 'दोंच् छेदने' (११४८) दो, अवपूर्व० । अवद्यतीति अवदानम् । 'अच्' (५।१।४९) अच्प्र० → अ ।

**[अवमानयति]** पूजयन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ ।

**[बाधयति]** 卐बध्नन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'न जन-बधः' (४।३।५४) इति दीर्घत्वं निषेधः ।

एतेषु उदाहरणेषु तु पूर्वं धातवो मन्यन्ते, यतोऽर्थान्तरे वाक्यमस्ति ।।छ।।

### धातोः कण्ड्वादेर्यक् ।।३।४।८।।

**[धातोः]** धातु पञ्चमी ङसि ।

**[कण्ड्वादेः]** कण्डू(ः) आदिर्यस्याऽसौ कण्ड्वादिः, तस्मात् ।

---

卐 अत्र 'बधण् संयमने' (१६६४) धातोर्ग्रहणं सम्यक् प्रतिभाति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[यक्]** यक् प्रथमा सि ।। 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

द्विविधाः कण्ड्वादयः, धातवो नामानि च, अत्र तु धातुभ्यः प्रत्ययः ।

**[कण्डूयति, कण्डूयते]** 'कण्डूग् गात्रविघर्षणे' (१९९१) कण्डू, सौत्रो धातुः । अनेन यक्प्र० । वर्त्त० तिव्-ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[महीयते]** 'महीङ् वृद्धौ पूजायाञ्च' (१९९२) मही सौत्रो धातुः । अनेन यक्प्र० । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[मन्तूयति]** 'मन्तु रोष-वैमनस्ययोः' (१९९६) मन्तु, सोत्रो धातुः । अनेन यक्प्र० । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[कण्डूः, कण्ड्वौ, कण्ड्वः]** 'कष हिंसायाम्' (५०७) कष् । कषतीति । 'कषेण्ड-च्छौ च षः' (उणा० ८३१) ऊप्र० षकारस्य च ण्ड आदेशे कण्डूशब्दः । सि-औ-जस् ।

तत् तूभाभ्यां कथं न भवति, न, यदि उभाभ्यामभिप्रेतः स्यात्, तदा कण्डूय इत्यादि पठेत, न सूत्रं कुर्यात्, तस्मादेकस्मादेव विधिरित्याह-यकः कित्फलं 'नामिनो गुणो०' (४।३।१) इत्येवमादीनि तानि च धातोरेव संभवन्ति, आह-यदा तु 'दीर्घश्च्वि-यङ्०' (४।३।१०८) इत्यादि कित्त्वफलं तदा धातुग्रहणमत्रापि सार्थम् ।

कण्डूग् गकारः फलवति 'ई-गितः' (३।३।९५) इत्यात्मनेपदार्थः ।।छ।।

**व्यञ्जनादेरेकस्वराद् भृशा-ऽऽभीक्ष्ण्ये यङ् वा** ।।३।४।९।।

**[व्यञ्जनादेः]** व्यञ्जनमादिर्यस्य सः = व्यञ्जनादिः, तस्मात् ।

**[एकस्वरात्]** एकः स्वरो यस्य सः = एकस्वरस्तस्मात् ।

**[भृशाऽऽभीक्ष्ण्ये]** 卐भृशश्च आभीक्ष्ण्यं च = भृशाऽऽभीक्ष्ण्यम्, तस्मिन् ।

**[यङ्]** यङ् प्रथमा सि ।

**[वा]** वा प्रथमा सि ।

ननु उत्तरसूत्रे अट्यर्त्तिग्रहणात् व्यञ्जनादित्वं सूत्रि-मूत्रिग्रहणात् एकस्वरत्वं लप्स्यते, न, गत्यर्थानां धातूनां भृशाभीक्ष्ण्येऽर्थे यङ् स्यात् तदा अट्यर्त्त्योरेव स्यात्, तथा च दनीध्वस्यते इति न स्यात्, व्यञ्जनादीनामेकस्वराणामदन्तानामेव स्यात्, तथा च पापच्यते इति न स्यादिति विपरीतनियमाशङ्का स्यात्, तन्निवृत्त्यर्थं व्यञ्जनादेरेकस्वरादित्युक्तम् ।

गुणक्रियाणामधिश्रयणादीनां क्रियान्तराव्यवहितानां साकल्येन संपत्तिः फलातिरेको वा **भृशत्वम्** ।

प्रधानक्रियाया विक्लेदादेः क्रियान्तराव्यवधानेनावृत्ति**राभीक्ष्ण्यम्** ।

अत्र भृशत्वं लक्षणे क्रियान्तरैर्विक्लृप्तिर्बाधकैर्गमनपठनादिभिरव्यवहितानामनन्तरितानां साकल्येन सामस्त्येन प्राप्तिरित्यर्थः ।

अत्र विक्लृप्तिर्विटचनक्रिया-

**[पापच्यते]** 'डुपचींष् पाके' (८९२) पच् । भृशं पुनः पुनर्वा पचति । अनेन यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् ।

P. 卐 भृशं च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) चलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[जाज्वल्यते]** 'ज्वल दीप्तौ' (९६०) ज्वल् । भृशं पुनः पुनर्वा ज्वलति । अनेन यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

यदा तु आभीक्ष्ण्यभृशार्थयङन्तादाभीक्ष्ण्यविवक्षा तदा भवत्येव द्विर्वचनम्, **पापच्यते २** ।

यदा तु आभीक्ष्ण्ययङन्तात् भृशार्थविवक्षा तदा न भवति द्विर्वचनम्, शब्दशक्तिस्वभावात्, तस्यार्थस्य यङैव प्रतिपादितत्वात् **पापच्यस्व २** इति, अत्र 'भृशा-ऽऽभीक्ष्ण्ये हि-स्वौ यथाविधि त-ध्वमौ च तद्युष्मदि' (५।४।४२) पञ्चमी स्व ।

**[भृशं प्रात्ति]** भृशम् 'क्रियाविशेषणात्' (२।२।४१) अम् । प्र 'अदं भक्षणे' (१०५९) अद् । वर्त्त० तिव् । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० ।

**[भृशमीक्षते]** 'ईक्षि दर्शने' (८८२) ईक्ष् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[भृशं चकास्ति]** भृशम् 'क्रियाविशेषणात्' (२।२।४१) अम् । 'चकासृक् दीप्तौ' (१०९४) चकास् । वर्त्त० तिव् ।

**[जाजागृीयते]** 'जागृक् निद्राक्षये' (१०९३) जागृ । भृशं पुनः पुनर्वा जागर्त्ति । मतान्तरे अनेनैव यङ्प्र० → य० । द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'आ-गुणावन्यादेः' (४।१।४८) आ । 'ऋतो रीः' (४।३।१०९) री । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[अवाव्यते]** 'अव रक्षण-गति-कान्ति-तृप्त्यवगमन-प्रवेश-श्रवण-स्वाम्यर्थ- याचना-क्रियेच्छा-दीप्त्यवाप्त्या-ऽऽलिङ्गन-हिंसा-दहन-भाव-वृद्धिषु' (४८९) अव् । भृशं पुनः पुनर्वा अवति । मतान्तरे अनेनैव यङ्प्र० । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) व्य सिउं द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) यलुक् । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[दादरिद्र्यते]** 'दरिद्राक् दुर्गतौ' (१०९२) दरिद्रा । भृशं पुनः पुनर्वा दरिद्राति । यङ्प्र० । द्वित्वम् । 'आ-गुणावन्यादेः' (४।१।४८) आ । 'अशित्यस्सन्-णकज्-णका-ऽनटि' (४।३।७७) आलोपः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[लुनीहि लुनीहीत्येवायं लुनातीत्यादि यथा स्यात्]** 'लूग्श् छेदने' (१५१९) लू । पञ्चमी हि । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'एषामी व्यञ्जनेऽदः' (४।२।९७) ई । 'प्वादेर्ह्रस्वः' (४।२।१०५) ह्रस्वः । 'वीप्सायाम्' (७।४।८०) द्वित्वम् ॥छ॥

## अट्यर्त्ति-सूत्रि-मूत्रि-सूच्यशूर्णोः ॥३।४।१०॥

**[अट्यर्त्तिसूत्रिमूत्रिसूच्यशूर्णोः]** अटिश्च अर्त्तिश्च सूत्रिश्च मूत्रिश्च सूचिश्च 卐अस्(श्) च ऊर्णुश्च = अट्यर्त्तिसूत्रिमूत्रिसूच्यशूर्णु, तस्मात्, पञ्चमी ङसि । 'ङित्यदिति' (१।४।२३) ओ । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

P. 卐 अशूश्च अश् च वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अटाट्यते]** 'अट गतौ' (१९४) अट् । भृशं पुनः पुनर्वा अटति । अनेन यङ्प्र० । 'लोकात्' (१।१।३) "अ"विश्लेषियइ । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "ट्य" सउं द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) यलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० ते । 'कर्त्तर्यनद्‌भ्यः शव्' (३।४।७१) शव् ।

**[अरार्यते]** 'ॠक् गतौ' (११३५) ऋ । 'ॠं प्रापणे च' (२७) ऋ । भृशं पुनः पुनर्वा इयर्त्ति ऋच्छति वा । अनेन यङ् सति 'क्य-यङाऽऽशीर्ये' (४।३।१०) गु० अर् । 'लोकात्' (१।१।३) "अ"विश्लेषियइ । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "र्य" सउं द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) यलुक् । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० ते । 'कर्त्तर्यनद्‌भ्यः शव्' (३।४।७१) शव् ।

**[सोसूत्र्यते]** 'सूत्रण् विमोचने' (१८९९) सूत्र । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । 'अतः' (४।३।८२) अलोपः । भृशं पुनः पुनर्वा सूत्रयति । अनेन यङ्प्र० । 'सन्-यङश्च' (४।१।२३) "सू"द्वित्वम् । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । 'णेरनिटि' (४।३।८३) णिच्लोपः ।

**[मोमूत्र्यते]** 'मूत्रण् प्रस्रवणे' (१९००) मूत्र । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । 'अतः' (४।३।८२) अलोपः । भृशं पुनः पुनर्वा मूत्रयति । अनेन यङ्प्र० । 'सन्-यङश्च' (४।१।३) "मू" द्वित्वम् । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । 'णेरनिटि' (४।३।८३) णिच्लोपः ।

**[सोसूच्यते]** 'सूचण् पैशून्ये' (१८५४) सूच । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । 'अतः' (४।३।८२) अलोपः । भृशं पुनः पुनर्वा सूचयति । 'सन्-यङश्च' (४।१।३) "सू" द्वित्वम् । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । 'णेरनिटि' (४।३।८३) णिच्लोपः ।

'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) इत्यादिना ह्रस्वप्राप्तिबाधनार्थः ।

**[अशाश्यते]** 'अशू(शौ)टि व्याप्तौ' (१३१४) अश् । 'अशश् भोजने' (१५५८) अश् । भृशं पुनः पुनर्वा अश्नुते अश्नाति वा । अनेन यङ्प्र० । 'लोकात्' (१।१।३) "अ" विश्लेषियइ । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "श्य" सउं द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) यलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० ते । 'कर्त्तर्यनद्‌भ्यः शव्' (३।४।७१) शव् ।

**[प्रोर्णोनूयते]** 'ऊर्णुग्क् आच्छादने' (११२३) ऊर्णु, प्रपूर्व० । भृशं पुनः पुनर्वा प्रोर्णोति । अनेन यङ्प्र० । ततः ऊर् इति पश्चात् विश्लिष्य । ततो 'निमित्ताभावे०' (न्या० सं० वक्ष(१)/सूत्र(२९)) नु । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "नू" इति द्वित्वम् । 'आ-गुणावन्यादेः' (४।१।४८) ओ । 'रषृवर्णान्नो ण०' (२।३।६३) न० → ण० । 'र्हादर्ह-स्वरस्याऽनु नवा' (१।३।३१) द्वित्वं णस्य ।।छ।।

## गत्यर्थात् कुटिले ।।३।४।११।।

**[गत्यर्थात्]** गतिरर्थो यस्य सः = गत्यर्थस्तस्मात् ।

**[कुटिले]** कुटिल सप्तमी ङि ।

**[चंक्रम्यते]** 'क्रमू पादविक्षेपे' (३८५) क्रम् । कुटिलं क्रामति । अनेन यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'मुरतोऽनुनासिकस्य' (४।१।५१) मोऽन्तः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[दन्द्रम्यते]** अम (३९२) - 'द्रम गतौ' (३९३) द्रम् । कुटिलं द्रमति । अनेन यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'मुरतोऽनुनासिकस्य' (४।१।५१) मोऽन्तः ।

**[भृशमभीक्ष्णं वा क्रामति]** क्रम् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'क्रमो दीर्घः परस्मै' (४।२।१०९) दीर्घः ।

**[जंगमः]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । भृशं पुनः पुनर्वा गच्छति । मतान्तरे 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) मलोपः । 'ग-होर्जः' (४।१।४०) ग० ⟶ ज० । 'मुरतोऽनुनासिकस्य' (४।१।५१) मोऽन्तः । जंगम्यते । 'अच्' (५।१।४९) अच्प्र० ⟶ अ । 'अचि' (३।४।१५) यङ्लोपः । मिथ्याशंकार्थः । गच्छतीति 'गमेर्जम् च वा' (उणा० १३) अप्र० । सरूपे च द्वे रूपे भवतः, पूर्वस्य च "जम्" इत्यादेशो वा भवति । रूढिशब्दोऽयं लक्षणया स्थावरप्रतिपक्षमात्रे वर्तते ॥छ॥

## गॄ-लुप-सद-चर-जप-जभ-दश-दहो गर्ह्ये ॥३।४।१२॥

**[गॄलुपसदचरजपजभदशदहः]** गॄश्च लुपश्च सदश्च चरश्च जपश्च जभश्च दशश्च दह् च = गॄलुपसदचरजपजभदशदह्, तस्मात् ।

**[गर्ह्ये]** 'गर्हि कुत्सने' (८६०) गर्ह् । गर्ह्यते = गर्ह्यम् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० ⟶ य, तस्मिन् ।

**[निजेगिल्यते]** 'गॄत् निगरणे' (१३३५) गॄ । गर्हितं निगिरति । अनेन यङ्प्र० । 'ॠतां क्ङितीर्' (४।४।११६) गिर् । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) रलोपः । 'ग-होर्जः' (४।१।४०) ग० ⟶ ज० । 'आ-गुणावन्यादेः' (४।१।४८) ए । 'ग्रो यङि' (२।३।१०१) र० ⟶ ल० ।

**[लोलुप्यते]** 'लुप्लृंती छेदने' (१३२३) लुप् । गर्हितं लुम्पति । अनेन यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) पलोपः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ ।

**[सासद्यते]** 'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सद् । गर्हितं सीदति । अनेन यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक् (४।१।४४) दलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ ।

**[चञ्चूर्यते]** 'चर भक्षणे च' (४१०) चर् । गर्हितं चरति । अनेन यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'चर-फलाम्' (४।१।५३) मोऽन्तः । 'ति चोपान्त्याऽतोऽनोदुः' (४।१।५४) अस्य उ० । 卐 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः ।

**[जञ्जप्यते]** 'जप मानसे च' (३३८) जप् । गर्हितं जपति । अनेन यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'जप-जभ-दह-दश-भञ्ज-पशः' (४।१।५२) मोऽन्तः ।

**[जञ्जभ्यते]** जभुङ् (७८२) - 'जभैङ् गात्रविनामे' (७८३) जभ् । गर्हितं जम्भते । 'जभ मैथुने' (३७९) जभ् । गर्हितं जम्भति । अनेन यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'जप-जभ-दह-दश-भञ्ज-पशः' (४।१।५२) मोऽन्तः ।

---

P. 卐 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[दन्दश्यते]** 'दंशं दशने' (४९६) दंश् । गर्हितं दशति । अनेन यङ्प्र० । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'जप-जभ-दह-दश-भञ्ज-पशः' (४।१।५२) मोऽन्तः ।

**[दन्दह्यते]** 'दहं भस्मीकरणे' (५५२) दह् । गर्हितं दहति । अनेन यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'जप-जभ-दह-दश-भञ्ज-पशः' (४।१।५२) मोऽन्तः ।

**[दंदशीति]** 'दंशं दशने' (४९६) दंश् । गर्हितं दशति । अनेन यङ्प्र० । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'जप-जभ-दह-दश-भञ्ज-पशः' (४।१।५२) मोऽन्तः । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । 'यङ्-तु-रु०' (४।३।६४) ईत् ।।छ।।

## न गृणा-शुभ-रुचः ।।३।४।१३।।

**[गृणाशुभरुचः]** गृणाश्च शुभश्च रुच् च = गृणाशुभरुच्, तस्मात् ।

**[गर्हितं गृणाति]** 'गृश् शब्दे' (१५३८) गृ । वर्त्त० तिव् । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'प्वादेर्ह्रस्वः' (४।२।१०५) ह्रस्वः ।

**[भृशं शोभते]** 'शुभि दीप्तौ' (९४७) शुभ् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[भृशं रोचते]** 'रुचि अभिप्रीत्यां च' (९३८) रुच् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।।छ।।

## बहुलं लुप् ।।३।४।१४।।

**[बोभूयते, बोभवीति, बोभोति]** 'भू सत्तायाम्' (१) भू । भृशं पुनः पुनर्वा भवति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । अनेन यङलुप् । द्वितीये 'यङ्-तु-रु-स्तोर्बहुलम्' (४।३।६४) ईत् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[रोरूयते, रोरवीति, रोरोति]** टुक्षु (१०८४) - 'रुं शब्दे' (१०८५) रु । भृशं पुनः पुनर्वा रौति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । यङि लोपे 'यङ्-तु-रु-स्तोर्बहुलम्' (४।३।६४) ईत् → ई ।

**[चंक्रम्यते, चंक्रमीति, चंक्रन्ति]** 'क्रमू पादविक्षेपे' (३८५) क्रम् । कुटिलं क्रामति । 'गत्यर्थात् कुटिले' (३।४।११) यङ्प्र० । शेषं पूर्ववत् ।

**[जंजप्यते, जंजपीति, जंजप्ति]** 'जप मानसे च' (३३८) जप् । गर्हितं जपति । 'गृ-लुप-सद-चर-जप-जभ-दश-दहो गर्ह्ये' (३।४।१२) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) पलोपः । यङि लुपि 'यङ्-तु-रु-स्तोर्बहुलम्' (४।३।६४) ईत् → ई ।

**[लोलूया]** 'लूगृश् छेदने' (१५१९) लू । भृशं पुनः पुनर्वा लुनाति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यङश्च' (४।१।३) द्वित्वम् । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । 卐लोलूयते । 'शंसि-प्रत्ययात्' (४।३।१०५) अप्र० । 'अतः' (४।३।८२) अलोपः । 'आत्' (२।४।१८) आप्प्र० → आ । प्रथमा सि ।

**[पोपूया]** 'पूगूश् पवने' (१५१८) पू । भृशं पुनः पुनर्वा पुनाति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । +पोपूयते । 'शंसि-प्रत्ययात्' (५।३।१०५) अप्र० । 'अतः' (४।३।८२) अलोपः । 'आत्' (२।४।१८) आप्प्र० → आ । प्रथमा सि ॥छ॥

## अचि ॥३।४।१५॥

**[अचि]** अच् सप्तमी ङि ।

**[लोलुवः]** लोलूय इति पूर्ववत् । लोलूयते । 'अच्' (५।१।४९) अच्प्र० → अ । अनेन यङ्लुप् । 'न वृद्धिश्चाऽविति क्ङिल्लोपे' (४।३।११) गुणनिषेधः । 'धातोरिवर्णोवर्णस्येयुव्०' (२।१।५०) उव् ।

**[पोपुवः]** पोपूय इति पूर्ववत् । पोपूयते । 'अच्' (५।१।४९) अच्प्र० → अ । अनेन यङ्लोपः । 'न वृद्धिश्चाऽविति०' (४।३।११) गुणनिषेधः । 'धातोरिवर्णोवर्णस्येयुव्०' (२।१।५०) उव् ।

**[सनीस्रंसः]** भ्रंशूङ् (९५२) - 'स्रंसूङ् अवस्रंसने' (९५३) स्रंस् । भृशं पुनः पुनर्वा स्रंसते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'वञ्च-स्रंस-ध्वंस-भ्रंश-कस-पत-पद-स्कन्दोऽन्तो नीः' (४।१।५०) "नी" आगमः । सनीस्रस्यते । 'अच्' (५।१।४९) अच्प्र० । अनेन यङ्लोपः ।

**[दनीध्वंसः]** 'ध्वंसूङ् गतौ च' (९५४) ध्वंस् । भृशं पुनः पुनर्वा ध्वंसते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'वञ्च-स्रंस-ध्वंस०' (४।१।५०) "नी" आगमः । दनीध्वस्यते । 'अच्' (५।१।४९) अच्प्र० → अ । अनेन यङ्लोपः ।

**[चेच्यः]** 'चिंग्ट् चयने' (१२९०) चि । भृशं पुनः पुनर्वा चिनोति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । चेचीयत इति । 'अच्' (५।१।४९) अच्प्र० । अनेन यङ्लोपः । 'योऽनेकस्वरस्य' (२।१।५६) यत् ।

**[नेन्यः]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । भृशं पुनः पुनर्वा नयति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । नेनीयत इति । 'अच्' (५।१।४९) अच्प्र० → अ । अनेन यङ्लोपः । 'योऽनेकस्वरस्य' (२।१।५६) यत् ॥छ॥

## नोतः ॥३।४।१६॥

**[नोतः]** न प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । उत् पञ्चमी ङसि ।

**[योयूयः]** 'युक् मिश्रणे' (१०८०) यु । भृशं पुनः पुनर्वा यौति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । 'दीर्घश्च्वि०' (४।३।१०८) दीर्घः । योयूयत इति । 'अच्' (५।१।४९) अच्प्र० । 'अतः' (४।३।८२) अलोपः ।

---

P. 卐 लोलूयनम् । P. + पोपूयनम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[रोरूयः]** टुक्षु (१०८४)-'रु शब्दे' (१०८५) रु । भृशं पुनः पुनर्वा रौति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्-प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । 'दीर्घश्च्वि०' (४।३।१०८) दीर्घः । रोरूयत इति । 'अच्' (५।१।४९) अच्प्र० । ℘'अतः' (४।३।८२) अलोपः ।

अत्र पृथग्योगाद् बहुलमित्यनेनापि न भवति यङ्लुप्, अन्यथा "अचि नोतः" इत्येकमेव कुर्यात् ।।छ।।

## चुरादिभ्यो णिच् ।।३।४।१७।।

**[चुरादिभ्यः]** चुर् आदिर्येषां ते = चुरादयस्तेभ्यः = चुरादिभ्यः ।

**[णिच्]** णिच् प्रथमा सि ।

**[चोरयति]** 'चुरण् स्तेये' (१५६८) चुर् । अनेन णिच्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[नाटयति]** 'नटण् अवस्यन्दने' (१५९३) नट् । अनेन णिच्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[पदयते]** 'पदणि गतौ' (१९३२) पद । अनेन णिच्प्र० → इ । 'अतः' (४।३।८२) अस्य लोपः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

णकारो वृद्ध्यर्थः, यद्यत्र चकारो न स्यात् अयमेवैकानुवन्धो णिरिति ततः णिग्रहणेष्वस्यैव ग्रहणं स्यात्, न सामान्येन णिगामित्यर्थः ।

+ **[ओलण्डयति]** 'ओलडुण् उत्क्षेपे' (१६२४) ओलण्ड् । अनेन णिच्प्र० → इ । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

हन्त्यर्थाश्चेति किं कथ्यते ? सर्वे हन्त्यर्था धातवोऽत्र पठितव्याः, तेन णिज्-शि(श)वादिकं च कार्यं भवति ।

अदन्तत्वं च सुखादीनां णिच्संनियोग एव द्रष्टव्यम्, तेन णिजभावे-

**[जगणतुः]** 'गणण् संख्याने' (१८७४) गण । परोक्षा अतुस्प्र० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ग-होर्जः' (४।१।४०) ग० → ज० ।

**[जगणिथ]** 'गणण् संख्याने' (१८७४) गण । परोक्षा थव्प्र० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'स्क्रसृ-वृ-भृ-स्तु-द्रु-श्रु-स्रोर्व्यञ्जनादेः परोक्षायाः' (४।४।८१) इट् ।

**[संवाहयति]** सम् 'वहीं प्रापणे' (९९६) वह् । अनेन णिच्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।।छ।।

---

P. ℘ 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

\+ बृहद्वृत्तौ इदमुदाहरणं नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## युजादेर्नवा ॥३।४।१८॥

**[युजादेः]** युज् आदिर्यस्य सः = युजादिस्तस्मात् ।

**[नवा]** नवा प्रथमा सि ।

**[योजयति, यजति]** 'युजण् संपर्चने' (१९४१) युज् । अनेन णिच्प्र० → इ विकल्पेन । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[साहयति, सहति]** 'षहण् मर्षणे' (१९८१) षह् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सह् । अनेन णिच्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

युजादीनां णिजभावपक्षे आत्मनेपदस्य चरितार्थत्वात् णिजन्तानां परस्मैपदमेव, यथा अर्चयति-अर्चति ॥छ॥

## भूङः प्राप्तौ णिङ् ॥३।४।१९॥

**[भूङः]** भूङ् पञ्चमी ङसि ।

**[प्राप्तौ]** प्राप्ति सप्तमी ङि । 'ङिर्डौ' (१।४।२५) ङि → डौ ।

**[णिङ्]** णिङ् प्रथमा सि ।

**[भावयते, भवते]** 'भू सत्तायाम्' (१) भू । भूः प्राप्त्यर्थे ङित् भूङिति ज्ञातव्यः । अनेन णिङ्प्र० वा । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । प्राप्नोतीत्यर्थः ।

णिङिति ङकार आत्मनेपदार्थः । भूङ इति ङकारनिर्देशो णिङभावेऽप्यात्मनेपदार्थः ।

प्राप्त्यभावे आत्मनेपदम्-

याचितारश्च नः सन्तु, दातारश्च भवामहे ।
आक्रोष्टारश्च नः सन्तु, क्षन्तारश्च भवामहे ॥१॥

**[याचितारः]** 'डुयाचृग् याच्ञायाम्' (८९१) याच् । याचन्तीति । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । प्रथमा जस् । 'तृ-स्वसृ-नप्तृ-नेष्टृ०' (१।४।३८) आर् ।

**[दातारः]** 'डुदांग्क् दाने' (११३८) दा । ददतीति । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । प्रथमा जस् । 'तृ-स्वसृ-नप्तृ-नेष्टृ०' (१।४।३८) आर् ।

**[भवामहे]** 'भू सत्तायाम्' (१) भू । वर्त्त० महे । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'म-व्यस्याः' (४।२।११३) दीर्घः ।

**[आक्रोष्टारः]** 'क्रुशं आह्वान-रोदनयोः' (९८६) क्रुश्, आङ्पूर्व० । आक्रोशन्तीति । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'यज-सृज-मृज०' (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । प्रथमा जस् । 'तृ-स्वसृ-नप्तृ-नेष्टृ०' (१।४।३८) आर् ।

**[नः]** अस्मद् षष्ठी आम् । 'पदाद् युग्विभक्त्यैकवाक्ये वस्-नसौ बहुत्वे' (२।१।२१) नसादेशः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[क्षन्तारः]** 'क्षमू(मौ)च् सहने' (१२३५) क्षम् । क्षाम्यन्तीति । 'णक-तृचौ' (५।१।४८) तृच्प्र० । प्रथमा जस् । 'तृ-स्वसृ-नप्तृ-नेष्ट्०' (१।४।३८) आर् ।

सर्वं भवति = प्राप्नोतीत्यर्थः ।।छ।।

**प्रयोक्तृव्यापारे णिग् ।।३।४।२०।।**

**[प्रयोक्तृव्यापारे]** प्रयोक्तुर्व्यापारः = प्रयोक्तृव्यापारस्तस्मिन् ।

**[णिग्]** णिग् प्रथमा सि ।

कर्त्तारं यः प्रयुङ्क्ते स प्रयोक्ता, तद् व्यापारे...... । व्यापारश्च प्रेषणाध्येषण-निमित्त-भावाख्यानाभिनय-ज्ञानप्राप्तिभेदैर-नेकधा भवति । तत्र तिरस्कारपूर्वको व्यापारः = प्रेषणम्, सत्कारपूर्वकस्त्वध्येषणम् ।

**[कारयति]** 'डुकृंग् करणे' (८८८) कृ । कुर्वन्तं प्रयुङ्क्ते । अनेन णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[पाचयति]** 'डुपचींष् पाके' (८९२) पच् । पचन्तं प्रयुङ्क्ते । अनेन णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

**[वासयति भिक्षा]** 'वसं निवासे' (९९९) वस् । 卐वसन्तं प्रयुङ्क्ते । अनेन णिग्प्र० → इ ।

**[कारीषाग्निरध्यापयति]** करीष । करीषस्याऽयम् । 'तस्येदम्' (६।३।१६०) अण्प्र० । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णवर्णस्य' (७।४।६८) अलोपः । अग्नि प्रथमा सि । अधि 'इंङ्क् अध्ययने' (११०४) इ । अधीयानं प्रयुङ्क्ते । अनेन णिग्प्र० → इ । 'णौ क्री-जीङः' (४।२।१०) इ० → आ० । 'अर्त्ति-री-व्ली०' (४।२।२१) पोऽन्तः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । अत्र निमित्तभावेन ।

**[राजानमागमयति]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । राजानमागच्छन्तं प्रयुङ्क्ते । अनेन णिग्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'अमोऽकम्यमि-चमः' (४।२।२६) ह्रस्वः ।

**[मृगान् रमयति]** 'रमिं क्रीडायाम्' (९८९) रम् । रमन्तं(माणं) प्रयुङ्क्ते । अनेन णिग्प्र० → इ । 'अणिगि प्राणिकर्तृकानाप्याण्णिगः' (३।३।१०७) परस्मैपदम् ।

**[रात्रिं विवासयति कथकः]** रात्रि द्वितीया अम् । 'वसं निवासे' (९९९) वस्, विपूर्व० । विवसन्तं प्रयुङ्क्ते । अनेन णिग्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । आख्यानेन हि वुद्धयारूढा राजादयः प्रयुक्ताः प्रतीयन्ते ।

**[कंसं घातयति]** कंस द्वितीया अम् । 'हनंक् हिंसा-गत्योः' (११००) हन् । हन्ति नारायणः कंसं, तं कंसं घ्नन्तमन्यः प्रयुङ्क्ते । अनेन णिग्प्र० → इ । 'ञ्णिति घात्' (४।३।१००) घात् ।

**[बलिं बन्धयति नटः]** बलि द्वितीया अम् । 'बन्धंश् बन्धने' (१५५२) बन्ध् । बध्नाति बलिं नारायणस्तं बलिं बध्नन्तं अन्यः प्रयुङ्क्ते । अनेन णिग्प्र० → इ । अत्राभिनयेन ।

---

P. 卐 वसति भिक्षुस्तं वसन्तं भिक्षुं भिक्षा प्रयुङ्क्ते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[पुष्येण योजयति चन्द्रम्]** 'युजूंपी योगे' (१४७६) युज् । पुष्येण सह चन्द्रयुक्तं(?) (चन्द्रं युञ्जन्तं) प्रयुङ्क्ते । अनेन णिग्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[मघाभिर्योजयति गणकः]** मघाभिः सह चन्द्रं युञ्जन्तं प्रयुङ्क्ते । गणक प्रथमा सि । 'सहार्थे' (२।२।४५) इत्यनेन तृतीया अत्र ज्ञानेन ।

**[उज्जयिन्याः प्रदोषे प्रस्थितो माहिष्मत्यां सूर्यमुद्गमयति]** महिष्मत् । महिष्मति भवा । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी, तस्याम् । उज्जय(यि)नी पञ्चमी ङसि । उद्-गम् । उद्गच्छति सूर्यः, ✠तमुद्गच्छन्तं सूर्यं पान्थः प्रयुङ्क्ते । अनेन णिग्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'अमोऽकम्यमि-चमः' (४।२।२६) ह्रस्वः । प्रतिष्ठते स्म = प्रस्थितः । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'दो-सो-मा-स्थ इः' (४।४।११) इ । प्रथमा सि ।

**[रैवतकात् प्रस्थितः शत्रुञ्जये सूर्यं पातयति]** 'पत्लृ गतौ' (९६२) पत् । पतति सूर्यस्तं पतन्तं सूर्यं पान्थः प्रयुङ्क्ते । अनेन णिग्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । अत्र प्राप्त्या ।।छ।।

### तुमर्हादिच्छायां सन्नतत्सनः ।।३।४।२१।।

**[तुमर्हात्]** तुम् 'अर्ह पूजायाम्' (५६४) अर्ह् । +तुमर्हतीति तुमर्हः । 'अर्होऽच्' (५।१।९१) अच्प्र० → अ । तस्मात् ।

**[इच्छायाम्]** 'इषत् इच्छायाम्' (१४१९) इष् । एषणमिच्छा । 'मृगयेच्छा-याच्ञा-तृष्णा-कृपा-भा-श्रद्धा-ऽन्तर्द्धा' (५।३।१०१) इच्छा निपात्यते, तस्याम् ।

**[सन्नतत्सनः]** सन् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । स एव इच्छायां सन् = तत्सन् । न तत्सन् = अतत्सन्, तस्मात् । 'ह्रस्वान्ङ-ण-नो द्वे' (१।३।२७) नस्य द्वित्वम् ।

यो धातुरिषेः कर्म इषिणैव च समानकर्तृकः स तुमर्हः ।

**[चिकीर्षति]** 'डुकृंग् करणे' (८८८) कृ । करणं = कर्तुम् । 'शक-धृष-ज्ञा-रभ-लभ-सहा-ऽर्ह-ग्ला-घटाऽस्ति समर्थाऽर्थे च तुम्' (५।४।९०) तुम्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । कर्तुमिच्छति । अनेन सन्प्र० । ✠✠'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'सन्यस्य' (४।१।५९) इ । 'ऋतां क्ङितीर्' (४।४।११६) इर् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । 'नाम्यन्तस्था०' (२।३।१५) ष० । अत्र इषेः कर्म कृग् इषेः कृगश्च एक एव नरः कर्त्ता, य एव करोति स एवेच्छतीत्यर्थः ।

**[जिगमिषति]** 'गम्लृं गतौ' (३९६) गम् । गमनं = गन्तुम् । 'शक-धृष-ज्ञा-रभ-लभ-सहा-ऽर्ह-ग्ला०' (५।४।९०) तुम्प्र० । गन्तुमिच्छति । अनेन सन्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) मलोपः ।

---

P. ✠ तमुद्गच्छन्तं उज्जयिन्यां प्रदोषे प्रस्थितः पथिकः प्रयुङ्क्ते ।

P. + तुममर्हतीति ।

P.✠✠'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः । 'ऋतां क्ङितीर्' (४।४।११६) इर् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । 'सन्-यङश्च' (४।१।३) "की" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । वर्त्त० तिव् । शव् ।

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

'ग-होर्जः' (४।१।४०) ग० —> ज० । 'सन्यस्य' (४।१।५९) इ । 'गमोऽनात्मने' (४।४।५१) इट् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् ।

**[भोजनमिच्छति देवदत्तस्य]** भोजन द्वितीया अम् । 'इषत् इच्छायाम्' (१४१९) इष् । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) शप्र० —> अ । 'गमिषद्यमश्छः' (४।२।१०६) ष० —> छ० । 'स्वरेभ्यः' (१।३।३०) छस्य द्वित्वम् । 'अघोषे प्रथमोऽशिटः' (१।३।५०) छ० —> च० ।

**[भोक्तुं व्रजति]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भोजनाय । 'क्रियायां क्रियार्थायां तुम् णकच् भविष्यन्ती' (५।३।१३) तुम्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'च-जः क-गम्' (२।१।८६) ज० —> ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० —> क० । धृज (१३०) - धृजु (१३१) - ध्वज (१३२) - ध्वजु (१३३) - ध्रज (१३४) - ध्रजु (१३५) - वज (१३६) - 'व्रज गतौ' (१३७) व्रज् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[चिकीर्षितुमिच्छति]** कृ । कर्तुमिच्छति । सन्प्र० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) रलोपः । 'क-ङश्चञ्' (४।१।४६) क० —> च० । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । चिकीर्षणम् । 'शक-धृष-ज्ञा-रभ-लभ०' (५।४।९०) तुम्प्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् —> इ ।

**[जुगुप्सिषते]** 'गुपि गोपन-कुत्सनयोः' (७६३) गुप् । 'गुप्-तिजो गर्हा-क्षान्तौ सन्' (३।४।५) सन्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) पलोपः । 'ग-होर्जः' (४।१।४०) ग० —> ज० । जुगुप्सितुमिच्छति । सन्प्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'अतः' (४।३।८२) अलोपः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० ते ।

**[अर्थान् प्रतीषिषति]** अर्थ द्वितीया शस् । प्रति 'इंण्क् गतौ' (१०७५) इ । प्रत्येतुमिच्छति । अनेन सन्प्र० —> स । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) सस्य द्वित्वम् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'समानानां०' (१।२।१) दीर्घः ई । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[कथं नदीकूलं पिपतिषति]** 'पत्लृ गतौ' (९६२) पत् । पतितुमिच्छतीव । सन्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) तलोपः । 'सन्यस्य' (४।१।५९) इ । 'इवृध-भ्रस्ज-दम्भ-श्रि०' (४।४।४७) इट् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[श्वा मुमूर्षति]** 'मृंत् प्राणत्यागे' (१३३३) मृ । मर्तुमिच्छतीव । सन्प्र० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः । 'ओष्ठ्यादुर्' (४।४।११७) उरादेशः । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) रलोपः । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । 'नाम्यन्तस्था०' (२।३।१५) ष० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।।छ।।

## द्वितीयायाः काम्यः ।।३।४।२२।।

**[द्वितीयायाः]** द्वितीया पञ्चमी ङसि ।

**[काम्यः]** काम्य प्रथमा सि ।

**[पुत्रकाम्यति]** पुत्र । पुत्रमिच्छति । अनेन काम्यप्र० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[इदंकाम्यति]** इदम् । इदमिच्छति । अनेन काम्यप्र० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[स्वःकाम्यति]** स्वर् । स्वरिच्छति । अनेन काम्यप्र० ।

**[पुत्रकाम्यत्यसौ]** पुत्र इष्यते, पुत्रकाम्यतेऽनेन, पुत्रमिच्छति । काम्यप्र० । भाव-कर्त्रोरेव प्रयोगावम् ।

**[इष्टः पुत्रः]** 'इषत् इच्छायाम्' (१४१९) इष् । इष्यते । 'ज्ञानेच्छा-ऽर्चाऽर्थ-ञीच्छील्यादिभ्यः क्तः' (५।२।९२) क्तप्र० → त । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

**[भ्रातुष्पुत्रकाम्यति]** भ्रातुः पुत्रः = भ्रातुष्पुत्रः । 'भ्रातुष्पुत्र-कस्कादयः' (२।३।१४) भ्रातुष्पुत्रनिपातः । भ्रातुष्पुत्रमिच्छति । अनेन काम्यप्र० ।।छ।।

### अमाव्ययात् क्यन् च ।।३।४।२३।।

**[अमाव्ययात्]** मश्च अव्ययश्च = माऽव्ययम्, न माऽव्ययम् = अमाऽव्ययम् । 'नञत्' (३।२।१२५) न० → अ०, तस्मात् ।

**[क्यन्]** क्यन् प्रथमा सि ।

**[च]** च प्रथमा सि ।

**[पुत्रीयति]** पुत्र । पुत्रमिच्छति । अनेन क्यन्प्र० → य । 'क्यनि' (४।३।११२) अ० → ई० ।

**[नाव्यति]** नौ । नावमिच्छति । अनेन क्यन्प्र० → य । 'य्यक्ये' (१।२।२५) आव् ।

**[वाच्यति]** वाचमिच्छति । अनेन क्यन्प्र० → य ।

**[इदमिच्छति]** इदम् द्वितीया अम् । 'अनतो लुप्' (१।४।५९) अम्लोपः । इच्छति ।

**[स्वरिच्छति]** स्वर् द्वितीया अम् । 'अव्ययस्य' (३।२।७) अम्लोपः । इच्छति, स्वर्गम् ।

**[गव्यति]** गो । गामिच्छति । मतान्तरे अनेन क्यन्प्र० → य । 'य्यक्ये' (१।२।२५) अव् ।

**[पुत्रीयति]** पुत्रमिच्छति । क्यन्प्र० । 'क्यनि' (४।३।११२) ई ।

**[राजीयति]** राजन् । राजानमिच्छति । क्यन्प्र० । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः । 'क्यनि' (४।३।११२) ई ।।छ।।

### आधाराच्चोपमानादाचारे ।।३।४।२४।।

**[आधारात्]** आ 'धृंग् धारणे' (८८७) धृ । आध्रियन्ते क्रिया अस्मिन्नित्याधारः । 'न्याया-ऽवाया-ऽध्यायोद्याव-संहारा-ऽवहारा-ऽऽधार-दार-जारम्' (५।३।१३४) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर्, तस्मात् ।

**[च]** च प्रथमा सि ।

**[उपमानात्]** उपमान पञ्चमी ङसि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[आचारे]** आचार सप्तमी ङि ।

**[पुत्रीयति छात्त्रम्]** पुत्र । पुत्रमिवाऽऽचरति । अनेन क्यन्प्र० → य । 'क्यनि' (४।३।११२) अ० → ई० । छात्त्र द्वितीया अम् ।

**[वस्त्रीयति कम्बलम्]** वस्त्रमिवाऽऽचरति । अनेन क्यन्प्र० → य । 'क्यनि'-(४।३।११२) अ० → इ० । कम्बल द्वितीया अम् ।

आधारात् - **[प्रासादीयति कुट्याम्]** प्रासाद । प्रासादे इवाऽऽचरति । अनेन क्यन्प्र० → य । 'क्यनि' (४।३।११२) ई । कुटी सप्तमी ङि ।

**[पर्यङ्कीयति मञ्चके]** पर्यङ्क इवाऽऽचरति । अनेन क्यन्प्र० → य । 'क्यनि' (४।३।११२) ई ।।छ।।

**कर्तुः क्विप्, गल्भ-क्लीब-होडात्तु ङित्** ।।३।४।२५।।

**[कर्तुः]** कर्तृ पञ्चमी ङसि ।

**[क्विप्]** क्विप् प्रथमा सि ।

**[गल्भक्लीबहोडात्]** गल्भश्च क्लीबश्च होडश्च = गल्भक्लीबहोडम्, तस्मात् ।

**[तु]** तु प्रथमा सि ।

**[ङित्]** ङ् इत् अनुबन्धो यस्याऽसौ ङित्, प्रथमा सि ।

**[अश्वति]** अश्व । अश्व इवाऽऽचरति । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[गर्दभति]** गर्दभ । गर्दभ इवाऽऽचरति । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[दधयति]** दधि । दधीवाऽऽचरति । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[गवा]** गौरिवाऽऽचरति । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'शंसि-प्रत्ययात्' (५।३।१०५) अप्र० । ओदौतोऽवाव्' (१।२।२४) अव् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[नावा]** नौरिवाऽऽचरति । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'शंसि-प्रत्ययात्' (५।३।१०५) अप्र० । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[राजनति]** राजन् । राजेवाऽऽचरति । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[मधुलेहति]** मधु 'लिहींक् आस्वादने' (११२९) लिह् । मधु लेढीति । क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । मधुलिडिवाऽऽचरति । अनेन क्विप् पुनरेव । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[गल्भते]** गल्भ । गल्भ इवाऽऽचरति ।

**[अवगल्भते]** अवगल्भ इवाऽऽचरति ।

**[क्लीबते]** क्लीब इवाऽऽचरति ।

**[विक्लीबते]** विक्लीब इवाऽऽचरति ।

**[होडते ]** होड इवाऽऽचरति ।

**[विहोडते]** विहोड इवाऽऽचरति । पञ्चसूदाहरणेषु अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[गल्भांचक्रे, अवगल्भांचक्रे]** गल्भ इवाऽऽचचार । अवगल्भ इवाऽऽचचार । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । परोक्षा ए । 'धातोरनेकस्वरादाम्०' (३।४।४६) आम् । 'डुकृंग् करणे' (८८८) कृ । परोक्षा ए । 'द्विर्धातुः परोक्षा-डे०' (४।१।१) "कृ" द्वि० । 'ऋतोऽत्' (४।१।३८) कृ० → क० । 'क-ङ-श्च-ञ्' (४।१।४६) क० → च० । 'इवर्णादे०' (१।२।२१) रत्वम् । ङित्त्वादात्मनेपदम् ।

**[अश्वति]** अश्व । अश्वमिवाऽऽत्मानमाऽऽचरति गर्दभः = अश्वति । मतान्तरे क्विप्प्र० ।

**[श्येनायते]** श्येन । श्येनमिवाऽऽत्मानमाऽऽचरति काकः = श्येनायते । मतान्तरे क्यङ्प्र० → य । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः ।।छ।।

## **क्यङ्** ।।३।४।२६।।

**[क्यङ्]** क्यङ् प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलोपः ।

**[श्येनायते]** श्येन इवाऽऽचरति ।

卐卐 **[हस्तायते]** हस्त इवाऽऽचरति ।

**[हंसायते]** हंस इवाऽऽचरति ।

**[अश्वायते]** अश्व इवाऽऽचरति ।

**[गर्दभायते]** गर्दभ इवाऽऽचरति ।

**[गल्भायते]** गल्भ इवाऽऽचरति ।

**[क्लीबायते]** क्लीब इवाऽऽचरति ।

**[होडायते]** होड इवाऽऽचरति । सर्वत्र अनेन क्यङ्प्र० → य । 'दीर्घश्च्वि०' (४।३।१०८) दीर्घः । वर्त्त० ते । 'कर्त्तर्य०' (३।४।७१) शव् ।

क्विप्क्यङोस्तुल्यविषयत्वादसत्युत्सर्गापवादत्वे पर्यायेण प्रयोगः । ककारः सामान्यग्रहणार्थः । ङकार आत्मनेपदार्थः ।।छ।।

---

卐卐 इदमुदाहरणं बृहद्वृत्तौ नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## सो वा लुक् च ॥३।४।२७॥

[सः] 卐स् षष्ठी ङस् ।

[वा] वा प्रथमा सि ।

[लुक्] लुक् प्रथमा सि ।

[च] च प्रथमा सि ।

स इत्यावृत्त्या पञ्चम्यन्तं षष्ठ्यन्तं वाभिसंबध्यते ।

[पयायते, पयस्यते] पयस् । पय इवाऽऽचरति । अनेन क्यङ्प्र० → य-सलुक् च । 'दीर्घश्च्वि०' (४।३।१०८) दीर्घः ।

[सरायते, सरस्यते] सरस् । सर इवाऽऽचरति । अनेन क्यङ्प्र० → य - सलुक् च । 'दीर्घश्च्वि०' (४।३।१०८) दीर्घः ।

[अप्सरायते] अप्सरस् । अप्सरस इवाऽऽचरन्ति । अनेन क्यङ्प्र० → य । मतान्तरे सलुक् । 'दीर्घश्च्वि०' (४।३।१०८) दीर्घः । अप्सरत्यपि ज्ञेयम् ॥छ॥

## ओजोऽप्सरसः ॥३।४।२८॥

[ओजोऽप्सरसः] ओजश्च अप्सराश्च = ओजोऽप्सरस्, तस्मात् ।

नित्यं सलोपार्थं वचनम् ।

[ओजायते] ओजस् । ओजस्वीवाऽऽचरति । अनेन क्यङ्प्र० → य-सलुक् च । 'दीर्घश्च्वि०' (४।३।१०८) दीर्घः ।

[अप्सरायते] अप्सरस् । अप्सरा इवाऽऽचरति । अनेन क्यङ्प्र० → य-सलुक् च । 'दीर्घश्च्वि०' (४।३।१०८) दीर्घः ॥छ॥

## च्व्यर्थे भृशादेः स्तोः ॥३।४।२९॥

[च्व्यर्थे] च्वेरर्थः = च्व्यर्थस्तस्मिन् ।

[भृशादेः] भृश आदिर्यस्याऽसौ भृशादिस्तस्मात् ।

[स्तोः] स् च त् च = स्तौ, तयोः = स्तोः, षष्ठी ओस् ।

अभूततद्भावार्थं वचनम् ।

[भृशायते] अभृशो भृशो भवति । अनेन क्यङ्प्र० → य ।

[उन्मनायते] उत् - मनस् । उद्गतं मनो यस्याऽसौ उन्मनाः । अनुन्मना उन्मना भवति । अनेन क्यङ्प्र० → य - सलुक् च ।

[वेहायते] वेहत् । अवेहद्वेहद्भवति । अनेन क्यङ्प्र० → य - तलुक् च ।

---

P. 卐 स् पञ्चमी ङसि-षष्ठी ङस् वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ओजायते]** ओजस् । अनोजस्वी ओजस्वी भवति । अनेन क्यङ्प्र० → य-सलुक् च । सर्वत्र 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः ।

भवत्यर्थे क्यङ्, प्रागतत्तत्त्वमात्रे च च्वि, इत्यतोऽर्थभेदान्न क्यङ् च्वेर्बाधक इति भावार्थः ॥छ॥

## डाच्-लोहितादिभ्यः षित् ॥३।४।३०॥

**[डाच्लोहितादिभ्यः]** लोहित आदिर्येषां ते = लोहितादयः, डाच् च लोहितादयश्च = डाच्लोहितादयस्तेभ्यः = डाच्लोहितादिभ्यः, पञ्चमी भ्यस् ।

**[षित्]** ष् इत् अनुबन्धो यस्याऽसौ षित् । प्रथमा सि ।

**[पटपटायति, पटपटायते]** अपटत् पटद्भवति । 'अव्यक्ताऽनुकरणादनेकस्वरात् कृ-भ्वस्तिनाऽनितौ द्विश्च' (७।२।१४५) डाच्प्र० → आ-द्विर्वचनं च । 'डाच्यादौ' (७।२।१४९) तलोपः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादि "अत्' लोपः । अपटपटा पटपटा भवति । अत्रे(त्रै)व क्यङ्ष्प्र० । यद्वा अपटत् पटद्भवति इति कृते डाचि द्विर्वचनं क्यङ्ष् इत्यादि क्रियते ।

**[दमदमायति, दमदमायते]** अदमत् दमद्भवति । 'अव्यक्तानुकरणा० (७।२।१४५) डाच्प्र० → आ-द्विर्वचनं च । 'डाच्यादौ' (७।२।१४९) तलोपः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लोपः । अनेन क्यङ्ष्प्र० → य ।

**[लोहितायति, लोहितायते]** अलोहितो लोहितो भवति । अनेन क्यङ्ष्प्र० → य । 'दीर्घश्च्वि०' (४।३।१०८) दीर्घः । 'क्यङ्षो नवा' (३।३।४३) इति विकल्पेन आत्मनेपदम् ।

**[अपटपटा पटपटा करोति]**卐 न पटपटा = अपटपटा । अम् । 'अव्ययस्य' (३।२।७) लोपः । पटपटा । अस् । 'अव्ययस्य' (३।२।७) लोपः, इति वाक्यनिष्पत्तिरिति ।

आकृतिगणात् "**अमृतं यस्य विषायति**" इति सिद्धम् ।

**[धूमायति, धूमायते]** धूम । अधूमवान् धूमवान् भवति । क्यङ्ष्प्र० → य । 'दीर्घश्च्वि०' (४।३।१०८) दीर्घः आ ॥छ॥

## कष्ट-कक्ष-कृच्छ्र-सत्र-गहनाय पापे क्रमणे ॥३।४।३१॥

**[कष्टकक्षकृच्छ्रसत्रगहनाय]**+ कष्टश्च कक्षश्च कृच्छ्रश्च सत्रश्च गहनश्च = कष्टकक्षकृच्छ्रसत्रगहनम्, चतुर्थ्यन्तं चैतत्, कष्टकक्षकृच्छ्रसत्रगहनाय, तस्मात् द्वे द्वे सति आयेन सह कर्मधारयो वा सूत्रत्वात् पञ्चम्या लोपः ।

कष्टपापहेतुत्वात् कर्मापि पापम् ।

**[कष्टायते]** 'कष हिंसायाम्' (५०७) कष् । कषिष्यतीति । 'कषोऽनिटः' (५।३।३) क्तप्र० → त । 'कषः कृच्छ्र-गहने' (४।४।६७) इट्निषेधः । कष्टाय कर्मणे क्रामति ।

**[कक्षायते]** कक्ष । कक्षाय कर्मणे क्रामति ।

**[कृच्छ्रायते]** कृच्छ्र । कृच्छ्राय कर्मणे क्रामति ।

---

P. 卐 अपटत् पटत् करोति । 'अव्यक्तानुकरणा०' (७।२।१४५) डाच्प्र० । 'डाच्यादौ' (७।२।१४९) तलोपः ।

P. + कष्टं च कक्षं च कृच्छ्रं च सत्रं च गहनायश्च = कष्ट० ... तेभ्यः, चतुर्थी भ्यस् । सूत्रत्वात् भ्यस्लोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[सत्रायते]** सत्र । सत्राय कर्मणे क्रामति ।

**[गहनायते]** गहन । गहनाय कर्मणे क्रामति । सर्वत्र अनेन क्यङ्प्र० → य । 'दीर्घश्च्वि०' (४।३।१०८) दीर्घः । वर्त्त० ते ।

**[कष्टाय तपसे क्रामति]** कष्टाय-तीव्राय तपसे क्रामति ।

**[कष्टायते]** कष्टं चिकीर्षति । मतान्तरे क्यङ्प्र० → य । 'दीर्घश्च्वि-यङ्०' (४।३।१०८) दीर्घः ।

ङकार आत्मनेपदार्थः ।।छ।।

**रोमन्थाद् व्याप्यादुच्चर्वणे** ।।३।४।३२।।

**[रोमन्थात्]** रोमन्थ पञ्चमी ङसि ।

**[व्याप्यात्]** व्याप्य पञ्चमी ङसि ।

**[उच्चर्वणे]** उद्गीर्य चर्वणमुच्चर्वणम्, तस्मिन् ।

**[रोमन्थायते गौः]** उत् 'चर्व अदने' (४५३) चर्व् । उच्चर्वति । उच्चर्वणयोग्यो भवति रोमन्थस्तं प्रयुङ्क्ते, बहुलमेतन्निदर्शनमिति चुरादित्वं वा उच्चर्वं करोतीति वा । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० → इ । रोमन्थमुच्चर्वयति । अनेन क्यङ्प्र० विकल्पे । गो प्रथमा सि । उद्गीर्य चर्वयतीत्यर्थः ।

**[कीटो रोमन्थं वर्तयति]** कीट प्रथमा सि । रोमन्थ द्वितीया अम् । 'वृतूङ् वर्तने' (९५५) वृत् । वर्त्तमानं प्रयुङ्क्ते । णिग्प्र० । उद्गीर्य बहिस्त्यक्तं पृष्ठान्तेन निर्गतं वा द्रव्यं गुटिकां करोतीत्यर्थः ।।छ।।

**फेनोष्म-बाष्प-धूमादुद्वमने** ।।३।४।३३।।

**[फेनोष्मबाष्पधूमात्]** फेनश्च ऊष्मा च बाष्पश्च धूमश्च = फेनोष्मबाष्पधूमम्, तस्मात् ।

**[उद्वमने]** उर्ध्वं वमनं = उद्वमनम्, तस्मिन् ।

**[फेनायते]** फेन । फेनमुद्वमति ।

**[ऊष्मायते]** ऊष्मन् । ऊष्माणमुद्वमति ।

**[बाष्पायते]** बाष्प । बाष्पमुद्वमति ।

**[धूमायते]** धूम । धूममुद्वमति । सर्वत्र अनेन क्यङ्प्र० → य । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः ।।छ।।

**सुखादेरनुभवे** ।।३।४।३४।।

**[सुखादेः]** सुखमादिर्यस्याऽसौ सुखादिस्तस्मात् ।

**[अनुभवे]** अनु 'भू सत्तायाम्' (१) भू । अनुभवनम् । 'भू-श्र्यदोऽल्' (५।३।२३) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव्, तस्मिन् ।

**[सुखायते]** सुख । सुखमनुभवति । अनेन क्यङ्प्र० । 'दीर्घश्च्वियङ्०' (४।३।१०८) दीर्घः । वर्त्त० ते । 'कर्त्तर्यन०'

(३।४।७१) शव् ।

**[दुःखायते]** दुःख । दुःखमनुभवति । अनेन क्यङ्प्र० । 'दीर्घश्च्वि-यङ्०' (४।३।१०८) दीर्घः । वर्त्त० ते । 'कर्त्तर्यन०' (३।४।७१) शव् ।

**[सुखं वेदयते प्रसाधको देवदत्तस्य]** सुख द्वितीया अम् । 'विदिण् चेतना-ऽऽख्यान-निवासेषु' (१८०८) विद् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१)शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्-' (१।२।२३) अय् । प्रसाधको भूषको देवदत्तस्य । मुखादिविकारेणानुमानतो निश्चिनोतीत्यर्थः । सुख, दुःख, तृप्र-दुःखं, कृच्छ्र, अस्र-अश्रु-रुधिरं वा, आस्र, अलीक, करुण, कृपण-दैन्यः, सोढ-सहनमभिभवो वा, प्रतीपः-प्रतिकूलम् ।।छ।।

## शब्दादेः कृतौ वा ॥३।४।३५॥

**[शब्दादेः]** शब्द आदिर्यस्याऽसौ शब्दादिस्तस्मात् ।

**[कृतौ]** करणं = कृतिस्तस्याम् ।

**[वा]** वा प्रथमा सि ।

**[शब्दायते]** शब्द । शब्दं करोति । अनेन क्यङ्प्र० → य । 'दीर्घश्च्वि-यङ्०' (४।३।१०८) दीर्घः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[वैरायते]** वैर । वैरं करोति । अनेन क्यङ्प्र० → य । 'दीर्घश्च्वि-यङ्०' (४।३।१०८) दीर्घः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[कलहायते]** कलह । कलहं करोति । अनेन क्यङ्प्र० → य ।

अनेनैव वाक्येन णिजपि भवति ।

**[मम]** ममेति षष्ठ्यन्तमनुकरणम् ।

**[अट]** अट् । अटनम् । 'भिदादयः' (५।३।१०८) अङ्प्र० → अ ।

**[अटाट्या]** अटाट्यते इति । 'वाऽटाट्यात्' (५।३।१०३) यप्र० । 'अतः' (४।३।८२) अलोपः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[सीका]** सीका - रूक्षता ।।छ।।

## तपसः क्यन् ॥३।४।३६॥

**[तपसः]** तपस् पञ्चमी ङसि ।

**[क्यन्]** क्यन् प्रथमा सि ।

**[तपस्यति]** तपस् । तपः करोति । अनेन क्यन्प्र० → य ।

**[तपस्यति शत्रून्]** शत्रूणां तपः करोति । पूर्वेण क्यन्प्र० → य । शत्रु द्वितीया शस् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[व्याकरणं सूत्रयति]** व्याकरणस्य सूत्रं करोति । व्याकरण द्वितीया अम् । सूत्रयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० → इ । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।।छ।।

## नमो-वरिवश्चित्रङोऽर्चा-सेवा-ऽऽश्चर्ये ।।३।४।३७।।

**[नमोवरिवश्चित्रङः]** नमश्च वरिवश्च चित्रङ् च = नमोवरिवश्चित्रङ्, तस्मात् ।

**[अर्चासेवाऽऽश्चर्ये]** अर्चा च सेवा च आश्चर्यं च = अर्चासेवाऽऽश्चर्यम्, तस्मिन् ।

**[नमस्यति देवान्]** देव-नमस् । देवेभ्यो नमः करोति । अनेन क्यन्प्र० ।

**[वरिवस्यति गुरून्]** 'वृङ्श् सम्भक्तौ' (१५६७) वृ । वृणीते इति । 'स्वरेभ्य इः' (उणा० ६०६) इप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । वरिः-सेवकः, तत्र वसतीति । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) विच्प्र० । 'अप्रयोगीत्' (१।१।३७) विच्लोपः । वरिवः = सेवा, तां करोतीति । अनेन क्यन्प्र० । गुरु द्वितीया शस् ।

**[चित्रीयते]** चित्रङ् आश्चर्ये (    ) चित्र । चित्रं करोति । अनेन क्यन्प्र० → य । 'क्यनि' (४।३।११२) ई । ङकार आत्मनेपदार्थः ।

**[नमः करोति]** नमस् द्वितीया अम् । 'अनतो लुप्' (१।४।५९) अम्लोपः । अर्थप्रधानोऽयमव्ययं अत्र तु शब्दप्रधानः करोति, नमःशब्दमुच्चारयतीत्यर्थः ।

**[चित्रं करोति]** चित्रं करोति । नानात्वमालेख्यं वा करोतीत्यर्थः ।।छ।।

## अङ्गान्निरसने णिङ् ।।३।४।३८।।

**[अङ्गात्]** अङ्ग पञ्चमी ङसि ।

**[निरसने]** निरसन सप्तमी ङि ।

**[णिङ्]** णिङ् प्रथमा सि ।

**[हस्तयते]** हस्त । हस्तौ निरस्यति ।

**[पादयते]** पाद । पादो(दौ) निरस्यति ।

**[ग्रीवयते]** ग्रीवा । ग्रीवां निरस्यति-निराकरोति । सर्वत्र अनेन णिङ्प्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अवर्णलोपः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[हस्तयति]** हस्तं करोति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० → इ । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अलोपः ।।छ।।

## पुच्छादुत्-परि-व्यसने ।।३।४।३९।।

**[पुच्छात्]** पुच्छ पञ्चमी ङसि ।

**[उत्परिव्यसने]** उच्च परिश्च विश्च = उत्परिवयः, उत्परिविभ्योऽसनम्=उत्परिव्यसनम्, उत्परिव्यसनं च असनं च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

= उत्परिव्यसनम् । 'ते लुग्वा' (३।२।१०८) असन एकलुक्, तस्मिन् ।

**[उत्पुच्छयते]** उत्-पुच्छ । पुच्छमुदस्यति ।

**[परिपुच्छयते]** परि-पुच्छ । पुच्छं पर्यस्यति ।

**[विपुच्छयते]** वि-पुच्छ । पुच्छं व्यस्यति ।

**[पुच्छयते]** पुच्छमस्यति । सर्वत्र अनेन णिङ्प्र० → इ । 'त्रन्त्यस्वरादेः' (७।४।४३) अलोपः ॥छ॥

**भाण्डात् समाचितौ** ॥३।४।४०॥

**[भाण्डात्]** भाण्ड पञ्चमी ङसि ।

**[समाचितौ]** समाचयनं = समाचितिः, तस्याम् ।

समाचयनं च समा परिणा च द्योत्यते ।

**[संभाण्डयते]** सम्-भाण्ड । भाण्डानि समाचिनोति, राशीं करोतीत्यर्थः ।

**[परिभाण्डयते]** भाण्डानि परिचिनोति । अनेन णिङ्प्र० → इ । 'त्रन्त्यस्वरादेः' (७।४।४३) अलोपः ॥छ॥

**चीवरात् परिधार्जने** ॥३।४।४१॥

**[चीवरात्]** चीवर पञ्चमी ङसि ।

**[परिधार्जने]** परिधा च अर्जनं च = परिधार्जनम्, तस्मिन् ।

**[परिचीवरयते]** चीवर । चीवरं परिधत्ते । अनेन णिङ्प्र० → इ । समाच्छादनमपि परिधानम् ।

**[संचीवरयते]** सम्-चीवर । चीवरं समाच्छादयति ।

**[चीवरयते]** चीवरमर्जयति । अनेन णिङ्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अलोपः ।

**[संचीवरयते]** चीवरं संमार्जयति । मतान्तरे णिङ्प्र० । वर्त्त० तिव्-(ते) । गु० अय् ॥छ॥

**णिज्बहुलं नाम्नः कृगादिषु** ॥३।४।४२॥

**[णिज्]** णिज्(च्) प्रथमा सि ।

**[बहुलम्]** बहु लातीति । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलोपः । 'क्रियाविशेषणात्' (२।२।४१) अम् ।

**[नाम्नः]** नामन् पञ्चमी ङसि ।

**[कृगादिषु]** कृग् आदिर्येषां ते = कृगादयस्तेषु ।

बहुलग्रहणं प्रयोगानुसरणार्थम्, तेन यस्मान्नाम्नो यद्विभक्त्यन्ताद्यस्मिन् धात्वर्थे दृश्यते तस्मात्तद्विभक्त्यन्तात्तद्धात्वर्थे एव भवतीति नियमो लभ्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[मुण्डयति छात्रम्]** मुण्ड । मुण्डं करोति । अनेन णिच्प्र० । छात्र द्वितीया अम् ।

**[मिश्रयत्योदनम्]** मिश्र । मिश्रं करोति । अनेन णिच्प्र० ।

**[श्लक्ष्णयति वस्त्रम्]** वस्त्र द्वितीया अम् ।

**[लवणयति सूपम्]** लवणेन संसृष्टः । 'लवणादः' (६।४।६) अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । लवणेन मिश्रं करोति । अनेन णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अलोपः । सूप द्वितीया अम् ।

**[मुण्डयति]** मुण्ड । अमुण्डं मुण्डं करोति । मतान्तरे णिच्प्र० ।

**[लघयति]** लघु । लघुं करोति ।

**[छिद्रयति]** छिद्र । छिद्रं करोति ।

**[कर्णयति]** कर्ण । कर्णं करोति ।

**[दण्डयति]** दण्ड । दण्डं करोति ।

**[अन्धयति]** 'अन्धण् दृष्ट्युपसंहारे' (१८८४) अन्ध् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । अन्धयतीति । 'अच्' (५।१।४९) अच्प्र० । अन्धं करोति ।

**[अङ्कयति]** 'अकुङ् लक्षणे' (६१०) अक् । 'उदितः स्वरान्नोन्तः' (४।४।९८) अङ्क् । अङ्क्यते इति । 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः' (५।३।२८) अल्प्र० → अ । अङ्कं करोति ।

**[व्याकरणं सूत्रयति]** व्याकरणस्य सूत्रं करोति ।

**[द्वारमुद्घाटयति]** उत् 'घटण् संघाते' (१७३६) घट् । उद्घटनम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । द्वारस्योद्घाटं करोति । सर्वत्र अनेन णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अलोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[पाप्मिन उल्लाघयति]** पाप्मन् । पाप्मा-पापमस्त्येषाम् । 'शिखादिभ्य इन्' (७।२।४) इन्प्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) अनो लुक् । द्वितीया शस् । उल्लाघ । उल्लाघं करोति ।

**[त्रिलोकी तिलकयति]** तिलक । त्रिलोक्यास्तिलकं करोति । अनेन णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अलोपः ।

**[पटयति]** पटु । पटुमाचष्टे । अनेन णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरलोपः ।

**[स्थवयति]** स्थूल । स्थूलमाचष्टे । अनेन णिच्प्र० । 'स्थूल-दूर-युव-ह्रस्व-क्षिप्र-क्षुद्रस्यान्तस्थादेर्गुणश्च नामिनः' (७।४।४२) "स्थू" आदेशो गुणश्च । 'ओदौतोऽवाव्' (१।२।२४) अव् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[दवयति]** दूर । दूरमाचष्टे । अनेन णिच्प्र० । 'स्थूल-दूर-युव-ह्रस्व-क्षिप्र०' (७।४।४२) "दु(दू)" आदेशो गुणश्च । 'ओदौतोऽवाव्' (१।२।२४) अव् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[यवयति]** युवन् । युवानमाचष्टे । अनेन णिच्प्र० । 'स्थूल-दूर-युव-ह्रस्व-क्षिप्र०' (७।४।४२) ''यु'' आदेशो गुणश्च । 'ओदौतोऽवाव्' (१।२।२४) अव् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[क्षेपयति]** क्षिप्र । क्षिप्रमाचष्टे । अनेन णिच्प्र० । 'स्थूल-दूर-युव-ह्रस्व-क्षिप्र०' (७।४।४२) क्षिपादेशो गुणश्च । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[क्षोदयति]** क्षुद्र । क्षुद्रमाचष्टे । अनेन णिच्प्र० । 'स्थूल-दूर-युव-ह्रस्व-क्षिप्र-क्षुद्र०' (७।४।४२) क्षुदादेशो गुणश्च । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[प्रापयति]** प्रिय । प्रियमाचष्टे करोति वा । अनेन णिच्प्र० —> इ । 'प्रिय-स्थिर-स्फिरोरु-गुरु-बहुल-तृप्र-दीर्घ-वृद्ध-वृन्दारकस्येमनि च प्रा-स्था-स्फा-वर-गर-बंह-त्रप-द्राघ-वर्ष-वृन्दम्' (७।४।३८) प्रादेशः । 'अर्त्ति-री-व्ली-ह्री-क्नूयि-क्ष्माय्यातां पुः' (४।२।२१) पोऽन्तः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[स्थापयति]** स्थिरमाचष्टे करोति वा । अनेन णिच्प्र० —> इ । 'प्रिय-स्थिर-स्फिरोरु-गुरु-बहुल-तृप्र-दीर्घ-वृद्ध०' (७।४।३८) स्थादेशः । 'अर्त्ति-री-व्ली-ह्री-क्नूयि०' (४।२।२१) पोऽन्तः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[स्फापयति]** स्फिरमाचष्टे करोति वा । अनेन णिच्प्र० —> इ । 'प्रिय-स्थिर-स्फिरोरु-गुरु-बहुल-तृप्र-दीर्घ-वृद्ध०' (७।४।३८) स्फादेशः । 'अर्त्ति-री-व्ली-ह्री-क्नूयि०' (४।२।२१) पोऽन्तः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय् (१।२।२३) अय् ।

**[पुच्छयति]** पुच्छ । पुच्छमाचष्टे ।

**[वृक्षयति]** वृक्षमाचष्टे रोपयति वा ।

**[कृतयति]** कृतं गृह्णाति ।

**[वर्णयति]** वर्णं गृह्णाति ।

**[त्वचयति]** त्वच । त्वचं गृह्णाति ।

**[रूपयति]** रूपं दर्शयति ।

**[निरूपयति]** रूपं निध्यापयति ।

**[अनुलोमयति]** अनु-लोमन् । लोमान्यनुमार्ष्टि ।

**[वितूस्तयति]** उत्-तूस्त । तूस्तानि उद्वहन्ति । अनेन सर्वत्र णिच्प्र० —> इ । केशान् विजटीकरोतीत्यर्थः ।

**[संवस्त्रयति]** वस्त्र-सम्पूर्व० । वस्त्रं वस्त्रेण वा समाच्छादयति ।

**[परिवस्त्रयति]** वस्त्र-परिपूर्व० । वस्त्रं परिदधाति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[उत्तृणयति]** उत्-तृण । तृणान्युत्प्लुत्य शातयति ।

**[अतिहस्तयति]** हस्तिनातिक्रामति ।

**[अत्यश्वयति]** अश्व । अश्वेनातिक्रामति ।

**[संवर्मयति]** वर्मन्-सम्पूर्व० । वर्मणा संनह्यति ।

**[उपवीणयति]** उप-वीणा । वीणया उपयाति(गायति) ।

**[अभिषेणयति]** अभि-सेना । सेनया अभियाति । 'स्था-सेनि-सेध-सिच-सञ्जां द्वित्वेऽपि' (२।३।४०) षत्वम् ।

**[अवचूर्णयति]** अव-चूर्ण । चूर्णैरवध्वंसयति अवकिरति वा ।

**[अनुतूलयति]** अनु-तूल । तूलैरनुकुष्णाति ।

**[अवतूलयति]** तूलैरवकुष्णाति अनुगृह्णाति वा । अनेन सर्वत्र णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः ।

**[वासयति]** वासी । वास्या छिनत्ति ।

**[परशयति]** परशु । परशुना छिनत्ति ।

**[असयति]** असि । असिना छिनत्ति ।

**[परिवासयति]** परि-वासी । वास्या परिछिनत्ति ।

**[उद्वासयति]** उत्-वासस् । वाससा उन्मोचयति ।

**[उपश्लोकयति]** उप-श्लोक । श्लोकैरुपस्तौति ।

**[अपहस्तयति]** अप-हस्त । हस्तेनापक्षिपति ।

**[समश्वयति]** सम्-अश्व । अश्वेन संयुनक्ति ।

**[गन्धयति]** गन्ध । गन्धेनार्चयति ।

**[पुष्पयति]** पुष्प । पुष्पैरर्चयति ।

**[बलयति]** बल । बलेन सहते ।

**[शीलयति]** शील । शीलेनाचरति ।

**[सामयति]** स(सा)मन् । साम आचरति ।

**[सान्त्वयति]** सान्त्व । सान्त्वमाचरति ।

**[उपच्छन्दयति]** उप-छन्दस् । छन्दसा उपचरति उपमन्त्रयते वा ।

**[संपाशयति]** सम्-पाशा(श) । पाशेन संयच्छति ।

**[विपाशयति]** वि-पाश । पाशं पाशाद्वा विमोचयति ।

**[शूरयति]** शूर । शूरो भवति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[वीरयति]** वीर । वीर उत्सहते ।

**[उत्कूलयति]** उत्-कूल । कूलमुल्लङ्घयति ।

**[प्रतिकूलयति]** प्रति-कूल । कूलं प्रतीपं गच्छति ।

**[अनुकूलयति]** अनु-कूल । कूलमनुगच्छति ।

**[अवलोष्टयति]** अव-लोष्ट । लोष्टानवमर्दयति ।

**[पुत्रयति]** पुत्र । पुत्रं सूते । अनेन सर्वत्र णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः ।

**[आख्यानम्]** आख्यान । आख्यानमाचष्टे ।

**[नलोपाख्यानम्]** नलोपाख्यानमाचष्टे ।

**[कंसवधम्]** कंसवध । कंसवधमाचष्टे ।

**[सीताहरणम्]** सीताहरण । सीताहरणमाचष्टे ।

**[रामप्रव्रजनम्]** रामप्रव्रजन । रामप्रव्रजनमाचष्टे ।

**[राजागमनम्]** राजागमन । राजागमनमाचष्टे ।

**[मृगरमणम्]** मृगरमण । मृगरमणमाचष्टे ।

**[आरात्रिविवासम्]** आरात्रिविवास । आरात्रिविवासमाचष्टे । बहुलवचनात् सर्वत्र अनेन णिच्प्र० न भवति । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः ।

यत्र पुनरेकोपसर्गविशिष्टा क्रिया प्रत्ययार्थस्तत्र शब्दशक्तिस्वाभाव्यादेक एवोपसर्गार्थः प्रत्ययार्थेऽन्तर्भवति, द्वितीयस्तूपसर्गेणैव प्रत्याय्यते ।

प्रत्याय्यते-ज्ञाप्यते इत्यर्थः ।

**[सम्भाण्डयते]** सम्-भाण्ड । भाण्डं समाचिनोति । 'भाण्डात् समाचितौ' (३।४।४०) णिङ्प्र० → इ । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः ॥छ॥

## व्रताद् भुजि-तन्निवृत्त्योः ॥३।४।४३॥

**[व्रतात्]** व्रत पञ्चमी ङसि ।

**[भुजितन्निवृत्त्योः]** तस्य = भुजेर्निवृत्तिः = तन्निवृत्तिः, भुजिश्च तन्निवृत्तिश्च = भुजितन्निवृत्ती, तयोः = भुजितन्निवृत्त्योः ।

व्रतं शास्त्रविहितो नियमः ।

**[पयो व्रतयति]** पयस् द्वितीया अम् । पय एव मया भोक्तव्यमिति व्रतं करोति, गृह्णाति वा । अनेन णिच्प्र० → इ । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[सावद्यान्नं व्रतयति]** सावद्यान्न द्वितीया अम् । सावद्यान्नं मया न भोक्तव्यमिति व्रतं करोति, गृह्णाति वा । शेषं पूर्ववत् ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सत्या-ऽर्थ-वेदस्याः** ।।३।४।४४।।

**[सत्यार्थवेदस्य]** सत्यश्च अर्थश्च वेदश्च = सत्यार्थवेदम्, तस्य ।

**[आः]** आ प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[सत्यापयति]** सत्य । सत्यमाचष्टे । अनेन (३।४।४२) सूत्रेण णिच्प्र० - आकारश्च । अत्र सर्वत्र 'त्रन्त्यस्वरादेः' (७।४।४३) इत्याकारस्य लुग् न भवति विधानसामर्थ्यात् । 'अर्त्ति-री-व्ली-ह्री०' (४।२।२१) पोऽन्तः ।

**[अर्थापयति]** अर्थ । अर्थमाचष्टे । अनेन (३।४।४२) सूत्रेण णिच्प्र० - आकारश्च । 'अर्त्ति-री-व्ली०' (४।२।२१)' पोऽन्तः ।

**[वेदापयति]** वेद । वेदमाचष्टे । अनेन (३।४।४२) सूत्रेण णिच्प्र०-आकारश्च । 'अर्त्ति-री-व्ली०' (४।२।२१) पोऽन्तः ।।छ।।

**श्वेताश्वा-ऽश्वतर-गालोडिता-ऽऽह्वरकस्याऽश्व-तरेत-कलुक्** ।।३।४।४५।।

**[श्वेताश्वाऽश्वतरगालोडिताऽऽह्वरकस्य]** श्वेताश्वश्च अश्वतरश्च गालोडितश्च आह्वरकश्च = श्वेताश्वाऽश्वतरगालोडिता-ऽऽह्वरकम्, तस्य ।

**[अश्वतरेतकलुक्]** अश्वश्च तरश्च इतश्च कश्च = 卐अश्वतरेतकाः, अश्वतरेतकानां लुक् = अश्वतरेतकलुक् । लुगर्थं वचनम् ।

**[श्वेतयति]** श्वेताश्वमाचष्टे करोति वा, श्वेताश्वेनातिक्रामतीति वा । अनेन (३।४।४२) सूत्रेण णिच्प्र० - अश्वलुक् ।

**[अश्वयति]** + अश्वतरमाचष्टे । अनेन (३।४।४२) सूत्रेण णिच्प्र० - तरलुक् ।

**[गालोडयति]** गालोडितमाचष्टे । अनेन (३।४।४२) सूत्रेण णिच्प्र० - इतलुक् ।

**[आह्वरयति]** आह्वरकमाचष्टे । अनेन (३।४।४२) सूत्रेण णिच्प्र० - कलुक् ।।छ।।

**धातोरनेकस्वरादाम् परोक्षायाः कृभ्वस्ति चानु तदन्तम्** ।।३।४।४६।।

**[धातोरनेकस्वरादाम्]** धातु पञ्चमी ङसि । एकः स्वरो यस्याऽसौ एकस्वरः, न एकस्वरः = अनेकस्वरः । 'अन् स्वरे' (३।२।१२९) अन्, तस्मात् । आम् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[परोक्षायाः]** परोक्षा षष्ठी ङस् । 'आपो ङितां यै-यास्०' (१।४।१७) यास् ।

**[कृभ्वस्ति]** कृश्च भूश्च अस्तिश्च = कृभ्वस्ति । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः ।

**[चानु]** च प्रथमा सि । अनु प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[तदन्तम्]*** सा-परोक्षा अन्ते यस्य तत्तदन्तम् । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् ।

---

P. 卐 अश्वतरेतकम्, अश्वतरेतकस्य लुक् = अश्वतरेतकलुक् । प्रथमा सि ।

P. + अश्वतरमाचष्टे करोति वा, अश्वतरेणातिक्रामतीति वा ।

P. * सैव ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृभ्वस्तिविशेषणमिदम् ।

**[चकासांचकार, चकासांबभूव, चकासामास]** 'चकासृक् दीप्तौ' (१०९४) चकास् । परोक्षा णव् । अनेन आम्, अनुपश्चात् कृभ्वस्ति । 'डुकृंग् करणे' (८८८) कृ । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'ऋतोऽत्' (४।१।३८) कृ० → क० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

'भू सत्तायाम्' (१) भू । परोक्षा णव् → अ । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'भू-स्वपोरदुतौ' (४।१।७०) उ०→अ० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'भुवो वः परोक्षा-ऽद्यतन्योः' (४।२।४३) आ० → ऊ ।

'असक् भवे' (भुवि)' (११०२) अस् । परोक्षा णव् । 'अस्याऽऽदेराः परोक्षायाम्' (४।१।६८) आ ।

**[चुलुम्पांचकार, चुलुम्पांबभूव, चुलुम्पामास]** 'चुलुम्प विनाशे' (२०५०) चुलुम्प्, सौत्रो धातुः । परोक्षा णव् । अनेन आम् ।

**[लोलूयांचक्रे, लोलूयांबभूव, लोलूयामास]** 'लूगश् छेदने' (१५१९) लू । भृशं पुनः पुनर्वा लुनाति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्-प्र० → य । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । परोक्षा णव् । अनेन आम् ।

**[पपाच]** 'डुपचींष् पाके' (८९२) पच् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) चलोपः । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

**[गवांचकार, गवांबभूव, गवामास]** गो । गौरिवाऽऽचचार । 'कर्तुः क्विप्, गल्भ-क्लीब-होडात्तु ङित्' (३।४।२५) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । परोक्षा णव् । मतान्तरे आम् ।

**[स्वांचकार, स्वांबभूव, स्वामास]** स्व इवाऽऽचचार । 'कर्तुः क्विप्०' (३।४।२५) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । परोक्षा णव् । मतान्तरे आम् ।

**[उक्षां प्रचक्रुर्नगरस्य मार्गान्]** 'उक्ष सेचने' (५६६) उक्ष् । परोक्षा णव् । 'गुरुनाम्यादेरनृच्छूर्णोः' (३।४।४८) आम् । प्र 'डुकृंग् करणे' (८८८) कृ । परोक्षा उस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'इवर्णादे०' (१।२।२१) र० । नगर षष्ठी ङस् । मार्ग द्वितीया शस् ॥छ॥

## दया-ऽया-ऽऽस्-कासः ॥३।४।४७॥

**[दयाऽयाऽऽस्कासः]** दयश्च अयश्च आस् च कास् च = दयाऽयाऽऽस्कास्, तस्मात् ।

**[दयांचक्रे, दयांबभूव, दयामास]** 'दयि दान-गति-हिंसा-दहनेषु च' (७९९) दय् । परोक्षा ए । अनेन ए० → आम्, आमन्ताच्च धातोः परे कृभ्वस्तयः प्रयुज्यन्ते । 'डुकृंग् करणे' (८८८) कृ । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'इवर्णादे०' (१।२।२१) र० । 'आमः कृगः' (३।३।७५) इत्यात्मनेपदम् । आमः परादनुप्रयुक्तात् कृग आम एव प्राग् यो धातुस्तस्मादिव कर्त्तर्यात्मनेपदं स्यात्, बभूव-आस पूर्ववत् ।

**[पलायांचक्रे, पलायांबभूव, पलायामास]** परा 'अयि गतौ' (७९०) अय् । परोक्षा ए । अनेन आम् । 'उपसर्गस्याऽयौ' (२।३।१००) र० → ल० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[आसांचक्रे, आसांबभूव, आसामास]** 'आसिक् उपवेशने' (१११९) आस् । परोक्षा ए । अनेन आम् ।

**[कासांचक्रे, कासांबभूव, कासामास]** 'कासृङ् शब्दकुत्सायाम्' (८४५) कास् । परोक्षा ए । अनेन सर्वत्र परोक्षास्थाने आम् ।

आमन्ताच्च धातोः कृभ्वस्तयः परोक्षान्ता मन्यन्ते, मूलधातुवत् कृगः परतः परस्मैपदं आत्मनेपदं वा स्यात्, कृभ्वग्निभ्यां पु(प)रतः परस्मैपदमेव ॥छ॥

## गुरुनाम्यादेरनृच्छूर्णोः ॥३।४।४८॥

**[गुरुनाम्यादेः]** गुरुश्चासौ नामी च = गुरुनामी, गुरुनामी आदिर्यस्याऽसौ गुरुनाम्यादिस्तस्मात् ।

**[अनृच्छूर्णोः]** 卐 ऋच्छुश्च ऊर्णुश्च = ऋच्छूर्णु, न ऋच्छूर्णु = अनृच्छूर्णु, तस्मात् ।

**[ईहांचक्रे, ईहांबभूव, ईहामास]** 'ईहि चेष्टायाम्' (८५७) ईह् । परोक्षा ए । अनेन आमादेशः ।

**[उञ्छांचकार]** 'उछुत् उञ्छे' (१३४६) उछ् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । परोक्षा णव् । अनेन आम् ।

**[व्युछांचकार]** 'उछैत् विवासे' (१३४४) उछ्, विपूर्व० । परोक्षा णव् । अनेन आम् ।

**[उब्जांचकार]** 'उब्जत् आर्जवे' (१३४८) उब्ज् । परोक्षा णव् । अनेन आम् ।

**[इयेष]** 'इषत् इच्छायाम्' (१४१९) इष् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'पूर्वस्याऽस्वे स्वरे योरियुव' (४।१।३७) इ० → इय्० ।

**[आनर्च]** 'अर्च पूजायाम्' (१०४) अर्च् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) र्च्लोपः । 'अनातो नश्चान्त ऋदाद्यशौ-संयोगस्य' (४।१।६९) अस्य आ-नकारागमश्च ।

**[निनाय]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ईडाञ्चक्रे]** 'ईडिक् स्तुतौ' (१११४) ईड् । परोक्षा ए । 'गुरुनाम्यादेरनृच्छूर्णोः' (३।४।४८) आम् ।

**[अयांचक्रे, अयांबभूव, अयामास]** 'अयि गतौ' (७९०) अय् । परोक्षा ए । 'दया-ऽया-ऽऽस्-कासः' (३।४।४७) आम् । चक्रे-बभूव-आस ।

**[ईषतुः, ईषुः]** 'इषत् इच्छायाम्' (१४१९) इष् । परोक्षा अतुस्-उस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) षलोपः । 'समानानां०' (१।२।१) दीर्घः । अत्र सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य (न्या०स० वक्षस्कार (१)/सूत्र (१९)) इति न भवति । यो यमाश्रित्य समुत्पद्यते सः सन्निपातः ।

[1] परोक्षाया विघातं कर्तुं न निमित्तं न कारणं इति भावार्थः ।

---

P. 卐 ऋच्छ् च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[आनर्च्छ]**卐 'ऋछत् इन्द्रियप्रलय-मूर्त्तिभावयोः' (१३४२) ऋछ् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'अनातो नश्चान्त ऋदाद्यशौ-संयोगस्य' (४।१।६९) अस्य आ-नकारागमश्च । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[प्रोर्णुनाव]** प्र 'ऊर्णुग्क् आच्छादने' (११२३) ऊर्णु । परोक्षा णव् । 'लोकात्' (१।१।३) "ऊर्" पाठउ विश्लेपियइ । 'निमित्ताभावे०' (न्या०सं० वक्षस्कार (१)/सूत्र (२९) नु । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "नु"द्वित्वम् । 'रपृवर्णान्नो ण०' (२।३।६३) न० → ण० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ओ ॥छ॥

## जागुष-समिन्धेर्नवा ॥३।४।४९॥

**[जागुषसमिन्धेः]**+ जागा च उपश्च समिन्धिश्च, तत्, तस्मात् ।

**[जागरांचकार, जागरांबभूव, जागरामास]** 'जागृक् निद्राक्षये' (१०९३) जागृ । परोक्षा णव् । अनेन आम् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[जजागार]** जागृ । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'जागुर्ञि-णवि' (४।३।५२) वृद्धिः आर् ।

**[ओषांचकार]** 'उषू दाहे' (५२९) उष् । परोक्षा णव् । अनेन आम् ।

**[उवोष]** उष् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) षलोपः । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'पूर्वस्याऽस्वे स्वरे योरियुव्' (४।१।३७) उव् ।

**[समिन्धांचक्रे]** 'ञिइन्धैपि दीप्तौ' (१४९८) इन्ध्, सम्पूर्व० । परोक्षा ए । अनेन आम् । अस्य धातोः आमि परोक्षाकार्यं नास्ति अतो न नकारलोपः ।

**[समीधे]** सम्-इन्ध् । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) न्ध् लोपः । 'समानानां०' (१।२।१) दीर्घः । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः ।

**[प्रेन्धांचक्रे]** प्र-इन्ध् । परोक्षा ए । 'गुरुनाम्यादेरनृच्छूर्णोः' (३।४।४८) आम् ।

**[इन्धांचक्रे, ईधे]** इन्ध् । परोक्षा ए । मतान्तरे वा आम् ॥छ॥

## भी-ह्री-भृ-होस्तिव्वत् ॥३।४।५०॥

**[भीह्रीभृहोः]** भीश्च ह्रीश्च भृश्च ह च (?) (हुश्च) = तत्, तस्मात् ।

**[तिव्वत्]** तिव् । तिविव = तिव्वत् । 'स्यादेरिवे' (७।१।५२) वत्प्र० । प्रथमा सि ।

**[बिभयांचकार, बिभयांबभूव, बिभयामास]** 'ञिभीक् भये' (११३२) भी । परोक्षा णव् । अनेन आम् । 'हवः शिति' (४।१।१२) द्वित्वम् । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । सर्वत्र परतः कृभ्वस्तयः प्रयोज्याः ।

---

卐 मध्यमवृत्तौ- ऋछ् । परोक्षा णव् । 'स्कृच्छृतोऽकि०' (४।३।८) गु० अर् । द्विः । 'अनातो नश्चान्त०' (४।१।६९) आ-नकारागमश्च ।
P. + जागृश्च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[बिभाय]** 'ञिभींक् भये' (११३२) भी । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[जिह्रयांचकार, जिह्राय]** 'ह्रींक् लज्जायाम्' (११३३) ह्री । परोक्षा णव् । अनेन आम् । 'हवः शिति' (४।१।१२) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) रलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । द्वितीये 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[बिभरांचकार, बभार]** 'डुडुभृंग्क् पोषणे च' (११४०) भृ । परोक्षा णव् । अनेन आम् । 'हवः शिति' (४।१।१२) द्वित्वम् । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'पृ-भृ-मा-हाङामिः' (४।१।५८) इ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । द्वितीये 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[जुहवांचकार, जुहाव]** 'हुंक् दाना-ऽदनयोः' (११३०) हु । परोक्षा णव् । अनेन आम् सर्वत्र । 'हवः शिति' (४।१।१२) द्वित्वम् । 'ग-होर्जः' (४।१।४०) हु० → जु० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । द्वितीये 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[जुहवांचक्रे, जुहुवे]** 'हुंक् दाना-ऽदनयोः' (११३०) हु । परोक्षा ए । अनेन आम् । द्वित्वम् । 'ग-होर्जः' (४।१।४०) ह०→ज० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । द्वितीये 'धातोरिवर्णो०' (२।१।५०) उव् । भावे कर्मणि वा अत्र 'क्यः शिति' (३।४।७०) इति क्यो न भवति-, सामान्योक्तेऽपि क्यस्य भावे कर्मणि च विधानात् शित्प्रत्ययोऽपि भावकर्मविहितो गृह्यते, अत्र नु(तु) तिव्वदित्युक्तम्, तिव् च भावे कर्मणि न भवति ।।छ।।

**वेत्तेः कित्** ।।३।४।५१।।

**[वेत्तेः]** वेत्ति पञ्चमी ङसि ।

**[कित्]** क् इत् अनुबन्धो यस्याऽसौ कित् । प्रथमा सि ।

**[विदांचकार, विदांबभूव, विदामास]** 'विदक् ज्ञाने' (१०९९) विद् । परोक्षा णव् । अनेन आम् परतः कृभ्वस्तयः प्रयुज्यन्ते । कित्त्वाद् गुणो न भवति ।

**[विवेद]** विद् । परोक्षा णव् → अ । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) दलोपः । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

तिव्निर्देश अदादिकपरिग्रहार्थः ।।छ।।

**पञ्चम्याः कृग्** ।।३।४।५२।।

**[पञ्चम्याः]** पञ्चमी 卐 पञ्चमी ङसि ।

**[कृग्]** कृग् प्रथमा सि ।

**[विदांकरोतु]** 'विदक् ज्ञाने' (१०९९) विद् । पञ्चमी तुव् । अनेन तुव् → आम् । 'डुकृंग् करणे' (८८८) कृ ।

P. 卐 षष्ठी ङस् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पञ्चमी तुव् । 'कृग्-तनादेरुः' (३।४।८३) उ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'उ-श्नोः' (४।३।२) गु० ओ ।

**[वेत्तु]** विद् । पञ्चमी तुव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० ।

**[विदांकुरु]** विद् । पञ्चमी हि । अनेन आम् । कृ । पञ्चमी हि । 'कृग् तनादेरुः' (३।४।८३) उ । गुणे सति 'अतः शित्युत्' (४।२।८९) अ० → उ० । 'असंयोगादोः' (४।२।८६) हिलोपः ।

**[विद्धि]** विद् । पञ्चमी हि । आमभावे 'हु-धुटो हेर्धिः' (४।२।८३) हि० → धि० ।

**[विदांकरवाणि]** विद् । पञ्चमी आनिव् → आनि । अनेन आम् । कृ । पञ्चमी आनिव् । 'कृग्-तनादेरुः' (३।४।८३) उप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'उ-श्नोः' (४।३।२) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'रषृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[वेदानि]** विद् । पञ्चमी आनिव् → आनि । आमभावे 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । कृग्ग्रहणं भ्वस्तिव्युदासार्थम् ।।छ।।

## सिजद्यतन्याम् ।।३।४।५३।।

**[सिजद्यतन्याम्]** सिच् प्रथमा सि । अद्यतनी सप्तमी ङि । 'च-जः क-गम्' (२।१।८६) इति कृते कित्त्वाशङ्का स्यात् ।

आमादेशनिवृत्तेस्तत्संबद्धत्वात् वेति निवृत्तम् ।

**[अनैषीत्]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । अद्यतनी दि → त् । अनेन सिच् → स० । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'सिचि परस्मै समानस्याऽङिति' (४।३।४४) वृद्धिः ऐ । 'अड् धातोरादि०' (४।४।२९) अट् → अ । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[अपाक्षीत्]** 'डुपचींष् पाके' (८९२) पच् । अद्यतनी दि → त् । अनेन सिच् → स० । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'व्यञ्जनानामनिटि' (४।३।४५) वृ० आ। 'च-जः क-गम्' (२।१।८६) च० → क० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम्, क-षसंयोगे क्षी० । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अकृषातां कटौ चैत्रेण]** 'डुकृंग् करणे' (८८८) कृ । अद्यतनी आताम् । अनेन सिच् । षत्वम् । 'अतः' (४।३।८२) अलोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।।छ।।

## स्पृश-मृश-कृष-तृप-दृपो वा ।।३।४।५४।।

**[स्पृशमृशकृषतृपदृपः]** स्पृशश्च मृशश्च कृषश्च तृपश्च च दृप् च = स्पृशमृशकृषतृपदृप्, तस्मात् ।

**[वा]** वा प्रथमा सि ।

**[अस्प्राक्षीत्, अस्पार्क्षीत्, अस्पृक्षत्]** 'स्पृशंत् संस्पर्शे' (१४१२) स्पृश् । अद्यतनी दि → त् । अनेन सिच् । 'स्पृशादि-सृपो वा' (४।४।११२) अत् → अ । 'इवर्णादि०' (१।२।२१) रत् । 'व्यञ्जनानामनिटि' (४।३।४५) वृद्धिः आ । गुणे सति वृ० आ । अत्रापि 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् → ई । अग्रेतने च 'ह-शिटो नाम्युपान्त्याददृशोऽनिटः सक्' (३।४।५५) सक् → स । 'यज-सृज-मृज-राज०' (२।१।८७) श० → ष० । 'ष-ढोः कस्सि' (२।१।६२) ष० → क० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम्, क-षसंयोगे क्ष० । 'अड् धातोरादि०' (४।४।२९) अट् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अम्राक्षीत्, अमार्क्षीत्, अमृक्षत्]** 'मृशंत् आमर्शने' (१४१६) मृश् । अद्यतनी दि → त् । अनेन सिच् । 'स्पृशादि - सृपो वा' (४।४।११२) अत् → अ । 'इवर्णादि०' (१।२।२१) रत् । गुणे सति 'व्यञ्जनानामनिटि' (४।३।४५) वृ० आ । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । तृतीये 'ह-शिटो नाम्युपा०' (३।४।५५) सक् → स । 'यज-सृज-मृज-राज०' (२।१।८७) श० → ष० । 'ष-ढोः कस्सि' (२।१।६२) ष० → क० । 'नाम्यन्तस्था०' (२।३।१५) ष०, क-षसंयोगे क्ष० । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अक्राक्षीत्, अकार्क्षीत्, अकृक्षत्]** 'कृषींत् विलेखने' (१३१९) कृष् । अद्यतनी दि → त् । अनेन सिच् । 'स्पृशादि - सृपो वा' (४।४।११२) अत् । 'इवर्णादि०' (१।२।२१) रत् । गुणे सति 'व्यञ्जनानामनिटि' (४।३।४५) वृद्धिः आ । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'ष-ढोः कस्सि' (२।१।६२) ष० → क० । 'नाम्यन्तस्था०' (२।३।१५) ष०, क-षसंयोगे क्ष० । 'अड् धातोरादि०' (४।४।२९) अट् । तृतीये सक् पूर्ववत् ।

**[अत्राप्सीत्, अताप्सीत्, अतृपत्]** 'तृपौच् प्रीतौ' (११८९) तृप् । अद्यतनी दि → त् । अनेन सिच् । 'स्पृशादि - सृपो वा' (४।४।११२) अत् । 'इवर्णादि०' (१।२।२१) रत् । गुणे सति 'व्यञ्जनानामनिटि' (४।३।४५) वृद्धिः आ । तृतीये 'लृदिद्-द्युतादि-पुष्यादेः परस्मै' (३।४।६४) अङ्प्र० → अ ।

**[अद्राप्सीत्, अदार्प्सीत्, अदृपत्]** 'दृपौच् हर्ष-मोहनयोः' (११९०) दृप् । अद्यतनी दि → त् । अनेन सिच् । 'स्पृशादि - सृपो वा' (४।४।११२) अत् । 'इवर्णादि०' (१।२।२१) रत् । गुणः । 'व्यञ्जनानामनिटि' (४।३।४५) वृद्धिः आ । तृतीये 'लृदिद्-द्युतादि०' (३।४।६४) अङ्प्र० → अ ।

तृपदृपोः पुष्यादित्वादङि, शेषाणां तु सकि प्राप्ते वचनम् ।।छ।।

## ह-शिटो नाम्युपान्त्याददृशोऽनिटः सक् ।।३।४।५५।।

**[हशिटः]** हश्च शिट् च = हशिट्, तस्मात् ।

**[नाम्युपान्त्यात्]** नामी उपान्त्ये यस्याऽसौ नाम्युपान्त्यस्तस्मात् ।

**[अदृशः]** न दृश् = अदृश्, तस्मात् ।

**[अनिटः]** न विद्यते इट् यस्मात् सोऽनिट् । 'अन् स्वरे' (३।२।१२९) अन्, तस्मात् ।

**[सक्]** सक् प्रथमा सि ।

**[अधुक्षत्]** 'दुहींक् क्षरणे' (११२७) दुह् । अद्यतनी दि → त् । अनेन सक्प्र० → स । 'भ्वादेर्दादेर्घः' (२।१।८३) ह० → घ० । 'ग-ड-द-बादेश्चतुर्थान्तस्यैकस्वरस्याऽऽदेश्चतुर्थः स्ध्वोश्च प्रत्यये' (२।१।७७) दस्य ध० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) घस्य क० । 'नाम्यन्तस्था०' (२।३।१५) ष०, क-षयोगे क्ष० । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अविक्षत्]** 'विशंत् प्रवेशने' (१४१५) विश् । अद्यतनी दि → त् । अनेन सक्प्र० → स । 'यज-सृज-मृज-राज०' (२।१।८७) श० → ष० । 'ष-ढोः कस्सि' (२।१।६२) ष० → क० । 'नाम्यन्तस्था०' (२।३।१५) ष०, क-षयोगे क्ष० । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अलिक्षत्]** 'लिहींक् आस्वादने' (११२९) लिह् । 'लिशंत् गतौ' (१४१७) लिश् । अद्यतनी दि → त् । अनेन सक्प्र० । 'हो धुट्-पदान्ते (२।१।८२) ह० → ढ० । 'यज-सृज-मृज-राज०' (२।१।८७) श० → ष० । 'ष-ढोः कस्सि' (२।१।६२) ष-ढयोः क० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम्, क-षयोगे क्ष० । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अद्विक्षत्]** 'द्विषींक् अप्रीतौ' (११२६) द्विष् । अद्यतनी दि → त् । अनेन सक्प्र० । 'ष-ढोः कस्सि' (२।१।६२)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ष० → क० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम्, क-ष्योगे क्ष० । 'अड् धातो०' (४।४।२९) अट् ।

**[अभैत्सीत्]** 'भिदृंपी विदारणे' (१४७७) भिद् । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'व्यञ्जनानामनिटि' (४।३।४५) वृ० ऐ । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अधाक्षीत्]** 'दहं भस्मीकरणे' (५५२) दह् । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'व्यञ्जनानामनिटि' (४।३।४५) वृ० आ । 'भ्वादेर्दादेर्घः' (२।१।८३) हस्य घ० । 'ग-ड-द-बादे०' (२।१।७७) दस्य ध० । 'धुटस्तृतीयः' (२।१।७६) घस्य ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) गस्य क० । 'नाम्यन्तस्था०' (२।३।१५) ष०, क-षयोगे क्ष० । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अद्राक्षीत्]** 'दृशूं प्रेक्षणे' (४९५) दृश् । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'अः सृजि-दृशोऽकिति' (४।४।१११) अत् → अ । 'व्यञ्जनानामनिटि' (४।३।४५) वृ० आ । 'यज-सृज-मृज-राज०' (२।१।८७) श० → ष० । 'ष-ढोः कस्सि' (२।१।६२) ष० → क० । 'नाम्यन्तस्था०' (२।३।१५) ष०, क-षयोगे क्ष० ।

**[अकोषीत्]** 'कुषश् 卐 निःकर्षे' (१५६५) कुष् । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'इट ईति' (४।३।७१) सिच्लोपः । 'समानानां०' (१।२।१) दीर्घः । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[न्यघुक्षत्]** नि 'गुहौग् संवरणे' (९३५) गुह् । अद्यतनी दि → त् । अनेन सक्प्र० । 'हो धुट्-पदान्ते' (२।१।८२) हस्य ढ० । 'ग-ड-द-बादे०' (२।१।७७) गस्य घः । 'ष-ढोः कस्सि' (२।१।६२) ढ० → क० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम्, क-षयोगे क्ष० । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[न्यगूहीत्]** 'गुहौग् संवरणे' (९३५) गुह् । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'धूगौदितः' (४।४।३८) इट् । 'इट ईति' (४।३।७१) सिच्लोपः । 'समानानां०' (१।२।१) दीर्घः । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । गोहः स्वरे (४।२।४२) ऊ । 'अड् धातोरादि०' (४।४।२९) अट् ।।छ।।

### श्लिषः ।।३।४।५६।।

**[श्लिषः]** श्लिष् पञ्चमी ङसि ।

**[आश्लिक्षत् कन्यां देवदत्तः]** 'श्लिषंच् आलिङ्गने' (१२१०) श्लिष्, आङ्पूर्व० । अद्यतनी दि → त् । अनेन सक् । 'ष-ढोः कस्सि' (२।१।६२) ष० → क० । 'नाम्यन्तस्था०' (२।३।१५) ष०, क-षयोगे क्ष० ।

**[आश्लेषि कन्या देवदत्तेन]** श्लिष्, आङ्पूर्व० । अद्यतनी त । 'भाव-कर्मणोः' (३।४।६८) ञिच् → इ - तलोपश्च । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[अश्लेषीत्]** 'श्लिषू दाहे' (५३१) श्लिष् । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।२९) इट् । 'इट ईति' (४।३।७१) सिच्लोपः । 'समानानां०' (१।२।१) दीर्घः । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'अड् धातोरादि०' (४।४।२९) अट् । अधाक्षीदित्यर्थः ।।छ।।

---

P. 卐 निष्कर्षे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## नाऽसत्त्वाऽऽश्लेषे ॥३।४।५७॥

**[न]** न प्रथमा सि ।

**[असत्त्वाऽऽश्लेषे]** सत्त्वस्य-प्राणिन आश्लेषः = सत्त्वाश्लेषः, न सत्त्वाश्लेषः = असत्त्वाश्लेषः । 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् ।

**[उपाश्लिषत् जतु च काष्ठं च]** उप-आङ्पूर्व०, 'श्लिषंच् आलिङ्गने' (१२१०) श्लिष् । अद्यतनी दि → त् । 'लृदिद्-द्युतादि-पुष्यादेः परस्मै' (३।४।६४) अङ्प्र० । जतु प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलुप् । काष्ठ प्रथमा सि ।

**[समाश्लिषत् गुरुकुलम्]** सम्-आङ्पूर्व०, श्लिष् । अद्यतनी दि → त् । 'लृदिद्-द्युतादि०' (३।४।६४) अङ्प्र० ।

**[व्यत्यश्लिक्षन्त मिथुनानि]** वि-अति श्लिष् । अद्यतनी अन्त । 'श्लिषः' (३।४।५६) सक् → स । 'ष-ढोः कस्सि' (२।१।६२) ष० → क० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'स्वरेऽतः' (४।३।७५) अलोपः । मिथुन प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ॥छ॥

## णि-श्रि-द्रु-स्रु-कमः कर्त्तरि ङः ॥३।४।५८॥

**[णिश्रिद्रुस्रुकमः]** णिश्च श्रिश्च द्रुश्च स्रुश्च कम् च = णिश्रिद्रुस्रुकम्, तस्मात् ।

**[कर्त्तरि]** कर्तृ सप्तमी ङि । 'अर्डौ च' (१।४।३९) अर् ।

**[ङः]** ङ प्रथमा सि ।

**[अचीकरत्]** 'डुकृंग् करणे' (८८८) कृ । 卐 कुर्वन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । अद्यतनी दि → त् । अनेन ङप्र० → अ । 'द्विर्धातुः परोक्षा ङे०' (४।१।१) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) रलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'असमानलोपे सन्वल्लघुनि ङे' (४।१।६३) इ । 'उपान्त्यस्याऽसमानलोपि-शास्वृदितो ङे' (४।२।३५) ह्रस्वत् । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिग्लोपः ।

**[अचूचुरत्]** 'चुरण् स्तेये' (१५६८) चुर् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । अद्यतनी दि → त् । अनेन ङप्र० → अ । द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) रलोपः । 'असमानलोपे०' (४।१।६३) ह्रस्वः । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिच्लोपः ।

**[औजढत्]** ऊढ । ऊढमाचष्टे । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० → इ । 'त्रन्त्यस्वरादेः' (७।४।४३) अलोपः । अद्यतनी दि → त् । अनेन ङप्र० → अ । द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'स्वरादेस्तासु' (४।४।३१) वृद्धिः औ । 'णेरनिटि' (४।३।८३) णिच्लोपः ।

**[अचीकमत्]** 'कमूङ् कान्तौ' (७८९) कम् । 'कमेर्णिङ्' (३।४।२) णिङ्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । अद्यतनी दि → त् । अनेन ङप्र० → अ । द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) मलोपः । 'ह्रस्वः'

---

P. 卐 कुर्वन्तं प्र० । णिग्प्र० । अद्यत० दि । 'अड् धातोरादि०' (४।४।२९) अट् । अनेन ङ । 'आद्योऽश एकस्वरः' (४।१।२) "कृ"द्वि० । "ऋतोऽत्' (४।१।३८) कृ० → क० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'असमानलोपे सन्वल्लघुनि ङे' (४।१।६३) इ । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 'णेरनिटि' (४।३।८३) णिग्लोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(४।१।३९) ह्रस्वत् । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'उपान्त्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 'असमानलोपे०' (४।१।६३) इ । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिङ्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अचीकरत कटः स्वयमेव]** कृ । अचीकरत् कटं देवदत्तः, स एवं विवक्षिते नाहं अचीकरम्, किन्तु अचीकरत । णिग्प्र० । नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । अद्यतनी त । शेषं पूर्ववत् साधिता ।

**[अशिश्रियत्]** 'श्रिग् सेवायाम्' (८८३) श्रि । अद्यतनी दि → त् । अनेन ङप्र० । द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) रलोपः । 'संयोगात्' (२।१।५२) इय् । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अदुद्रुवत्]** इं (११) - दुं (१२) - 'द्रुं गतौ' (१३) द्रु । अद्यतनी दि → त् । अनेन ङप्र० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्रु सउं द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) रलोपः । 'संयोगात्' (२।१।५२) उव् । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[असुस्रुवत्]** 'स्रुं गतौ' (१५) स्रु । अद्यतनी दि → त् । अनेन ङप्र० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) रलोपः । 'संयोगात्' (२।१।५२) उव् । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अचकमत]** 'कमूङ् कान्तौ' (७८९) कम् । अद्यतनी त । अनेन ङप्र० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) मलोपः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अकारयिषातां कटौ देवदत्तेन]** करोति कटौ देवदत्तः, स एवं विवक्षिते नाहं करोमि, अपितु क्रियते कटौ स्वयमेव । यद्वा क्रियेते कटौ देवदत्तेन, तौ क्रियमाणौ यज्ञदत्तेन प्रयुज्य(ये)ते स्म, तौ क्रियमाणौ कटौ देवदत्तेन प्रायुक्षाताम् । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । अद्यतनी आताम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'अड् धातोरादि०' (४।४।२९) अट् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । कट प्रथमा द्विवचनम् । देवदत्त तृतीया एकवचनम् । कम्(मि)ग्रहणं 'अशवि ते वा' (३।४।४) इति यदा णिङ् नास्ति तदार्थवत् । ङकारो ङित्कार्यार्थः ॥छ॥

## ट्धे-श्वेर्वा ॥३।४।५९॥

**[ट्धेश्वेः]** ट्धेश्च श्विश्च 卐 ट्धेश्विस्तस्मात् ।

**[वा]** वा प्रथमा सि ।

**[अदधत्, अधात्, अधासीत्]** 'ट्धें पाने' (२८) धे । 'आत् सन्ध्यक्षरस्य' (४।२।१) धा । अद्यतनी दि → त् । अनेन ङप्र० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) ध० → द० । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलोपः । उभयस्थाने 'सिजद्यतन्याम्' (३।४।५३) सिच्प्र० → स । 'ट्धे-घ्रा-शा-च्छा-सो वा' (४।३।६७) विकल्पे सिच्लोपः । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् → ई । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अशिश्वियत्, अश्वयीत्, अश्वत्]** 'ट्वोश्वि गति-वृद्ध्योः' (९९७) श्वि । अद्यतनी दि → त् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) वलोपः । 'संयोगात्' (२।१।५२) इय् । द्वितीये 'सिजद्यतन्याम्' (३।४।५३) सिच्प्र० → सं । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'इट

P. 卐 ट्धेश्वि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ईति' (४।३।७१) सिच्लोपः । 'समानानां०' (१।२।१) दीर्घः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । तृतीये 'ऋदिच्छ्वि-स्तम्भू-म्रुचू-म्लुचू-ग्रुचू-ग्लुचू-ग्लुञ्चू-ज्रो वा' (३।४।६५) अङ्प्र० । 'श्वयत्यसू-वच-पत श्वा ऽऽस्थ-वोच-पप्तम्' (४।३।१०३) श्वादेशः ।

**[अधिषातां गावौ वत्सेन]** 'ट्धें पाने' (२८) धे । 'आत् सन्ध्यक्षरस्य' (४।२।१) धा । अद्यतनी आताम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'इश्च स्था-दः' (४।३।४१) आकारस्य इकारः । गो-औ, 'ओत औः' (१।४।७४) औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । वत्स तृतीया टा ।।छ।।

## शास्त्यसू-वक्ति-ख्यातेरङ् ।।३।४।६०।।

**[शास्त्यसूवक्तिख्यातेः]** शास्तिश्च असूश्च वक्तिश्च ख्यातिश्च = शास्त्यसूवक्तिख्याति, तस्मात् ।

**[अङ्]** अङ् प्रथमा सि ।

**[अशिषत्]** 'शासूक् अनुशिष्टौ' (१०९५) शास् । अद्यतनी दि ⟶ त् । अनेन अङ्प्र० ⟶ अ । 'इसासः शासोऽङ्-व्यञ्जने' (४।४।११८) इस् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[व्यत्यशिषत]** वि-अति 'शासूक् अनुशिष्टौ' (१०९५) शास् । अद्यतनी त । अनेन अङ्प्र० । 'इसासः शासोऽङ्-व्यञ्जने' (४।४।११८) इस् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[आस्थत्]** 'असूच् क्षेपणे' (१२२१) अस् । अद्यतनी दि ⟶ त् । अनेन अङ्प्र० ⟶ अ । 'श्वयत्यसू-वच०' (४।३।१०३) "आस्थ" आदेशः ।

**[अपास्थत]** 'असूच् क्षेपणे' (१२२१) अस्, अपपूर्व० । अद्यतनी त । अनेन अङ्प्र० ⟶ अ । 'श्वयत्यसू-वच०' (४।३।१०३) "आस्थ" आदेशः । 'उपसर्गादस्योहो वा' (३।३।२५) आत्मनेपदम् ।

**[अवोचत्]** 'वचंक् भाषणे' (१०९६) वच् । अद्यतनी दि ⟶ त् । अनेन अङ्प्र० । 'श्वयत्यसू-वच०' (४।३।१०३) वोचादेशः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अवोचत]** 'ब्रूग्क् व्यक्तायां वाचि' (११२५) ब्रू । अद्यतनी त । 'अस्ति-ब्रूवोर्भू-वचावशिति' (४।४।१) "वच्" आदेश । अनेन अङ्प्र० । 'श्वयत्यसू-वच०' (४।३।१०३) वोचादेशः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[आख्यत्, आख्यत]** 'ख्यांक् 卐 प्रकथने' (१०७१) ख्या, आङ्पूर्व० । 'चक्षिक् व्यक्तायां वाचि' (११२२) चक्ष्, आङ्पूर्व० । अद्यतनी दि ⟶ त् - त । 'चक्षो वाचि क्शांग् ख्यांग्' (४।४।४) ख्यांग् ⟶ ख्या । अनेन अङ्प्र० । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलोपः ।

**[अशासिषातां शिष्यौ गुरुणा]** शास् । अद्यतनी आताम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'अड् धातोरादि०' (४।४।२९) अट् । शिष्य प्रथमा औ । गुरु तृतीया टा । 'टः पुंसि ना' (१।४।२४) ना । 'र-षृवर्णा०' (२।३।६३) न० ⟶ ण० ।

**[अशाशासीत्]** शास् । भृशं पुनः पुनर्वा शास्ति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) सलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'आ-गुणावन्यादेः' (४।१।४८) आ । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । अद्यतनी दि ⟶ त् । 'यङ्-तु-रु-स्तोर्बहुलम्' (४।३।६४) ईत् । 'अड् धातोरादि०' (४।४।२९)

卐 धातुपारायणे-प्रथने, प्रकथने इत्यन्ये । क्रियारत्नसमुच्चये - प्रकथने, प्रकटने इत्यन्ये ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अट् ।

**[अवावचीत्]** वच् । भृशं पुनः पुनर्वा वक्ति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) चलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । अद्यतनी दि → त् । ईत् । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अचाख्यासीत्]** ख्या । भृशं पुनः पुनर्वा ख्याति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'द्वितीयतुर्ययोः पूर्वौ' (४।१।४२) ख० → क० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'आ-गुणावन्यादेः' (४।१।४८) आ । अद्यतनी दि → त् । ईत् । 'यमि-रमि-नम्यातः सोऽन्तश्च' (४।४।८६) सोऽन्तः । अट् ।

**[अभूत्]** 'असक् भुवि' (११०२) अस् । 'अस्ति-ब्रुवोर्भू-वचावशिति' (४।४।१) भू । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'पिबैति-दा-भू-स्थः सिचो लुप् परस्मै न चेट्' (४।३।६६) सिच्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[आसीत्]** अषी (९३१) - 'असी गत्यादानयोश्च' (९३२) अस् । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'इट ईति' (४।३।७१) सिच्लोपः । 'स्वरादेस्तासु' (४।४।३१) वृद्धिः आ ।

**[व्यत्यशासिष्ट]** वि-अति 'शासूक् अनुशिष्टौ' (१०९५) शास् । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । 'अड् धातोरादि०' (४।४।२९) अट् ॥छ॥

## सर्त्यर्त्तेर्वा ॥३।४।६१॥

**[सर्त्यर्त्तेः]** सर्त्तिश्च अर्त्तिश्च = सर्त्यर्त्ति, तस्मात् ।

**[वा]** वा प्रथमा सि ।

**[असरत्]** 'सृं गतौ' (२५) सृ । अद्यतनी दि → त् । अनेन अङ्प्र० । 'ऋवर्ण-दृशोऽङि' (४।३।७) गु० अर् । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[असार्षीत्]** 'सृं गतौ' (२५) सृ । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'सिचि परस्मै समानस्याऽङिति' (४।३।४४) वृ० आर् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[आरत्, आर्षीत्]** 'ऋंक् गतौ' (११३५) ऋ । 'ऋं प्रापणे च' (२६) ऋ इति वा । अद्यतनी दि → त् । अनेन अङ्प्र० । ऋवर्ण-दृशोऽङि' (४।३।७) गु० अर् । 'स्वरादेस्तासु' (४।४।३१) वृ० आर् । द्वितीये 'सिजद्यतन्याम्' (३।४।५३) सिच् । सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'सिचि परस्मै समानस्याऽङिति' (४।३।४४) वृ० आर् ।

**[समारत, समार्ष्ट]** सम्-ऋ । अद्यतनी त । अनेन अङ्प्र० । 'ऋवर्ण-दृशोऽङि' (४।३।७) गु० अर् । 'स्वरादेस्तासु' (४।४।३१) वृ० आर् । द्वितीये 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'ऋवर्णात्' (४।३।३६) सिच् किद्भावात् गुणो न भवति, ततः 'सिचि परस्मै समानस्याऽङिति' (४।३।४४) वृ० आर् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[असरिसारीत्]** 'सृं गतौ' (२५) सृ ।卐 कुटिलं असरत् । 'गत्यर्थात् कुटिले' (३।४।११) यङ्प्र०→य । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । 'रि-रौ च लुपि' (४।१।५६) "रि" आगमः । अद्यतनी त् ।

**[आरारीत्]** 'ऋं प्रापणे च' (२६) ऋ । 'ऋंक् गतौ' (११३५) ऋ । भृशं पुनः पुनर्वा ऋच्छति-इयर्त्ति । 'अट्यर्त्ति-सूत्रि-मूत्रि-सूच्यशूर्णोः' (३।४।१०) यङ्प्र० । 'बहुलं लुप्' (३।४।१४) यङ्लोपः । 'सन्-यङश्च' (४।१।३) द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'रि-रौ च लुपि' (४।१।५६) "र्" आगमः । अद्यतनी दि० → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'इट ईति' (४।३।७१) सिच्लोपः । 'सिचि परस्मै०' (४।३।४४) वृद्धिः आर् । 'स्वरादेस्तासु' (४।४।३१) वृद्धिः । 'समानानां०' (१।२।१) दीर्घः । ।।छ।।

### ह्वा-लिप्-सिचः ।।३।४।६२।।

**[ह्वालिप्सिचः]** ह्वाश्च लिप् च सिच् च = ह्वालिप्सिच्, तस्मात् ।

**[आह्वत्]** 'ह्वेंग् स्पर्द्धा-शब्दयोः' (९९४) ह्वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) ह्वा, आङ्पूर्व० । अद्यतनी दि → त् । अनेन अङ्प्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलोपः ।

**[अलिपत्]** 'लिपींत् उपदेहे' (१३२४) लिप् । अद्यतनी दि → त् । अनेन अङ्प्र० → अ । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[असिचत्]** 'षिचींत् क्षरणे' (१३२१) षिच् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सिच् । अद्यतनी दि → त् । अनेन अङ्प्र० → अ । 'अड् धातोरादि०' (४।४।२९) अट् ।।छ।।

### वाऽऽत्मने ।।३।४।६३।।

**[वा]** वा प्रथमा सि ।

**[आत्मने]** आत्मार्थं पदं = आत्मनेपदम्, तस्मिन् । 'ते लुग्वा' (३।२।१०८) पदलोपः । सूत्रत्वात् ङिलोपः । 'परा-ऽऽत्मभ्यां ङेः' (३।२।१७) इत्यनेन चतुर्थीअलुप्समासः ।

**[आह्वत, आह्वास्त]** 'ह्वेंग् स्पर्द्धा-शब्दयोः' (९९४) ह्वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) ह्वा, आङ्पूर्व० । अद्यतनी त । प्रथमे अनेन अङ्प्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलोपः । द्वितीये 'सिजद्यतन्याम्' (३।४।५३) सिच् ।

**[अलिपत, अलिप्त]** लिप् । अद्यतनी त । प्रथमे अनेन अङ्प्र० → अ । द्वितीये 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'धुड्-ह्रस्वाल्लुगनिटस्त-थोः' (४।३।७०) सिच्लोपः ।

**[असिचत, असिक्त]** सिच् । अद्यतनी त । प्रथमे अनेन अङ्प्र० → अ । द्वितीये 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'धुड्-ह्रस्वाल्लुगनिटस्त-थोः' (४।३।७०) सिच्लोपः । 'च-जः क-गम्' (२।१।८६) च० → क० ।।छ।।

### लृदिद्-द्युतादि-पुष्यादेः परस्मै ।।३।४।६४।।

**[लृदिद् द्युतादिपुष्यादेः]**+ लृत् इत् अनुबन्धो येषां ते = लृदितः । द्युत् आदिर्येषां ते = द्युतादयः । आगन्तुना अकारेण

---

卐 मध्यमवृत्तौ - भृशं पुनः पुनर्वा सरति । 'व्यञ्जना०' (३।४।९) यङ्प्र० ।

P. + लृत् इत् अनुवन्धो यस्य सः = लृदित्, द्युत् आदिर्यस्य सः = द्युतादिः, पुष्य आदिर्यस्य सः = पुष्यादिः, लृदिच्च द्युतादिश्च पुष्यादिश्च = लृदिद्द्युतादिपुष्यादि, तस्मात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्युतेति कृत्वा तृतीयत्वाऽप्रसङ्गात् द्युतादीति निर्देशः । पुष्य आदिर्येषां ते = पुष्यादयः । लृदितश्च द्युतादयश्च पुष्यादयश्च = लृदिद्द्युतादिपुष्यादि, तस्मात् ।

**[परस्मै]** परार्थं पदं = परस्मैपदम्, तस्मिन् । 'ते लुग्वा' (३।२।१०८) इति पदलोपः । 'परा-ऽऽत्मभ्यां ङेः' (३।२।१७) चतुर्थीअलुप्समासः । सूत्रत्वात् वा ङिलोपः ।

**[अगमत्]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) 'गम्लृं गतौ' (३९६) गम् । अद्यतनी दि → त् । अनेन अङ्प्र० → अ । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अशकत्]** 'शक्लृंट् शक्तौ' (१३००) शक् । अद्यतनी दि → त् । अनेन अङ्प्र० → अ । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अद्युतत्]** 'द्युति दीप्तौ' (९३७) द्युत् । अद्यतनी दि → त् । अनेन अङ्प्र० → अ । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अरुचत्]** 'रुचि अभिप्रीत्यां च' (९३८) रुच् । अद्यतनी दि → त् । अनेन अङ्प्र० → अ । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[औचत्]** 'उचच् समवाये' (११७६) उच् । अद्यतनी दि → त् । अनेन अङ्प्र० → अ । 'स्वरादेस्तासु' (४।४।३१) वृ० औ ।

**[अश्लिषत् जतु च काष्ठं च]** 'श्लिषंच् आलिङ्गने' (१२१०) श्लिष् । अद्यतनी दि → त् । अनेन अङ्प्र० → अ । 'अड् धातोरादि०' (४।४।२९) अट् । जतु प्रथमा सि । काष्ठ प्रथमा सि ।

**[अपोषीत्]** 'पुष पुष्टौ' (५३६) पुष् । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'इट ईति' (४।३।७१) सिच्लोपः । 'समानानां०' (१।२।१) दीर्घः । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । अट् ।

**[अभूषीत्]** 'भूष अलङ्कारे' (५३७) भूष् । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'इट ईति' (४।३।७१) सिच्लोपः । 'समानानां०' (१।२।१) दीर्घः । 'अड़ धातोरादि०' (४।४।२९) अट् ।

**[अपोषीत्]** 'पुषश् पुष्टौ' (१५६४) पुष् । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'इट ईति' (४।३।७१) सिच्लोपः । 'समानानां०' (१।२।१) दीर्घः । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[अकोषीत्]** 'कुषश् निष्कर्षे' (१५६५) कुष् । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'इट ईति' (४।३।७१) सिच्लोपः । 'समानानां०' (१।२।१) दीर्घः । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[समगंस्त]** सम् अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'अड् धातोरादि०' (४।४।२९) अट् । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः ।

**[व्यद्योतिष्ट]** वि 'द्युति दीप्तौ' (९३७) द्युत् । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्ताद्यशितोऽत्रोणा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देरिट्' (४।४।३२) इट् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[व्यत्यपुक्षत]** वि-अति 'पुषंच् पुष्टौ' (११७५) पुष् । अद्यतनी त । 'ह-शिटो नाम्युपान्त्याददृशोऽनिटः सक्' (३।४।५५) सक्प्र० । 'ष-ढोः कस्सि' (२।१।६२) ष० → क० । 'नाम्यन्तस्था०' (२।३।१५) ष०, क-षसंयोगे क्ष० । 'अड् धातोरादि०' (४।४।२९) अट् ।।छ।।

## ऋदिच्छ्वि-स्तम्भू-मुचू-म्लुचू-गुचू-ग्लुचू-ग्लुञ्चू-ज्रो वा ।।३।४।६५।।

**[ऋदिच्छ्विस्तम्भूमुचूम्लुचूगुचूग्लुचूग्लुञ्चूजः]** 卐 ऋत् इत् अनुबन्धो येषां ते = ऋदितः, ऋदितश्च श्विश्च स्तम्भूश्च मुचूश्च म्लुचूश्च गुचूश्च ग्लुचूश्च ग्लुञ्चूश्च जृश्च = ऋदिच्छ्विस्तम्भूमुचूम्लुचूगुचूग्लुचूग्लुञ्चूजृ, तस्मात् ।

**[वा]** वा प्रथमा सि ।

**[अरुधत्, अरौत्सीत्]** 'रुधृंपी आवरणे' (१४७३) रुध् । अद्यतनी दि → त् । प्रथमे अनेन अङ्प्र० सर्वत्र । अन्यत्र 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'व्यञ्जनानामनिटि' (४।३।४५) वृद्धिः औ । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ध० → त० ।

**[अभिदत्, अभैत्सीत्]** 'भिदृंपी विदारणे' (१४७७) भिद् । अद्यतनी दि → त् । प्रथमे अनेन अङ्प्र० । अन्यत्र 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'व्यञ्जनानामनिटि' (४।३।४५) वृद्धिः ऐ । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० ।

**[अश्वत्, अश्वयीत्, अशिश्वियत्]** 'ट्वोश्वि गति-वृद्धयोः' (९९७) श्वि । अद्यतनी दि → त् । प्रथमे अनेन अङ्प्र० । 'श्वयत्यसू-वच०' (४।३।१०३) श्वादेशः । अग्रेतने 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । इट् । 'इट ईति' (४।३।७१) सिच्लोपः । 'सिचि परस्मै समानस्याऽङिति' (४।३।४४) इति वृद्धिप्राप्ता 'न श्वि-जागृ-शस-क्षण-ह्म्येदितः' (४।३।४९) इत्यनेन निषिध्यते । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । तृतीये 'ट्धे-श्वेर्वा' (३।४।५९) ङप्र० → अ । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'संयोगात्' (२।१।५२) इय् ।

**[अस्तभत्, अस्तम्भीत्]** 'स्तम्भू स्तम्भे' (१९८५) स्तम्भ्, स्तम्भू इति सौत्रो धातुः । अद्यतनी दि → त् । अनेन अङ्प्र० । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः । द्वितीये 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । इट् । 'इट ईति' (४।३।७१) सिच्लोपः । 'समानानां०' (१।२।१) दीर्घः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अमुचत्, अमोचीत्]** वञ्चू (१०६) - चञ्चू (१०७) - तञ्चू (१०८) - त्वञ्चू (१०९) - मञ्चू (११०) - मुञ्चू (१११) - मुञ्चू (११२) - 'मुचू गतौ' (११३) मुच् । अद्यतनी दि → त् । अनेन अङ्प्र० । द्वितीये 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । इट् । 'इट ईति' (४।३।७१) सिच्लोपः । 'समानानां०' (१।२।१) दीर्घः । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अम्लुचत्, अम्लोचीत्]** 'म्लुचू गतौ' (११४) म्लुच् । अद्यतनी दि → त् । अनेन अङ्प्र० । द्वितीये 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । इट् । 'इट ईति' (४।३।७१) सिच्लोपः । 'समानानां०' (१।२।१) दीर्घः । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'अड् धातोरादि०' (४।४।२९) अट् ।

P. 卐 ऋत् इत् अनुबन्धो यस्य सः = ऋदित्, ऋदिच्च श्विश्च.... ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अगुचत्, अग्रोचीत्]** 'गुचू स्तेये' (११७) गुच् । अद्यतनी दि → त् । अनेन अङ्प्र० । द्वितीये 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । इट् । 'इट ईति' (४।३।७१) सिच्लोपः । 'समानानां०' (१।२।१) दीर्घः । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अग्लुचत्, अग्लोचीत्]** 'ग्लुचू स्तेये' (११८) ग्लुच् । अद्यतनी दि → त् । अनेन अङ्प्र० । द्वितीये 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । इट् । 'इट ईति' (४।३।७१) सिच्लोपः । 'समानानां०' (१।२।१) दीर्घः । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अग्लुचत्, अग्लुञ्चीत्]** 'ग्लुञ्चू गतौ' (११५) ग्लुञ्च् । अद्यतनी दि → त् । अनेन अङ्प्र० । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः । द्वितीये 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'इट ईति' (४।३।७१) सिच्लोपः । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अजरत्, अजारीत्]** 'जॄश् वयोहानौ' (१५३६) जॄ । 'जॄषूच् जरसि' (११४५) जॄ । अद्यतनी दि → त् । अनेन अङ्प्र० । 'ऋवर्ण-दृशोऽङि' (४।३।७) गु० अर् । द्वितीये 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । इट् । 'इट ईति' (४।३।७१) सिच्लोपः । पूर्वं 'सिचि परस्मै समानस्याऽङिति' (४।३।४४) वृद्धिः आर्, ततः सिच्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अरुद्ध]** रुध् । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'धुड्-ह्रस्वाल्लुगनिटस्त-थोः' (४।३।७०) सिच्लोपः । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ध० → द० ।

**[अभित्त]** भिद् । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'धुड्-ह्रस्वाल्लुगनिटस्त-थोः' (४।३।७०) सिच्लोपः । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० । 'अड् धातोरादि०' (४।४।२९) अट् ॥छ॥

### जिच् ते पदस्तलुक् च ॥३।४।६६॥

**[जिच्]** जिच् प्रथमा सि ।

**[ते]** त सप्तमी ङि ।

**[पदः]** पद् पञ्चमी ङसि ।

**[तलुक्]** तस्य-निमित्तभूतस्य तकारस्य लुक् = तल्लुक् । प्रथमा सि ।

**[च]** च प्रथमा सि ।

**[उदपादि भिक्षा]** उत् 'पदिंच् गतौ' (१२५७) पद् । अद्यतनी त । अनेन जिच्→इ - तलुक् च । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[समपादि विद्या]** सम्-पद् । अद्यतनी त । अनेन जिच्-तलुक् च । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[उदपत्सातम्]** उत्-पद् । अद्यतनी आताम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'अघोषे प्रथमो०' (१।३।५०) द० → त० । 'अड् धातोरादि०' (४।४।२९) अट् ।

पदेरात्मनेपदा(दि)त्वात् त इति आत्मनेपदप्रथमत्रिकैकवचनं तकारो गृह्यते, न परस्मैपदमध्यमत्रिकबहुवचनम् । जकारो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'ञ्णिति' (४।३।५०) इति विशेषणार्थः । चकारो 'न कर्मणा ञिच्' (३।४।८८) इत्यत्र विशेषणार्थः ।।छ।।

## दीप-जन-बुधि-पूर-ताय-प्यायो वा ।।३।४।६७।।

**[दीपजनबुधिपूरतायप्यायः]** दीपश्च जनश्च बुधिश्च पूरश्च तायश्च प्याय् च = दीपजनबुधिपूरतायप्याय्, तस्मात् ।

**[वा]** वा प्रथमा सि ।

**[अदीपि, अदीपिष्ट]** 'दीपैचि दीप्तौ' (१२६६) दीप् । अद्यतनी त । अनेन ञिच्प्र० → इ - तस्य लुक् च । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अजनि, अजनिष्ट]** 'जनैचि प्रादुर्भावे' (१२६५) जन् । अद्यतनी त । अनेन ञिच् → इ - तस्य लुक् च । 'न जन-वधः' (४।३।५४) इति वृद्ध्यभावः । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'तवर्गस्य श्चवर्ग०' (१।३।६०) तस्य टत्वम् । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अबोधि, अबुद्ध]** 'बुधिं ज्ञाने' (१२६२) बुध् । अद्यतनी त । अनेन ञिच्-तस्य लुक् च । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सिजाशिषावात्मने' (४।३।३५) सिचः कित्त्वाद् गुणो न भवति । 'धुड्-ह्रस्वाल्लुगनिटस्त-थोः' (४।३।७०) सिच्लोपः । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) तस्य ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ध० → द० । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अपूरि, अपूरिष्ट]** 'पूरैचि आप्यायने' (१२६८) पूर् । अद्यतनी त । अनेन ञिच्प्र० → इ - तलुक् च । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अतायि, अतायिष्ट]** 'तायृङ् सन्तान-पालनयोः' (८०६) ताय् । अद्यतनी त । अनेन ञिच्प्र० → इ - तलुक् च । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अप्यायि, अप्यायिष्ट]** स्फायैङ् (८०४) - 'ओप्यायैङ् वृद्धौ' (८०५) प्याय् । अद्यतनी त । अनेन ञिच्प्र० → इ - तलुक् च । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

**[अदीपिषाताम्]** दीप् । अद्यतनी आताम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अदीपि भवता]** दीप् । अद्यतनी त । 'भाव-कर्मणोः' (३।४।६८) ञिच् → इ -तलुक् च ।

बुधीति इकारो दैवादिकस्यात्मनेपदिनः परिग्रहार्थः, तेन **[अबोधिष्ट]** 'बुधृग् बोधने' (९१२) बुध् । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'तवर्गस्य श्चवर्ग०' (१।३।६०) तस्य टत्वम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'अड् धातोरादि०' (४।४।२९) अट् ।।छ।।

## भाव-कर्मणोः ।।३।४।६८।।

**[भावकर्मणोः]** भावश्च कर्म च = भावकर्मणी, तयोः = भावकर्मणोः, सप्तमी ओस् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[आसि भवता]** 'आसिक् उपवेशने' (१११९) आस् । अद्यतनी त । अनेन ञिच् → इ-तलुक् च ।

**[अशायि भवता]** 'शीङ्क् स्वप्ने' (११०५) शी । अद्यतनी त । अनेन ञिच् → इ-तलुक् च । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अकारि कटः]** 'डुकृंग् करणे' (८८८) कृ । अद्यतनी त । अनेन ञिच् → इ - तलुक् च । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अपाच्योदनश्चैत्रेण]** 'डुपचींष् पाके' (८९२) पच् । अद्यतनी त । अनेन ञिच् → इ - तलुक् च । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'अड् धातोरादि०' (४।४।२९) अट् ।।छ।।

### स्वर-ग्रह-दृश-हन्भ्यः स्य-सिजाशीः-श्वस्तन्यां ञिट् वा ।।३।४।६९।।

**[स्वरग्रहदृशहन्भ्यः]** स्वरश्च ग्रहश्च दृशश्च हन् च = स्वरग्रहदृशहन्, तेभ्यः = स्वरग्रहदृशहन्भ्यः, पञ्चमी भ्यस् ।

**[स्यसिजाशीःश्वस्तन्याम्]** स्यश्च सिच् च आशीश्च श्वस्तनी च = स्यसिजाशीःश्वस्तनी, सूत्रत्वात् क्लीबत्वं न, तस्याम् ।

**[ञिट्]** ञिट् प्रथमा सि ।

**[वा]** वा प्रथमा सि ।

**[दायिष्यते, दास्यते]** 'डुदांग्क् दाने' (११३८) दा । भविष्यन्ती स्यते । अनेन ञिट् → इ । 'आत ऐः कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[अदायिष्यत, अदास्यत]** दा । क्रियातिपत्तिः स्यत । अनेन ञिट् → इ । 'आत ऐः कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अदायिषाताम्, अदिषाताम्]** दा । अद्यतनी आताम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । अनेन ञिट् → इ । 'आत ऐः कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । द्वितीये 'इश्च स्था-दः' (४।३।४१) आ० → इ० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[दायिषीष्ट, दासीष्ट]** दा । आशीः सीष्ट । अनेन ञिट् → इ । 'आत ऐः कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[दायिता, दाता]** दा । श्वस्तनी ता । अनेन ञिट् → इ । 'आत ऐः कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[शमिष्यते, शामिष्यते, शमयिष्यते]** 'शमू उपशमे' (१२३०) शम् । शमिष्यति कश्चित्, स शमिष्यत् अन्येन प्रयुङ्(यो)क्ष्यते । 'ञ्णिति' (४।३।५०) वृद्धिः । 'शमोऽदर्शने' (४।२।२८) ह्रस्वत्वम् । ञि-णमि परे तु णौ वा दीर्घः । भविष्यन्ती स्यते । अनेन ञिट् → इ । 'णेरनिटि' (४।३।८३) णिग्लोपः । सर्वत्र 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[अशमिष्यत, अशामिष्यत, अशमयिष्यत]** शमि पूर्ववत् । क्रिया० स्यत । अनेन ञिट् → इ । अग्रे पूर्ववत् ।

**[अशमिषाताम्, अशामिषाताम्, अशमयिषाताम्]** शमि पूर्ववत् । अद्यतनी आताम् । 'सिजद्यतन्याम्' (३।४।५३)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिच् । अनेन ञिट् → इ । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्डिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । पूर्वं अयमेव कार्यः । अशमतां कश्चित्, तौ शान्तत्वं तावन्मेनं(?)प्र(प्रा)युक्षाताम् ।

**[शमिषीष्ट, शामिषीष्ट, शमयिषीष्ट]** 'शमू उपशमे' (१२३०) शम् । शम्यात् कश्चित्, स शान्तिरन्येन प्रयुक्षीष्ट । 'प्रयोक्तृव्या०' (३।४।२०) णिग्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'शमोऽदर्शने' (४।२।२८) ह्रस्वः । 'घटादेर्ह्रस्वो०' (४।२।२४) ह्रस्वत्वम्, ञि-णमि परे तु वा दीर्घः । आशीः सीष्ट । अनेन ञिट् । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्डिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[शमिता, शामिता, शमयिता]** शम् । शमिता कश्चित् ।

**[चायिष्यते, चेष्यते]** चेष्यति कश्चित्, स चेष्यन् अन्येन प्रयुज्यन्ते (प्रयोक्ष्यते) । णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । उभये भवि० स्यते । अनेन ञिट् ।

**[शायिष्यते, शयिष्यते]** 'शीङ्क् स्वप्ने' (११०५) शी । भवि० स्यते । अनेन ञिट् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्डिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[स्ताविष्यते, स्तोष्यते]** 'ष्टुंग्क् स्तुतौ' (११२४) ष्टु । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्तु । 'निमित्ताभावे०' (न्या० सं० वक्षस्कार (१)/सूत्र(२९)) स्तु । भवि० स्यते । अनेन ञिट् → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'नामिनो गुणोऽक्डिति' (४।३।१) गु० ओ ।

**[लाविष्यते, लविष्यते]** 'लूग्श् छेदने' (१५१९) लू । भवि० स्यते । अनेन ञिट् → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्डिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[कारिष्यते, करिष्यते]** 'डुकृंग् करणे' (८८८) कृ । भवि० स्यते । अनेन ञिट् → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । 'हनृतः स्यस्य' (४।४।४९) इट् । 'नामिनो गुणोऽक्डिति' (४।३।१) गु० अर् ।

**[तारिष्यते, तरिष्यते, तरीष्यते]** 'तॄ प्लवन-तरणयोः' (२७) तॄ । भवि० स्यते । अनेन ञिट् → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्डिति' (४।३।१) गु० अर् । तृतीये 'वृतो नवाऽनाशीः-सिच् परस्मै च' (४।४।३५) इटो दीर्घः ।

**[ग्राहिष्यते, ग्रहीष्यते]** 'ग्रहीश् उपादाने' (१५१७) ग्रह् । भवि० स्यते । अनेन ञिट् → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । पक्षे इट् । 'गृह्णोऽपरोक्षायां दीर्घः' (४।४।३४) इटो दीर्घः । सर्वत्र 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[अग्राहिषाताम्, अग्रहीषाताम्]** ग्रह् । अद्यतनी आताम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । अनेन ञिट् → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । इट् । 'गृह्णोऽपरोक्षायां दीर्घः' (४।४।३४) दीर्घः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[ग्राहिषीष्ट, ग्रहीषीष्ट]** ग्रह् । आशीः सीष्ट । अनेन ञिट् → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । इट् । 'गृह्णोऽपरोक्षायां दीर्घः' (४।४।३४) दीर्घः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ग्राहिता, ग्रहीता]** ग्रह् । श्वस्तनी ता । अनेन ञिट् → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । इट् । 'गृह्णोऽपरोक्षायां दीर्घः' (४।४।३४) दीर्घः ।

**[दर्शिष्यते, द्रक्ष्यते]** 'दृशृं प्रेक्षणे' (४९५) दृश् । भवि० स्यते । अनेन ञिट् → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'अः सृजि-दृशोऽकिति' (४।४।१११) अकारागमः । 'इवर्णादि०' (१।२।२१) रत् । 'यज-सृज-मृज-राज०' (२।१।८७) श० → ष० । 'ष-ढोः कस्सि' (२।१।६२) ष० → क० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम्, क-षसंयोगे क्ष० ।

**[अदर्शिषाताम्, अदृक्षाताम्]** दृश् । अद्यतनी आताम् । अनेन ञिट् → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'सिजाशिषावात्मने' (४।३।२५) कित्त्वं सिच् । 'अः सृजि-दृशोऽकिति' (४।४।१११) अकारागमो न भवति । 'यज-सृज-मृज-राज०' (२।१।८७) श० → ष० । 'ष-ढोः कस्सि' (२।१।६२) ष० → क० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम्, क-षसंयोगे क्ष० ।

**[दर्शिषीष्ट, दृक्षीष्ट]** दृश् । आशीः सीष्ट । अनेन ञिट् → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । अग्रे पूर्ववत् । 'सिजाशिषावात्मने' (४।३।३५) कित्त्वम् ।

**[दर्शिता, द्रष्टा]** दृश् । श्वस्तनी ता । अनेन ञिट् → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । इवर्णादि० (१।२।२१) रत् । यज-सृज-मृज-राज-भ्राज०' (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) तस्य ट० ।

**[घानिष्यते, हनिष्यते]** 'हनंक् हिंसा-गत्योः' (११००) हन् । भवि० स्यते । अनेन ञिट् → इ । 'ञि-णवि घन्' (४।३।१०१) घनादेशः । 'ञ्णिति' (४।३।५०) वृद्धिः आ । पक्षे 'हनृतः स्यस्य' (४।४।४९) इट् ।

**[अघानिषाताम्, अवधिषाताम्, अहसाताम्]** हन् । अद्यतनी आताम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । अनेन ञिट् → इ । 'ञि-णवि घन्' (४।३।१०१) घनादेशः । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'अद्यतन्यां वा त्वात्मने' (४।४।२२) हन्० → वध० । पूर्वं इट् । 'हनः सिच्' (४।३।३८) कित्त्वे 'यमि-रमि-नमि-गमि-हनि०' (४।२।५५) नलोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[घानिषीष्ट, वधिषीष्ट]** हन् । आशीः सीष्ट । अनेन ञिट् → इ । 'ञि-णवि घन्' (४।३।१०१) घनादेशः । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धि- । 'हनो वध आशिष्यञौ' (४।४।२१) वध० ।

**[घानिता, हन्ता]** हन् । श्वस्तनी ता । अनेन ञिट् । 'ञि-णवि घन्' (४।३।१०१) घनादेशः । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

**[पठिष्यते]** 'पठ व्यक्तायां वाचि' (२१३) पठ् । भवि० स्यते । इट् ।

**[चीयते]** 'चिंग्ट् चयने' (१२९०) चि । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः ।

**[दास्यति]** 'डुदांग्क् दाने' (११३८) दा । भवि० स्यति ।

**[चेष्यति]** 'चिंग्ट् चयने' (१२९०) चि । भविष्यन्ती स्यति । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए ॥छ॥

**क्यः शिति** ॥३।४।७०॥

**[क्यः]** क्य प्रथमा सि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[शिति]** श् इत् अनुबन्धो यस्याऽसौ शित्, तस्मिन् ।

**[शय्यते भवता]** 'शीङ्क् स्वप्ने' (११०५) शी । वर्त्त० ते । अनेन क्यप्र० → य । 'क्ङिति यि शय्' (४।३।१०५) शी० → शयादेशः । भवत् तृतीया टा ।

**[शय्येत भवता]** शी । सप्तमी ईत । अनेन क्यप्र० → य । 'क्ङिति यि शय्' (४।३।१०५) शयादेशः । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए । भवत् तृतीया टा ।

**[शय्यतां भवता]** शी । पञ्चमी ताम् । अनेन क्यप्र० → य । 'क्ङिति यि शय्' (४।३।१०५) शयादेशः । भवत् तृतीया टा ।

**[अशय्यत भवता]** शी । ह्यस्तनी त । अनेन क्यप्र० → य । 'क्ङिति यि शय्' (४।३।१०५) शयादेशः । 'अड् धातोरादि०' (४।४।२९) अट् । भवत् तृतीया टा ।

**[भिद्यते कुसूलेन]** 'भिदृंपी विदारणे' (१४७७) भिद् । वर्त्त० ते । अनेन क्यप्र० → य ।

**[क्रियते कटः]** 'डुकृंग् करणे' (८८८) कृ । वर्त्त० ते । अनेन क्यप्र० → य । 'रिः श-क्या-ऽऽशीर्ये' (४।३।११०) ऋ० → रि० ।

**[अक्रियेतां कटौ]** 'डुकृंग् करणे' (८८८) कृ । ह्यस्तनी आताम् । अनेन क्यप्र० → य । 'रिः श- क्या-ऽऽशीर्ये (४।३।११०) ऋ० → रि० । 'आतामाते-आथामाथे आदिः' (४।२।१२१) आ० → इ० । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[क्रिया]** कृ । करणं = क्रिया । 'कृगः श च वा' (५।३।१००) शप्र० । अनेन क्यप्र० → य । 'रिः श-क्या-ऽऽशीर्ये' (४।३।११०) ऋ० → रि० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[अभावि]** 'भू सत्तायाम्' (१) भू । अद्यतनी त । 'भाव-कर्मणोः' (३।४।६८) ञिच् → इ-तलुक् च । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[बभूवे]** भू । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) ''भू''द्वित्वम् । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भु० → बु० । 'भू-स्वपोरदुतौ' (४।१।७०) उ० → अ० । 'धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये' (२।१।५०) उव् । 'भुवो वः परोक्षा-ऽद्यतन्योः' (४।२।४३) इत्यनेन उ० → ऊ ।

**[भविषीष्ट]** भू । आशीः सीष्ट । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[भविता]** भू । श्वस्तनी ता । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[भविष्यते]** भू । भविष्यन्ती स्यति(ते) । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[अभविष्यत भवता]** भू । क्रियातिपत्तिः स्यत । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'अड् धातोरादि०' (४।४।२९) अट् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अकारि कटो भवता]** 'डुकृंग् करणे' (८८८) कृ । अद्यतनी त । 'भाव-कर्मणोः' (३।४।६८) ञिच् → इ-तलुक् च । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । 'अड् धातोरादि०' (४।३।२९) अट् ।

**[आस्ते]** 'आसिक् उपवेशने' (१११९) आस् । वर्त्त० ते ।

## कर्त्तर्यनद्भ्यः शव् ॥३।४।७१॥

**[कर्त्तर्यनद्भ्यः]** कर्तृ सप्तमी ङि । अच्च अच्च अच्च = अदः, न अदः = अनदः । 'अन् स्वरे' (३।२।१२९) अन्, तेभ्यः = अनद्भ्यः, पञ्चमी भ्यस् ।

**[शव्]** शव् प्रथमा सि ।

**[भवति]** 'भू सत्तायाम्' (१) भू । वर्त्त० तिव् । अनेन शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[चोरयति]** 'चुरण् स्तेये' (१५६८) चुर् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । वर्त्त० तिव् । अनेन शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[पचन्]** 'डुपचींष् पाके' (८९२) पच् । पचतीति । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत् । अनेन शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[पचमानः]** पच् । पचते । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) आनश्प्र० → आन । अनेन शव् । 'अतो म आने' (४।४।११४) मोऽन्तः ।

**[धारयः]** 'धृंग् धारणे' (८८७) धृ । धरन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । धारयतीति । साहि-साति-वेद्युदेजि-धारि-पारि-चेतेरनुपसर्गात्' (५।१।५९) शप्र० → अ । अनेन शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[पारयः]** 'पार कर्मसमाप्तौ' (१९०१) पार् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । पारयतीति । 'साहि-साति-वेद्युदेजि-धारि-पारि०' (५।१।५९) शप्र० → अ । अनेन शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[जनमेजयः]** 'एजृ कम्पने' (१४८) एज् । एजन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । जनमेजयतीति । 'एजेः' (५।१।११८) खश्प्र० । अनेन शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्'(१।२।२३) अय् । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

**[पच्यते]** पच् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य ।

**[अत्ति]** 'अदं भक्षणे' (१०५९) अद् । वर्त्त० तिव् । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० ।

**[अदती]** अद् । अत्तीति । शतृप्र० → अत् । 'अधातूदृदितः' (२।४।२) ङी । इति कितोऽदादयः ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**दिवादेः श्यः** ।।३।४।७२।।

**[दिवादेः]** दिव् आदिर्यस्याऽसौ दिवादिः, तस्मात् ।

**[श्यः]** श्य प्रथमा सि ।

**[दीव्यति]** 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११-४४) दिव् । वर्त्त० तिव् । अनेन श्यप्र० । 'भ्वादेर्नामिनो दीर्घो र्वोर्व्यञ्जने' (२।१।६३) दीर्घः ।

**[दीव्यन्]** दिव् । दीव्यतीति । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत् । अनेन श्यप्र० → य । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

श्यादयः शवोऽपवादाः । पुष्यादिः ६७ । इति चितो दिवादयः ।।छ।।

**भ्रास-भ्लास-भ्रम-क्रम-क्लम-त्रसि-त्रुटि-लषि-यसि-संयसेर्वा** ।।३।४।७३।।

**[भ्रासभ्लासभ्रमक्रमक्लमत्रसित्रुटिलषियसिसंयसेः]** भ्रासश्च भ्लासश्च भ्रमश्च क्रमश्च क्लमश्च त्रसिश्च त्रुटिश्च लषिश्च यसिश्च संयसिश्च = भ्रासभ्लासभ्रमक्रमक्लमत्रसित्रुटिलषियसिसंयसि, तस्मात् ।

**[वा]** वा प्रथमा सि ।

**[भ्रास्यते, भ्रासते]** भासि (८४६) - 'टुभ्रासि दीप्तौ' (८४७) भ्रास् । वर्त्त० ते । अनेन श्यप्र० । द्वितीये शव् ।

**[भ्लास्यते, भ्लासते]** भासि (८४६) - टुभ्रासि (८४७) - 'टुभ्लासृङ् दीप्तौ' (८४८) भ्लास् । वर्त्त० ते । अनेन श्यप्र० । अन्यत्र शव् ।

**[भ्राम्यति, भ्रमति]** 'भ्रमूच् अनवस्थाने' (१२३४) भ्रम् । वर्त्त० तिव् । अनेन श्यप्र० । 'शम्सप्तकस्य श्ये' (४।२।१११) दीर्घः । 'भ्रमू चलने' (९७०) भ्रम् । वर्त्त० तिव् । शव् ।

**[क्राम्यति, क्रामति]** 'क्रमू पादविक्षेपे' (३८५) क्रम् । वर्त्त० तिव् । अनेन श्यप्र० । द्वितीये शव् । 'क्रमो दीर्घः परस्मै' (४।२।१०९) दीर्घः आ ।

**[क्लाम्यति, क्लामति]** 'क्लमूच् ग्लानौ' (१२३७) क्लम् । वर्त्त० तिव् । अनेन श्यप्र० । 'शम्सप्तकस्य श्ये' (४।२।१११) दीर्घः । द्वितीये शव् । 'ष्ठिवू-क्लम्वाऽऽचमः' (४।२।११०) दीर्घः आ ।

**[त्रस्यति, त्रसति]** 'त्रसैच् भये'(११७१) त्रस् । वर्त्त० तिव् । अनेन श्यप्र० । द्वितीये शव् ।

**[त्रुट्यति, त्रुटति]** चुट (१४३५) - छुट (१४३६) 'त्रुटत् छेदने' (१४३७) त्रुट् । वर्त्त० तिव् । अनेन श्यप्र० । द्वितीये 'तुदादेः शः' (३।४।८१) शप्र० → अ ।

**[लष्यति, लषति]** 'लषी कान्तौ' (९२७) लष् । वर्त्त० तिव् । अनेन श्यप्र० । द्वितीये शव् ।

**[यस्यति, यसति]** 'यसूच् प्रयत्ने' (१२२२) यस् । वर्त्त० तिव् । अनेन श्यप्र० । द्वितीये शव् ।

**[संयस्यति, संयसति]** 'यसूच् प्रयत्ने' (१२२२)यस्, सम्पूर्व० । वर्त्त० तिव् । अनेन श्यप्र० । द्वितीये शव् ।

**[आयस्यति]** यस्, आङ्पूर्व० । वर्त्त० तिव् । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[प्रयस्यति]** यस्, प्रपूर्व० । वर्त्त० तिव् । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य ।

यसिग्रहणेनैव सिद्धे संयसिग्रहणमुपसर्गान्तरपूर्वकस्य यसेर्निवृत्त्यर्थः ॥छ॥

**कुषि-रञ्जेर्व्याप्ये वा परस्मै च** ॥३।४।७४॥

**[कुषिरञ्जेः]** कुषिश्च रञ्जिश्च, तत्, तस्मात् ।

**[व्याप्ये]** व्याप्य सप्तमी ङि ।

**[वा]** वा प्रथमा सि ।

**[परस्मै]** परस्मैपद । परार्थं पदं = परस्मै । 'ते लुग्वा' (३।२।१०८) पदलोपः । सि । सूत्रत्वात् लोपः ।

**[च]** च प्रथमा सि ।

श्यपरस्मैपदे, तयोरपवादौ क्यात्मनेपदौ ।

**[कुष्यति पादः स्वयमेव, कुष्यते पादः स्वयमेव]** 'कुषश् निष्कर्षे' (१५६५) कुष् । कुष्णाति पादं देवदत्तः, स एवं विवक्षते नाहं कुष्णामि, किन्तु कुष्यति कुष्यते वा पादः स्वयमेव । वर्त्त० तिव्-ते । प्रथमे परस्मैपदयोगे अनेन श्यप्र०卐(पक्षे) 'क्यः शिति' (३।४।७०) क्यप्र० → य ।

**[कुष्यन् पादः स्वयमेव]** कुष् । प्रथमं स एव वाक्यः कार्यः । कुष्यतीति । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत् । अनेन श्यप्र० → य । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[कुष्यमाणः पादः स्वयमेव]** कुष्यते । 'शत्रानशावेष्यति०' (५।२।२०) आनश्प्र० → आन । अनेन श्यप्र० । 'अतो म आने' (४।४।११४) मोऽन्तः । 'रषृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[रज्यति वस्त्रं स्वयमेव, रज्यते वस्त्रं स्वयमेव]** 'रञ्जीं रागे' (८९६) रञ्ज् । 'अकट्-घिनोश्च रञ्जेः' (४।२।५०) नलुक् । रजति वस्त्रं रजकः, स एवं विवक्षते नाहं रजामि, किन्तु रज्यति रज्यते वा वस्त्रं स्वयमेव । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् । वर्त्त० तिव्-ते । अनेन परस्मैपदयोगे श्यप्र० → य ।

**[रज्यद्वस्त्रं स्वयमेव]** रज्यतीति । 'शत्रानशावेष्यति०' (५।२।२०) शतृप्र० → अत् । अनेन श्यप्र० ।

**[रज्यमानं वस्त्रं स्वयमेव]** रज्यते । 'शत्रानशावेष्यति०' (५।२।२०) आनश्प्र० → आन । अनेन श्यप्र० → य । 'अतो म आने' (४।४।११४) मोऽन्तः । प्रथमा सि ।

**[कुष्णाति पादं रोगः]** कुष् । वर्त्त० तिव् । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'रषृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[रज्य(ज)ति वस्त्रं शिल्पी]** रञ्ज् । वर्त्त० तिव् । शव् । 'अकट्-घिनोश्च रञ्जेः' (४।२।५०) नलुक् ।

**[अकोषि]** कुष् । अकोषीत् पादं देवदत्तः, स एवं विवक्षते नाहमकोषिषम्, किन्तु अकोषि पादः स्वयमेव । 'एकधातौ कर्मक्रिययैकाऽकर्मक्रिये' (३।४।८६) ञिप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

---

P. 卐 पक्षे 'एकधातौ कर्मक्रिययैकाऽकर्मक्रिये' (३।४।८६) आत्मनेपदं क्यश्च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[चुकुषे]** कुष् । चुकोष पादं देवदत्तः, स एवं विवक्षते नाहं चुकोष, किन्तु चुकुषे पादः स्वयमेव । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "कुष्"द्वि० । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) षलोपः । 'क-ङश्च-ञ्' (४।१।४६) कु० → चु० ।

**[कोषिष्यमाणः]** कुष् । कुक्ष्यति (?) (कोषिष्यति) पादं देवदत्तः, स एवं विवक्षते नाहं कुक्ष्यामि(?) (कोषिष्यामि), किन्तु कोषिष्यमाणं (?) (णः) ।

**[अरञ्जि]** रञ्ज् । अराङ्क्षीत् वस्त्रं रजकः, स एवं विवक्षते नाहं अराङ्क्षम्, किन्तु अरञ्जि । अद्यतनी त । 'एकधातौ०' (३।४।८६) जि → इ० - तलुक् ।

**[ररञ्जे]** रञ्ज् । ररञ्ज वस्त्रं रजकः, स एवं विवक्ष्यते नाहं ररञ्ज, अपि तु ररञ्जे । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः ।

**[रङ्क्ष्यमाणं स्वयमेव]** रञ्ज् । रङ्क्ष्यति वस्त्रं रजकः, स एवं विवक्षते नाहं रङ्क्ष्यामि, किन्तु रङ्क्ष्यते । 'शत्रानशावेष्यति०' (५।२।२०) आनश्प्र० → आन - "स्य" आदिः । 'अतो म आने' (४।४।११४) मोऽन्तः । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे०' (१।३।५०) ग० → क० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम्, क-षसंयोगे क्ष० ।

**[कतीह कुष्णानाः पादाः]** किम् । का संख्या मानमेषां = कति । 'यत्-तत्-किमः संख्याया डतिर्वा' (७।१।१५०) डतिप्र० → अति । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । जस् । 'डति-ष्णः संख्याया०' (१।४।५४) जस्लुप् । इह प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । कुष् । कुष्णाति पादान् रोगः, स एवं विवक्षते नाहं कुष्णामि, किन्तु कुष्यन्ति पादाः स्वयमेव, ततः कुष्यन्तीत्येवंशीलाः । 'वयः-शक्ति-शीले' (५।२।२४) शानप्र० → आन । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'रषृवर्णान्नो ण०' (२।३।६३) न० → ण० । प्रथमा जस् । पाद प्रथमा जस् ।

**[कतीह रजमानानि वस्त्राणि]** रञ्ज् । रजति वस्त्रं रजकः, स एवं विवक्षते नाहं रजामि, किन्तु रज्यन्ति वस्त्राणि स्वयमेव; ततः रज्यन्तीत्येवंशीलानि = रजमानानि । 'शत्रानशावेष्यति०' (५।२।२०) आनश्प्र० → आन । शव् । 'अतो म आने' (४।४।११४) मोऽन्तः । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

क्यात्परस्मैपदविकल्पविधानेनैव सिद्धे श्यविधानं कुष्यन्ती - रज्यन्तीत्यत्र नित्यमन्तादेशार्थम् ।

**[कुष्यन्ती]** कुष् । प्रथमं पूर्ववत् वाक्यः कार्यः । कुष्यतीति । 'शत्रानशावेष्यति०' (५।२।२०) शतृप्र० → अत् । अनेन श्यप्र० → य । 'अधातूदृदितः' (२।४।२) ङी । 'श्य-शवः' (२।१।११६) अन्त्० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[रज्यन्ती]** रञ्ज् । प्रथमं पूर्ववत् वाक्यः कार्यः । रज्यतीति । 'शत्रानशावेष्यति०' (५।२।२०) शतृप्र० → अत् । अनेन श्यप्र० → य । 'अधातूदृदितः' (२।४।२) ङी । 'श्य-शवः' (२।१।११६) अन्त्० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अत्र शाटिका कर्मकर्त्रे ॥छ॥

**स्वादेः श्नुः** ॥३।४।७५॥

**[स्वादेः]** सुरादिर्यस्याऽसौ स्वादिस्तस्मात् ।

**[श्नुः]** श्नु प्रथमा सि
शकारः शित्कार्यार्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[सुनोति]** 'षुंगट् अभिषवे' (१२८६) षु । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सु । वर्त्त० तिव् । अनेन श्नुप्र० → नु । 'उ-श्नोः' (४।३।२) गु० ओ ।

**[सुनुते]** सु । वर्त्त० ते । अनेन श्नुप्र० → नु ।

**[सुन्वन्]** सु । सुनोतीति । 'सुग्-द्विषार्हः सत्रि-शत्रु-स्तुत्ये' (५।२।२६) अतृश्प्र० → अत् । अनेन श्नुप्र० → नु । 'इवर्णादि०' (१।२।२१) वत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[सुन्वानः]** सु । सुनुते । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) आनश्प्र० → आन । अनेन श्नुप्र० → नु । 'इवर्णादि०' (१।२।२१) वत् ।

**[सिनोति]** 'षिंगट् बन्धने'(१२८७) षि । 'षः सोऽष्ट्यै०' (२।३।९८) सि । वर्त्त० तिव् । अनेन श्नुप्र० → नु । 'उ-श्नोः' (४।३।२) गु० ओ ।

**[सिनुते]** सि । वर्त्त० ते । अनेन श्नुप्र० → नु ।

**[सिन्वन्]** सि । सिनोतीति । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत् । अनेन श्नुप्र० → नु । 'इवर्णादिरस्वे स्वरे य-व-र-लम्' (१।२।२१) वत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[सिन्वानः]** सि । सिनुते । 'शत्रानशावेष्यति०' (५।२।२०) आनश्प्र० → आन । अनेन श्नुप्र० → नु । 'इवर्णादिरस्वे०' (१।२।२१) वत् ।

इति टितः स्वादयः ॥छ॥

**वाऽक्षः ॥३।४।७६॥**

**[वा]** वा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[अक्षः]** अक्ष् पञ्चमी ङसि ।

**[अक्ष्णोति, अक्षति]** 'अक्षौ व्याप्तौ च' (५७०) अक्ष् । वर्त्त० तिव् । अनेन विकल्पे श्नुप्र० → नु । 'उ-श्नोः' (४।३।२) गु० ओ । पक्षे 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव्प्र० → अ ॥छ॥

**तक्षः स्वार्थे वा ॥३।४।७७॥**

**[तक्षः]** तक्ष् पञ्चमी ङसि ।

**[स्वार्थे]** स्वकीयोऽर्थः = स्वार्थस्तस्मिन्, यद्वा स्वश्चासावर्थश्च = स्वार्थस्तस्मिन् ।

**[वा]** वा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[तक्ष्णोति, तक्षति काष्ठम्]** 'तक्षौ तनूकरणे' (५७१) तक्ष् । वर्त्त० तिव् । अनेन वा श्नुप्र० → नु । 'उ-श्नोः' (४।३।२) गु० ओ । पक्षे 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव्प्र० ।

**[तक्ष्णुवानः]** तक्ष् । तक्षितुं शक्तः । 'वयः-शक्ति-शीले' (५।२।२४) शानप्र० → आन । अनेन श्नुप्र० → नु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'संयोगात्' (२।१।५२) उव् ।

**[तक्षमाणः]** तक्ष् । तक्षितुं शक्तः । 'वयःशक्ति-शीले' (५।२।२४) शानप्र० → आन । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'अतो म आने' (४।४।११४) मोऽन्तः ।

**[संतक्षति वाग्भिः शिष्यम्]** तक्ष्-सम्पूर्व० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । वाच् तृतीया भिस् । 'च-जः क-गम्' (२।१।८६) च० → क० । 'धुटस्तृतीयः' (२।१।७६) क० → ग०, निर्भर्त्सयतीत्यर्थः ।।छ।।

## स्तम्भू-स्तुम्भू-स्कम्भू-स्कुम्भू-स्कोः श्ना च ।।३।४।७८।।

**[स्तम्भूस्तुम्भूस्कम्भूस्कुम्भूस्कोः]** स्तम्भूश्च स्तुम्भूश्च स्कम्भूश्च स्कुम्भूश्च स्कुश्च = स्तम्भूस्तुम्भूस्कम्भूस्कुम्भूस्कु, तस्मात् ।

**[श्ना]** श्ना प्रथमा सि । सूत्रत्वात् लोपः ।

**[च]** च प्रथमा सि ।

चत्वारः सौत्रा धातवः ।

**[स्तभ्नाति, स्तभ्नोति]** स्तम्भू इति सौत्रो धातुः, स्तम्भ् । वर्त्त० तिव् । अनेन श्ना-श्नुप्र० । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः । 'उ-श्नोः' (४।३।२) गु० ओ ।

**[स्तभ्नानः, स्तभ्नुवानः]** स्तम्भ् । स्तभ्नातीत्येवंशीलः । 'वयः-शक्ति-शीले' (५।२।२४) शानप्र० → आन । अनेन श्ना-श्नुप्र० । 'संयोगात्' (२।१।५२) उव् (?) ('भ्रू-श्नोः' (२।१।५३) उव्) । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः ।

**[स्तुभ्नाति, स्तुभ्नोति]** स्तुम्भ् । वर्त्त० तिव् । अनेन श्ना-श्नुप्र० । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः । 'उ-श्नोः' (४।३।२) गु० ओ ।

**[स्कभ्नाति, स्कभ्नोति]** स्कम्भ् । वर्त्त० तिव् । अनेन श्ना-श्नुप्र० । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः । 'उ-श्नोः'(४।३।२) गु० ओ ।

**[स्कुभ्नाति, स्कुभ्नोति]** स्कुम्भ् । वर्त्त० तिव् । अनेन श्ना-श्नुप्र० । 'नो व्यञ्जनस्याऽनुदितः'(४।२।४५) नलोपः । 'उ-श्नोः' (४।३।२) गु० ओ ।

स्तम्भ्वादीनामूदित्करणं क्त्वाक्तयोरिड्विकल्पनित्यप्रतिषेधौ यथा स्याताम्-

**[स्तब्ध्वा, स्तम्भित्वा]** स्तम्भ् । स्तम्भनं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तृतीयस्तृतीयचतुर्थे' (१।३।४९) भस्य ब० । 'धूगौदितः' (४।४।३८) वेट्(?) (ऊदितो वा' (४।४।४२) वेट्) ।

**[स्तब्धः, स्तब्धवान्]** स्तभ्यते स्म । स्तभ्नाति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त - क्तवतुप्र० → तवत् । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) तस्य ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) भ० → ब० ।।छ।।

## क्र्यादेः ।।३।४।७९।।

**[क्र्यादेः]** 卐 क्रीरादिर्यस्याऽसौ क्र्यादिस्तस्मात् । 'ङित्यदिति' (१।४।२३) इ० → ए० । 'एदोद्भ्यां ङसि ङसो रः'

P. 卐 क्री आदिर्यस्य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१।४।३५) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[क्रीणाति]** 'डुक्रींग्श् द्रव्यविनिमये' (१५०८) क्री । वर्त्त० तिव् । अनेन श्नाप्र० → ना । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[प्रीणाति]** 'प्रींग्श् तृप्ति-कान्त्योः' (१५१०) प्री । वर्त्त० तिव् । अनेन श्नाप्र० → ना । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

इति शितः क्र्यादयः ॥छ॥

## व्यञ्जनाच्छ्नाहेरानः ॥३।४।८०॥

**[व्यञ्जनात्]** व्यञ्जन पञ्चमी ङसि ।

**[श्नाहेः]** श्ना युक्ता हिः = श्नाहिस्तस्य ।

**[आनः]** आन प्रथमा सि ।

**[पुषाण]** 'पुष्श् पुष्टौ' (१५६४) पुष् । पञ्चमी हि । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । अनेन श्नाहि → आन आदेशः ।

**[मुषाण]** 'मुषश् स्तेये' (१५६३) मुष् । पञ्चमी हि । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । अनेन श्नाहि → आन आदेशः ।

**[उत्तभान]** उत्-स्तम्भू इति सौत्रो धातुः, स्तम्भ् । पञ्चमी हि । 'क्र्यादेः' (३।४।७९) श्नाप्र० । अनेन आन । 'उदः स्था-स्तम्भः सः' (१।३।४४) सलोपः । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः ।

**[विष्कभाण]** स्कम्भू इति सौत्रो धातुः, विपूर्व० । पञ्चमी हि । 'क्र्यादेः' (३।४।७९) श्नाप्र० । अनेन आन । 'स्कभ्नः' (२।३।५५) इति षत्वम् । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः ।

**[लुनीहि]** 'लूग्श् छेदने'(१५१९) लू । पञ्चमी हि । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'एषामी व्यञ्जनेऽदः' (४।२।९७) आ० → ई० । 'प्वादेर्ह्रस्वः' (४।२।१०५) ह्रस्वः ।

**[अश्नाति]** 'अशश् भोजने' (१५५८) अश् । वर्त्त० तिव् । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना ।

**[उत्तभ्नुहि]** उत्-स्तम्भू इति सौत्रो धातुः । पञ्चमी हि । 'स्तम्भू-स्तुम्भू-स्कम्भू-स्कुम्भू-स्कोः श्ना च' (३।४।७८) श्नुप्र० → नु । 'उदः स्था-स्तम्भः सः' (१।३।४४) सलोपः । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः ।

**[विस्कभ्नुहि]** स्कम्भू इति सौत्रो धातुः, स्कम्भ्, विपूर्व० । पञ्चमी हि । 'स्तम्भू-स्तुम्भू-स्कम्भू०' (३।४।७८) श्नुप्र० → नु । स्कम्भू इत्यत्र श्नानिर्देशात् श्नु आगते सस्य षत्वं न भवति ॥छ॥

## तुदादेः शः ॥३।४।८१॥

**[तुदादेः]** तुद् आदिर्यस्याऽसौ तुदादिस्तस्मात् ।

**[शः]** श प्रथमा सि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[तुदति]** 'तुदींत् व्यथने' (१३१५) तुद् । वर्त्त० तिव् । अनेन शप्र० ।

**[तुदन्]** तुद् । तुदतीति । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० —> अत् । अनेन शप्र० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[तुदमानः]** तुद् । तुदते । 'शत्रानशावेष्यति०' (५।२।२०) आनश्प्र० —> आन । अनेन शप्र० । 'अतो म आने' (४।४।११४) मोऽन्तः । प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

इति तितस्तुदादयः ।।छ।।

## रुधां स्वराच्श्नो नलुक् च ।।३।४।८२।।

**[रुधाम्]** रुध्, यद्वा रुध् च रुध् च रुध् च = रुधः । 'स्यादावसंख्येयः' (३।१।११९) एकशेषः, तेषां = रुधाम्, षष्ठी आम् ।

**[स्वरात्]** स्वर पञ्चमी ङसि ।

**[नलुक्]** 卐 नो लुक् = नलुक्, प्रथमा सि ।

**[च]** च प्रथमा सि ।

**[रुणद्धि, रुन्द्धे]** 'रुधूंपी आवरणे' (१४७३) रुध् । वर्त्त० तिव्-ते । अनेन श्नप्र० —> न । आत्मनेपदे 'श्नाऽस्त्योर्लुक्' (४।२।९०) अलोपः । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० —> ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ध० —> द० । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) णत्वाऽपवादे ने रुन्द्धे ।

**[भिनत्ति, भिन्ते]** 'भिदूंपी विदारणे' (१४७७) भिद् । वर्त्त० तिव्-ते । अनेन श्नप्र० —> न । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अलोपः । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० —> त० ।

**[भनक्ति]** 'भञ्जोंप् आमर्दने' (१४८६) भञ्ज् । वर्त्त० तिव् । अनेन श्नप्र० - अग्रेतननकारस्य लुक् च । 'च-जः क-गम्' (२।१।८६) ज० —> ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० —> क० ।

**[हिनस्ति]** 'हिसु हिंसायाम्' (१४९४) हिस् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) हिन्स् । वर्त्त० तिव् । अनेन श्नप्र०-अग्रेतननकारस्य लुक् च ।

इति पितो रुधादयः ।।छ।।

## कृग्-तनादेरुः ।।३।४।८३।।

**[कृग्तनादेः]**+ कृग् च तनादयश्च = कृग्तनादिस्तस्मात् ।

[उः] उ प्रथमा सि ।

तनादिषु पाठमकृत्वा कृगो भ्वादौ पाठः 'तन्भ्यो वा त-थासि न्-णोश्च' (४।३।६८) इति सिचो लुप्

---

P. 卐 नस्य लुक् ।

P. + तन् आदिर्यस्य सः = तनादिः, कृग् च तनादिश्च = कृग्तनादिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विकल्पाभावार्थः, तेन **अकृत अकृथाः** इत्यत्र 'धुड्-ह्रस्वाल्लुगनिटस्त-थोः' (४।३।७०) इति नित्यमेव सिच् लुक् भवति, शवर्थश्च तेन **करते करती**त्यपि भवति, अन्यैः कृग्तनादौ पठितस्तनादिसाहचर्यात् डुकृंग् गृह्यते, न कृंगट् ।

**[करोति, कुरुते]** 'डुकृंग् करणे' (८८८) कृ । वर्त्त० तिव्-ते । अनेन उप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'उ-श्नोः' (४।३।२) गु० ओ । 'अतः शित्युत्' (४।२।८९) अ० ⟶ उ० ।

**[कुर्वन्]** कृ । करोतीति । 'शत्रानशावेष्यति०' (५।२।२०) शतृप्र० ⟶ अत् । अनेन उप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अतः शित्युत्' (४।२।८९) अ० ⟶ उ० । 'इवर्णादे०' (१।२।२१) वत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[कुर्वाणः]** कृ । कुरुते । 'शत्रानशावेष्यति०' (५।२।२०) आनश्प्र० ⟶ आन । अनेन उप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अतः शित्युत्' (४।२।८९) अ० ⟶ उ० । 'इवर्णादे०' (१।२।२१) वत् । प्रथमा सि । 'र-षृवर्णान्नो ण०' (२।३।६३) न० ⟶ ण० । 'सो रुः' (२।१।७२) स० ⟶ र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[तनोति]** 'तनूयी विस्तारे'(१४९९) तन् । वर्त्त० तिव् । अनेन उप्र० । 'उ-श्नोः' (४।३।२) गु० ओ ।

**[तनुते]** तन् । वर्त्त० ते । अनेन उप्र० ।

**[तन्वन्]** तन् । तनोतीति । 'शत्रानशावेष्यति०' (५।२।२०) शतृप्र० ⟶ अत् । अनेन उप्र० । 'इवर्णादे०' (१।२।२१) वत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[तन्वानः]** तन् । तनुते । 'शत्रानशावेष्यति०' (५।२।२०) आनश्प्र० ⟶ आन । अनेन उप्र० । 'इवर्णादे०' (१।२।२१) वत् । प्रथमा सि । 'सो रुः' (२।१।७२) स० ⟶ र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

इति यितस्तनादयः ।।छ।।

## सृजः श्राद्धे ञि-क्या-ऽऽत्मने तथा ।।३।४।८४।।

**[सृजः]** सृज् पञ्चमी ङसि ।

**[श्राद्धे]** श्रत् 'डुधांग्क् धारणे च' (११३९) धा । श्रद्धानं = श्रद्धा । 'मृगयेच्छा-याच्ञा-तृष्णा-कृपा-भा-श्रद्धा-ऽन्तर्द्धा' (५।३।१०१) श्रद्धा निपात्यते । श्रद्धा अस्याऽस्तीति । 'प्रज्ञा-श्रद्धा-ऽर्चा-वृत्तेर्णः' (७।२।३३) णप्र० ⟶ अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलोपः, तस्मिन् ।

**[ञिक्याऽऽत्मने]** 卐 ञिश्च क्यश्च आत्मनेपदं च, तत् । 'ते लुग्वा' (३।२।१०८) पदलोपः । सि । सूत्रत्वात् लोपः ।

श्रद्धावत् इति कोऽर्थः ? धर्मार्थो मानसो व्यापारविशेषः ।

**[तथा]** तथेत्यत्र ञिक्यौ तथा विधीय(ये)ते, आत्मनेपदं तु मुख्यमेव विधीयते ।

**[असर्जि मालां धार्मिकः]** 'सृजीं(जं)त् विसर्गे' (१३४९) सृज् । 'सृजिच् विसर्गे' (१२५५) सृज् । अद्यतनी त । अनेन ञिच् ⟶ इ - तस्य लुक् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'अड् धातोरादि०' (४।४।२९) अट् । माला द्वितीया अम् । धर्म । धर्मेण चरति । 'धर्मा-ऽधर्माच्चरति' (६।४।४९) इकण्प्र० ⟶ इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते'

P. 卐 ञिश्च क्यश्च आत्मनेपदं च = ञिक्यात्मनेपदानि । जस् । 'ते लुग्वा' (३।२।१०८) पदलोपः । सूत्रत्वात् जस्लोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[सृज्यते मालां धार्मिकः]** सृज् । वर्त्त० ति(ते) । अनेनैव क्यप्र० ।

**[स्रक्ष्यते मालां धार्मिकः]** सृज् । भविष्यन्ती स्यते । 'अः सृजि-दृशोऽकिति' (४।४।१११) अकारागमः । 'इवर्णादि०' (१।२।२३) रत् । 'यज-सृज-मृज-राज०' (२।१।८७) ज० → ष० । 'ष-ढोः कस्सि' (२।१।६२) ष० → क० । 'नाम्यन्तस्था०' (२।३।१५) स० → ष०, क-षसंयोगे क्ष० ।

**[व्यत्यसृष्ट माले मिथुनम्]** सृज्, वि-अतिपूर्व० । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'धुड्-ह्रस्वाल्लुगनिटस्त-थोः' (४।३।७०) सिच्लोपः । 'यज-सृज-मृज०' (२।१।८७) ज० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । 'अड् धातोरादि०' (४।४।२९) अट् । 'क्रियाव्यतिहारे०' (३।३।२३) इत्यात्मनेपदम् ।।छ।।

### तपेस्तपःकर्मकात् ।।३।४।८५।।

**[तपेः]** तपि पञ्चमी ङसि ।

**[तपःकर्मकात्]** तप एव कर्म यस्य सः = तपःकर्मकः । 'शेषाद् वा' (७।३।१७५) कच्प्र०, तस्मात् ।

**[तप्यते तपः साधुः]** 'तपं सन्तापे' (३३३) तप् । वर्त्त० ते । अनेन क्यप्र० → य ।

ञिच् तु 'तपः कर्त्रनुतापे च' (३।४।९१) इति प्रतिषेधान्न भवति ।

**[कुरुते तपांसि साधुः]** 'डुकृंग् करणे' (८८८) कृ । वर्त्त० ते । 'कृग्-तनादेरुः' (३।४।८३) उप्र० । गुणे सति 'अतः शित्युत्' (४।२।८९) उत् भवति ।

**[उत्तपति सुवर्णं सुवर्णकारः]** तप्, उत्पूर्व० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[तपांसि साधु(धुं) तपति(न्ति)]** दुःखयन्तीत्यर्थः ।।छ।।

### एकधातौ कर्मक्रिययैकाऽकर्मक्रिये ।।३।४।८६।।

**[एकधातौ]** एकश्चासौ धातुश्च = एकधातुस्तस्मिन् ।

**[कर्मक्रियया]** कर्मस्थ क्रिया = कर्मक्रिया, तया ।

**[एकाऽकर्मक्रिये]** न विद्यते कर्म यस्यां सा = अकर्मा, एका अकर्मा क्रिया यस्याऽसौ एकाऽकर्मक्रियस्तस्मिन् । 'सर्वादयोऽस्यादौ' (३।२।६१) पुंवत् । 'गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ' (२।४।९६) ह्रस्वः ।

**[अकारि कटः स्वयमेव]** 'डुकृंग् करणे' (८८८) कृ । अकार्षीत् कटं देवदत्तः, स एवं विवक्षते नाहमकार्षम्, किन्तु अकारि कटः स्वयमेव । अद्यतनी त । अनेन ञिच् → इ-तलुक् च । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[कारिष्यते कटः स्वयमेव]** करिष्यति कटं देवदत्तः, स एवं विवक्षते नाहं करिष्यामि, किन्तु卐 कारिष्यते कटः स्वयमेव । भवि० स्यते । 'स्वर-ग्रह-दृश-हन्भ्यः स्य०' (३।४।६९) इति यथाविहितस्तथा अनेन ञिच् । 'नामिनोऽकलि-हलेः'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(४।३।५१) वृ० आर् ।

**[क्रियते कटः स्वयमेव]** करोति कटं देवदत्तः, स एवं विवक्षते नाहं करोमि, किन्तु क्रियते कटः स्वयमेव । वर्त्त० ते । अनेन क्यप्र० । 'रिः श-क्या-ऽऽशीर्ये' (४।३।११०) ऋ० → रि० ।

**[क्रियमाणः कटः स्वयमेव]** क्रियते = क्रियमाणः । 'शत्रानशावेष्यति०' (५।२।२०) आनश्प्र० → आन । अनेन क्यप्र० । 'अतो म आने' (४।४।११४) मोऽन्तः । 'रिः श-क्या-ऽऽशीर्ये' (४।३।११०) क्रि० । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[चक्रे कटः स्वयमेव]** कृ । चकार कटं देवदत्तः, स एवं विवक्षते नाहं चकार, किन्तु चक्रे । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'ऋतोऽत्' (४।१।३८) कृ० → क० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'इवर्णादे०' (१।२।२३) रत् ।

**[अभेदि कुशूलः स्वयमेव]** 'भिदृंपी विदारणे' (१४७७) भिद् । अभैत्सीत् कुसूलं देवदत्तः, स एवं विवक्षते नाहमभैत्सम्, किन्तु अभेदि कुसूलः स्वयमेव । अद्यतनी त । अनेन ञिच्-तलुक् च ।

**[भिद्यते कुशूलः स्वयमेव]** भिद् । भिनत्ति कुसूलं देवदत्तः, स एवं विवक्षते नाहं भिनद्मि, किन्तु भिद्यते ।

**[बिभिदे कुशूलः स्वयमेव]** भिद् । बिभेद कुसूलं देवदत्तः, स एवं विवक्षते नाहं बिभेद, किन्तु बिभिदे । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) दलोपः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० ।

एवं चाकर्मकत्वाद्भावेप्यात्मनेपदं भवति, ञिच् तु न भवति 'णि-स्नुश्र्यात्मनेपदाऽकर्मकात्' (३।४।९२) इति निषेधात् ।

**[क्रियते कटेन]** कृ । क्रियते कटो देवदत्तेन, तेन(स) एवं विवक्ष्यते, न मया क्रियते, किन्तु क्रियते कटेन स्वयमेव ।

**[भिद्यते कुशूलेन]** भिद् । भिद्यते कुसूलो देवदत्तेन,स एवं विवक्ष्यते, न मया भिद्यते, किन्तु भिद्यते कुसूलेन स्वयमेव । अनेनैव क्यप्र० ।

**[पचत्योदनं चैत्रः, सिध्यत्योदनः स्वयमेव]** 卐卐 'षिधू गत्याम्' (३२०) षिध् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सिध् । पचति ओदनं चैत्रं(त्रः), स एवं विवक्षते नाहं पचामि, किन्तु सिध्यति ओदनः स्वयमेव । अत्र हि धातुद्वयं भिन्नं धातुत्वात् नात्मनेपदं स्यात् ।

**[साध्वसिश्छिनत्ति]** 'छिदृंपी द्वैधीकरणे' (१४७८) छिद् । असिना छिनत्ति देवदत्तः, स एवं विवक्षते नाहं असिना छिनद्मि किन्तु साध्वसिश्छिनत्ति । साधु 'क्रियाविशेषणात्' (२।२।४१) द्वितीया अम् । अत्र हि करणस्था क्रिया अतो न भवति ञ्यादयः ।

**[साधु स्थाली पचति]** स्थाल्यां पचति देवदत्तः, स एवं विवक्षते नाहं स्थाल्यां पचामि, किन्तु साधु स्थाली पचति । अत्र द्वयं करणाधिकरणक्रिययैकक्रिये मा भूत् ।

**[स्रवत्युदकं कुण्डिका, स्रवत्युदकं कुण्डिकायाः]** इं (११-) दुं (१२)- द्रुं (१३) - शुं (१४) - 'स्रुं गतौ' (१५) स्रु । स्रवत्युदकं कुण्डिका, स्रवत्युदकं कुण्डिकायाः, विसृजति उदकं कुण्डिका, सा एवं विवक्षते नाहं विसृजामि, किन्तु स्वयमेव

P. 卐卐 'षिधूंच् संराद्धौ' (११८५) षिध् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निष्क्रामतीति विवक्षायां न भवति, यदा तु स्वयमेव विसृज्यते इति विवक्ष्यते तदा क्यादयो भवन्ति वा नवा ? उच्यते - शब्दशक्तिस्वाभाव्यात् स्वयमेव विसृज्यते इत्यर्थो न प्रतीयते किन्तु निष्क्रामतीत्येव, अत्र विसृजति निःक्रामतीति क्रियाभेदात् ।

**[गलन्त्युदकं वलीकानि, गलत्युदकं वलीकेभ्यः]** 'गल अदने' (४५२) गल् । वर्त्त० अन्ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । गलन्त्युदकं वलीकानि, गलत्युदकं वलीकेभ्यः । अत्रापि मुञ्चन्ति पततीति क्रियाभेदात् नैकक्रियत्वम् ।

**[भिद्यमानः कुशूलः पात्राणि भिनत्ति]** भिद् । भिनत्ति कुसूलं मेघः, स एवं विवक्षते नाहं कुसूलं भिनद्मि, किन्तु भिद्यते卐 भिद्यमानः । अनेनैव आत्मनेपदं आनप्रत्ययस्तूपसञ्जातम् ।।छ।।

## पचि-दुहेः ।।३।४।८७।।

**[पचिदुहेः]** पचिश्च दुहिश्च = पचिदुहि, तस्मात् ।

पचिदुहिभ्यामेकधातौ कर्मस्थक्रियया पूर्वदृष्ट्या अकर्मिकया इत्यत्र साधनभेदने(देन) क्रियाभेदः, क्रियाभेदात् धातुभेदेऽपि स्याद्वादसमाश्रयणादेकधातुत्वमेकक्रियत्वम्, अकर्मकत्वे पूर्वेण सिद्धमप्यनूद्यते सूत्रारम्भात्, अनेन तु कर्मणि विधीयते तर्ह्यत्र कर्मणीत्युच्यताम् ? न, एवं कृते पचिदुह्योः तक्रकौण्डिन्यन्यायेन सत्येव कर्मणि स्यात्, कर्मण्यसति पूर्वेणापि न स्यात् ।

**[अपाच्योदनः स्वयमेव]** 'डुपचींष् पाके' (८९२) पच् । अपाक्षीत् ओदनं चैत्रः, स एवं विवक्षते नाहं अपाक्षम्, किन्तु अपाच्योदनः स्वयमेव । अद्यतनी त । अनेन ञिच्-तलुक् च । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'अड् धातोरादि०' (४।४।२९) अडागमः ।

**[पच्यते ओदनः स्वयमेव]** पचति ओदनं चैत्रः, स एवं विवक्षते नाहं पचामि, किन्तु पच्यते ओदनः स्वयमेव । अनेन क्यप्र० ।

**[पक्ष्यते ओदनः स्वयमेव]** पच् । पक्ष्यति ओदनं चैत्रः, स एवं विवक्षते नाहं पक्ष्यामि, किन्तु पक्ष्यते ओदनः स्वयमेव । भवि० स्यते । 'च-जः क-गम्' (२।१।८६) च० ⟶ क० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम्, क-षसंयोगे क्ष० ।

**[दुग्धे गौः स्वयमेव]** 'दुहींक् क्षरणे' (११२७) दुह् । दोग्धि गां देवदत्तः, स एवं विवक्षते नाहं दोह्मि, किन्तु दुग्धे गौः स्वयमेव । दुग्धे इत्यत्र वर्तमाना ते । 'भूषार्थ-सन्-किरादि०' (३।४।९३) गणत्वात् क्यो न स्यात् । अनेन आत्मनेपदम् ।

**[अदुग्ध गौः पयः स्वयमेव]** दुह् । अधुक्षत् गां चैत्रः, स एवं विवक्षते नाहं अधुक्षम्, किन्तु अदुग्ध गौः स्वयमेव । अत्र आत्मनेपदम् । अद्यतनी त । 'ह-शिटो' नाम्युपान्त्याददृशोऽनिटः सक्' (३।४।५५) सक्प्र० । 'दुह-दिह-लिह-गुहो दन्त्यात्मने वा सकः' (४।३।७४)सक्लोपः । 'स्वर-दुहो वा' (३।४।९०) ञिच्निषेधः ।

**[उदुम्बरः फलं पच्यते स्वयमेव]** 'डुपचींष् पाके' (८९२) पच् । अन्तर्भूतण्यर्थो द्विकर्मकः । उदुम्बरं फलं पचति वायुः, स एवं विवक्षते नाहं पचामि, किन्तु उदुम्बरः फलं पच्यते स्वयमेव ।

**[अपक्तोदुम्बरः फलं स्वयमेव]** पच् । अपाक्षीत् उदुम्बरं फलं वायुः, स एवं विवक्षते नाहं अपाक्षम्, किन्तु अपक्त उदुम्बरः फलं स्वयमेव ।

---

P. 卐 भिद्यमानः सन् पात्राणि भिनत्ति । भिद् । भिद्यत इति । 'शत्रानशावेष्यति०' (५।२।२०) आनश्प्र० । अनेन 'क्यः शिति' (३।४।७०) क्यप्र० । 'अतो म आने' (४।४।११४) मोऽन्तः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[दुग्धे गौः पयः स्वयमेव]** 'दुहींक् क्षरणे' (११२७) दुह् । गां दोग्धि पयो गोपालकः, स एवं विवक्षते नाहं दोह्मि, किन्तु दुग्धे गौः पयः स्वयमेव ।

**[अदुग्ध गौः पयः स्वयमेव]** दुह् । अधुक्षत् गां पयो गोपालकः, स एवं विवक्षते नाहं अधुक्षम्, किन्तु अदुग्ध गौः पयः स्वयमेव ।

**[अधुक्षत गौः पयः स्वयमेव]** दुह् । अधुक्षत् गां पयो गोपालकः, स एवं विवक्षते नाहं अधुक्षम्, किन्तु अधुक्षत । 'ह-शिटो नाम्युपान्त्याद०' (३।४।५५) सक्प्र० । 'भ्वादेर्दादेर्घः' (२।१।८३) ह० —> घ० । 'ग-ड-द-बादेश्चतुर्थान्तस्यैक०' (२।१।७७) दु० —> धु० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) घ० —> क० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम्, क-षयोगे क्ष० । 'अड् धातोरादि०' (४।४।२९) अट् ।

अकर्मकस्य पूर्वेणैव सिद्धे सकर्मकार्थं वचनम् ॥छ॥

## न कर्मणा ञिच् ॥३।४।८८॥

**[न]** न प्रथमा सि ।

**[कर्मणा]** कर्मन् तृतीया टा ।

**[ञिच्]** ञिच् प्रथमा सि ।

अन्तर्भूतणिगर्थत्वात् कर्मत्वं फलं स्यात् ।

**[अपक्तोदुम्बरः फलं स्वयमेव]** पच् । अपाक्षीत् उदुम्बरं फलं वायुः, स एवं विवक्षते नाहं अपाक्षम्, किन्तु अपक्तोदुम्बरः फलं स्वयमेव । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'धुड्-हस्वाल्लुगनिटस्त-थोः' (४।३।७०) सिच्लोपः । 'च-जः क-गम्' (२।१।८६) च० —> क० ।

**[अदुग्ध गौः पयः स्वयमेव]** दुह् । अधुक्षत् गां पयो देवदत्तः, स एवं विवक्षते नाहं गां पयो अधुक्षम्, किन्तु अदुग्ध गौः पयः स्वयमेव । अद्यतनी त ।

**[अपाच्योदनः स्वयमेव]** पच् । अपाक्षीत् ओदनं चैत्रः, स एवं विवक्षते नाहं अपाक्षम्, किन्तु अपाचि ओदनः स्वयमेव । अद्यतनी त । 'पचि-दुहेः' (३।४।८७) ञिच्प्र० —> इ-तलुक् च । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अदोहि गौः स्वयमेव]** दुह् । अधुक्षत् गां पयो गोपालकः, स एवं विवक्षते नाहं अधुक्षम्, किन्तु अदोहि गौः स्वयमेव । अद्यतनी त । 'पचि-दुहेः' (३।४।८७) ञिच् —> इ - तलुक् च । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[अपाचि उदुम्बरः फलं वायुना]** पच् । अपाक्षीत् इत्यादि वाक्यम् । अत्र अपाचि 'भाव-कर्मणोः' (३।४।६८) ञिच् —> इ ।

**[अदोहि गौः पयो गोपालकेन]** दुह् । अदोहि वाक्यं पूर्ववत् । 'भाव-कर्मणोः' (३।४।६८) ञिच् —> इ-तलुक् च । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## रुधः ॥३।४।८९॥

**[रुधः]** रुध् पञ्चमी ङसि ।

**[अरुद्ध गौः स्वयमेव]** 'रुधूंपी आवरणे' (१४७३) रुध् । अरौत्सीत् गां चैत्रः, स एवं विवक्षते नाहं अरौत्सम्, किन्तु अरुद्ध गौः स्वयमेव । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सिजाशिषावात्मने' (४।३।३५) सिचः कित्त्वाद् गुणो न भवति । 'धुड् ह्रस्वाल्लु०' (४।३।७०) सिच्लोपः । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ध० → द० । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अरोधि गौर्गोपालकेन]** अरोधि इत्यत्र वाक्यं पूर्ववत् । 'भाव-कर्मणोः' (३।४।६८) ञिच्-तलुक् च । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । गौर्गोपालकेन ॥छ॥

## स्वर-दुहो वा ॥३।४।९०॥

**[स्वरदुहः]** स्वरश्च दुह् च = स्वरदुह्, तस्मात् ।

**[वा]** वा प्रथमा सि ।

**[अकृत अकारि कटः स्वयमेव]** 'डुकृंग् करणे' (८८८) कृ । अकार्षीत् कटं चैत्रः, स एवं विवक्षते नाहं अकार्षम्, किन्तु अकृत अकारि कटः स्वयमेव । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'धुड्-ह्रस्वाल्लु०' (४।३।७०) सिच्-लोपः । 'अड् धातोरादि०' (४।४।२९) अट् । द्वितीये 'एकधातौ कर्मक्रिययैकाऽकर्मक्रिये' (३।४।८६) ञिच् → इ-तलोपश्च । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[अलविष्ट अलावि केदारः स्वयमेव]** 'लूग्श् छेदने' (१५१९) लू । अलावीत् देवदत्तः केदारं, स एवं विवक्षते नाहं अलावं (अलाविषम्) किन्तु अलावि केदारः, अलविष्ट केदारः स्वयमेव । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'स्वर-ग्रह-दृश०' (३।४।६९) ञिट् → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अदुग्ध अदोहि गौः स्वयमेव]** 'दुहींक् क्षरणे' (११२७) दुह् । अधुक्षत् गां गोपालः, स एवं विवक्षते नाहं अधुक्षम्, किन्तु अदुग्ध अदोहि वा गौः स्वयमेव । अद्यतनी त । 'ह-शिटो०' (३।४।५५) सक्प्र० । 'दुह-दिह-लिह-गुहो०' (४।३।७४) सक्लोपः । 'भ्वादेर्दादेर्घः' (२।१।८३) ह० → घ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) घ० → ग० । द्वितीये 'पचि-दुहेः' (३।४।८७) ञिच् → इ - तलोपश्च । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[अभेदि कुशूलः स्वयमेव]** 'भिदूंपी विदारणे' (१४७७) भिद् । अभैत्सीत् कुशूलं देवदत्तः, स एवं विवक्षते नाहं अभैत्सम्, किन्तु अभेदि कुशूलः स्वयमेव । अद्यतनी त । 'एकधातौ०' (३।४।८६) ञिच्→इ-तलुक् च । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अकारि कटश्चैत्रेण]** 'डुकृंग् करणे' (८८८) कृ । अद्यतनी त । 'भाव-कर्मणोः' (३।४।६८) ञिच्→इ → तलुक् च । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ।

**[अदोहि गौर्बल्लवेन]** दुह् । अद्यतनी त । 'भाव-कर्मणोः' (३।४।६८) ञिच् → इ-तलुक् च । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## तपः कर्त्रनुतापे च ॥३।४।९१॥

**[तपः]** तप् पञ्चमी ङसि ।

**[कर्त्रनुतापे]** कर्ता च अनुतापश्च = कर्त्रनुतापम्, तस्मिन् ।

**[च]** च प्रथमा सि ।

अनुतापग्रहणाद्भावे कर्मणि च ।

**[अन्ववातप्त कितवः स्वयमेव]** 'तपं संतापे' (३३३) तप्, अनु-अवपूर्व० । अन्ववाताप्सीत् कितवं चैत्रः, स एवं विवक्षते नाहं अन्ववातापसम्, किन्तु अन्ववातप्त । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'धुड्-ह्रस्वाल्लुगनिटस्त-थोः' (४।३।७०) सिच्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् । कितवः स्वयमेव ।

**[अतप्त तपांसि साधुः]** तप् । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'धुड्-ह्रस्वाल्लु०' (४।३।७०) सिच्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् । तपस् द्वितीया शस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'धुटां प्राक्' (१।४।६६) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः ।

**[अन्वतप्त चैत्रेण]** भावे - अन्वतप्त चैत्रेण पश्चात्तपनं कृतमित्यर्थः । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'धुड्-ह्रस्वाल्लु०' (४।३।७०) सिच्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अन्ववातप्त पापः पापेन कर्मणा]** अन्ववातप्त पापः पापेन कर्मणा, पश्चात्तापं कारित इत्यर्थः । पापमस्याऽस्तीति । 'अभ्रादिभ्यः' (७।२।४६) अप्र० । तृतीय टा । 'टा-ङसोरिन-स्यौ' (१।४।५) इन । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए । स्वकीयं कर्म = स्वकर्म, तेन = स्वकर्मणा । अत्रापि 'भाव-कर्मणोः' (३।४।६८) ञिचि प्राप्ते निषेधः । 'तपेस्तपः कर्मकात्' (३।४।८५) अनेन कर्त्तरि अनुतापे भावे कर्मणि । कर्मकर्त्तरि तु 'एकधातौ कर्मक्रिययैकाकर्मक्रिये' (३।४।८६) ञिट्(च्)प्राप्तः प्रतिषिध्यते ।

**[अतापि पृथिवी राज्ञा]** कर्मणि तप् । अद्यतनी त । 'भाव-कर्मणोः' (३।४।६८) ञिच् → इ-तलुक् च । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः, व्याप्तेत्यर्थः ॥छ॥

## णि-स्नु-श्र्यात्मनेपदाकर्मकात् ॥३।४।९२॥

**[णिस्नुश्र्यात्मनेपदाकर्मकात्]** न विद्यते कर्म येषां ते = अकर्मकाः । 'शेषाद् वा' (७।३।१७५) कच्प्र० → क । आत्मनेपदे अकर्मकाः = आत्मनेपदाकर्मकाः, णिश्च स्नुश्च श्रिश्च आत्मनेपदाकर्मकाश्च = णिस्नुश्र्यात्मनेपदकर्मकम्, तस्मात् ।

'अनोः कर्मण्यसति' (३।३।८१) इत्यादिभिः सूत्रैर्येभ्यः कर्मण्यसति आत्मनेपदमुक्तास्ते आत्मनेपदाकर्मका उच्यन्ते ।

**[अपीपचतौदनः स्वयमेव]** 'डुपचींष् पाके' (८९२) पच् । अपाक्षीत् ओदनं चैत्रस्तं पेचिवांसं मैत्रः प्रायुक्त । णिग्प्र० । अपीपचत् ओदनं चैत्रेण मैत्रः, स एवं विवक्षते नाहं अपीपचम्, किन्तु अपीपचत ओदनः स्वयमेव । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । अद्यतनी त । 'णि-श्रि-द्रु-स्रु-कमः कर्त्तरि ङः' (३।४।५८) ङप्र० → अ । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 'असमानलोपे सन्वल्लघुनि ङे' (४।१।६३) इ । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिग्लोपः । यदि वा पचत्योदनं चैत्रः, स एवं विवक्षते नाहं पचामि, किन्तु पच्यते ओदनः स्वयमेव, पच्यते = पच्यमानः, स्वयं पच्यमानः प्रायुक्त । णिग्प्र० । अपीपचतौदनः स्वयमेव । उभयत्र स्वयमेवापाचीत्येवार्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अचूचुरत गौः स्वयमेव]** 'चुरण् स्तेये' (१५६८) चुर् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । अचूचुरत् गां चैत्रः, स एवं विवक्षते नाहं अचूचुरम्, किन्तु अचूचुरत गौः स्वयमेव । अद्यतनी त । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । द्विः । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिच्लोपः ।

**[उदपुपुच्छत गौः स्वयमेव]** उत्-पुच्छ । पुच्छमुत्क्षिपति । 'पुच्छादुत्-परि-व्यसने' (३।४।३९) णिङ्प्र० → इ । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । उदपुपुच्छत् गां देवदत्तः, स एवं विवक्षते नाहं उदपुपुच्छे(च्छम्) किन्तु उदपुपुच्छत गौः स्वयमेव । अद्यतनी त । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'णेरनिटि' (४।३।८३) णिङ्लोपः ।

यद्वा उद्गतं पुच्छमस्याः सा = उत्पुच्छा, उत्पुच्छामकार्षीत् । णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिज्(च्)प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । उदपुपुच्छत् गां देवदत्तः, स एवं विवक्षते नाहं उदपुपुच्छे(च्छम्), किन्तु उदपुपुच्छत गौः स्वयमेव ।

**[प्रास्नोष्ट गौः स्वयमेव]** 'स्नुक् प्रस्रवणे' (१०८३) स्नु, प्रपूर्व० । प्रास्नावीत् गां देवदत्तः, स एवं विवक्षते नाहं प्रास्नाविषम्, किन्तु प्रास्नोष्ट गौः स्वयमेव । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३)सिच् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'नाम्यन्तस्था०' (२।३।१५) स० → ष० । तवर्गस्य श्चवर्ग० (१।३।६०) त० → ट० । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[उदशिश्रियत दण्डः स्वयमेव]** उत् 'श्रिग् सेवायाम्' (८८३) श्रि । उदशिश्रियत् दण्डं दण्डी,स एवं विवक्षते नाहं उदशिश्रियम्, किन्तु उदशिश्रियत दण्डः स्वयमेव । अद्यतनी त । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अत्र पूर्वमेव नित्यत्वादन्तरङ्गत्वाच्च गुणः । 'संयोगात्' (२।१।५२) इय् । 'अड् धातोरादि०' (४।४।२९) अट् ।

*आत्मनेपदाकर्मकाः-

**[व्यकृत सैन्धवः स्वयमेव]** वि 'डुकृंग् करणे' (८८८) कृ । व्यकार्षीत् सैन्धवं चैत्रः, स एवं विवक्षते नाहं व्यकार्षम्, किन्तु व्यकृत सैन्धवः स्वयमेव । 'वेः कृगः शब्दे चाऽनाशे' (३।३।८५) आत्मनेपदमुक्तमस्यास्ति । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'धुड्-ह्रस्वाल्लु०' (४।३।७०) सिच्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् । वल्गयति स्मेत्यर्थः ।

**[व्यकृत कटः स्वयमेव]** वि-कृ । विकुर्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । व्यकार्षीत् कटं चैत्रः, स एवं विवक्षते नाहं व्यकार्षम्, किन्तु व्यकृत कटः स्वयमेव । विकारयति स्मेत्यर्थः ।

पूर्वं पूर्वोक्तो णिग् न एति, परं करोति वल्गनेऽन्तर्भूतण्यर्थः ।

**[आहत गौः स्वयमेव]** 'हनंक् हिंसा-गत्योः' (११००) हन्, आङ्पूर्व० । आवधीत् गां गोपः, स एवं विवक्षते नाहं आवधिषम्, किन्तु आहत गौः स्वयमेव । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'हनः सिच्' (४।३।३८) कित्त्वात् 'यमि-रमि-नमि-गमि-हनि-मनि-वनति-तनादेर्धुटि क्ङिति' (४।२।५५) नलोपः । 'धुड्-ह्रस्वाल्लुगनिटस्त-थोः' (४।३।७०) सिच्-लुक् ।

**[व्यतप्त पृथ्वी स्वयमेव]** वि 'तपं संतापे' (३३३) तप् । व्यताप्सीत् पृथ्वीं रविः, स एवं विवक्षते नाहं व्यताप्सम्, किन्तु व्यतप्त पृथ्वी स्वयमेव । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'धुड्-ह्रस्वाल्लुग०' (४।३।७०) सिच्लुक् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[पाचिता, पाचिषीष्ट ओदनः स्वयमेव]** 'डुपचींष् पाके' (८९२) पच् । पचन्तं प्रयोक्ता । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिगप्र० । पाचयिता ओदनं चैत्रेण मैत्रः, स एवं विवक्षते नाहं पाचयितास्मि, किन्तु पाचिता । श्वस्तनी ता । 'स्वर-ग्रह-दृश-हन्भ्यः स्य-सिजाशीः-श्वस्तन्यां ञिट् वा' (३।४।६९) ञिट्प्र० → इ । 'णेरनिटि' (४।३।८३) णिग्लोपः । पच् । पचन्तं प्रयुज्यात् । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिगप्र० । पाचिषीष्ट ओदनं चैत्रेण मैत्रः, स एवं विवक्षते नाहं पाचिषीय, किन्तु पाचिषीष्ट ओदनः स्वयमेव । आशीः सीष्ट । 'स्वर-ग्रह-दृश-हन्भ्यः स्य०' (३।४।६९) ञिट्प्र० । 'णेरनिटि' (४।३।८३) णिग्लोपः ।

**[प्रास्नाविष्ट, प्रस्नाविषीष्ट गौः स्वयमेव]** प्रास्नावीत् गां देवदत्तः, स एवं विवक्षते नाहं प्रास्नाविषम्, किन्तु प्रास्नाविष्ट । प्रस्नूयात् गां देवदत्तः, स एवं विवक्षते नाहं प्रस्नूयासम् । किन्तु प्रस्नाविषीष्ट गौः स्वयमेव ।

**[उच्छ्रायिता, उच्छ्रायिषीष्ट दण्डः स्वयमेव]** उत् 'श्रिग् सेवायाम्' (८८३) श्रि । उच्छ्रयिता दण्डं दण्डी, स एवं विवक्षते नाहं उच्छ्रयितास्मि, किन्तु उच्छ्रायिता । उत्-श्रि । उच्छ्रीयात् दण्डं दण्डी, स एवं विवक्षते नाहं उच्छ्रीयासम्, किन्तु उच्छ्रायिषीष्ट दण्डः स्वयमेव । 'स्वर-ग्रह-दृश-हन्भ्यः स्य०' (३।४।६९) ञिट्प्र० → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[आघानिष्ट, आघानिषीष्ट गौः स्वयमेव]** 'हनंक् हिंसा-गत्योः' (११००) हन्, आङ्पूर्व० । आवधीत् गां गोपः, स एवं विवक्षते नाहं आवधिषम्, किन्तु आघानिष्ट । आहन्यात् (आवध्यात्) गां गोपः, स एवं विवक्षते नाहं आहन्यासं (आवध्यासम्), किन्तु आघानिषीष्ट गौः स्वयमेव । सर्वत्र 'स्वर-ग्रह-दृश-हन्भ्यः स्य०' (३।४।६९) ञिट्प्र० → इ । 'ञि-णवि घन्' (४।३।१०१) घनादेशः । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।।छ।।

## भूषार्थ-सन्-किरादिभ्यश्च ञिक्यौ ।।३।४।९३।।

**[भूषार्थसन्किरादिभ्यः]** भूषा अर्थो येषां ते = भूषार्थाः, किर् आदिर्येषां ते = किरादयः, भूषार्थाश्च सन् च किरादयश्च = भूषार्थसन्किरादयः, तेभ्यः = भूषार्थसन्किरादिभ्यः, पञ्चमी भ्यस् ।

**[ञिक्यौ]** ञिश्च क्यश्च = ञिक्यौ ।

**[अलमकृत कन्या स्वयमेव]** अलम् 'डुकृंग् करणे' (८८८) कृ । अलमकार्षीत् कन्यां चैत्रः, स एवं विवक्षते नाहं अलमकार्षम्, किन्तु अलमकृत कन्या स्वयमेव । 'एकधातौ०' (३।४।८६) ञिच्-क्या(यौ) यथासंख्यं प्राप्नुवन्ति(तः) अनेन निषिध्यते । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'धुड्-ह्रस्वाल्लु०' (४।३।७०) सिच्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अलंकरिष्यते कन्या स्वयमेव]** अलंकरिष्यति कन्यां चैत्रः, स एवं विवक्षते नाहं अलंकरिष्यामि, किन्तु अलंकरिष्यते । भविष्यन्ती स्यते । 'हनृतः स्यस्य' (४।४।४९) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[अलंकुरुते कन्या स्वयमेव]** अलंकरोति कन्यां चैत्रः, स एवं विवक्षते नाहं अलंकरोमि, किन्तु अलंकुरुते कन्या स्वयमेव । वर्त्त० ते । 'कृग्-तनादेरुः' (३।४।८३) उप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अतः शित्युत्' (४।२।८९) अस्य उ० ।

**[पर्यस्कृत परिष्करिष्यते परिष्कुरुते कन्या स्वयमेव]** परि-कृ । पर्यकार्षीत् (पर्यस्कार्षीत्) कन्यां चैत्रः, स एवं विवक्षते नाहं पर्यकार्षम् (पयस्कार्षम्), किन्तु पर्यकृत (पर्यस्कृत) । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'धुड्-ह्रस्वाल्लु०' (४।३।७०) सिच्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परि(रिष्)करिष्यति कन्यां चैत्रः, स एवं विवक्षते नाहं परि(रिष्)करिष्यामि, किन्तु परिष्करिष्यते । 'संपरेः कृगः स्सट्' (४।४।९१) स्सडागमः । परिष्करोति कन्यां चैत्रः, स एवं विवक्षते नाहं परिष्करोमि, किन्तु परिष्कुरुते कन्या स्वयमेव ।

**[अबूभुषत, भूषयिष्यते, भूषयते कन्या स्वयमेव]** 'भूष अलंकारे' (१७५६) भूष् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । अबूभुषत् कन्यां छात्रः, स एवं विवक्षते नाहं अबूभुषम्, किन्तु अबूभुषत । 'णि-श्रि-द्रु-सु-कमः कर्त्तरि ङः' (३।४।५८) ङप्र० → अ । द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४)अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भु० → बु० । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिच्लोपः ।

भूषयिष्यति कन्यां छात्रः, स एवं विवक्षते नाहं भूषयिष्यामि, किन्तु भूषयिष्यते । भविष्यन्ती स्यते । इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

भूषयति कन्यां छात्रः, स एवं विवक्षते नाहं भूषयामि, किन्तु भूषयते कन्या स्वयमेव । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । गुणे सति अय् ।

**[अममण्डत, मण्डयिष्यते, मण्डयते कन्या स्वयमेव]** 'मडुण् भूषायाम्' (१६३३) मड् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) मण्ड् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । अममण्डत् कन्यां छात्रः, स एवं विवक्षते नाहं अममण्डम्, किन्तु अममण्डत । अद्यतनी त । 'णि-श्रि-द्रु०-' (३।४।५८) ङप्र० → अ । द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'णेरनिटि' (४।३।८३) णिच्लोपः ।

मण्डयिष्यति कन्यां छात्रः, स एवं विवक्षते, नाहं मण्डयिष्यामि, किन्तु मण्डयिष्यते । भविष्यन्ती स्यते । इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

मण्डयति कन्यां छात्रः, स एवं विवक्षते नाहं मण्डयामि, किन्तु मण्डयते कन्या स्वयमेव । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

सन्नन्त-

**[अचिकीर्षिष्ट, चिकीर्षिष्यते, चिकीर्षते कटः स्वयमेव]** 'डुकृंग् करणे' (८८८) कृ । कर्तुमैच्छत् । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) रलोपः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । अचिकीर्षीत् कटं चैत्रः, स एवं विवक्षते नाहं अचिकीर्षिषम्, किन्तु अचिकीर्षिष्ट । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । इट् । 'अतः' (४।३।८२) अलोपः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । 'अड् धातोरादि०' (४।४।२९) अट् ।

चिकीर्षिष्यते इति नोदाह्रियते, अत्र इटि ञिटि च न कश्चिद्विशेषः, एवमुत्तरोदाहरणे ।

चिकीर्षति कटं चैत्रः, स एवं विवक्षते नाहं चिकीर्षामि, किन्तु चिकीर्षते कटः स्वयमेव । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[अबिभित्सिष्ट, बिभित्सिष्यते, बिभित्सते कुशूलः स्वयमेव]** 'भिदृंपी विदारणे' (१४७७) भिद् । भेत्तुमैच्छत् । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) दलोपः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'अघोषे०' (१।३।५०) द० → त० । अबिभित्सीत् कुसूलं चैत्रः, स एवं विवक्षते नाहं अबिभित्सिषम्, किन्तु अबिभित्सिष्ट । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । इट् । 'नाम्यन्तस्था०'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(२।३।१५) षत्वम् । 'अड् धातोरादि०' (४।४।२९) अट् ।

बिभित्सिष्यति कुसूलं चैत्रः, स एवं विवक्षते नाहं बिभित्सिष्यामि, किन्तु बिभित्सिष्यते । भविष्यन्ती स्यते । इट् ।

बिभित्सति कुसूलं चैत्रः, स एवं विवक्षते नाहं बिभित्सामि, किन्तु बिभित्सते कुसूलः स्वयमेव । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[अकीर्ष्ट, कीर्षीष्ट, किरते पांसुः स्वयमेव]** 'कृत् विक्षेपे' (१३३४) कृ । अकारीत् पांसुं करी, स एवं विवक्षते नाहं अकारिषम्, किन्तु अकीर्ष्ट । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । 'अड् धातोरादि०' (४।४।२९) अट् ।

कीर्यात् पांसुं करी, स एवं विवक्षते नाहं कीर्यासम्, किन्तु कीर्षीष्ट । आशीः सीष्ट । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः ।

किरति पांसुं करी, स एवं विवक्षते नाहं किरामि, किन्तु किरते पांसुः स्वयमेव । वर्त्त० ते । 'तुदादेः शः' (३।४।८१) शप्र० । 'ॠतां क्ङितीर्' (४।४।११६) इर् ।

**[अवाकीर्ष्ट, अवकीर्षीष्ट, अवकिरते पांसुः स्वयमेव]** अव 'कृत् विक्षेपे' (१३३४) कृ । अवाकारीत् पांसुं करी, स एवं विवक्षते नाहं अवाकारिषम्, किन्तु अवाकीर्ष्ट ।

अवकीर्यात् पांसुं करी, स एवं विवक्षते नाहं अवकीर्यासम्, किन्तु अवकीर्षीष्ट ।

अवकिरति पांसुं करी, स एवं विवक्षते नाहं अवकिरामि, किन्तु अवकिरते पांसुः स्वयमेव ।

**[अगीर्ष्ट, गीर्षीष्ट, गिरते ग्रासः स्वयमेव]** 'गृत् निगरणे' (१३३५) गृ । अगारीत् ग्रासं चैत्रः, स एवं विवक्षते नाहं अगारिषम्, किन्तु अगीर्ष्ट ।

गीर्यात् ग्रासं चैत्रः, स एवं विवक्षते नाहं गीर्यासम्, किन्तु गीर्षीष्ट । आशीः सीष्ट । 'ॠतां क्ङितीर्' (४।४।११६) इर् । भ्वादेर्नामिनो० (२।१।६३) दीर्घः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

गिरति ग्रासं चैत्रः, स एवं विवक्षते नाहं गिरामि, किन्तु गिरते ग्रासः स्वयमेव ।

**[न्यगीर्ष्ट निगीर्षीष्ट निगिरते ग्रासः स्वयमेव]** न्यगारीत् ग्रासं चैत्रः, स एवं विवक्षते नाहं न्यगारिषम्, किन्तु न्यगीर्ष्ट । निगीर्यात् ग्रासं चैत्रः, स एवं विवक्षते नाहं निगीर्यासम्, किन्तु निगीर्षीष्ट ।

निगिरति ग्रासं चैत्रः, स एवं विवक्षते नाहं निगिरामि, किन्तु निगिरते ग्रासः स्वयमेव । वर्त्त० ते । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'ॠतां क्ङितीर्' (४।४।११६) इर् ।

**[दुग्धे गौः स्वयमेव]** 'दुहींक् क्षरणे' (११२७) दुह् । दोग्धि गां पयो गोपः, स एवं विवक्षते नाहं दोह्मि, किन्तु दुग्धे गौः स्वयमेव । वर्त्त० ते । 'भ्वादेर्दादेर्घः' (२।१।८३) ह० → घ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) घ० → ग० ।

**[अदोहि गौः स्वयमेव]** दुह् । अधुक्षत् गां देवदत्तः, स एवं विवक्षते नाहं अधुक्षम्, किन्तु अदोहि । अद्यतनी त । 'स्वर-दुहो वा' (३।४।९०) ञिच् → इ-तलोपश्च । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अवोचत ब्रूते कथा स्वयमेव]** 'ब्रूंग्क् व्यक्तायां वाचि' (११२५) ब्रू । अवोचत् कथां चैत्रः, स एवं विवक्षते नाहं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अवोचम्, किन्तु अवोचत । अद्यतनी त । 'अस्ति-ब्रुवोर्भू-वचावशिति' (४।४।१) ब्रू० → वच० । 'शास्त्यसू-वक्ति-ख्यातेरङ्' (३।४।६०) अङ्प्र० । 'श्वयत्यसू-वच-पतः श्वा-ऽऽस्थ-वोच-पप्तम्' (४।३।१०३) वच० → वोच० । 'अड् धातोरादि०' (४।४।२९) अट् ।

ब्रूते(ब्रवीति) कथां चैत्रः, स एवं विवक्षते नाहं ब्रुवे(ब्रवीमि), किन्तु ब्रूते कथा स्वयमेव ।

**[अश्रन्थिष्ट, श्रथ्नीते, श्रन्थते माला स्वयमेव]** 'श्रन्थ सन्दर्भे' (१९५८) श्रन्थ् । 'श्रन्थश् मोचन-प्रतिहर्षयोः' (१५४६) श्रन्थ् । अश्रन्थीत् मालां मालिकः,स एवं विवक्षते नाहं अश्रन्थिषम्, किन्तु अश्रन्थिष्ट । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । इट् । 'अड् धातोरादि०' (४।४।२९) अट् ।

श्रथ्नाति श्रन्थति वा मालां मालिकः, स एवं विवक्षते नाहं श्रथ्नामि श्रन्थामि, किन्तु श्रथ्नीते श्रन्थते माला स्वयमेव । वर्त्त० ते । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'एषामी व्यञ्जनेऽदः' (४।२।९७) आ० → ई० । अन्यत्र शव् ।

**[अग्रन्थिष्ट, ग्रथ्नीते, ग्रन्थते ग्रन्थः स्वयमेव]** 'ग्रन्थश् सन्दर्भे' (१५४८) ग्रन्थ् । 'ग्रन्थण् सन्दर्भे' (१९५९) ग्रन्थ् । अग्रन्थीत् ग्रन्थं विद्वान्, स एवं विवक्षते नाहं अग्रन्थिषम्, किन्तु अग्रन्थिष्ट ।

ग्रथ्नाति ग्रन्थति ग्रन्थं विद्वान्, स एवं विवक्षते नाहं ग्रथ्नामि ग्रन्थामि, किन्तु ग्रथ्नीते ग्रन्थते ग्रन्थः स्वयमेव । श्रन्थि-ग्रन्थी क्र्यादौ युजादौ वा ।

**[अनंस्त, नमते दण्डः स्वयमेव]** 'णमं प्रह्वत्वे' (३८८) णम् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नम् । अनंसीत् दण्डं दण्डी-अनीनमदित्यर्थः, स एवं विवक्षते नाहं अनंसिषम्, किन्तु अनंस्त । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः ।

नमति दण्डं दण्डी, स एवं विवक्षते नाहं नमामि, किन्तु नमते दण्डः स्वयमेव ।

**[परिणमते मृत् स्वयमेव]** परि-नम् । परिणमति मृदं कुलालः, स एवं विवक्षते नाहं परिणमामि, किन्तु परिणमते मृत् स्वयमेव ।

कृ-गृ-दुह्-ब्रू-श्रन्थ्-ग्रन्थ्-नम् इति किरादयः ।

**[कारयते कटः स्वयमेव]** 'डुकृंग् करणे' (८८८) कृ । कुर्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'नामिनोऽकलि-हलैः (४।३।५१) वृ० आर् । कारयति कटं चैत्रः, स एवं विवक्षते नाहं कारयामि, किन्तु कारयते कटः स्वयमेव । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[चोरयते गौः स्वयमेव]** 'चुरण् स्तेये' (१५६८) चुर् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । चोरयति गां देवदत्तः, स एवं विवक्षते नाहं चोरयामि, किन्तु चोरयते गौः स्वयमेव ।

**[प्रस्नुते गौः स्वयमेव]** 'स्नुक् प्रस्नवने (प्रस्रवणे)' (१०८३) स्नु, प्रपूर्व० । प्रस्नौति गां गोपः, स एवं विवक्षते नाहं प्रस्नौमि, किन्तु प्रस्नुते गौः स्वयमेव ।

**[उच्छ्रयते दण्डः स्वयमेव]** उत् 'श्रिग् सेवायाम्' (८८३) श्रि । उच्छ्रयति दण्डं दण्डी, स एवं विवक्षते नाहं उच्छ्रयामि, किन्तु उच्छ्रयते दण्डः स्वयमेव ।

आत्मनेपदाकर्मकः-

**[विकुर्वते सैन्धवाः स्वयमेव]** वि 'डुकृंग् करणे' (८८८) कृ । विकरोति सैन्धवान् देवदत्तः, स एवं विवक्षते नाहं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विकरोमि, किन्तु विकुर्वते सैन्धवाः स्वयमेव । वर्त्त० अन्ते । 'कृग्-तनादेरुः' (३।४।८३) उप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अतः शित्युत्' (४।२।८९) अ० —> उ० । 'इवर्णादे०' (१।२।२१) व० । 'अनतोऽन्तोऽदात्मने' (४।२।११४) नलोपः । 'अनोः कर्मण्यसति' (३।३।८१) - 'वेः कृगः शब्दे चाऽनाशे' (३।३।८५) आत्मनेपदम् ।

**[आहते गौः स्वयमेव]** आहन्ति गां गोपः, स एवं विवक्षते नाहं आहन्मि, किन्तु आहते गौः स्वयमेव ।

**[पाचयिता, पाचयिष्यते ओदनः]** 'डुपचींष् पाके' (८९२) पच् । पचन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । पाचयिता ओदनं चैत्रः, स एवं विवक्षते नाहं पाचयितास्मि, किन्तु पाचयिता ओदनः स्वयमेव । पाचयिष्यति ओदनं चैत्रः, स एवं विवक्षते नाहं पाचयिष्यामि, किन्तु पाचयिष्यते ओदनः स्वयमेव ।

**[प्रस्नोता, प्रस्नोष्यते गौः]** प्रस्नोता पूर्ववत् । अत्रात्मनेपदत्वात् 'स्नोः' (४।४।५२) इत्यनेन इट् न भवति । प्रस्नविष्यति गां गोपः, स एवं विवक्षते नाहं प्रस्नविष्यामि, किन्तु प्रस्नोष्यते गौः ।

**[उच्छ्रयिता, उच्छ्रयिष्यते दण्डः]** उच्छ्रयिता पूर्ववत् । उच्छ्रयिष्यति दण्डं दण्डी, स एवं विवक्षते नाहं उच्छ्रयिष्यामि, किन्तु उच्छ्रयिष्यते दण्डः ।

**[आहन्ता, आहनिष्यते गौः स्वयमेव]** आहन्ता पूर्ववत् । आहनिष्यति गां गोपः, स एवं विवक्षते नाहं आहनिष्यामि, किन्तु आहनिष्यते गौः स्वयमेव । एतेषु अष्टासूदाहरणेषु मतान्तरे ञिट् न स्यात्, 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इति इट् विशेषः । वाक्यानि पूर्ववत् ।

**[प्रस्नौति गौर्दोग्धुः कौशलेन]** प्र-स्नु । वर्त्त० तिव् । 'उत औविति व्यञ्जनेऽद्वेः' (४।३।५९) उ० —> औ ।

**[नमति पल्लवो वातेन]** 'णमं प्रह्वत्वे' (३८८) णम् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नम् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

ननु कर्मस्था(स्थ)या क्रिया(य)या एकाकर्मक्रिये कर्त्तरि ञिक्यात्मनेपदानि भवन्ति, अत्र तु ण्यन्तानां प्रयोजकव्यापारः, सन्नन्तानां चेच्छाकर्तृस्थैव क्रियेति ञिक्ययोः प्राप्ते(ति)रेव नास्ति, किं ततः प्रतिषेधेनेत्यत्रोच्यते-प्रयोजकव्यापारस्येच्छायाश्च प्रकृत्यर्थत्वात् करणादिक्रियारूपस्य प्रकृत्यर्थस्य प्राधान्यम्, तस्य च कर्मस्थत्वात् णिग्-सन्नन्तानामपि कर्मस्थक्रियत्वम्,तथा ब्रूते कथेत्यत्र वचनं शब्दप्रकाशनफलत्वात्, यद्वा उपाध्यायेनोक्तः करोतीतिवत् प्रेरणार्थत्वाद्वा कर्मस्थक्रियारूपम्, ननु वचनक्रिया देवदत्ते कर्त्तरि स्थिता, न तु कथाकर्मणि, ततः कथं कर्मस्थक्रिया इत्याह-शब्दप्रकाशनफलत्वादिति- अस्यां ये शब्दास्ते प्रकाशमाना वचनेन प्रकाशनफलत्वादिति- अस्यां ये शब्दास्ते प्रकाशमाना वचनेन प्रकाश्यन्ते इति यद्वेति चात्र प्रेरणार्थो वा अत्र ब्रूग् ततश्च ब्रूते इति कोऽर्थः ? शिष्येण बुध्यमानं बोधयन्ती(ती)त्यर्थः, भूषाक्रियाणां तु भूषाफलं शोभाख्यं कर्मणि दृश्यते इति कर्मस्थक्रियत्वम्, एवमन्येषामपि भावनीयम् ॥छ॥

## करणक्रियया क्वचित् ॥३।४।९४॥

**[करणक्रियया]**卐 करणस्था क्रिया = करणक्रिया, तया ।

**[क्वचित्]** क्वचित् प्रथमा सि । 'अनतो लुप्' (३।२।६) सिलोपः (?) । ('अव्ययस्य' (३।२।७) सिलोपः) ।

एतदधिकारायातत्वात् योजितं क्वचिद्ग्रहणात्तु सकर्मकत्वेऽपि भवति ।

**[परिवारयन्ते कण्टका वृक्षं स्वयमेव]** 'वृग्ट् वरणे' (१२९४) वृ । वृण्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । यद्वा 'वृगण् आवरणे' (१९४६) वृ । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१)

P. 卐 करणेन दृष्टा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ० आर्, परिपूर्व० । परिवारयन्ति कण्टकैः पुरुषा वृक्षम्, ते एवं विवक्षते न वयं परिवारयामः, किन्तु परिवारयन्ते कण्टका वृक्षं स्वयमेव । अनेनात्मनेपदम् । वर्त्त० अन्ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

क्वचिन्न भवति-

**[साध्वसिश्छिनत्ति]** 'छिदृंपी द्वैधीकरणे' (१४७८) छिद् । साधू(धु) असिना छिनत्ति देवदत्तः, स एवं विवक्षते नाहं छिनद्मि, किन्तु साधु यथा भवति तथा असिश्छिनत्ति । वर्त्त० तिव् । 'रुधां स्वरा०' (३।४।८२) श्नप्र० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० ।।छ।।

*इति **श्रीसिद्धहेमचन्द्रव्याकरणे बृहद्वृत्तौ तृतीयस्याध्यायस्य चतुर्थः पादः समाप्तः** ।।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

|| अर्हम् ||

# || अथ चतुर्थाध्यायस्य प्रथमः पादः ||

## द्विर्धातुः परोक्षा-ङे प्राक् तु स्वरे स्वरविधेः ||४|१|१||

**[द्विः]** द्वि । द्वौ वारावस्य । 'द्वि-त्रि-चतुरः सुच्' (७|२|११०) सुच्प्र० → स् । 'क्रियाविशेषणात्' (२|२|४१) अम् ।

**[परोक्षाङे]** परोक्षा च ङश्च = परोक्षाङम्, तस्मिन् ।

**[प्राक्]** प्राक् प्रथमा सि । 'अव्ययस्य' (३|२|७) सिलोपः ।

प्राक् करणाभावेपि वृद्धे 'स्वरस्य परे०' (७|४|११०) इति स्थानित्वे सिद्धम् ? नैवम्, कार्यापेक्षायां स्थानित्वाभावः ।

**[तु]** तु प्रथमा सि । 'अव्ययस्य' (३|२|७) सिलोपः ।

**[स्वरे]** स्वर सप्तमी ङि ।

**[स्वरविधेः]** स्वरस्य विधिः = स्वरविधिस्तस्मात् ।

**[पपाच]** 'डुपचींष् पाके' (८९२) पच् । परोक्षा णव् । अनेन द्विः । व्यञ्जनस्याऽनादेर्लुक्' (४|१|४४) चलोपः । 'ञ्णिति' (४|३|५०) उपान्त्यवृद्धिः आ ।

**[पपाठ]** 'पठ व्यक्तायां वाचि' (२१३) पठ् । परोक्षा णव् । अनेन द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४|१|४४) ठलोपः । 'ञ्णिति' (४|३|५०) उपान्त्यवृद्धिः आ ।

**[इयाज]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । परोक्षा णव् । अनेन द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४|१|४४) जलोपः । 'यजादि-वश्-वचः सस्वरान्तस्था य्वृत्' (४|१|७२) य्वृत् य० → इ० । 'ञ्णिति' (४|३|५०) उपान्त्यवृद्धिः ।

**[आर]** 'ऋंक् गतौ' (११३५) ऋ । परोक्षा णव् । अनेन द्विः । 'ऋतोऽत्' (४|१|३८) ऋ० → अ० । 'अस्याऽऽदेराः परोक्षायाम्' (४|१|६८) अकारस्य आ । 'नामिनोऽकलि-हलेः' (४|३|५१) वृ० आर् ।

**[अचकमत]** 'कमूङ् कान्तौ' (७८९) कम् । अद्यतनी त । 'णि-श्रि-द्रु-स्रु-कमः कर्त्तरि ङः' (३|४|५८) ङप्र० → अ । अनेन द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४|१|४४) मलोपः । 'क-ङश्च-ञ्' (४|१|४६) क० → च० । 'कमेर्णिङ्' (३|४|२) पूर्वं णिङ् आनीयते । 'ञ्णिति' (४|३|५०) उपान्त्यवृद्धिः । 'अमोऽकम्यमि-चमः' (४|२|२६) ह्रस्वः, पश्चात् अद्यतनी त । 'अड् धातोरादि०' (४|४|२९) अट् ।

**[प्राशिश्रियत्]** प्र 'श्रिग् सेवायाम्' (८८३) श्रि । अद्यतनी दि → त् । 'णि-श्रि-द्रु०' (३|४|५८) ङप्र० → अ । प्रस्य न धातुः । अनेन द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४|१|४४) रलोपः । 'संयोगात्' (२|१|५२) इय् । 'अड् धातोरादि०' (४|४|२९) अट् ।

'वेत्तेः कित्' (३|४|५१) इति वचनादामि परोक्षाकार्यं न भवति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[दयांचक्रे]** 'दयि दान-गति-हिंसा-दहनेषु च' (७९९) दय् । परोक्षा ए । 'दया-ऽया-ऽऽस्-कासः' (३।४।४७) आमादेशः । 'डुकृंग् करणे' (८८८) कृ । परोक्षा ए । अनेन द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'इवर्णादे०' (१।२।२३) रत् ।

**[विदांचकार]** 'विदक् ज्ञाने' (१०९९) विद् । परोक्षा णव् । 'वेत्तेः कित् (३।४।५१) आमादेशः । कृ । परोक्षा णव् । अनेन द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[अदात्]** 'डुदांग्क् दाने' (११३८) दा । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'पिबैति-दा०' (४।३।६६) सिच्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[निनाय]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । परोक्षा णव् । अनेन द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्'(१।२।२३) आय् ।

**[निनयिथ]** नी । परोक्षा थव् । अनेन द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'सृजि-दृशि-स्कृ-स्वराऽत्वतस्तृज्नित्याऽनिटस्थवः' (४।४।७८) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[निन्यतुः]** नी । परोक्षा अतुस् । अनेन द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'योऽनेकस्वरस्य' (२।१।५६) य० ।

**[चक्रतुः]** 'डुकृंग् करणे' (८८८) कृ । परोक्षा अतुस् । अनेन द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'इवर्णादे०' (१।२।२१) रत् ।

**[पपौ]** 'पां पाने' (२) पा । परोक्षा णव् । अनेन द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'आतो णव औ' (४।२।१२०) औ ।

**[पपतुः]** पा । परोक्षा अतुस् । अनेन द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलोपः ।

**[जग्मतुः]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । परोक्षा अतुस् । अनेन द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) मलोपः । 'गम-हन-जन-खन-घसः स्वरेऽनङि क्ङित्ति लुक्' (४।२।४४) अलोपः । 'ग-होर्जः' (४।१।४०) ग० → ज० ।

**[अदधत्]** 'ट्धें पाने' (२८) धे । 'आत् सन्ध्यक्षरस्य' (४।२।१) धा । अद्यतनी दि → त् । 'ट्धे-श्वेर्वा' (३।४।५९) ङप्र० । अनेन द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) ध० → द० । 'इडेत्-पुसि०' (४।३।९४) आलोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

एवमादिषु वृद्ध्यादेः स्वरविधेः प्राक् पूर्वं द्वित्वं सिद्धं भवति ।

**[दिदीर्वान्]** 'दृश् विदारणे' (१५३५) दृ । ददार । 'तत्र क्वसु-कानौ तद्वत्' (५।२।२) क्वसुप्र० → वस् । 'ऋतां क्ङितीर्' (४।४।११६) इर् । अनेन द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) रलोपः । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । प्रथमा सि । 'धुटां प्राक्' (१।४।६६) नोऽन्तः (?) ('ऋदुदितः' (१।४।७०) नोऽन्तः) । 'न्स्महतोः' (१।४।८६) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) सलोपः ।

**[शिशीर्वान्]** कॄ (१५२९) - मॄ (१५३०) - 'शॄश् हिंसायाम्' (१५३१) शॄ । शशार । 'तत्र क्वसु-कानौ तद्वत्'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(५।२।२) क्वसुप्र० → वस् । शेषं 'दिदीर्वान्' वत् ।

**[जेघ्रीयते]** 'घ्रां गन्धोपादाने' (३) घ्रा । भृशं पुनः पुनर्वा जिघ्रति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'घ्रा-ध्मोर्यङि' (४।३।९८) आ० → ई० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) रलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) घ० → ग० । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[देध्मीयते]** 'ध्मां शब्दा-ऽग्निसंयोगयोः' (४) ध्मा । भृशं पुनः पुनर्वा धमति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'घ्रा-ध्योर्मङि' (४।३।९८) आ० → ई० । 'सन्-यङश्च' (४।१।३) द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) ध० → द० । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे'(२।१।११३) अलोपः ।

**[जेगीयते]** कैं (३६) - 'गैं शब्दे' (३७) गै । 'आत् सन्ध्यक्षरस्य' (४।२।१) गा । भृशं पुनः पुनर्वा गायति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'ईर्व्यञ्जनेऽयपि' (४।३।९७) आ० → ई० । 'सन्-यङश्च' (४।१।३) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[शुशाव]** 'ट्वोश्वि गति-वृद्ध्योः' (९९७) श्वि । परोक्षा णव्प्र० → अ । 'वा परोक्षा-यङि' (४।१।९०) य्वृत् व-इ० → उ०, व्यञ्जनकार्यमिदम् । द्विः । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[तितवनीयिषति]** 'तुंक् वृत्ति-हिंसा-पूरणेषु' (१०७९) तु । तूयते = तवनम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन । गुणे सति 'ओदौतोऽवाव्' (१।२।२४) अव् । तवनमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य । 'क्यनि' (४।३।११२) अकारस्य ई । तवनीयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'आद्योऽश एकस्वरः' (४।१।२) द्विः (?) । ('अन्यस्य' (४।१।८) द्विः) 'सन्यस्य' (४।१।५९) अ० → इ० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'अतः' (४।३।८२) अस्य लुक् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । इत्यत्र तु स्वरविधेर्द्विवचननिमित्तप्रत्ययाजन्यत्वान्न ततः प्राग् द्वित्वम् ।

**[जग्ले]** 'ग्लैं हर्षक्षये' (३१) ग्लै । 'आत् सन्ध्यक्षरस्य' (४।२।१) ग्ला । परोक्षा ए । अनेन द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलोपः ।

**[मम्ले]** 'म्लैं गात्रविनामे' (३२) म्लै । 'आत् सन्ध्यक्षरस्य' (४।२।१) म्ला । परोक्षा ए । अनेन द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'इडेत्-पुसि०' (४।३।९४) आलोपः ।

**[अधिजगे]** 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । 'गाः परोक्षायाम्' (४।४।२६) इङ् → गादेशः । अनेन 'गा' द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'इडेत्-पुसि०' (४।३।९४) आलोपः । अत्र विषये आदेशः । प्राक् तु स्वरे स्वरविधेरिति आद्विर्वचनमधिकारः । अन्यथा-

**[आटिटत्]** 'अट गतौ' (१९४) अट् । अटन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे०' (३।४।२०) णिग्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । अद्यतनी दि→त् । 'णि-श्रि-द्रु०' (३।४।५८) ङप्र० → अ । 'लोकात्' (१।१।३) अकारु पाठउ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विश्लेषियइ । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "टि" द्विः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'स्वरादेस्तासु' (४।४।३१) वृद्धिः आ इत्यादि न सिद्ध्यति ।।छ।।

## आद्योऽश एकस्वरः ।।४।१।२।।

**[आद्यः]** आदौ भवः = आद्यः । 'दिगादिदेहांशाद् यः' (६।३।१२४) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[अंशः]** अंश प्रथमा सि ।

**[एकस्वरः]** एकः स्वरो यस्य सः = एकस्वरः ।

**[जजागार]** 'जागृक् निद्राक्षये' (१०९३) जागृ । परोक्षा णव् । अनेन "जा" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'जागृर्ञि-णवि' (४।३।५२) वृ० आर् ।

**[अचकाणत्]** अण (२५९) - रण (२६०) - वण (२६१) - व्रण (२६२) - बण (२६३) - भण (२६४) - भ्रण (२६५) - मण (२६६) - धण (२६७) - ध्वण (२६८) - ध्रण (२६९) - 'कण शब्दे' (२७०) कण् । कणन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'भ्राज-भास-भाष-दीप-पीड०' (४।२।३६) इत्यस्य विकल्पत्वात् न ह्रस्वत्वम् । अद्यतनी दि → त् । 'णि-श्रि-द्रु०' (३।४।५८) ङप्र० → अ । अनेन द्विः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् । एकस्वरार्थमुदाहृतं न बहुस्वरार्थम्, तेन काणि इत्यस्य न द्विर्वचनम् ।।छ।।

## सन्-यङश्च ।।४।१।३।।

**[सन्यङः]** सन् च यङ् च = सन्यङ्, तस्य ।

**[च]** च प्रथमा सि ।

**[तितिक्षते]** 'तिजि क्षमा-निशानयोः' (६६७) तिज् । 'गुप्-तिजो गर्हा-क्षान्तौ सन्' (३।४।५) सन्प्र० → स । अनेन आद्योऽशो द्विः "ति" । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम्, क-षसंयोगे क्ष० । वर्त्त० ते ।

**[चिकीर्षति]** 'डुकृंग् करणे' (८८८) कृ । कर्तुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः । 'ॠतां क्ङितीर्' (४।४।११६) इर् । अनेन द्विः "कि" । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११४) अलोपः ।

**[पापच्यते]** 'डुपचींष् पाके' (८९२) पच् । भृशं पुनः पुनर्वा पचति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । अनेन "प" द्विः । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[लोलूयते]** 'लूग्श् छेदने' (१५१९) लू । भृशं पुनः पुनर्वा लुनाति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । अनेन द्विः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चकारः पूर्वोक्तनिमित्तसमुच्चयार्थ उत्तरार्थ एव, तेनोत्तरत्र परोक्षा-ङे सन्नन्त-यङन्तानां च यथासंभवं द्वित्वं सिद्धम् ॥छ॥

**स्वराऽऽदेर्द्वितीयः** ॥४।१।४॥

**[स्वराऽऽदेः]** स्वर आदिर्यस्य सः = स्वरादिः, तस्य ।

**[द्वितीयः]** द्वितीय प्रथमा सि ।

**[अटिटिषति]** 'अट गतौ' (१९४) अट् । अटितुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । अनेन "टि" इति द्विः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[अशिशिषति]** 'अशूट् (अशौटि) व्याप्तौ' (१३१४) अश् । अशितुमिच्छति । सन्प्र० । इटि सति "शि" इति द्विः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् ।

**[अटाट्यते]** अट् । भृशं पुनः पुनर्वा अटति । 'अट्यर्त्ति-सूत्रि-मूत्रि-सूच्य-शूर्णोः' (३।४।१०) यङ्प्र० → य । अनेन "ट्य" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[अशाश्यते]** अश् । भृशं पुनः पुनर्वा अश्नुति(ते) । 'अट्यर्त्ति-सूत्रि०' (३।४।१०) यङ्प्र० → य । अनेन "श्य" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्या०' (२।१।११३) अलोपः ।

**[आटिटत्]** अट् । अटन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) वृद्धिः आ । अद्यतनी दि → त् । 'णि-श्रि-द्रु०' (३।४।५८) ङप्र० → अ । अनेन "टि" इति द्विः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'स्वरादेस्तासु' (४।४।३१) वृद्धिः आ ।

**[आशिशत्]** अश् । अश्नुवानं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) वृद्धिः आ । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । अनेन "शि" इति द्विः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'स्वरादेस्तासु' (४।४।३१) वृ० आ ।

**[प्रोर्णुनाव]** प्र 'ऊर्णुगक् आच्छादने' (११२३) ऊर्णु । परोक्षा णव् । 'लोकात्' (१।१।३) "ऊर्" पाठउ विश्लेषियइ । 'निमित्ताभावे नैमित्तिकस्याप्यभावः' (वक्षस्कार(१) / सूत्र (२९)) णु० → नु० । अनेन "नु" इति द्विः । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ओ ।

**[प्रोर्णुनविषति]** प्र-ऊर्णु । प्रोर्णवितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० → स । 'लोकात्' (१।१।३) "ऊर्" पाठउ विश्लेषियइ । 'निमित्ताभावे०' (वक्षस्कार (१) / सूत्र (२९)) णु० → नु० । अनेन "नु" इति द्विः । 'रषृवर्णान्नो ण०' (२।३।६३) न० → ण० । 'इवृध-भ्रस्ज-दम्भ-श्रि-यूर्ण्णु-भर-ज्ञपि-सनि-तनि-पति-वृद्-दरिद्रः सनः' (४।४।४७) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ओ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अरिरिषति]** 'ऋंक् गतौ' (११३५) ऋ । अर्तुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० → स । 'ऋ-स्मि-पूङञ्जशौ-कृ-गृ-दृ-धृ-प्रच्छः' (४।४।४८) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'वृतो नवाऽनाशीः - सिच्परस्मै च' (४।४।३५) विकल्पेन दीर्घः । अनेन री(रि) इति द्विः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् इत्यत्र तु इटः कार्यित्वं, न निमित्तत्वम्, ततो द्वित्वनिमित्तस्य स्वरादिप्रत्ययस्याभावात् प्राक् स्वरविधिरेव ।।छ।।

## न ब-द-नं संयोगाऽऽदिः ।।४।१।५।।

**[न]** न प्रथमा सि ।

**[बदनम्]** बश्च दश्च नश्च = बदनम् । प्रथमा सि ।

**[संयोगाऽऽदिः]** संयोगस्य आदिः = संयोगाऽऽदिः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[उब्जिजिषति]** 'ऊब्जत् आर्जवे' (१३४८) उब्ज् । उब्जितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'लोकात्' (१।१।३) "उब्" पाठउ विश्लेषियइ । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "जि" द्विः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[अड्डिडिषति]** 'अद्ड् अभियोगे' (२५७) अड्ड । 'तवर्गस्य०' (१।३।६०) द० → ड० । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'लोकात्' (१।१।३) "अद्" पाठउ विश्लेषियइ । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "डि" इति द्विः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् ।

**[उन्दिदिषति]** 'उन्दैप् क्लेदने' (१४९१) उन्द् । उन्दितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'लोकात्' (१।१।३) "उन्" पाठउ विश्लेषियइ । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "दि" इति द्विः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[इन्द्रिद्रीयिषति]** इन्द्रमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य । 'क्यनि' (४।३।११२) अ० → ई० । इन्द्रीयितुमिच्छति । सन्प्र० । इटि सति 'लोकात्' (१।१।३) "इन्" पाठउ विश्लेषियइ । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "द्री" इति द्विः । 'अतः' (४।३।८२) अलोपः । वर्त्त० तिव् ।

**[औन्दिदत्]** उन्द् । उन्दन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । अद्यतनी दि → त् । 'णि-श्रि-द्रु०' (३।४।५८) ङप्र० → अ । 'लोकात्' (१।१।३) "उन्" पाठउ विश्लेषियइ । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "दि" इति द्विः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'स्वरादेस्तासु' (४।४।३१) वृ० औ ।

**[ईचिक्षिषते]** 'ईक्षि दर्शने' (८८२) ईक्ष् । ईक्षितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'लोकात्' (१।१।३) "ई" इति पाठउ विश्लेषियइ । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "क्षि" सउं द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) षलोपः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[प्राणिणिषति]** 'अन प्राणने' (१०८९) अन्, प्रपूर्व० । प्राणितुमिच्छति । सन्प्र० । इटि सति 'स्वरादेर्द्वितीयः' (४।१।४) "नि" द्विः । 'द्वित्वेऽप्यन्तेप्यनितेः परेस्तु वा' (२।३।८१) णत्वम् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।।छ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अयि रः ॥४।१।६॥**

**[अयि]** न य् = अय् । 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् ।

**[रः]** र प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[अर्चिचिषति]** 'अर्च पूजायाम्' (१०४) अर्च् । अर्चितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । इटि सति 'लोकात्' (१।१।३) "अर्" पाठ्उ विश्लेषियइ । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "चि" इति द्विः । "नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् ।

**[प्रोर्णुनविषति]** प्र 'ऊर्णुगूक् आच्छादने' (११२३) ऊर्णु । प्रोर्णवितुमिच्छति । 'तुमर्हा०' (३।४।२१) सन्प्र० । 'लोकात्' (१।१।३) "ऊर्" पाठ्उ विश्लेषियइ । 'निमित्ताभावे०' (न्या०स० वक्षस्कार(१) / सूत्र (२९)) णु० → नु० । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "नु" द्विः, । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । 'इवृध-भ्रस्ज-दम्भ-श्रि-यूर्ण्णु०' (४।४।४७) इट् । गुणे सति अव् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[प्रोर्णोनूयते]** प्र-ऊर्णु । भृशं पुनः पुनर्वा प्रोर्णोति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० ? ('अट्यर्त्ति - सूत्रि-मूत्रि-सूच्यशूर्णोः' (३।४।१०) यङ्प्र० → य) । 'लोकात्' (१।१।३) "ऊर्" पाठ्उ विश्लेषियइ । 'निमित्ताभावे०' (वक्षस्कार(१) / सूत्र(२९)) नु । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "नु" द्विः । 'र-षृवर्णान्नो ण०' (२।३।६३) नु० → णु० । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ओ ।

**[प्रोर्णुनाव]** प्र-ऊर्णु । परोक्षा णव् । 'लोकात्' (१।१।३) "ऊर्" पाठ्उ विश्लेषियइ । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "नु" द्विः । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[प्रोर्णुनवत्]** प्र-ऊर्णु । प्रोर्णुवन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । 'लोकात्' (१।१।३) "ऊर्" पाठ्उ विश्लेषियइ । स्वरनिमित्तं "णौ यत्कृतं कार्यं तत्सर्वं स्थानिवद्भवति" (वक्षस्कार (२)/ सूत्र (३५)) इति न्यायात् 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "नु" द्विः । 'णेरनिटि' (४।३।८३) णिग्लोपः ।

**[आर्चिचत्]** 'अर्च पूजायाम्' (१०४) अर्च् । अर्चन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । अद्यतनी दि→त् । 'णि-श्रि-द्रु०' (३।४।५८) ङप्र० → अ । 'लोकात्' (१।१।३) "अर्" पाठ्उ विश्लेषियइ । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "चि" द्विः । 'णेरनिटि' (४।३।८३) णिग्लोपः ।

**[अरार्यते]** 'ॠक् गतौ' (११३५) ॠ । 'ॠं प्रापणे च' (२६) ॠ । भृशं पुनः पुनर्वा इयर्त्ति ॠच्छति वा । 'अट्यर्त्ति-सूत्रि-मूत्रि-सूच्यशूर्णोः' (३।४।१०) यङ्प्र० → य । 'क्य-यङा-ऽऽशीर्ये' (४।३।१०)गु० अर् । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "र्य" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) यलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[आरर्यत्]** 'ॠक् गतौ' (११३५) ॠ । अर्यते = अर्यः । 'स्वामि-वैश्येऽर्यः' (५।१।३३) अर्यनिपातः । अर्यमाख्यत् । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिज्(च्)प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । 'लोकात्' (१।१।३) "अ" पाठ्उ विश्लेषियइ । 'स्वरादे०' (४।१।४) "र्य"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्विः । 'णेरनिटि' (४।३।८३) पूर्वणिज्लोपः, ततो द्विः । 'स्वरादेस्तासु' (४।४।३१) वृद्धिः आ ।

**[अरिरिषति]** 'ऋंक् गतौ' (११३५) ऋ । अर्तुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'ऋ-स्मि-पूङ्ञ्शौ-कृ-गृ-दृ-धृ-प्रच्छः' (४।४।४८) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "रि" द्विः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।।छ।।

## नाम्नो द्वितीयाद् यथेष्टम् ।।४।१।७।।

**[नाम्नः]** नामन् षष्ठी ङस् । 'अनोऽस्य' (२।१।१०८) अलोपः ।

**[द्वितीयात्]** द्वितीय पञ्चमी ङसि ।

**[यथेष्टम्]** यो य इष्टः = यथेष्टम् । सि ।卐 'अमव्ययीभावस्याऽतोऽपञ्चम्याः' (३।२।२) सि० → अम्० । 'समानादमोऽतः' (१।४।४६) अमोऽकारलोपः ।

'लोकात्' (१।१।३) द्वितीयादित्यधिकारो नेष्टम् ।

**[अशिश्वीयिषति, अश्वीयियिषति, अश्वीयिषिषति]** अश्व । अश्वमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य । 'क्यनि' (४।३।११२) अकारस्य ई० । अश्वीयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । प्रथमे 'लोकात्' (१।१।३) अकारु विश्लेषियइ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । अनेन "श्वी" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । द्वितीये "यि" द्विः । तृतीये "सन्" द्विः । 'सन्यस्य' (४।१।५९) इ । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।।छ।।

## अन्यस्य ।।४।१।८।।

**[अन्यस्य]** अन्य षष्ठी ङस् ।

**[पुपुत्रीयिषति, पुतित्रीयिषति, पुत्रीयियिषति, पुत्रीयिषिषति]** पुत्र । पुत्रमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य । 'क्यनि' (४।३।११२) अ० → ई० । पुत्रीयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'अतः' (४।३।८१) अलोपः । अनेन प्रथमे "पु" द्विः । द्वितीये "त्री" द्विः । "ह्रस्वः' (४।१।३९) ह्रस्वत् । 'व्यञ्जनस्याऽनादेर्लुक्'(४।१।४४) अनादिव्यञ्जनलोपः । तृतीये "यि" द्विः । चतुर्थे "सन्" द्विः । 'सन्यस्य' (४।१।५९) इ । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[अपुपुत्रीयत्, अपुतित्रीयत्, अपुत्रीयियत्]** पुत्रीयन्तं प्रायुक्त । णिग्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । अनेन प्रथमे "पु" द्विः । द्वितीये "त्री" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । तृतीये "यि" द्विः । 'णेरनिटि' (४।३।८३) णिज्(ग्)लोपः । 'अड् धातोरादिर्ह्यस्तन्यां०' (४।४।२९) अट् ।।छ।।

---

P. 卐 'क्रियाविशेषणात्' (२।२।४१) अम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कण्ड्वादेस्तृतीयः ॥४।१।९॥**

**[कण्ड्वादेः]** कण्डूरादिर्यस्य सः = कण्ड्वादिः, तस्य ।

**[तृतीयः]** तृतीय प्रथमा सि ।

**[कण्डूयियिषति]** 'कण्डूग् गात्रविघर्षणे' (१९९१) कण्डू इति सौत्रो धातुः । 'धातोः कण्ड्वादेर्यक्' (३।४।८) यक्प्र० → य । कण्डूयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'अतः' (४।३।८२) अकारलोपः । अनेन "यि" द्विः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[असूयियिषति]**+ असूग् इति सौत्रो धातुः । 'धातोः कण्ड्वादेर्यक्' (३।४।८) यक्प्र० → य । असूयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट । 'अतः' (४।३।८२) अलोपः । अनेन "यि" द्विः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् । शव् ।

**[आसूयियत्]** असू । 'धातोः कण्ड्वादेर्यक्' (३।४।८) यक्प्र० → य । असूयन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । अद्यतनी दि→त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । अनेन "यि" द्विः । 'स्वरादेस्तासु' (४।४।३१) वृद्धिः आ । 'णेरनिटि' (४।३।८३) णिग्लोपः ॥छ॥

**पुनरेकेषाम् ॥४।१।१०॥**

**[पुनर्]** पुनर् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[एकेषाम्]** एकशब्दादन्यार्थत्वाद्बहुवचनं षष्ठी आम् । 'अवर्णस्याऽऽमः साम्' (१।४।१५) आम्० → साम्० । 'एद् बहुस्भोसि' (१।४।४) अ० → ए० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[सुसोषुपिषते]** 'ञिष्वपंक् शये' (१०८८) ष्वप् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्वप् । भृशं पुनः पुनर्वा स्वपिति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'स्वपेर्यङ्-ङे च' (४।१।८०) य्वृत् व० → उ० । 'सन्-यङश्च' (४।१।३) "सु"द्विः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । 卐'अवः स्वपः' (२।३।५७) षत्वम् । सोषुपितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । इट् । अनेन "सो" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । वर्त्त० तिव्(ते) । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । पूर्वं 'अतः' (४।३।८२) अकारलोपः । 'णि-स्तोरेवाऽस्वद-स्विद-सहः षणि' (२।३।३७) इत्यस्य नियमात् षत्वं न भवति यङ्-द्विरुक्तोः ।

**[प्राणिणिनिषत्]** प्र 'अन प्राणने' (१०८९) अन् । प्राणितुमिच्छति (मैच्छत्) । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । इट् । 'लोकात्' (१।१।३) अकारु पाठउ विश्लेषियइ । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "नि" द्विः । अनेन "नि" द्विः । 'द्वित्वेऽप्यन्तेप्यनितेः परेस्तु वा' (२।३।८१) न० → ण० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[बुबोभूयिषते]** 'भू सत्तायाम्' (१) भू । भृशं पुनः पुनर्वा भवति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) "भू" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भु० → बु० । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । बोभूयितुमिच्छति । सन्प्र० । इट् । अनेन द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । वर्त्त ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । पूर्वं 'अतः' (४।३।८२) अकारलोपः । षत्वम् ॥छ॥

---

P. 卐 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

+ उक्तं च धातुरत्नाकरे - असू - असूग् इत्येके । अन्ये तु असूङ् दोषाविष्कृतौ रोगे चेत्याहुः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## यिः सन् वेर्ष्यः ॥४।१।११॥

**[यिः]** यि प्रथमा सि । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[सन्]** सन् प्रथमा सि ।

**[वा]** वा प्रथमा सि ।

**[ईर्ष्यः]** ईर्ष्य् षष्ठी ङस् ।

**[ईर्ष्यियिषति]** सूर्क्ष्य (४००) - ईर्क्ष्य (४०१) - 'ईर्ष्य ईर्ष्यायाम्' (४०२) ईर्ष्य् । ईर्ष्यितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । इट् । अनेन ''यि'' द्विः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

卐**[ऐर्ष्यियत्]** ईर्ष्य् । ईर्ष्यन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । अनेन ''यि'' द्विः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'स्वरादेस्तासु' (४।४।३१) वृद्धिः ऐ ।

**[ईर्ष्यिषिषति]** ईर्ष्य् । ईर्ष्यितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । इट् । 'लोकात्' (१।१।३) ''ईर्ष्य'' पाठ्ठ विश्लेषियइ । अत्र अनेन ''सन्'' द्विः । 'सन्यस्य' (४।१।५९) इ । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।।छ।।

## हवः शिति ॥४।१।१२॥

**[हवः]** हु प्रथमा जस् । 'जस्येदोत्' (१।४।२२) ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'सो रुः' (२।१।७२) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[शिति]** श् इत् अनुबन्धो यस्याऽसौ शित्, तस्मिन् ।

**[जुहोति]** 'हुंक् दाना-ऽदनयोः' (११३०) हु । वर्त्त० तिव् । अनेन ''हु'' द्विः । 'ग-होर्जः' (४।१।४०) हु० → जु० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ ।

**[जुहृवत्]** हु । जुहोतीति । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत् । अनेन द्वित्वम् । 'ग-होर्जः' (४।१।४०) हु० → जु० । 'ह्विणोरप्विति व्-यौ' (४।३।१५) वत्वम् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अन्तो नो लुक्' (४।२।९४) नलोपः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[जुहवानि]** हु । पञ्चमी आनिव् । अनेन द्विः । 'ग-होर्जः' (४।१।४०) हु० → जु० । गुणे सति अव् ।।छ।।

## चराचर-चलाचल-पतापत-वदावद-घनाघन-पाटूपटं वा ॥४।१।१३॥

**[चराचरचलाचलपतापतवदावदघनाघनपाटूपटम्]** चराचरश्च चलाचलश्च पतापतश्च वदावदश्च घनाघनश्च पाटूपटश्च = चराचरचलाचलपतापतवदावदघनाघनपाटूपटम् ।

**[वा]** वा प्रथमा सि ।

---

卐 न विद्यते इदमुदाहरणं बृहद्वृत्तौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[चराचरः]** 'चर भक्षणे च' (४१०) चर् । चरतीति । 'अच्' (५।१।४९) अच्प्र० → अ । अनेन निपातः ।

**[चलाचलः]** 'चल कम्पने' (९७२) चल् । चलतीति । 'अच्' (५।१।४९) अच्प्र० → अ । अनेन निपातः ।

**[पतापतः]** 'पत्लृ गतौ' (९६२) पत् । पततीति । 'अच्' (५।१।४९) अच्प्र० → अ । अनेन निपातः ।

**[वदावदः]** 'वद व्यक्तायां वाचि' (९९८) वद् । वदतीति । 'अच्' (५।१।४९) अच्प्र० → अ । अनेन निपातः ।

**[घनाघनः]** 'हनंक् हिंसा-गत्योः' (११००) हन् । हन्तीति । 'अच्' (५।१।४९) अच्प्र० → अ । हन्तेर्हस्य घत्वम् - पूर्वस्य च दीर्घः ।

**[पाटूपटः]**卐卐 卐'पट ग्रन्थे' (१८६०) पट् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । पाटयतीति । 'अच्' (५।१।४९) अच्प्र० → अ । पाटयतेरजन्तस्य द्वित्वं, ह्रस्वत्वं पूर्वस्य च ऊदन्तता निपात्यते ।

यल्लक्षणेनानुपपन्नं तत्सर्वं निपातनत्वम् ।।छ।।

## चिक्लिद-चक्नसम् ।।४।१।१४।।

**[चिक्लिदचक्नसम्]** चिक्लिदश्च चक्नसश्च = चिक्लिदचक्नसम् ।

**[चिक्लिदः]** 'क्लिदौच् आर्द्रभावे' (११७९) क्लिद् । क्लिद्यतीति । 'नाम्युपान्त्य-प्री-कृ-गृ-ज्ञः कः' (५।१।५४) कप्र० । अनेन निपात्यते चिक्लिदः ।

**[चक्नसः]** 'क्नसूच् ह्वृति-दीप्त्योः' (११७०) क्नस् । क्नस्यतीति । 'अच्' (५।१।४९) अच्प्र० । अनेन निपात्यते चक्नसः ।

**[चक्रुः]** 'डुकृंग् करणे' (८८८) कृ । करोतीति । 'हनि-या-कृ-भृ-पृ-तृ- त्रो द्वे च' (उणा० ७३३) किद् उप्र० । अनेन निपात्यते ।

**[ययुः]** 'यांक् प्रापणे' (१०६२) या । यातीति । 'हनि-या-कृ-भृ-पृ-तृ-त्रो द्वे च' (उणा० ७३३) किद् उप्र० । अनेन निपात्यते ।

**[बभ्रुः]** 'टुडुभृंग्क् पोषणे च' (११४०) भृ । बिभर्तीति । 'हनि-या-कृ-भृ-पृ-तृ-त्रो द्वे च' (उणा० ७३३) किद् उप्र० । अनेन निपात्यते ।।छ।।

## दाश्वत् - साह्वत् - मीढ्वत् ।।४।१।१५।।

**[दाश्वत्साह्वत्मीढ्वत्]**+ दास्वांश्च साह्वांश्च मीढ्वांश्च = तत् । स्रंस्-ध्वंस्-क्वस्सनडुहो दः (२।१।६८) त्रिष्वपि सस्य दः ।

**[दाश्वान्, दाश्वांसौ, दाशुषी]** 'दासृग दाने' (९३३) दास् । ददास ददासतुः । 'तत्र क्वसु-कानौ तद्वत्' (५।२।२) क्वसुप्र० → वस् । अनेन अद्वित्वं अनिट्त्वं च निपात्यते । प्रथमा सि-औ । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'न्समहतोः'

---

卐卐 'पट ग्रन्थे' (१८६०) णिचि पटयति । 'पट भासार्थः' (१७७८) णिचि पाटयति ।

P. 卐 अट (१९४)- 'पट गतौ' (१९५) पट् । पटन्तं प्रयुङ्क्ते । णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । पाटयतीति । 'अच्' (५।१।४९) अच्प्र० । अनेन पाटूपट इति निपातः ।

P. + हस्तप्रतिषु तालव्यशकारस्थाने दन्त्यसकारः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१।४।८६) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) सलोपः । तृतीये 'अधातूदृदितः' (२।४।२) ङी → ई । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[साह्वान्, साह्वांसौ]** 'षहण् मर्षणे' (१९८१) षह्, इत्यस्य न निपातनं इष्टिवशात् । 'षहि मर्षणे' (९९०) षह् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सह् । सेहे, सेहाते । 'तत्र क्वसु-कानौ तद्वत्' (५।२।२) क्वसुप्र० → वस् । अनेन परस्मैपदं - उपान्त्यदीर्घत्वं - अद्वित्वं - अनिट्त्वं च निपात्यते । परस्मैपदफलं प्रथमा सि-औ । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

**[मीढ्वान्]** 'मिहं सेचने' (५५१) मिह् । मिमेह । 'तत्र क्वसु-कानौ तद्वत्' (५।२।२) क्वसुप्र० → वस् । अनेन अत्र अद्वित्वं - अनिट्त्वं - उपान्त्यदीर्घत्वं-ढत्वं च निपात्यते । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) सलोपः ।।छ।।

**ज्ञप्यापो ज्ञीपीप्, न च द्विः, सि सनि** ।।४।१।१६।।

**[ज्ञप्यापः]** ज्ञपिश्च आप् च = ज्ञप्याप्, तस्य ।

**[ज्ञीपीप्]** ज्ञीप् च ईप् च = ज्ञीपीप् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः ।

**[न]** न प्रथमा सि ।

**[द्विः]** द्वौ वारावस्येति द्विः । 'द्वि-त्रि-चतुरः सुच्' (७।२।११०) सुच्प्र० ।

**[ज्ञीप्सति]** 'ज्ञाण् मारणादिनियोजनेषु' (१७२०) ज्ञा । णिच्प्र० । यद्वा 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । जानन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'अर्त्ति-री-व्ली-ह्री०' (४।२।२१) पोऽन्तः । 'मारण-तोषण-निशाने ज्ञश्च' (४।२।३०) ह्रस्वः । ज्ञपयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । अनेन "ज्ञीप्' आदेशः ।

**[ईप्सति]** 'आप्लृंट् व्याप्तौ' (१३०७) आप् । आप्तुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । अनेन "ईप्" आदेशः ।

**[जिज्ञपयिषति]** ज्ञा । जानन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'अर्त्ति-री-व्ली-ह्री०' (४।२।२१) पोऽन्तः । 'मारण-तोषण-निशाने ज्ञश्च' (४।२।३०) ह्रस्वः । ज्ञपयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'इवृध-भ्रस्ज-दम्भ-श्रि-यूर्णु-भर-ज्ञपि-सनि-तनि-पति-वृद्-दरिद्र-सनः' (४।४।४७) इत्यादिना इट् । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जन "न्" लोपः । 'सन्यस्य' (४।१।५९) अ० → इ० । गुणे सति अय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[आप्स्यति]** 'आप्लृंट् व्याप्तौ' (१३०७) आप् । भविष्यन्ती स्यति ।।छ।।

**ऋध ईर्त्** ।।४।१।१७।।

**[ऋधः]** ऋध् षष्ठी ङस् ।

**[ईर्त्]** ईर्त् प्रथमा सि ।

**[ईर्त्सति]** 'ऋधूच् वृद्धौ' (११८६) ऋध् । 'ऋधूट् वृद्धौ' (१३०६) ऋध् । अर्धितुमिच्छति । सन्प्र० । अनेन "ईर्त्" आदेशः । 'धुटो धुटि स्वे वा' (१।३।४८) तलोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अर्दिधिषति]** ऋध् । अर्धितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'इवृध-भ्रस्ज-दम्भ-श्रि-यूर्णु०' (४।४।४७) वेट् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'लोकात्' (१।१।३) "अर्" विश्लेषियइ । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "धि" द्विः । 'द्वितीय-तुर्ययोः पूर्वो' (४।१।४२) ध० → द० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्य-शव्' (३।४।७१) शव् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।।छ।।

## दम्भो धिप् धीप् ।।४।१।१८।।

**[दम्भः]** दम्भ् षष्ठी ङस् ।

**[धिप्धीप्]** धिप् च धीप् च = तत् ।

**[धिप्सति, धीप्सति]** 'दम्भूट् दम्भे' (१३०९) दम्भ् । दम्भितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । अनेन "धिप्-धीप्" आदेशः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[दिदम्भिषति]** दम्भ् । दम्भितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'इवृध-भ्रस्ज-दम्भ-श्रि०' (४।४।४७) इट् । 'सन्-यङश्च' (४।१।३) "द" द्विः । 'सन्यस्य' (४।१।५९) इ । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।।छ।।

## अव्याप्यस्य मुचेर्मोग्वा ।।४।१।१९।।

**[अव्याप्यस्य]** न विद्यते व्याप्यं-कर्म यस्य सः = अव्याप्यः, तस्य ।

**[मुचेः]** मुचि षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) ए । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० ।

**[मोग्वा]** मोग्(क्) प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । वा प्रथमा सि ।

**[मोक्षति, मुमुक्षति चैत्रः]** 'मुच्लृंती मोक्षणे' (१३२०) मुच् । मोक्तुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । अनेन प्रथमे "मोक्" आदेशः । द्वितीये 'सन्-यङश्च' (४।१।३) "मु" द्विः । 'च-जः क-गम्' (२।१।८६) च० →क० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम्, क-षसंयोगे क्ष० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[मोक्षते, मुमुक्षते वा वत्सः स्वयमेव]** मुमुक्षति वत्सं चैत्रः, स एवं विवक्षते नाहं मुमुक्षामि, किन्तु मुमुक्षते वत्सः स्वयमेव ।।छ।।

## मि-मी-मा-दामित् स्वरस्य ।।४।१।२०।।

**[मिमीमादाम्]** मिश्च मीश्च माश्च दाश्च = मिमीमादाः, तेषाम् = मिमीमादाम्, षष्ठी आम् । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः ।

**[इत्]** इत् प्रथमा सि ।

**[स्वरस्य]** स्वर षष्ठी ङस् ।

'मिग्-मीगोऽखलचलि' (४।२।८) इत्यात्वे माद्वारेणैव सिध्यति, मिग्रहणं कथमिति ? सत्यम्, 'नामिनोऽनिट्' (४।३।३३) इत्यनेन सनः कित्त्वात् आत्वं न प्राप्नोति ।

**[मित्सति, मित्सते शतम्]** 'डुमिंग्ट् प्रक्षेपणे' (१२८९) मि । मातुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनेन "मित्" आदेशः । वर्त्त० तिव् - ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[मित्सते]** 'मींग्श् हिंसायाम्' (१५१२) मी । मातुमिच्छति । 'तुमर्हादिच्छा०' (३।४।२१) सन्प्र० । अनेन "मित्" आदेशः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । यदा दैवादिकः 'मींङ्च् हिंसायाम्' (१२४६) मी, तदा मेतुमिच्छति ।

**[प्रमित्सति, प्रमित्सते शत्रून्]** 'मींग्श् हिंसायाम्' (१५१२) मी, प्रपूर्व० । प्रमातुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । अनेन "मित्" आदेशः । वर्त्त० तिव्-ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । शत्रु द्वितीया शस् । 'शसोऽता सश्च नः पुंसि' (१।४।४९) दीर्घः - स्०→न्० । यदा दैवादिकः 'मींङ्च् हिंसायाम्' (१२४६) मी, तदा प्रमेतुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० ।

**[मित्सति]** 'मांक् माने' (१०७३) मा । मातुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । अनेन "मित्" आदेशः । वर्त्त० तिव् ।

**[प्रमित्सते भूमिम्]** 'मांङ्क् मान-शब्दयोः' (११३७) मा, प्रपूर्व० । प्रमातुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । अनेन "मित्" आदेशः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[अपमित्सते यवान्]** अप 'मेंङ् प्रतिदाने' (६०३) मे । अपमातुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । अनेन "मित्" आदेशः । यव द्वितीया शस् ।

**[मिमासति]** मातुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) "मा" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'सन्यस्य' (४।१।५९) इ । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[प्रदित्सति दानम्]** 'दां दाने'(७) दा, प्रपूर्व० । प्रदातुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । अनेन "इत्" । दीयते = दानम् । 'भुजि-पत्यादिभ्यः कर्मा-ऽपादाने' (५।३।१२८) अनट्प्र० → अन ।

**[दित्सते पुत्रम्]** 'देंङ् पालने' (६०४) दे । 'आत् सन्ध्यक्षरस्य' (४।२।१) दा । दातुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । अनेन "इत्" । पुत्र द्वितीया अम् ।

**[दित्सति, दित्सते वस्त्रम्]** 'डुदांग्क् दाने' (११३८) दा । दातुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । अनेन "इत्" ।

**[दित्सति दण्डम्]** 'दोंच् छेदने' (११४८) दो । 'आत् सन्ध्यक्षरस्य' (४।२।१) दा । दातुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । अनेन "इत्" । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । दण्ड द्वितीया अम् ।

**[धित्सति स्तनम्]** 'ट्धें पाने' (२८) धे । 'आत् सन्ध्यक्षरस्य' (४।२।१) धा । धातुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । अनेन "धित्" आदेशः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । स्तन द्वितीया अम् ।

**[धित्सति, धित्सते श्रुतम्]** 'डुधांग्क् धारणे च' (११३९) धा । धातुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । अनेन "धित्" आदेशः । वर्त्त० तिव् - ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । श्रुत द्वितीया अम् ।

बहुवचनं व्याप्त्यर्थम्, तेन 'निरनुबन्धग्रहणे न सानुबन्धकस्य' (न्या०स० वक्षस्कार (१) / सूत्र (३२)), 'एकानुबन्धग्रहणे न द्व्यनुबन्धकस्य' (न्या०सं०वक्षस्कार (१) / सूत्र (३३)) 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' (न्या०सं० वक्षस्कार(१) / सूत्र(१५)) इत्यादि नाश्रीयते ।।छ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रभ-लभ-शक-पत-पदामिः ॥४।१।२१॥

**[रभलभशकपतपदाम्]** रभश्च लभश्च शकश्च पतश्च पच्च = ते, तेषाम् ।

**[इः]** इ प्रथमा सि ।

**[आरिप्सते]** 'रभिं राभस्ये' (७८५) रभ्, आङ्पूर्व० । आरब्धुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । अनेन इ० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) भ० → प० । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[लिप्सते]** 'डुलभिंष् प्राप्तौ' (७८६) लभ् । लब्धुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । अनेन इ० ।

**[शिक्षति]** 'शक्लृंट् शक्तौ' (१३००) शक् । शक्तुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । अनेन इ० ।

**[पित्सति]** 'पत्लृ गतौ' (९६२) पत् । पतितुमिच्छति । 'तुमर्हादिच्छायां सन्न०' (३।४।२१) सन्प्र० । अनेन इ० ।

**[पित्सते]** 'पदिंच् गतौ' (१२५७) पद् । पत्तुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । अनेन इ० ।

**[पिपतिषति]** पत् । पतितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'इवृध-भ्रस्ज-दम्भ-श्रि-यूर्ण्णु-भर-ज्ञपि-सनि-तनि-पति-वृद्-दरिद्रः सनः' (४।४।४७) इट् । 'सन्-यङश्च' (४।१।३) "प" द्विः । 'सन्यस्य' (४।१।५९) इ० ।

बहुवचनं शकींच्-शक्लृंटोरुभयोरपि परिग्रहार्थम् ॥छ॥

राधेर्वधे ॥४।१।२२॥

**[राधेः]** राधि षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) ए० । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० ।

**[वधे]** वध सप्तमी ङि ।

**[प्रतिरित्सति]** प्रति 'राधं संसिद्धौ' (१३०४) राध् । 'राधंच् वृद्धौ' (११५६) राध् । प्रतिराद्धुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । अनेन रा० → रि० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ध० → त० । वर्त्त० तिव् ।

**[आरिरात्सति गुरून्]** राध्, आङ्पूर्व० । आराद्धुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) "रा" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'सन्यस्य' (४।१।५९) इ० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ध० → त० । गुरु द्वितीया शस् । 'शसोऽता सश्च नः पुंसि' (१।४।४९) दीर्घः-सश्च न० ॥छ॥

अवित्परोक्षा-सेट्थवोरेः ॥४।१।२३॥

**[अवित्परोक्षासेट्थवोः]** न वित् = अवित् । 'नञत्' (३।२।१२५) न० → अ० । अविच्चासौ परोक्षा च = अवित्परोक्षा । सह इटा वर्त्तत इति सेट्, सेट् चासौ थव् च = सेट्थव्, अवित्परोक्षा च सेट्थव् च = अवित्परोक्षासेट्थवौ, तयोः = अवित्परोक्षासेट्थवोः, सप्तमी ओस् ।

**[एः]** ए प्रथमा सि ।

**[रेधतुः]** 'राधं संसिद्धौ' (१३०४) राध् । परोक्षा अतुस् । अनेन आरूपस्वरस्य ए० ।

**[रेधुः]** राध् । परोक्षा उस् । अनेन आरूपस्वरस्य ए० ।

**[रेधिथ]** राध् । परोक्षा थव् । 'स्क्रसृ-वृ-भृ-स्तु-द्रु-श्रु-स्रोर्व्यञ्जनादेः परोक्षायाः' (४।४।८१) इट् । अनेन आ० → ए० ।

एवं अप-प्रति-परिपूर्वकः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अपरेधिव]** अप-राध् । परोक्षा व । 'स्क्रसृ-वृ-भृ-स्तु०' (४।४।८१) इट् । अनेन आ० → ए० ।

**[अपरेधिम]** अप-राध् । परोक्षा म । 'स्क्रसृ-वृ-भृ-स्तु०' (४।४।८१) इट् । अनेन आ० → ए० ।

**[अपरराधम]** अप-राध् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "राध्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जन "ध" लोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वः ॥

**[अपराध्यते]** अप-राध् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य ।

**[आरराधतुः]** राध्, आङ्पूर्व० । परोक्षा अतुस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "राध्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जन "ध" लोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वः ।

**[आरराधिथ]** राध्, आङ्पूर्व० । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः "राध्" । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जन "ध" लोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'स्क्रसृ-वृ-भृ-स्तु-द्रु०' (४।४।८१) इट् ॥छ॥

**अनादेशादेरेकव्यञ्जनमध्येऽतः ॥४।१।२४॥**

**[अनादेशादेः]** आदिश्यत इति आदेशः । आदेश आदिर्यस्य सः = आदेशादिः । न आदेशादिः = अनादेशादिः । 'अन् स्वरे' (३।२।१२९) अन्, तस्य ।

**[एकव्यञ्जनमध्ये]** एकशब्दोऽत्राऽसहायवचनः, एकं च एके च = एके । 'त्यदादिः' (३।१।१२०) एकशेषः । एके च ते व्यञ्जने च = एकव्यञ्जने, एकव्यञ्जनयोर्मध्यमेकव्यञ्जनमध्यम्, तस्मिन् ।

**[अतः]** अत् षष्ठी ङस् ।

**[पेचतुः]** 'डुपचींष् पाके' (८९२) पच् । परोक्षा अतुस् । अनेन अ० → ए० ।

**[पेचुः]** पच् । परोक्षा उस् । अनेन अ० → ए० ।

**[पेचिवान्]** पच् । पपाच । 'तत्र क्वसु-कानौ तद्वत्' (५।२।२) क्वसुप्र० → वस् । 'घसेकस्वराऽऽतः क्वसोः' (४।४।८२) इट् → इ० । अनेन ए० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) सलोपः ।

**[पेचुषी]** पच् । पपाच । 'तत्र क्वसु-कानौ तद्वत्' (५।२।२) क्वसुप्र० → वस् । अनेन ए० । 'अधातूदृदितः' (२।४।२) ङी → ई । 'क्वसुष्मतौ च' (२।१।१०५) उष् ।

**[पेचिव]** 'डुपचींष् पाके' (८९२) पच् । परोक्षा व । 'स्क्रसृ-वृ-भृ-स्तु-द्रु-श्रु०' (४।४।८१) इट् । अनेन ए० ।

**[पेचिम]** पच् । परोक्षा म । अनेन ए० । 'स्क्रसृ-वृ-भृ-स्तु०' (४।४।८१) इट् ।

**[पेचिथ]** पच् । परोक्षा थव् । 'सृजि-दृशि-स्कृ-स्वराऽत्वतस्तृज्नित्याऽनिटस्थवः' (४।४।७८) विकल्पेनेट् । अनेन ए० ।

**[रेणतुः]** अण (२५९) - 'रण शब्दे' (२६०) रण् । परोक्षा अतुस् । अनेन ए० ।

**[रेणिथ]** रण् । परोक्षा थव् । 'स्क्रसृ-वृ-भृ-स्तु-द्रु-श्रु०' (४।४।८१) इट् । अनेन ए० ।

**[अहं पपच]** अस्मद् प्रथमा सि । 'त्वमहं सिना प्राक् चाऽकः' (२।१।१२) "अहं" आदेशः । पच् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "पच्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) चलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[पच्यते]** पच् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य ।

**[पपक्थ]** पच् । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "पच्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) चलोपः । 'च-जः क-गम्' (२।१।८६) च० → क० । 'सृजि-दृशि-स्कृ-स्वराऽत्वतस्तृज्नित्याऽनिटस्थवः' (४।४।७८) इत्यादिना विकल्पेनेट् ।

**[बभणतुः]** अण (२५९)- रण (२६०) - वण (२६१) - व्रण (२६२) - बण (२६३) - 'भण शब्दे' (२६४) भण् । परोक्षा अतुस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "भण्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) णलोपः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० ।

**[बभणिथ]** भण् । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "भण्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) णलोपः । 'स्क्रसृ-वृ-भृ-स्तु०' (४।४।८१) इट् ।

**[चकणतुः]** अण (२५९) - रण (२६०) - वण (२६१) - व्रण (२६२) - बण (२६३) - भण (२६४) - भ्रण (२६५) - मण (२६६) - धण (२६७) - ध्वण (२६८) - ध्रण (२६९) - 'कण शब्दे' (२७०) कण् । परोक्षा अतुस् । 'द्विर्धातुः परोक्षा - ङे०' (४।१।१) "कण्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) णलोपः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० ।

**[चकणिथ]** कण् । परोक्षा थव् । 'स्क्रसृ-वृ-भृ०' (४।४।८१) इट् । शेषं पूर्ववत् ।

ममध्वानित्यत्र तु एकव्यञ्जनमध्यत्वं लाक्षणिकं यतो नलोपे कृते ध० → द० बभूव ।

**[ततक्षतुः]** 'तक्षौ तनूकरणे' (५७१) तक्ष् । परोक्षा अतुस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) क्षलोपः ।

**[ततक्षिथ]** तक्ष् । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) क्षलोपः । 'स्क्रसृ-वृ-भृ-स्तु०' (४।४।८१) इट् ।

**[दिदिवतुः]** 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव् । परोक्षा अतुस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) वलोपः ।

**[दिदेविथ]** दिव् । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) वलोपः । 'स्क्रसृ-वृ-भृ-स्तु-द्रु-श्रु०' (४।४।८१) इट् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[नेमतुः]** 'णमं प्रह्वत्वे' (३८८) णम् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नम् । परोक्षा अतुस् । अनेन ए० ।

**[नेमुः]** नम् । परोक्षा उस् । अनेन ए० ।

**[नेमिथ]** नम् । परोक्षा थव् । 'सृजि-दृशि-स्कृ०' (४।४।८१) इट् । अनेन ए० ।

**[सेहे]** 'षहि मर्षणे' (९९०) षह् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८)सह् । परोक्षा ए । अनेन ए० ।

**[सेहाते]** सह् । परोक्षा आते । अनेन ए० ।

**[सेहिरे]** सह् । परोक्षा इरे । अनेन ए० ।

**[सेहिथ]** युजादौ 'षहण् मर्षणे' (१९८१) षह् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सह् । परोक्षा थव् । 'स्क्रसृ-वृ-भृ-स्तु-द्रु-श्रु०' (४।४।८१) इट् । अनेन ए० ।

अत्र हि अनिमित्ते नत्वसत्वे न तु परोक्षाथव्निमित्ते इति ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## तॄ-त्रप-फल-भजाम् ।।४।१।२५।।

**[तॄत्रपफलभजाम्]** तॄश्च त्रपश्च फलश्च भज् च = तॄत्रपफलभजः, तेषाम् ।

**[तेरतुः]** 'तॄ प्लवन-तरणयोः' (२७) तॄ । द्विर्वचने कृते मूलधातोः तॄ । परोक्षा अतुस् । "प्राक् तु स्वरे स्वरविधेः" (४।१।१) इति वचनात् प्रथमं द्वित्वं पश्चात् गुणः, ततोऽस्य एत्वे कृते द्वित्वनिवृत्तिः, एवं उत्तरसूत्रे "जॄ" इत्यस्यापि 'स्कृच्छृतोऽकि परोक्षायाम्' (४।३।८) इत्यनेन गुणे सति तॄ-त्रपेति एत्वं भवति, द्विर्वचनं च निवर्त्तते ।

**[तेरिथ]** तॄ । परोक्षा थव् । 'स्क्रसृ-वृ-भृ-स्तु०' (४।४।८१) इट् । शेषं पूर्ववत् ।

**[त्रेपे]** 'त्रपू(पौ)षि लज्जायाम्'(७६२) त्रप् । परोक्षा ए । अनेन ए० ।

**[त्रेपाते]** त्रप् । परोक्षा आते । अनेन ए० ।

**[त्रेपिरे]** त्रप् । परोक्षा इरे । अनेन ए० ।

**[फेलतुः]** दल (४१३) - 'ञिफला' विशरणे' (४१४) फल् । परोक्षा अतुस् । अनेन ए० ।

**[फेलिथ]** फल् । परोक्षा थव् । 'स्क्रसृ-वृ-भृ-स्तु०' (४।४।८१) इट् । शेषं पूर्ववत् ।

**[भेजिथ]** 'भजी सेवायाम्' (८९५) भज् । परोक्षा थव् । 'सृजि-दृशि-स्कृ०' (४।४।७८) वेट् । अनेन ए० ।

**[अहं ततर]** अहं (४।१।२४) सूत्रवत् । तॄ । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "तॄ" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । गुणः ।

**[बभक्थ]** भज् । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "भज्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्" (४।१।४४) जलोपः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० ।

**[तितीर्वान्]** तॄ । ततार । 'तत्र क्वसु-कानौ तद्वत्' (५।२।२) क्वसुप्र० → वस् । 'ॠतां क्ङितीर्' (४।४।११६) इर् → तिर् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "तिर्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) रलोपः । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) सलोपः ।

बहुवचनं तु 'फल निष्पत्तौ' (४२८), दल (४१३) 'ञिफला विशरणे' (४१४) इत्युभयोरपि परिग्रहार्थम् ।।छ।।

## जॄ-भ्रम-वम-त्रस-फण-स्यम-स्वन-राज-भ्राज-भ्रास-भ्लासो वा ।।४।१।२६।।

**[जॄभ्रमवमत्रसफणस्यमस्वनराजभ्राजभ्रासभ्लासः]** जॄश्च भ्रमश्च वमश्च त्रसश्च फणश्च स्यमश्च स्वनश्च राजश्च भ्राजश्च भ्रासश्च भ्लास् च = जॄभ्रमवमत्रसफणस्यमस्वनराजभ्राजभ्रासभ्लास्, तस्य ।

**[वा]** वा प्रथमा सि ।

**[जेरतुः, जजरतुः]** 'जॄष् जरसि' (११४५) जॄ । परोक्षा अतुस् । द्विर्वचने कृते मूलधातोः 'स्कृच्छृतोऽकि परोक्षायाम्' (४।३।८) इत्यनेन गुणं कृत्वा अतोऽनु एत्वं क्रियते । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "जॄ" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'स्कृच्छृतोऽकि परोक्षायाम्' (४।३।८) गु० अर् ।

[जेरिथ, जजरिथ] जॄ । परोक्षा थव् । 'स्कृच्छृतोऽकि परोक्षायाम्' (४।३।८) गु० अर् । 'स्क्रसृ-वृ-भृ-स्तु०' (४।४।८१) इट् ।

[भ्रेमतुः, बभ्रमतुः] 'भ्रमू चलने' (९७०) भ्रम् । परोक्षा अतुस् । पूर्वं द्वित्वं, ततोऽनेन एकारः । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० ।

[भ्रेमिथ, बभ्रमिथ] भ्रम् । परोक्षा थव् । 'स्क्रसृ-वृ-भृ-स्तु-द्रु०' (४।४।८१) इट् । अनेन ए० । शेषं पूर्ववत् ।

[वेमतुः, ववमतुः] 'टुवमू उद्गिरणे' (९६९) वम् । परोक्षा अतुस् । पूर्वं द्विः । अनेन ए० ।

[वेमिथ, ववमिथ] वम् । परोक्षा थव् । 'स्क्रसृ-वृ-भृ-स्तु०' (४।४।८१) इट् । शेषं पूर्ववत् ।

["उद्वेमुस्तत्र रुधिरं रथिनोऽन्योन्यवीक्षिताः"] उत्-वम् । परोक्षा उस् । अनेन ए० ।

[त्रेसतुः, तत्रसतुः] 'त्रसैच् भये' (११७१) त्रस् । परोक्षा अतुस् । पूर्वं द्वित्वं ततश्चानेन ए० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः ।

[त्रेसिथ, तत्रसिथ] त्रस् । परोक्षा थव् । 'स्क्रसृ-वृ-भृ-स्तु०' (४।४।८१) इट् । शेषं पूर्ववत् ।

[फेणतुः, पफणतुः] 'फण गतौ' (१०३७) फण् । परोक्षा अतुस् । पूर्वं द्वित्वं पश्चादनेन एकारः । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) णलोपः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) फ० → प० ।

[फेणिथ, पफणिथ] फण् । परोक्षा थव् । 'स्क्रसृ-वृ-भृ-स्तु०' (४।४।८१) इट् । शेषं पूर्ववत् ।

[स्येमतुः, सस्यमतुः] 'स्यमू शब्दे' (३८७) स्यम् । परोक्षा अतुस् । अनेन ए० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः ।

[स्येमिथ, सस्यमिथ] स्यम् । परोक्षा थव् । 'स्क्रसृ-वृ-भृ-स्तु०' (४।४।८१) इट् । शेषं पूर्ववत् ।

[स्वेनतुः, सस्वनतुः] स्तन (३२३) - धन (३२४) - ध्वन (३२५) - चन (३२६) - 'स्वन शब्दे' (३२७) स्वन् । परोक्षा अतुस् । अनेन ए० ।

[स्वेनिथ, सस्वनिथ] स्वन् । परोक्षा थव् । 'स्क्रसृ-वृ-भृ-स्तु०' (४।४।८१) इट् । शेषं पूर्ववत् ।

[रेजतुः, रराजतुः] 'राजृग् दीप्तौ' (८९३) राज् । वृत्तौ स्वरस्यात इति श्लिष्टनिर्देशात् आकारस्याप्येत्वमनेन ए० ।

[रेजिथ, रराजिथ] राज् । परोक्षा थव् । 'सृजि-दृशि-स्कृ-स्वराऽत्वतस्तृज्नित्याऽनिटस्थवः' (४।४।७८) इट् । शेषं पूर्ववत् ।

[भ्रेजे, बभ्राजे] 'टुभ्राजि दीप्तौ' (८९४) भ्राज् । परोक्षा ए । अनेन ए० । 'द्विर्धातुः परोक्षा-ङे०'(४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० ।

[भ्रेसे, बभ्रासे] 'टुभ्रासि दीप्तौ' (८४७) भ्रास् । परोक्षा ए । अनेन ए० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० ।

[भ्लेसे, बभ्लासे] 'टुभ्लासृङ् दीप्तौ' (८४८) भ्लास् । परोक्षा ए । पूर्वं द्विर्वचनं पश्चात् अनेन ए० । 'द्विर्धातुः परोक्षा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० ।

**[अहं जजर]** अहं 'जॄष् जरसि' (११४५) जॄ । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।।छ।।

## वा श्रन्थ-ग्रन्थो न्लुक् च ।।४।१।२७।।

**[वा]** वा प्रथमा सि ।

**[श्रन्थग्रन्थः]** श्रन्थश्च ग्रन्थ् च = श्रन्थग्रन्थ्, तस्य ।

श्रुथुङ्-ग्रथुङ् इत्यनयोर्लाक्षणिकत्वान्न भवति, प्रकृतिप्रत्यययोर्वचनभेदान्न यथासंख्यम् ।

**[न्लुक्]**卐 नो लुक् = न्लुक् ।

**[च]** च प्रथमा सि ।

**[श्रेथतुः, शश्रन्थतुः]** 'श्रन्थश् मोचन-प्रतिहर्षयोः' (१५४६) श्रन्थ् । परोक्षा अतुस् । अनेन ए- नलुक् च । द्विर्धातुः परोक्षा-ङे० (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः ।

**[श्रेथिथ, शश्रन्थिथ]** श्रन्थ् । परोक्षा थव् । 'सृजि-दृशि-स्कृ-स्वरा०' (४।४।७८) इट् । शेषं पूर्ववत् ।

**[ग्रेथतुः, जग्रन्थतुः]** 'ग्रन्थश् संदर्भे' (१५४८) ग्रन्थ् । परोक्षा अतुस् । अनेन ए-नलुक् च । द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ग-होर्जः' (४।१।४०) ग० → ज० ।

**[ग्रेथिथ, जग्रन्थिथ]** ग्रन्थ् । परोक्षा थव् । 'सृजि-दृशि-स्कृ०' (४।४।७८) इट् । अनेन ए-न्लुक् च ।

**[शश्रन्थ]** श्रन्थ् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः ।

**[जग्रन्थ]** ग्रन्थ् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ग-होर्जः' (४।१।४०) ग० → ज० ।।छ।।

## दम्भः ।।४।१।२८।।

**[दम्भः]** दम्भ् षष्ठी ङस् ।

**[देभतुः]** 'दम्भूट् दम्भे' (१३०९) दम्भ् । परोक्षा अतुस् । अनेन ए० । पूर्वं 'नो व्यञ्जनस्याऽनुदितः'(४।२।४५) नलुक्, ततः ए० ।

**[देभुः]** दम्भ् । परोक्षा उस् । अनेन ए० । पूर्वं 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक्, ततः ए० ।

**[ददम्भ]** दम्भ् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः ।।छ।।

---

P. 卐 नस्य लुक् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## थे वा ॥४।१।२९॥

**[थे]** थ सप्तमी ङि ।

**[वा]** वा प्रथमा सि ।

**[देभिथ, ददम्भिथ]** दम्भ् । परोक्षा थव् । 'स्क्रसृ-वृ-भृ-स्तु०' (४।४।८१) इट् । अनेन ए० । पक्षे 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः ॥छ॥

## न शस-ददि-वादि-गुणिनः ॥४।१।३०॥

**[न]** न प्रथमा सि ।

**[शसददवादिगुणिनः]** व आदिर्येषांते = वादयः, गुणो विद्यते येषां ते = गुणिनः, शसश्च ददश्च वादयश्च गुणिनश्च = शसददवादिगुणिन्, तस्य ।

**[विशशसतुः]** 'शसू हिंसायाम्' (५४९) शस्, विपूर्व० । परोक्षा अतुस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "शस्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।२।४५) सलुक् ।

**[विशशसिथ]** वि-शस् । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "शस्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) सलुक् । 'स्क्रसृ-वृ-भृ-स्तु०' (४।४।८१) इट् ।

**[ददде]** 'ददि दाने' (७२७) दद् । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) दलुक् ।

**[ददाते]** दद् । परोक्षा आते । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) दलुक् ।

**[ददिरे]** दद् । परोक्षा इरे । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) दलुक् ।

**[ववले]** 'वलि संवरणे' (८०७) वल् । परोक्षा ए । 'द्विर्धातुः परोक्षा—ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) ललुक् ।

**[ववलाते]** वल् । परोक्षा आते । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) ललुक् ।

**[ववलिरे]** वल् । परोक्षा इरे । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) ललुक् ।

**[ववणतुः]** अण (२५९)- रण (२६०) - 'वण शब्दे' (२६१) वण् । परोक्षा अतुस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) णलुक् ।

**[ववणिथ]** वण् । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) णलुक् । 'स्क्रसृ-वृ-भृ०' (४।४।८१) इट् ।

**[विशशरतुः]** कॄ (१५२९)- मॄ (१५३०) - 'शॄश् हिंसायाम्' (१५३१) शॄ, विपूर्व० । परोक्षा अतुस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'स्कृच्छृतोऽकि परोक्षायाम्' (४।३।८) गु० अर् ।

**[विशशरिथ]** वि-शॄ । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ऋतोऽत्'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(४।१।३८) ऋ० → अ० । 'स्क्रसृ-वृ-भृ-स्तु-द्रु-श्रु-स्रोर्व्यञ्जनादेः परोक्षायाः' (४।४।८१) इट् । 'स्कृच्छृतोऽकि परोक्षायाम्' (४।३।८) गु० अर् ।

**[चिचयिथ, चिचेथ]** 'चिंगट् चयने' (१२९०) चि । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे प्राक्०' (४।१।१) द्विः । 'सृजि-दृशि-स्कृ-स्वरा०' (४।४।७८) इट् ।

**[लुलविथ]** 'लूग्श् छेदने' (१५१९) लू । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'स्क्रसृ-वृ-भृ०' (४।४।८१) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।।छ।।

## ह्रौ दः ।।४।१।३१।।

**[ह्रौ]** हि सप्तमी ङि ।

**[दः]** दा षष्ठी ङस् । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः ।

**[देहि]** 'डुदांग्क् दाने' (११३८) दा । पञ्चमी हि । अनेन आ० → ए० ।

**[धेहि]** 'डुधांग्क् धारणे च' (११३९) धा । पञ्चमी हि । अनेन आ० → ए० ।

**[देहि]** 'डुदांग्क् दाने' (११३८) दा । भृशं पुनः पुनर्वा ददाति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) "दा" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'बहुलं लुप्'(३।४।१४) यङ्लुप् । पञ्चमी हि । अनेन ए० । द्वित्वनिवृत्तिः ।

**[दत्तात्]** 'डुदांग्क् दाने' (११३८) दा । पञ्चमी हि । 'आशिषि तु ह्योस्तातङ्' (४।२।११९) हि० → तातङ् । 'ह्वः शिति' (४।१।१२) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'श्नश्चाऽऽतः' (४।२।९६) आलोपः । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० ।

**[धत्तात्]** 'डुधांग्क् धारणे च' (११३९) धा । पञ्चमी हि । 'आशिषि तु०' (४।२।११९) हि० → तातङ् । 'ह्वः शिति' (४।१।१२) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'द्वितीय-तुर्ययोः पूर्वौ (४।१।४२) ध० → द० । 'श्नश्चाऽऽतः' (४।२।९६) आलोपः । 'धागस्त-थोश्च' (२।१।७८) द० → ध० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ध० → त० ।।छ।।

## देर्दिगिः परोक्षायाम् ।।४।१।३२।।

**[देः]** दि(दे) षष्ठी ङस् । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० ।

**[दिगिः]** दिगि प्रथमा सि ।

**[परोक्षायाम्]** परोक्षा सप्तमी ङि । 'आपो ङित्तां०' (१।४।१७) ङि० → याम् ।

**[दिग्ये]** 'देंङ् पालने' (६०४) दे । परोक्षा ए । अनेन दिगि० । 'योऽनेकस्वरस्य' (२।१।५६) य० ।

**[दिग्याते]** दे । परोक्षा आते । अनेन दिगि० । 'योऽनेकस्वरस्य' (२।१।५६) य० ।

**[दिग्यिरे]** दे । परोक्षा इरे । अनेन दिगि० । 'योऽनेकस्वरस्य' (२।१।५६) य० ।

**[अवदिग्ये]** दे, अवपूर्वकः । परोक्षा ए । अनेन दिगि० । 'योऽनेकस्वरस्य' (२।१।५६) य० ।

**[अवदिग्याते]** दे, अवपूर्व० । परोक्षा आते । शेषं 'दिग्याते' वत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[अवदिग्यिरे] दे, अवपूर्व० । परोक्षा इरे । शेषं 'दिग्यिरे' वत् ॥छ॥

**ङे पिबः पीप्य्** ॥४।१।३३॥

[ङे] ङ सप्तमी ङि ।

[पिबः] पिब् षष्ठी ङस् ।

[पीप्य्] पीप्य् प्रथमा सि ।

[अपीप्यत्, अपीप्यताम्, अपीप्यन्] 'पां पाने' (२) पा । पिबन्तं प्रायुक्त ।卐 अपासीत् कश्चित्, तमन्यः प्रयुङ्क्ते वा । णिग्प्र० । 'पा-शा-छा-सा-वे-व्या-ह्वो यः' (४।२।२०) योऽन्तः । अद्यतनी त्-ताम्-अन् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । अनेन "पीप्य्" आदेशः । 'अड् धातोरादि०'(४।४।२९) अट् ।

[अपीपलत्] 'पांक् रक्षणे' (१०६७) पा । पान्तं प्रायुक्त । णिग्प्र० । 'पातेः' (४।२।१७) इति लोऽन्तः-ल् । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 'आद्योऽश एकस्वरः' (४।१।२) "प" द्विः । 'असमानलोपे सन्वल्लघुनि ङे' (४।१।६३) इ । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'अड् धातोरादि०' (४।४।२९) अट् । 'णेरनिटि' (४।३।८३) णिग्लोपः ।

[अपापयत्] 'पां पाने' (२) पा । पायि पूर्ववत् । भृशं पुनः पुनर्वा अपीप्यत् । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) "पा" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'आ-गुणावन्यादेः' (४।१।४८) आ । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । पा । पान्तं (पिबन्तं) प्रायुक्त । णिग्प्र० । 'पा-शा-छा-सा-वे-व्या-ह्वो यः' (४।२।२०) योऽन्तः । अद्यतनी दि→त् । 'अड् 'धातोरादि०' (४।४।२९) अट् । 'णेरनिटि' (४।३।८३) णिग्लोपः ।

[पाययति] पा । पिबन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'पा-शा-छा-सा-वे-व्या-ह्वो यः' (४।२।२०) योऽन्तः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ॥छ॥

**अङे हि-हनो हो घः पूर्वात्** ॥४।१।३४॥

[अङे] न ङः = अङः । 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् ।

[हिहनः] हिश्च हन् च = हिहन्, तस्य ।

[हः] ह् षष्ठी ङस् ।

[घः] घ प्रथमा सि ।

[पूर्वात्] पूर्व पञ्चमी ङसि ।

[प्रजिघाय] 'हिंट् गति-वृद्ध्योः' (१२९५) हि, प्रपूर्व० । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "हि" द्विः । 'ग-होर्जः' (४।१।४०) ह० → ज० । अनेन पूर्वस्मात् परस्य हस्य घ० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

---

卐 'पैं शोषणे' (४७) अद्यतन्यां दिप्रत्यये अपासीत् भवति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[प्रजिघीषति]** प्र-हि । प्रहेतुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः । 'सन्-यङश्च' (४।१।३) "ही" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ग-होर्जः' (४।१।४०) ह० → ज० । अनेन घ० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[प्रजेघीयते, प्रजेघेति]** प्र-हि । भृशं पुनः पुनर्वा प्रहिनोति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) "हि" द्विः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । अनेन घ० । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । द्वितीये 'बहुलं लुप्' (३।४।१४) यङ्लुप् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए ।

**[जिघांसति]** 'हनंक् हिंसा-गत्योः' (११००) हन् । हन्तुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'सन्यस्य' (४।१।५९) इ । अनेन पूर्वस्मात् परस्य हस्य घ० । स्वर-हन-गमोः सनि धुटि (४।१।१०४) दीर्घः । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः । वर्त्त० तिव् ।

**[जंघन्यते]** हन् । भृशं पुनः पुनर्वा हन्ति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङप्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'मुरतोऽनुनासिकस्य' (४।१।५१) मोऽन्तः । अनेन पूर्वस्मात् परस्य हस्य घ० । वर्त्त० ते ।

**[जङ्घनीति]** हन् । भृशं पुनः पुनर्वा हन्ति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'मुरतोऽनुनासिकस्य' (४।१।५१) मोऽन्तः । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । 'यङ्-तु-रु-स्तोर्बहुलम्' (४।३।६४) ईत् → ई । अनेन पूर्वस्मात् परस्य हस्य घ० । वर्त्त० तिव् ।

**[प्राजीहयत्]** प्र 'हिंट् गति-वृद्ध्योः' (१२९५) हि । प्राहैषीत् कश्चित्, तमन्यः प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । 'आद्योंऽश एकस्वरः' (४।१।२) द्विः । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'असमानलोपे०' (४।१।६३) इ । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।१।८३) णिग्लोपः ।

**[जिहननीयिषति]** हन् । हन्यते । 'अनट्' (५।३।१२४) अनट्प्र० → अन । हननमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य । 'क्यनि' (४।३।११२) अ० → ई० । हननीयितुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । "ह"द्विः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'सन्यस्य' (४।१।५९) इ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'अतः' (४।३।८२) अकारलोपः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[प्रजिघाययिषति]** प्र-हि । प्रहिण्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । प्रहाययितुमिच्छति । सन्प्र० । "हा" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'सन्यस्य' (४।१।५९) इ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । अनेन ह० → घ० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।।छ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## जेर्गिः सन्-परोक्षयोः ॥४।१।३५॥

**[जेर्गिः]** जि षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) ए । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० । गि प्रथमा सि ।

**[सन्परोक्षयोः]** सन् च परोक्षा च = सन्परोक्षे, तयोः = सन्परोक्षयोः, सप्तमी ओस् । 'एद् बहुस्भोसि' (१।४।४) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[जिगीषति]** 'जिं अभिभवे' (८) जि । जेतुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः । 'सन्-यङश्च' (४।१।३) "जी" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । अनेन । 'स्वर-हन०' (४।१।१०४) दीर्घः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् ।

**[विजिगीषते]** वि-जि । विजेतुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः "जी" । 'सन्-यङश्च' (४।१।३) "जी" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । अनेन । 'स्वर-हन०' (४।१।१०४) दीर्घः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[जिगाय]** जि । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "जि"द्विः । अनेन गि० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[विजिग्ये]** वि-जि । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "जि" द्विः । अनेन गि० । 'योऽनेकस्वरस्य' (२।१।५६) य० ।

**[जेजीयते]** जि । भृशं पुनः पुनर्वा जयति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) "जि" द्विः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[जिज्यतुः]** 'ज्यांश् हानौ' (१५२४) ज्या । परोक्षा अतुस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः, पूर्वं 'ज्या-व्यधः क्ङिति' (४।१।८१) य्वृत् जि०, ततो द्विः । 'इवर्णादेरस्वे०' (१।२।२१) य० (?) । ('योऽनेकस्वरस्य' (२।१।५६) य०) ॥छ॥

## चेः किर्वा ॥४।१।३६॥

**[चेः]** चि षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) ए । 'एदोद्भ्यां०' (१।४।३५) र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[किः]** कि प्रथमा सि ।

**[वा]** वा प्रथमा सि ।

**[चिकीषति, चिचीषति]** 'चिंग्ट् चयने' (१२९०) चि । चेतुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घत्वे "ची" । 'सन्-यङश्च' (४।१।३) "ची" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । अनेन विकल्पेन किरादेशे पुनः 'स्वर-हन०' (४।१।१०४) इति दीर्घत्वं 'यावत् संभवस्तावद्विधिः' (न्या०सं० वक्षस्कार (२) / सूत्र (५६)) इति न्यायात्, एवं पूर्वसूत्रे जिगीषतीत्यत्र । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[चिकाय, चिचाय]** चि । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "चि" द्विः । अनेन चि० → कि० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । एदैतोऽयाय् (१।२।२३) आय् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[चिक्ये, चिच्ये]** चि । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "चि" द्विः । अनेन चि० → कि० । 'योऽनेकस्वरस्य' (२।१।५६) य० ।

**[चेचीयते]** चि । भृशं पुनः पुनर्वा चिनोति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) "चि" द्विः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।।छ।।

## पूर्वस्याऽस्वे स्वरे योरियुव् ।।४।१।३७।।

**[पूर्वस्य]** पूर्व षष्ठी ङस् ।

**[अस्वे]** न स्वः = अस्वः, 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् ।

**[स्वरे]** स्वर सप्तमी ङि ।

**[योः]** इश्च उश्च = यु, तस्य ।

**[इयुव्]** इय् च उव् च = इयुव् । प्रथमा सि ।

**[इयेष]** 'इषत् इच्छायाम्' (१४१९) इष् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) षलोपः । अनेन पूर्वस्य इकारस्य इय् पूर्वं 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[उवोष]** 'उषू दाहे' (५२९) उष् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः "उष्" । 'व्यञ्जनस्याऽनादेर्लुक्" (४।१।४४) षलोपः । 'लघोरुपान्त्यस्य' (४।३।४)गु० ओ । अनेन "उव्" आदेशः ।

'स्वरस्य परे प्राग्विधौ' (७।४।११०) इत्यनेन गुणस्य स्थानित्वे इयुवौ न स्तः, परं परे इति सप्तमी निर्देशात् सप्तम्या निर्दिष्टे पूर्वस्य तच्चानन्तरस्यैव, अत्र तु प(य)कारेण व्यवधानमिति न स्थानित्वम्, अस्वे इति नञा निर्दिष्टमनित्यमिति वा ।

**[इयर्ति]** 'ऋंक् गतौ' (११३५) ऋ । वर्त्त० तिव् । 'हवः शिति' (४।१।१२) द्विः । 'पृ-भृ-मा-हाङामिः' (४।१।५८) पूर्वस्य ऋकारस्य इकारः । अनेन इय् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[अरियर्ति, अरियरीति]** 'ऋंक् गतौ' (११३५) ऋ । भृशं पुनः पुनर्वा इयर्त्ति । 'अट्यर्त्ति-सूत्रि-मूत्रि-सूच्यशूर्णोः' (३।४।१०) यङ्प्र० । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । 'सन्-यङश्च' (४।१।३) द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'रि-रौ च लुपि' (४।१।५६) "रि" आगमः । अनेन इय् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । द्वितीये 'यङ्-तु-रु-स्तोर्बहुलम्' (४।३।६४) ईत् → ई ।

**[ईषतुः]** 'इषत् इच्छायाम्' (१४१९) इष् । परोक्षा अतुस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) षलोपः । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः ।

**[ऊषतुः]** 'उषू दाहे' (५२९) उष् । परोक्षा अतुस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) षलोपः । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः ।

**[पिपक्षति]** 'डुपचींष् पाके' (८९२) पच् । पक्तुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) चलोपः । 'सन्यस्य' (४।१।५९) इ । 'च-जः क-गम्' (२।१।८६) च० → क० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम्, क-षसंयोगे क्ष० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[पुपूषति]** 'पूगृश् पवने' (१५१८) पू । पवितुमिच्छति । 'तुमर्हादिच्छायां सन्न०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) "पू" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'नाम्यन्तस्था०' (२।३।१५) ष० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'ग्रह-गुहश्च सनः' (४।४।५९) इट्निषेधः ।

**[इयाज]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "यज्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) जलोपः । 'यजादि-वश्-वचः०' (४।१।७२) य्वृत् य० → इ० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

**[उवाप]** 'डुवपीं बीजसन्ताने' (९९५) वप् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "वप्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) पलोपः । 'यजादि-वश्-वचः०' (४।१।७२) य्वृत् व० → उ० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ॥छ॥

**ऋतोऽत्** ॥४।१।३८॥

**[ऋतः]** ऋत् षष्ठी ङस् ।

**[अत्]** अत् प्रथमा सि ।

**[चकार]** 'डुकृंग् करणे' (८८८) कृ । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । अनेन ऋ० → अ० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[ववृधे]** 'वृधूङ् वृद्धौ' (९५७) वृध् । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) धलोपः । अनेन ऋ० → अ० ॥छ॥

**ह्रस्वः** ॥४।१।३९॥

**[ह्रस्वः]** ह्रस्व प्रथमा सि ।

**[पपौ]** 'पां पाने' (२) पा । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "पा" द्विः । अनेन ह्रस्वः । 'आतो णव औ' (४।२।१२०) णव् → औ । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ ।

**[निनाय]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । अनेन ह्रस्वः । नामिनोऽकलि-हलेः (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[लुलाव]** 'लूगृश् छेदने' (१५१९) लू । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "लू" द्विः । अनेन ह्रस्वः । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[चकार]** 'कृ हिंसायाम्' (१५२९) कृ । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । अनेन ह्रस्वः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[सिसेके]** ककुङ् (६२२) - श्वकुङ् (६२३) - त्रकुङ् (६२४) - श्रकुङ् (६२५)- श्लकुङ् (६२६) - ढौकृङ् (६२७) - त्रौकृङ् (६२८) - ष्वष्कि (६२९) - वस्कि (६३०)- मस्कि (६३१) - तिकि(६३२)- टिकि (६३३) - टीकृङ् (६३४) - 'सेकृङ् गतौ' (६३५) सेक् । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) क-लोपः । अनेन ह्रस्वः से० → सि० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[लुलोके]** 'लोकृङ् दर्शने' (६१२) लोक् । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) कलोपः । अनेन ह्रस्वः लो० → लु० ।

**[तुत्रौके]** ककुङ् (६२२) - श्वकुङ् (६२३) - त्रकुङ् (६२४) - श्रकुङ् (६२५) - श्लकुङ् (६२६) - ढौकृङ् (६२७) 'त्रौकृङ् गतौ' (६२८) त्रौ । परोक्षा ए । 'द्विर्धातुः परोक्षा - ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन ह्रस्वः तो० → तु० ।

### ग-होर्जः ।।४।१।४०।।

**[गहोः]** गश्च ह् च = गहौ, तयोः = गहोः, षष्ठी ओस् ।

**[जः]** ज प्रथमा सि ।

**[जगाम]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "गम्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) मलुक् । अनेन ग० → ज० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

**[जघास]** 'अदं भक्षणे' (१०५९) अद् । परोक्षा णव् । 'परोक्षायां नवा' (४।४।१८) अद्० → घस्० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) सलुक् । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) घ० → ग० । अनेन ग० → ज० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

**[जहौ]** 'ओहांक् त्यागे' (११३१) हा । परोक्षा णव् । 'द्विर्धातुः परोक्षा ङे०' (४।१।१) "हा" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । अनेन ह० → ज० । 'आतो णव औ' (४।२।१२०) औ । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ ।

卐 **[जिहासति]** 'हसे हसने' (५४५) हस् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "हस्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) सलुक् । अनेन ह० → ज० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । वर्त्त० तिव् ।

**[जिहीर्षति]** 'हृंग् हरणे' (८८५) हृ । हर्तुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । स्वर-हन०' (४।१।१०४) दीर्घः । 'ॠतां क्ङित्तीर्' (४।४।११६) हिर् । 'सन्-यङश्च' (४।१।३) "हिर्" द्विः । व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) रलुक् । अनेन ह० → ज० । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः ।

**[जुहोति]** 'हुंक् दाना-ऽदनयोः' (११३०) हु । वर्त्त० तिव् । 'हवः शिति' (४।१।१२) "हु" द्विः । अनेन ह० → ज० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ ।

**[जहाति]** 'ओहांक् त्यागे' (११३१) हा । वर्त्त० तिव् । 'हवः शिति' (४।१।१२) "हा" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । अनेन ह० → ज० ।।छ।।

### द्युतेरिः ।।४।१।४१।।

**[द्युतेरिः]** द्युति षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) ए । 'एदोद्भ्यां०' (१।४।३५) र० । इ प्रथमा सि ।

**[दिद्युते]** 'द्युति दीप्तौ' (९३७) द्युत् । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "द्युत्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन उ० → इ० ।

卐 न विद्यते इदमुदाहरणं बृहद्वृत्तौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अदिद्युतत्]** द्युत् । अद्यतनी दि → त् । 'लृदिद्-द्युतादि०' (३।४।६४) अङ्प्र० । अद्युतत् प्रायुक्त । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "द्युत्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन उ० → इ० । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[देद्युत्यते]** द्युत् । भृशं पुनः पुनर्वा द्योतते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) द्विः । अनेन उ० → इ० । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[विदिद्युतिषते, विदिद्योतिषते]** वि-द्युत् । विद्योतितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । अनेन उ० → इ० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'वौ व्यञ्जनादेः सन् चाऽय्-वः' (४।३।२५) इत्यनेन वा सनः कित्त्वम्, यत्र कित्त्वं न तत्र 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ॥छ॥

## द्वितीय-तुर्ययोः पूर्वौ ॥४।१।४२॥

**[द्वितीयतुर्ययोः]** द्वितीयश्च तुर्यश्च = द्वितीयतुर्यौ, तयोः = द्वितीयतुर्ययोः, षष्ठी ओस् ।

**[पूर्वौ]** पूर्व प्रथमा औ ।

**[चखान]** 'खनूग् अवदारणे' (९१३) खन् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "खन्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) नलुक् । अनेन ख० → क० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[चिच्छेद]** 'छिदूंपी द्वैधीकरणे' (१४७८) छिद् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन छ० → च० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[टिठ्कारयिषति]** ठकार । ठकारं करोति । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिज्(च्)प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अलोपः । ठकारयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । "ठ" द्विः । अनेन ठ० → ट० । 'सन्यस्य' (४।१।५९) इ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् → इ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[तस्थौ]** 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे नैमित्तिकस्याप्यभावः' (न्या०सं० वक्षस्कार(१) / सूत्र (२९)) स्था । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "स्था" द्विः । 'अघोषे शिटः' (४।१।४५) सलुक् । 'ह्रस्वः' (४।१।३९) ह्रस्वः । अनेन थ० → त० । 'आतो णव औ' (४।२।१२०) औ । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ ।

**[पफाल]** 'फल निष्पत्तौ' (४२८) फल् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "फल्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) ललुक् । अनेन फ० → प० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[जुघोष]** 'घुषृ शब्दे' (४९७) घुष् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "घुष्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) षलुक् । अनेन घु० → गु० । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[जझाम]** चमू (३८०) - छमू (३८१) - जमू (३८२) - 'झमू अदने' (३८३) झम् । परोक्षा णव् । 'द्विर्धातुः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परोक्षा-ङे०' (४।१।१) "झम्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) मलुक् । अनेन झ० → ज० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[डुढौके]** ककुङ् (६२२) - श्वकुङ् (६२३) - त्रकुङ् (६२४) - श्रकुङ् (६२५) - श्लकुङ् (६२६) - 'ढौकृङ् गतौ' (६२७) ढौक् । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "ढौक्" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । अनेन ढ० → ड० ।

**[दधौ]** 'डुधांग्क् धारणे च' (११३९) धा । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "धा"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । अनेन ध० → द० । 'आतो णव औ' (४।२।१२०) णव् → औ । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ ।

**[बभार]** 'टुडुभृंग्क् पोषणे च' (११४०) भृ । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "भृ" द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । अनेन भ० → ब० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[पपाच]** 'डुपचींष् पाके' (८९२) पच् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "पच्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) चलुक् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।।छ।।

## तिर्वा ष्ठिवः ।।४।१।४३।।

**[तिर्वा]** ति प्रथमा सि । 'सो रुः' (२।१।७२) र० । वा प्रथमा सि ।

**[ष्ठिवः]** ष्ठिव् षष्ठी ङस् ।

**[तिष्ठेव, टिष्ठेव]** 'ष्ठिवू निरसने" (४६३ / ११६६) ष्ठिव् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "ष्ठिव्" द्विः । 'अघोषे शिटः' (४।१।४५) षलुक् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) वलुक् । अनेन वा ठि० → ति० । 'द्वितीय-तुर्ययोः पूर्वो' (४।१।४२) ठि० → टि० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

卐 **[तेष्ठीव्यते, टेष्ठीव्यते]** ष्ठिव् । भृशं पुनः पुनर्वा ष्ठीवति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) द्विः । 'अघोषे शिटः' (४।१।४५) षलुक् । अनेन वा ठि० → ति० । 'द्वितीय-तुर्ययोः पूर्वो' (४।१।४२) ठि० → टि० । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[तुष्ठ्यूषति, टुष्ठ्यूषति]** ष्ठिव् । ष्ठी(ष्ठे)वितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'अनुनासिके' च च्छ्-वः शूट्' (४।१।१०८) वस्य ऊट् → ऊ । 'इवर्णादि०' (१।२।२१) यत् । 'सन्-यङश्च' (४।१।३) "ष्ठ्यू" द्विः । 'अघोषे शिटः' (४।१।४५) षलुक् । ह्रस्वः (४।१।३९) ह्रस्वत् । 'इवृध-भ्रस्ज-दम्भ०' (४।४।४७) वेट् । अनेन ठु० → तु० । 'द्वितीय-तुर्ययोः पूर्वो' (४।१।४२) ठु० → टु० । 'नाम्यन्तस्था०' (२।३।१५) ष० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[तस्थौ]** (४।१।४२) सूत्रवत् ।

**[तष्ट्यौ]** 'ष्ट्यैं सङ्घाते च' (३९) ष्ट्यै । 'आत् सन्ध्यक्षरस्य' (४।२।१) ष्ट्या । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "ष्ट्या"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'अघोषे शिटः' (४।१।४५) षलुक् । 'निमित्ताभावे

---

卐 धातुरत्नाकरे - तेष्ठिव्यते, टेष्ठिव्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नैमित्तिकस्याप्यभावः' (न्या०सं० वक्षस्कार (१) / सूत्र (२९)) ट० ⟶ त० । 'आतो णव औः' (४।२।१२०) औ । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ ।

**[उतिच्छिषति]** 'उछैत् विवासे' (१३४४) उछ् । 'स्वरेभ्यः' (१।३।३०) छस्य द्वित्वम् । उच्छितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । इट् । 'लोकात्' (१।१।३) "उच्" पाठउ विश्लेषियइ । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "छि" द्विः । मतान्तरे अनेन छि० ⟶ ति० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[ऋतिच्छिषति]** 'ऋछत् इन्द्रियप्रलय-मूर्त्तिभावयोः' (१३४२) ऋछ् । 'स्वरेभ्यः' (१।३।३०) छस्य द्वित्वम् । ऋच्छितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । इट् । 'लोकात्' (१।१।३) "ऋच्" पाठउ विश्लेषियइ । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "छि"द्विः । मतान्तरे अनेन छि० ⟶ ति० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ॥छ॥

## व्यञ्जनस्याऽनादेर्लुक् ॥४।१।४४॥

**[व्यञ्जनस्य]** व्यञ्जन षष्ठी ङस् ।

**[अनादेः]** न आदिरनादिः । 'अन् स्वरे' (३।२।१२९) अन्, तस्य ।

**[लुक्]** लुक् प्रथमा सि ।

**[जग्ले]** 'ग्लैं हर्षक्षये' (३१) ग्लै । 'आत् सन्ध्यक्षरस्य' (४।२।१) ग्ला । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । अनेन अनादिव्यञ्जन-अक्षरलुक् । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ग-होर्जः' (४।१।४०) ग० ⟶ ज० । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलोपः ।

**[मम्ले]** 'म्लैं गात्रविनामे' (३२) म्लै । 'आत् सन्ध्यक्षरस्य' (४।२।१) म्ला । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । अनेन अनादिव्यञ्जन-अक्षरलुक् । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलोपः ।

**[पपाच]** पच् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "पच्" द्विः । अनेन चलुक् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[आटतुः]** 'अट गतौ' (१९४) अट् । परोक्षा अतुस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "अट्" द्विः । अनेन टलुक् । 'अस्याऽऽदेराः परोक्षायाम्' (४।१।६८) अ० ⟶ आ० । 'समानानां०' (१।२।१) दीर्घः ।

**[उचिच्छिषति]** 'उछैत् विवासे' (१३४४) उछ् । 'स्वरेभ्यः' (१।३।३०) छस्य द्वित्वम् । उच्छितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । इट् । 'लोकात्' (१।१।३) "उ" पाठउ विश्लेषियइ । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "छि" द्विः । अनेन छलुक् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) छि० ⟶ चि० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[ऋचिच्छिषति]** 'ऋछत् इन्द्रियप्रलय-मूर्त्तिभावयोः' (१३४२) ऋछ् । 'स्वरेभ्यः' (१।३।३०) छस्य द्वित्वम् । ऋच्छितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । इट् । 'लोकात्' (१।१।३) "ऋ"पाठउ विश्लेषियइ । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "च्छि" द्विः । अनेन छलुक् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) छि० ⟶ चि० । वर्त्त० तिव् । 'कर्त्तर्य०' (३।४।७१) शव् ।

**[अटाट्यते]** अट् । भृशं पुनः पुनर्वा अटति । 'अट्यति-सूत्रि-मूत्रि०' (३।४।१०) यङ्प्र० ⟶ य । 'लोकात्' (१।१।३)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"अ" पाठउ विश्लेषियइ । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "ट्य" द्विः । अनेन यलुक् । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० ते ।

**[पपाच]** पपाच पूर्ववत् ।।छ।।

**अघोषे शिटः** ।।४।१।४५।।

**[अघोषे]** अघोष सप्तमी ङि ।

**[शिटः]** शिट् षष्ठी ङस् ।

अनादिलुगपवादोऽयम् ।

卐 **[चुश्च्योत]** स्चुतृ (२८२) - 'स्च्युतृ क्षरणे' (२८३) स्च्युत् । 'सस्य श-षौ' (१।३।६१) श्च्युत् । परोक्षा णव् । 'द्विर्धातुः परोक्षा - ङे०' (४।१।१) 'श्च्युत्'' द्विः । अनेन शलुक् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

+ **[तिष्ठेव]** 'ष्ठिवू निरसने' (४६३।११६६) ष्ठिव् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "ष्ठिव्" द्विः । अनेन षलुक् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) वलुक् । 'तिर्वा ष्ठिवः' (४।१।४३) ति । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[चस्कन्द]** 'स्कन्दृं गति-शोषणयोः' (३१९) स्कन्द् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "स्कन्द्" द्विः । अनेन सलोपः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० ।

**[सस्नौ]** 'ष्णांक् शौचे' (१०६४) ष्णा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्ना । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः' । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'आतो णव औ' (४।२।१२०) णव्० → औ० । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ ।

**[पप्सौ]** अदं (१०५९) - 'प्सांक् भक्षणे' (१०६०) प्सा । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "प्सा"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'आतो णव औ' (४।२।१२०) औ । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ ।।छ।।

**क-ङश्च-ञ्** ।।४।१।४६।।

**[कङः]** कश्च ङ् च = कङ्, तस्य ।

**[चञ्]** चश्च ञ् च = चञ् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः ।

**[चकार]** 'डुकृंग् करणे' (८८८) कृ । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "कृ"द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । अनेन क० → च० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[चखान]** 'खनूग् अवदारणे' (९१३) खन् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "खन्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) नलुक् । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) ख० → क० । अनेन क० → च० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

卐 बृहद्वृत्तौ - 'स्चुतृ क्षरणे' (२८२) परोक्षायाः चुश्चोत ।

+ बृहद्वृत्तौ-टिष्ठेव ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[जुड्वे] उंङ् (५८९) - कुंङ् (५९०) - गुंङ् (५९१) - घुंङ् (५९२) - 'ङुंङ् शब्दे' (५९३) ङु । परोक्षा ए । 'द्विर्धातुः परोक्षा-डे०' (४।१।१) "ङु" द्विः । अनेन ङु० → जु० । 'धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये' (२।१।५०) उव् ।

[जिङकारीयिषति] ङकारमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य । 'क्यनि' (४।३।११२) ई । ङकारीयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । "ङ"द्विः । अनेन ङ० → ज० । 'सन्यस्य' (४।१।५९) इ । इट् । 'अतः' (४।३।८२) अलोपः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ॥छ॥

## न कवतेर्यङः ॥४।१।४७॥

[न] न प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

[कवतेः] कवति षष्ठी ङस् ।

[यङः] यङ् षष्ठी ङस् ।

[कोकूयते खरः] उंङ् (५८९) - 'कुंङ् शब्दे' (५९०) कु । भृशं पुनः पुनर्वा कवते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) "कु"द्विः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । 'दीर्घश्च्वि-यङ्०' (४।३।१०८) दीर्घः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

शव्निर्देशः कौति-कुवत्योर्निवृत्त्यर्थः ।

[चोकूयते] टुक्षु (१०८४) - रु (१०८५) - 'कुंक् शब्दे' (१०८६) कु । भृशं पुनः पुनर्वा कौति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) "कु"द्विः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

[चोकवीति] पूर्वं यङ्लुपि द्विः । शेषं पूर्ववत् । वर्त्त० तिव् । 'यङ्-तु-रु-स्तोर्बहुलम्' (४।३।६४) ईत् → ई । गुणे सति अव् ।

[चुकुवे] उंङ् (५८९) - 'कुंङ् शब्दे' (५९०) कु । परोक्षा ए । 'द्विर्धातुः परोक्षा-डे०' (४।१।१)"कु"द्विः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'धातोरिवर्णोवर्णस्येयुव्०' (२।१।५०) उव् ॥छ॥

## आ-गुणावन्यादेः ॥४।१।४८॥

[आगुणावन्यादेः] आश्च गुणश्च = आगुणौ, प्रथमा औ । नीरादिर्येषां ते = न्यादयः, न भविष्यन्ति न्यादयो यस्य सः = अन्यादिस्तस्य ।

[पापच्यते] 'डुपचींष् पाके' (८९२) पच् । भृशं पुनः पुनर्वा पचति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) द्विः । अनेन आ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

[अटाट्यते] 'अट गतौ' (१९४) अट् । भृशं पुनः पुनर्वा अटति । 'अट्यर्त्ति-सूत्रि-मूत्रि०' (३।४।१०) यङ्प्र० → य । 'लोकात्' (१।१।३) "अ" पाठउ विश्लेषियइ । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "ट्य"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) यलुक् । अनेन आ । वर्त्त० ते । 'कर्त्तर्य०' (३।४।७१) शव् ।

[चेचीयते] 'चिंग्ट् चयने' (१२९०) चि । भृशं पुनः पुनर्वा चिनोति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) "चि" द्विः । अनेन गु० ए । 'दीर्घश्च्वि-यङ्०' (४।३।१०८) दीर्घः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[लोलूयते]** 'लूग्श् छेदने' (१५१९) लू । भृशं पुनः पुनर्वा लुनाति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) "लू"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । अनेन गु० ओ । वर्त्त० ते ।

**[जेहीयते]** 'ओहांक् त्यागे' (११३१) हा । भृशं पुनः पुनर्वा जहाति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'ईर्व्यञ्जनेऽयपि' (४।३।९७) आ० → ई० । 'सन्-यङश्च' (४।१।३) "ही"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ग-होर्जः' (४।१।४०) ह० → ज० । अनेन गु० ए । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[पापचीति]** पच् । भृशं पुनः पुनर्वा पचति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । 'सन्-यङश्च' (४।१।३) द्विः । अनेन आ । वर्त्त० तिव् । 'यङ्-तु-रु-स्तोर्बहुलम्' (४।३।६४) ईत् → ई ।

**[बेभिदीति]** भिद् । भृशं पुनः पुनर्वा भिनत्ति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । 'सन्-यङश्च' (४।१।३) द्विः । अनेन गु० ए । वर्त्त० तिव् । 'यङ्-तु-रु-स्तोर्बहुलम्' (४।३।६४) ईत् → ई । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० ।

**[लोलवीति]** लू । भृशं पुनः पुनर्वा लुनाति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । 'सन्-यङश्च' (४।१।३) द्विः । अनेन गु० ओ । वर्त्त० तिव् । 'यङ्-तु-रु०' (४।३।६४) ईत् → ई । गुणे सति अव् ।

नैतावाकारगुणौ यङ्निमित्ताविति यङ्लुप्यपि भवतः ।

**[वनीवच्यते]** 'वञ्चू गतौ' (१०६) वञ्च् । कुटिलं वञ्चति । 'गत्यर्थात् कुटिले' (३।४।११) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) द्विः । 'वञ्च-स्रंस-ध्वंस-भ्रंश-कस-पत-पद-स्कन्दोऽन्तो नीः' (४।१।५०) "नी" आगमः । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् । वर्त्त० ते । 'कर्त्तर्य०' (३।४।७१) शव् ।

**[यंयम्यते]** 'यमूं उपरमे' (३८६) यम् । भृशं पुनः पुनर्वा यच्छति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) "य"द्विः । 'मुरतोऽनुनासिकस्य' (४।१।५१) मोऽन्तः । वर्त्त० ते । 'कर्त्तर्य०' (३।४।७१) शव् ।

**[नरीनृत्यते]** 'नृतैच् नर्त्तने' (११५२) नृत् । भृशं पुनः पुनर्वा नृत्यति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'ऋमतां री' (४।१।५५) "री" आगमः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[नरिनर्त्ति]** नृत् । भृशं पुनः पुनर्वा नृत्यति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । 'सन्-यङश्च' (४।१।३) द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'रि-रौ च लुपि' (४।१।५६) "रि" आगमः । वर्त्त० तिव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[नर्नर्ति]** नृत् । भृशं पुनः पुनर्वा नृत्यति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । 'सन्-यङश्च' (४।१।३) द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'रि-रौ च लुपि' (४।१।५६) "र्" आगमः । वर्त्त० तिव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[अचीकरत्]** 'डुकृंग् करणे' (८८८) कृ । कुर्वन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "कार्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'असमानलोपे०' (४।१।६३) अ० → इ० - एतत् सन्वत्कार्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिग्लोपः । इत्यत्र 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) इत्यनेन सूत्रेण सन्वत्कार्यं न बाध्यते, त्वित्वे सति पूर्वस्य विकारेषु बाधको न बाधक इति न्यायज्ञापनार्थं सन्वत्कार्यं बाधायां तु **अचाकरत्** इति स्यात् ॥छ॥

## न हाको लुपि ॥४।१।४९॥

**[न]** न प्रथमा सि ।

**[हाकः]** हाक् षष्ठी ङस् ।

**[लुपि]** लुप् सप्तमी ङि ।

**[जहाति, जहेति]** 'ओहांक् त्यागे' (११३१) हा । भृशं पुनः पुनर्वा जहाति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'बहुलं लुप्' (३।४।१४) यङ्लुप् विकल्पेन । 'यङ्-तु-रु०' (४।३।६४) ईत् → ई । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए ।

**[जेहीयते]** हा । भृशं पुनः पुनर्वा जहाति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'ईर्व्यञ्जनेऽयपि' (४।३।९७) आ० → ई० । 'सन्-यङश्च' (४।१।३) "ही"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए ॥छ॥

## वञ्च-स्रंस-ध्वंस-भ्रंश-कस-पत-पद-स्कन्दोऽन्तो नीः ॥४।१।५०॥

**[वञ्चस्रंसध्वंसभ्रंशकसपतपदस्कन्दोऽन्तः]** वञ्चश्च स्रंसश्च ध्वंसश्च भ्रंशश्च कसश्च पतश्च पदश्च स्कन्द् च = वञ्चस्रंसध्वंस-भ्रंशकसपतपदस्कन्द्, तस्य । अन्त प्रथमा सि ।

**[नीः]** नी प्रथमा सि ।

द्युतादिध्वंससाहचर्यात् भ्रंशूङ् (९५२)- स्रंसूङ् अवस्रंसने (९५३) इत्यस्यैव द्युतादिस्रंसो ग्रहः, स्रंसूङ् प्रमादे (८४४) इत्यस्य न ग्रहणम्, यतः **सास्रस्यते** इति भवति । भ्रंशिरपि भ्रंशूङ् - (९५२) इति भ्वादिरेव गृह्यते, भ्वादिध्वंस (९५४) साहचर्यात् । भृशू (१२०४)- 'भ्रंशूच् अधःपतने' (१२०५) इत्यस्य न ग्रहणम्, यतः **बाभ्रश्यते** इत्येव भवति ।

**[वनीवच्यते, वनीवञ्चीति]** 'वञ्चू गतौ' (१०६) वञ्च् । कुटिलं वञ्चति । 'गत्यर्थात् कुटिले' (३।४।११) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) द्विः । अनेन "नी" आगमः । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् । यङ्लुपि 'यङ्-तु-रु-स्तोर्बहुलम्' (४।३।६४) ईत् → ई ।

**[सनीस्रस्यते, सनीस्रंसीति]** भ्रंशूङ् (९५२) - 'स्रंसूङ् अवस्रंसने' (९५३) स्रंस् । भृशं पुनः पुनर्वा स्रंसते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन "नी" आगमः । यङ्लुपि 'यङ्-तु-रु-स्तोर्बहुलम्' (४।३।६४) ईत् → ई ।

**[दनीध्वस्यते, दनीध्वंसीति]** 'ध्वंसूङ् गतौ च' (९५४) ध्वंस् । भृशं पुनः पुनर्वा ध्वंसते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) ध० → द० । अनेन "नी" आगमः । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् । यङ्लुपि 'यङ्-तु-रु०' (४।३।६४) ईत् → ई ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[बनीभ्रश्यते, बनीभ्रंशीति]** 'भ्रंशूङ् अवस्रंसने' (९५२) भ्रंश् । भृशं पुनः पुनर्वा भ्रंशते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । अनेन "नी" आगमः । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् । यङ्लुपि 'यङ्-तु-रु०' (४।३।६४) ईत् → ई ।

**[चनीकस्यते, चनीकसीति]** 'कस गतौ' (९८७) कस् ।[1] भृशं पुनः पुनर्वा कसति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) द्विः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । अनेन "नी" आगमः । यङ्लुपि 'यङ्-तु-रु०' (४।३।६४) ईत् → ई ।

**[पनीपत्यते, पनीपतीति]** 'पत्लृ गतौ' (९८२) पत् ।[2] भृशं पुनः पुनर्वा पतति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । अनेन "नी" आगमः । यङ्लुपि 'यङ्-तु-रु०' (४।३।६४) ईत् → ई ।

**[पनीपद्यते, पनीपदीति]** 'पदिंच् गतौ' (१२५७) पद् ।[3] भृशं पुनः पुनर्वा पद्यते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) द्विः । अनेन "नी" आगमः । यङ्लुपि 'यङ्-तु-रु०' (४।३।६४) ईत् → ई ।

**[चनीस्कद्यते, चनीस्कन्दीति]** 'स्कन्दृं गति-शोषणयोः' (३१९) स्कन्द् । [4]भृशं पुनः पुनर्वा स्कन्दते(ति) । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'अघोषे शिटः' (४।१।४५) सलुक् । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । अनेन "नी" आगमः । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् । यङ्लुपि 'यङ्-तु-रु०' (४।३।६४) ईत् → ई । दीर्घविधानात् ह्रस्वो न भवति ।।छ।।

## मुरतोऽनुनासिकस्य ।।४।१।५१।।

**[मुः]** मु प्रथमा सि ।

**[अतः]** अत् पञ्चमी ङसि ।

**[अनुनासिकस्य]** अनु-पश्चान्नासिका - उच्चारणं यस्य सः = अनुनासिकस्तस्य ।

**[बम्भण्यते, बम्भणीति]** अण (२५९) - रण (२६०) - वण (२६१) - व्रण (२६२) - बण (२६३) 'भण शब्दे' (२६४) भण् । भृशं पुनः पुनर्वा भणति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) "भ"द्वि । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । अनेन मोऽन्तः । यङ्लुपि 'यङ्-तु-रु०' (४।३।६४) ईत् → ई ।

**[तन्तन्यते, तन्तनीति]** 'तनूयी विस्तारे' (१४९९) तन् । भृशं पुनः पुनर्वा तनोति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । अनेन मोऽन्तः । यङ्लुपि 'यङ्-तु-रु०' (४।३।६४) ईत् → ई ।

**[जङ्गम्यते, जङ्गमीति]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५)- 'गम्लृं गतौ' (३९६) गम् । भृशं पुनः पुनर्वा गच्छति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'ग-होर्जः' (४।१।४०) ग० → ज० । अनेन मोऽन्तः । यङ्लुपि 'यङ्-तु-रु-स्तोर्बहुलम्' (४।३।६४) ईत् → ई ।

---

P. १. कुटिलं कसति । 'गत्यर्थात् कुटिले' (३।४।११) यङ्प्र० ।

P. २. कुटिलं पतति । 'गत्यर्थात् कुटिले' (३।४।११) यङ्प्र० ।

P. ३. कुटिलं पद्यते । 'गत्यर्थात् कुटिले' (३।४।११) यङ्प्र० ।

P. ४. कुटिलं स्कन्दति । 'गत्यर्थात् कुटिले' (३।४।११) यङ्प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

य-ल-वानामनुनासिकत्वे-

**[तन्तय्ँयते]** 'तयि रक्षणे च' (७९७) तय् । भृशं पुनः पुनर्वा तयते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । अनेन मोऽन्तः ।

**[तन्तयँः]** तन्तय्यँते इति तन्तयँः । 'अच्' (५।१।४९) अच्प्र० । अचि (३।४।१५) यङ्लुप् ।

**[चञ्चल्ँयते]** 'चल कम्पने' (९७२/१०५५) चल् । भृशं पुनः पुनर्वा चलति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । अनेन मोऽन्तः ।

**[चञ्चलँः]** चञ्चँल्यते इति चञ्चलँः । 'अच्' (५।१।४९) अच्प्र० । 'अचि' (३।४।१५) यङ्लुप् ।

**[मंमव्यँते]** मुर्वै (४७९) –'मव बन्धने' (४८०) मव् । भृशं पुनः पुनर्वा मवति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । अनेन मोऽन्तः ।

**[मंमवँः]** मंमव्यँते इति मंमवँः । 'अच्' (५।१।४९) अच्प्र० । 'अचि' (३।४।१५) यङ्लुप् ।

अननुनासिकत्वे-

**[तातय्यते]** 'तयि रक्षणे च' (७९७) तय् । भृशं पुनः पुनर्वा तयते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[तातयः]** तातय्यते = तातयः । 'अच्' (५।१।४९) अच्प्र० । 'अचि' (३।४।१५) यङ्लुप् ।

**[चाचल्यते]** 'चल कम्पने' (९७२) चल् । भृशं पुनः पुनर्वा चलति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[चाचलः]** चाचल्यते = चाचलः । 'अच्' (५।१।४९) यङ्प्र० । 'अचि' (३।४।१५) यङ्लुप् ।

**[मामव्यते]** मुर्वै (४७९) - 'मव बन्धने' (४८०) मव् । भृशं पुनः पुनर्वा मवति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[मामवः]** मामव्यते = मामवः । 'अच्' (५।१।४९) अच्प्र० । 'अचि' (३।४।१५) यङ्लुप् ।

**[तेतिम्यते]** 'तिम आर्द्रभावे' (११६०) तिम् । भृशं पुनः पुनर्वा तिम्यति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए ।

**[जोघुण्यते]** 'घुणि भ्रमणे' (७०८) घुण् । भृशं पुनः पुनर्वा घोणते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) घु० → गु० । 'ग-होर्जः'(४।१।४०) गु० → जु० । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । वर्त्त० ते ।

**[बाभाम्यते]** 'भामि क्रोधे' (७८७) भाम् । भृशं पुनः पुनर्वा भामते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'आ-गुणावन्यादेः' (४।१।४८) आ ।

केचित्तु द्वित्वे सति अत इति आद्यविशेषणं मन्यते, तन्मते **बंभाम्यते** इति, तन्मतसंग्रहार्थं अत इत्यत्र षष्ठ्यपि व्याख्येया ।

**[पापच्यते]** (४।१।४८) सूत्रवत् ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## जप-जभ-दह-दश-भञ्ज-पशः ।।४।१।५२।।

**[जपजभदहदशभञ्जपशः]** जपश्च जभश्च दहश्च दशश्च भञ्जश्च पश् च = जपजभदहदशभञ्जपश्, तस्य ।

**[जञ्जप्यते, जञ्जपीति]** 'जप मानसे च' (३३८) जप् । गर्हितं जपति । 'गॄ-लुप-सद-चर-जप-जभ-दश-दहो गर्ह्ये' (३।४।१२) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । अनेन मोऽन्तः । यङ्लुपि 'यङ्-तु-रु-स्तोर्बहुलम्' (४।३।६४) ईत् → ई ।

**[जञ्जभ्यते, जञ्जभीति]** [1]'जभ मैथुने' (३७९) जभ् । भृशं पुनः पुनर्वा जम्भति । 'गॄ-लुप-सद-चर-जप-जभ०' (३।४।१२) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । अनेन मोऽन्तः । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । 'यङ्-तु-रु०' (४।३।६४) ईत् । 'आगमशासनमनित्यम्' (    ) इति न्यायात् 'जभः स्वरे' (४।४।१००) इति न नोऽन्तः ।

**[दन्दह्यते, दन्दहीति]** 'दहं भस्मीकरणे' (५५२) दह् ।[2] भृशं पुनः पुनर्वा दहति । 'गॄ-लुप-सद-चर-जप-दश-दहो गर्ह्ये' (३।४।१२) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । अनेन मोऽन्तः । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । 'यङ्-तु-रु०' (४।३।६४) ईत् → ई ।

**[दन्दश्यते, दन्दशीति]** 'दंशं दशने' (४९६) दंश् ।[3] भृशं पुनः पुनर्वा दशति । 'गॄ-लुप-सद-चर-जप-जभ०' (३।४।१२) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । अनेन मोऽन्तः । यङ्लुपि 'यङ्-तु-रु०' (४।३।६४) ईत् । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः ।

**[बम्भज्यते, बाभञ्जीति[4]]** 'भञ्जोंप् आमर्दने' (१४८६) भञ्ज् । भृशं पुनः पुनर्वा भनक्ति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । अनेन मोऽन्तः । यङ्लुपि 'यङ्-तु-रु०' (४।३।६४) ईत् । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलोपः सर्वत्र ।

**[पम्पश्यते, पम्पशीति]** 'पशी बाधनग्रथनयोश्च' (६८) पशिति सौत्रो धातुः । भृशं पुनः पुनर्वा पशति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । अनेन मोऽन्तः । यङ्लुपि 'यङ्-तु-रु०' (४।३।६४) ईत् → ई ।

पश(स) इति दन्त्यान्तं न्यायकारादयो मेनिरे, भोजस्तु तालव्यान्तम् ।

**[दन्दशीति]** पूर्ववत् ।।छ।।

## चर-फलाम् ।।४।१।५३।।

**[चरफलाम्]**卐 चरश्च फलौ च = चरफलः, तेषाम् ।

**[चञ्चूर्यते, चञ्चुरीति]** 'चर भक्षणे च' (४१०) चर् । गर्हितं चरति । 'गॄ-लुप-सद-चर०' (३।४।१२) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । अनेन मोऽन्तः । 'ति चोपान्त्यातोऽनोदुः' (४।१।५४) उ । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः ।

---

P. १. जुभुङ् (७८२) - 'जभैङ् गात्रविनामे' (७८३) जभ् । गर्हितं जम्भते ।

P. २. गर्हितं दहति ।

P. ३. गर्हितं दशति ।

४. क्रियारत्नसमुच्चये - बम्भजीति ।

P. 卐 चरश्च फल् च = चरफल्, तेषाम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यङ्लुपि यङ्-तु-रु०' (४।३।६४) ईत् → ई ।

**[पम्फुल्यते, पम्फुलीति]** पल (९८२) +'फल गतौ' (९८३) फल् । भृशं पुनः पुनर्वा फलति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन-यङश्च' (४।१।३) द्विः । अनेन मोऽन्तः । 'ति चोपान्त्यातोऽनोदुः' (४।१।५४) उ । यङ्लुपि 'यङ्-तु-रु०' (४।३।६४) ईत् → ई ।

बहुवचनं दल (४१३) - ञिफला विशरणे (४१४) इत्यस्यापि परिग्रहार्थम् ।।छ।।

## ति चोपान्त्यातोऽनोदुः ।।४।१।५४।।

[ति] त् सप्तमी ङि ।

**[चोपान्त्यातः]** च प्रथमा सि । उपान्त्यश्चासौ अच्च = उपान्त्यात्, तस्य ।

**[अनोत्]** न ओत् = अनोत् । 'अन् स्वरे' (३।२।१२९) अन् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

[उः] उ प्रथमा सि ।

**[चञ्चूर्यते, चञ्चुरीति]** चञ्चूर्यते - चञ्चुरीति पूर्ववत् । अनेन अस्य उ । द्वित्वे सतीत्यधिकारान्न पूर्वमुत्वम् ।

**[चूर्त्तिः]** चर् । चरणं = चूर्त्तिः । 'श्र्वादिभ्यः' (५।३।९२) क्तिप्र० → ति । अनेन अ० → उ० । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः ।

**[ब्रह्मचूर्तिः]** ब्रह्मणश्चरणम् । 'श्र्वादिभ्यः' (५।३।९२) क्तिप्र० → ति । अनेन अ० → उ० । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । 'कृति' (३।१।७७) इत्यनेन समासः ।

**[प्रफुल्लिः]** फल्-प्रपूर्व० । प्रफलनं = प्रफुल्लिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति ।

卐卐 **[प्रफुल्लः, प्रफुल्लवान्]** दल (४१३) - 'ञिफला विशरणे' (४१४) फल्, प्रपूर्व० । प्रफल्यते स्म । प्रफलति स्म । 'ज्ञानेच्छाऽर्चा०' (५।२।९२) क्तप्र० → त० । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । 'आदितः' (४।४।७१) इण्निषेधः ।

**[चञ्चार्यते]** चर् । चरन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । चारयतीति क्विप् । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । चारिवाऽऽचरति । 'कर्तुः क्विप् गल्भ-क्लीब-होडात्तु ङित्' (३।४।२५) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 卐 गर्हितं च(चारति) । 'गृ-लुप-सद० (३।४।१२) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'एकदेशविकृतस्याऽनन्यत्वात्' (वक्ष० १/सूत्र ७) 'चर-फलाम्' (४।१।५३) मोऽन्तः । वर्त्त० ते ।

**[पम्फाल्यते]** फलन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'ञ्णिति' (४।३।५०)

---

P. + 'फल निष्पत्तौ' (४२८) फल् ।

卐卐 उक्तं च धातुपारायणे - क्रियारत्नसमुच्चये च-सोपसर्गस्य प्रफुल्ता लता । अत्र ञीत्त्वात् 'ज्ञानेच्छाऽर्चा०' (५।२।९२) इति वर्त्तमाने क्तः । क्तवतौ निपातनाभावात् फुल्तवान् । ये तु क्तवतावपीच्छन्ति तन्मते (वामनस्य मते) फुल्लवान् । आदित्त्वाद् 'नवा भावाऽऽरम्भे' (४।४।७२) इति क्तयोर्वा नेटि प्रफुलितमनेन प्रफुलितः, प्रफुल्तमनेन प्रफुल्तः ।

अग्रेतनोदहारणे 'प्रफुल्तिः' सम्यक् प्रतिभाति ।

P. 卐 भृशं पुनः पुनर्वा चारति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपान्त्यवृद्धिः आ। फालयतीति क्विप् । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । फालिवाऽऽचरति । 'कर्तुः क्विप्, गल्भ-क्लीब०' (३।४।२५) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । भृशं पुनः पुनर्वा फ(फा)लति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । एकदेशविकृतस्याऽनन्यत्वात् (वक्ष० १/सूत्र ७) 'चर-फलाम्' (४।१।५३) मोऽन्तः । वर्त्त० ते ।

**[चञ्चूर्त्ति]** चञ्चूर्त्ति पूर्ववत् । अत्र 'लघोरुपान्त्यस्य' (४।३।४) इत्यनेन गुणः प्राप्नोति स न भवति ।

**[पम्फुल्ति]** भृशं पुनः पुनर्वा फलति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'चर-फलाम्' (४।१।५३) मोऽन्तः । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । वर्त्त० तिव् । अनेन अ० → उ० ।।छ।।

## ऋमतां री ।।४।१।५५।।

**[ऋमताम्]**+ ऋ विद्यते येषां ते = ऋमन्तः । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत्, तेषाम् = ऋमताम् । षष्ठी आम् ।

**[री]** री प्रथमा सि । सूत्रत्वात् लोपः ।

**[नरीनृत्यते]** 'नृतैच् नर्तने' (११५२) नृत् । भृशं पुनः पुनर्वा नृत्यति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) "नृ" द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । अनेन "री" आगमः । वर्त्त० ते ।

**[दरीदृश्यते]** 'दृशृं प्रेक्षणे' (४९५) दृश् । भृशं पुनः पुनर्वा पश्यति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । सन्-यङश्च' (४।१।३) "दृ"द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । अनेन "री" आगमः । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[वरीवृत्यते]** 'वृतूङ् वर्त्तने' (९५५) वृत् । भृशं पुनः पुनर्वा वर्त्तते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) "वृ"द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । अनेन "री" आगमः । वर्त्त० ते ।

**[वरीवृध्यते]** 'वृधूङ् वृद्धौ' (९५७) वृध् । भृशं पुनः पुनर्वा वर्धते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) "वृ"द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । अनेन "री" आगमः । वर्त्त० ते ।

**[चलीक्लृप्यते]** 'कृपौङ् सामर्थ्ये' (९५९) कृप् । भृशं पुनः पुनर्वा कल्पते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) "कृ"द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । अनेन "री" आगमः । वर्त्त० ते ।

**[दरीधृज्यते]** 'धृज गतौ' (१३०) धृज् । भृशं पुनः पुनर्वा धर्जति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) "धृ"द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) ध० → द० । अनेन "री" आगमः । वर्त्त० ते ।

**[परीपृच्छ्यते]** 'प्रछंत् ज्ञीप्सायाम्' (१३४७) प्रछ् । भृशं पुनः पुनर्वा पृच्छति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् प्र० → पृ० । 'सन्-यङश्च' (४।१।३) "पृ"द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । अनेन "री" आगमः । वर्त्त० ते ।

卐 **[वरीवृश्च्यते, वरिवृष्टि, वर्वृष्टि]** 'ओव्रस्चौत् छेदने' (१३४१) व्रस्च् । भृशं पुनः पुनर्वा वृश्चति । 'व्यञ्जनादेरेकस्वराद्०'

---

卐 बृहद्वृत्तौ यङ्लुबन्तरूपं न दत्तम् । P. + ऋर्विद्यते.... ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(३।४।९) यङ्प्र० । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् व्र० → वृ० । 'सन्-यङश्च' (४।१।३) "वृ"द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । अनेन "री" आगमः । यङ्लुपि सति च ऋतो विकल्पे रि-रौ आगमे **वरिवृष्टि-वर्वृष्टि** ।

+ **[जरीगृह्यते, जरिगर्ढि, जर्गर्ढि]** 'ग्रहीश् उपादाने' (१५१७) ग्रह् । भृशं पुनः पुनर्वा गृह्णाति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् ग्र० → गृ० । 'सन्-यङश्च' (४।१।३) "गृ"द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'ग-होर्जः'(४।१।४०) ग० → ज० । अनेन "री" आगमः । यङ्लुपि **जरिगर्ढि-जर्गर्ढि** ।

प्रच्छि-व्रश्चि-ग्रहीणामृकारे कृते ऋमत्त्वम् ।

**[चेक्रीयते]** 'डुकृंग् करणे' (८८८) कृ । भृशं पुनः पुनर्वा करोति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'ऋतो री' (४।३।१०९) री-कृ० → क्री । 'सन्-यङश्च' (४।१।३) "क्री"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । 'क-ङश्च-ञ्' (४।१।४६) क० → च० ।

**[जेह्रीयते]** 'हृंग् हरणे' (८८५) हृ । भृशं पुनः पुनर्वा हरति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'ऋतो री' (४।३।१०९) री-हृ० → ह्री० । 'सन्-यङश्च' (४।१।३) "ह्री" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । 'ग-होर्जः' (४।१।४०) ग० → ज० । अत्र रीभावे कृते द्वित्वमिति ऋमत्त्वं नास्ति । बहुवचननिर्देशो लाक्षणिकपरिग्रहार्थः ।।छ।।

## रि-रौ च लुपि ।।४।१।५६।।

**[रिरौ]** रिश्च र् च = रिरौ । प्रथमा औ ।

**[च]** च प्रथमा सि ।

**[लुपि]** लुप् सप्तमी ङि ।

**[चरिकर्ति, चर्कर्ति, चरीकर्ति]** 'डुकृंग् करणे' (८८८) कृ । भृशं पुनः पुनर्वा करोति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । 'सन्-यङश्च' (४।१।३) "कृ"द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । अनेन "रि-र्-री" आगमः । वर्त्त० तिव् । गुणः ।

**[जरिहर्ति, जर्हर्ति, जरीहर्ति]** 'हृंग् हरणे' (८८५) हृ । भृशं पुनः पुनर्वा हरति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । 'सन्-यङश्च' (४।१।३) "हृ"द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'ग-होर्जः' (४।१।४०) ह० → ज० । अनेन "रि-र्-री" आगमः । वर्त्त० तिव् । गुणः ।

**[नरिनृतीति, नरिनर्ति, नर्नृतीति, नर्नर्ति, नरीनृतीति, नरीनर्ति]** नरिनृतीति पूर्ववत् । 'ह्रस्वुक्तोपान्त्यस्य शिति स्वरे' (४।३।१४) इति गुणनिषेधः । 'यङ्-तु-रु-स्तोर्बहुलम्' (४।३।६४) ईत् ।

**[वरिवृश्चीति, वरिवृष्टि, वर्वृश्चीति, वर्वृष्टि, वरीवृश्चीति, वरीवृष्टि]** वरिवृश्चीति । 'यङ्-तु-रु०' (४।३।६४) ईत् । लुप्यय्वृल्लेनत् (७।४।११२) इति कर्त्तव्ये यङः स्थानित्वम् । 'संयोगस्याऽऽदौ स्कोर्लुक्' (२।१।८८) सलुक् परे गुणे कर्त्तव्ये सकारलुकोऽसत्त्वात् उपान्त्याभावः । 'यज-सृज-मृज-राज०' (२।१।८७) च० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) तस्य ट० । एवमग्रेपि । शेषं पूर्ववत् ।

**[चलिक्लृपीति, चलिकल्प्ति, चल्क्लृपीति, चल्कल्प्ति, चलीक्लृपीति, चलीकल्प्ति]** 'कृपू(पौ)ङ् सामर्थ्ये' (९५९) कृप् ।

+ बृहद्वृत्तौ यङ्लुबन्तरूपं न दत्तम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भृशं पुनः पुनर्वा कल्पते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) "कृ"द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । अनेन रि-र्-री आगमः । 'ऋ-र लृ-लं कृपोऽकृपीटादिषु' (२।३।९९) र० → ल० । विकल्पे 'यङ्-तु-रु०' (४।३।६४) ईत् → ई ।

**[नरीनृत्यते]** 'नृतैच् नर्तने' (११५२) नृत् । भृशं पुनः पुनर्वा नृत्यति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) "नृ" द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'ऋमतां री' (४।१।५५) "री" आगमः ।

**[चाकरीति,चाकर्ति]** 'कृत् विक्षेपे' (१३३४) कृ । भृशं पुनः पुनर्वा किरति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३० द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'आ-गुणावन्यादेः' (४।१।४८) आ । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । वर्त्त० तिव् । 'यङ्-तु-रु०' (४।३।६४) ईत् → ई ।

**[चाकीर्तः]** कृ । भृशं पुनः पुनर्वा किरतः । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । शेषं पूर्ववत् । 'ॠतां क्ङितीर्' (४।४।११६) इर् → किर् पूर्वम् । वर्त्तमाना तस् ।

**[चाकिरति]** कृ । भृशं पुनः पुनर्वा किरन्ति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । शेषं पूर्ववत् । वर्त्त० अन्ति । ततः किर् । 'अन्तो नो लुक्' (४।२।९४) नलुक् ।

**[जागल्ति]** 'गृत् निगरणे' (१३३५) गृ । भृशं पुनः पुनर्वा गिरति । यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'आ-गुणावन्यादेः' (४।१।४८) आ । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । वर्त्त० तिव् । गु० अर् । 'लुप्यय्वृल्लेनत्' (७।४।११२) इति लत्वे कर्त्तव्ये यङः स्थानित्वात् 'ग्रो यङि' (२।३।१०१) लत्वम् ।

**[तार्तर्ति]** 'तॄ प्लवन-तरणयोः'(२७) तॄ । भृशं पुनः पुनर्वा तरति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'आ-गुणावन्यादेः' (४।१।४८) आ । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । वर्त्त० तिव् ।।छ।।

## निजां शित्येत् ।।४।१।५७।।

**[निजाम्]** निज् षष्ठी आम् ।

**[शिति]** श् इत् अनुबन्धो यस्याऽसौ शित्, तस्मिन् ।

**[एत्]** एत् प्रथमा सि ।

**[नेनेक्ति]** 'णिजृंकी शौचे च' (११४१) णिज् । 'पाठे धात्वादेर्णो नः' (२।३।९७) निज् । वर्त्त० तिव् । 'हवः शिति' (४।१।१२) "निज्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) जलुक् । अनेन पूर्वस्येकारस्य ए । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० ।

**[नेनिक्ते]** निज् । वर्त्त० ते । 'हवः शिति' (४।१।१२) "निज्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) जलुक् । अनेन पूर्वस्येकारस्य ए । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० ।

**[नेनिज्यात्]** निज् । सप्तमी यात् । 'हवः शिति' (४।१।१२) "निज्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) जलुक् । अनेन ए ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[नेनेक्तु] निज् । पञ्चमी तुव् → तु । 'हवः शिति' (४।१।१२) "निज्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) जलुक् । अनेन ए । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० ।

[अनेनेक्] निज् । ह्यस्तनी दिव् → त् । 'हवः शिति' (४।१।१२) "निज्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) जलुक् । अनेन ए । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'व्यञ्जनाद् देः सश्च दः' (४।३।७८) दलोपः । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'विरामे वा' (१।३।५१) ग० → क० । 'अड् धातोरादि०' (४।४।२९) अट् ।

[वेवेक्ति] 'विजृंकी पृथग्भावे' (११४२) विज् । वर्त्त० तिव् । 'हवः शिति' (४।१।१२) "विज्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) जलुक् । अनेन ए । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० ।

[वेवेष्टि] 'विष्लृंकी व्याप्तौ' (११४३) विष् । वर्त्त० तिव् । 'हवः शिति' (४।१।१२) "विष्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) षलुक् । अनेन ए । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

[निनेज] निज् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "निज्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) जलुक् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

[निनिक्षति] निज् । नेक्तुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । क-षसंयोगे क्ष० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

[अनीनिजत्] निज् । अनिजत् अनैक्षीत् वा कश्चित्, तमन्यः प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) जलुक् । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

निजामिति बहुवचनेन निजि-विजि-विषस्त्रय एवाऽऽदादिपर्यन्तपठिता गृह्यन्ते ॥छ॥

## पृ-भृ-मा-हाङामिः ॥४।१।५८॥

[पृभृमाहाङाम्] पृश्च ऋश्च भृश्च माश्च हाङ् च = पृभृमाहाङः, तेषाम् ।

[इः] इ प्रथमा सि ।

'मांक् माने' (१०७३) इत्यस्य शिति द्वित्वस्यासंभवादेव न ग्रहणः, इति 'मांङ्क् मान-शब्दयोः' (११३७) मा उक्तः ।

[पिपर्त्ति] 'पृंक् पालन-पूरणयोः' (११३४) पृ । वर्त्त० तिव् । 'हवः शिति' (४।१।१२) द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । अनेन इ० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

[पिपृयात्] पृ । सप्तमी यात् । 'हवः शिति' (४।१।१२) द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । अनेन इ० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[इयर्त्ति]** 'ऋंक् गतौ' (११३५) ऋ । वर्त्त० तिव् । 'हवः शिति' (४।१।१२) द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० →अ० । अनेन इ० । 'पूर्वस्याऽस्वे स्वरे योरियुव्' (४।१।३७) इय् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[इयृयात्]** 'ऋंक् गतौ' (११३५)ऋ । सप्तमी यात् । 'हवः शिति' (४।१।१२) द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । अनेन इ० । 'पूर्वस्याऽस्वे स्वरे०' (४।१।३७) इय् ।

**[बिभर्त्ति]** 'टुडुभृंगृक् पोषणे च' (११४०) भृ । वर्त्त० तिव् । 'हवः शिति' (४।१।१२) "भृ"द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । अनेन इ० । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[बिभृयात्]** भृ । सप्तमी यात् । 'हवः शिति' (४।१।१२) "भृ"द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । अनेन इ० । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० ।

**[मिमीते]** 'मांङ्क् मान-शब्दयोः' (११३७) मा । वर्त्त० ते । 'हवः शिति' (४।१।१२) "मा"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । अनेन इ० । 'एषामी व्यञ्जनेऽदः' (४।२।९७) आ० → ई० ।

**[अमिमीत]** 'मांङ्क् मान-शब्दयोः' (११३७) मा । ह्यस्तनी त । 'हवः शिति' (४।१।१२) "मा" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । अनेन इ० । 'एषामी व्यञ्जनेऽदः' (४।२।९७) आ० → ई० । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[जिहीते]** 'ओहांङ्क् गतौ' (११३६) हा । वर्त्त० ते । 'हवः शिति' (४।१।१२) "हा" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ग-होर्जः' (४।१।४०) ह० → ज० । अनेन इ० । 'एषामी व्यञ्जनेऽदः' (४।२।९७) आ० → ई० ।

**[अजिहीत]** 'ओहांङ्क् गतौ' (११३६) हा । ह्यस्तनी त । 'हवः शिति' (४।१।१२) "हा"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ग-होर्जः' (४।१।४०) ह० → ज० । अनेन इ० । 'एषामी व्यञ्जनेऽदः' (४।२।९७) आ० → ई० । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[पिपर्त्ति]** 'पृ पालन-पूरणयोः' (११३४/२) पृ । केचित्तु पृ पालनपूरणयोरिति जुहोत्यादौ दीर्घत्वं पठन्ति । वर्त्त० तिव् । 'हवः शिति' (४।१।१२) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । अनेन इ० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[पिपूर्त्तः]** पृ । वर्त्त० तस् । 'हवः शिति' (४।१।१२) द्विः । शेषं पूर्ववत् । 'ओष्ठ्यादुर्' (४।४।११७) उर् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः ।

**[पिपूर्यात्]** पृ । सप्तमी यात् । 'हवः शिति' (४।१।१२) द्विः । शेषं पूर्ववत् । 'ओष्ठ्यादुर्' (४।४।११७) उर् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः ।

**[जहाति]** 'ओहांक् त्यागे' (११३१) हा । वर्त्त० तिव् । 'हवः शिति' (४।१।१२) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ग-होर्जः' (४।१।४०) ह० → ज० ।

**[पपार]** 'पृंक् पालन-पूरणयोः' (११३४) पृ । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "पृ"द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[आर]** 'ऋंक् गतौ' (११३५) ऋ । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'अस्याऽऽदेराः परोक्षायाम् (४।१।६८) अ० → आ० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[बभार]** 'टुडुभृंग्क् पोषणे च' (११४०) भृ । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'ऋतोऽत्' (४।१।४८) ऋ० → अ० । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[ममे]** 'मांङ्क् मान-शब्दयोः' (११३७) मा । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलोपः ।

**[जहे]** 'ओहांङ्क् गतौ' (११३६) हा । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'इडेत्-पुसि०' (४।३।९४) आलोपः ।

**[पर्पर्त्ति, परीपर्त्ति]** पृ । भृशं पुनः पुनर्वा पिपर्त्ति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) "पृ"द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । 'रि-रौ च लुपि' (४।१।५६) "र्"-"री" आगमः । वर्त्त० तिव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । अत्र यङन्तस्य द्वित्वं न शितीति न भवति ॥छ॥

### सन्यस्य ॥४।१।५९॥

**[सनि]** सन् सप्तमी ङि ।

**[अस्य]** अ षष्ठी ङस् ।

**[पिपक्षति]** 'डुपचींष् पाके' (८९२) पच् । पक्तुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) "प" द्विः । अनेन अस्य इ० । 'च-जः क-गम्' (२।१।८६) च० → क० । 'नाम्यन्तस्था०' (२।३।१५) स० → ष०, क-षसंयोगे क्ष० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[पिपासति]** 'पां पाने' (२) पा । 'पांक् रक्षणे' (१०६७) पा । पातुमिच्छति । तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) "पा" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । अनेन अ० → इ० ।

**[प्रतीषिषति]** प्रति 'इंण्क् गतौ' (१०७५) इ । प्रत्येतुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "स" द्विः । अनेन इ० । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[जिह्वायकीयिषति]** 'ह्वेंग् स्पर्द्धा-शब्दयोः' (९४) ह्वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) ह्वा । ह्वयतीति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । ह्वायकमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० । क्यनि (४।३।११२) अ० → ई० । ह्वायकीयितुमिच्छति । सन्प्र० । ह्वाद्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ग-होर्जः' (४।१।४०) ह० → ज० । अनेन इ० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् → इ । 'अतः' (४।३।८२) अलोपः । वर्त्त० तिव् । 'कर्त्तर्य०' (३।४।७१) शव् ।

**[पपाच]** 'डुपचींष् पाके' (८९२) पच् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

**[लुलूषति]** 'लूग्श् छेदने' (१५१९) लू । लवितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'ह्रस्व' (४।१।३९) ह्रस्वः । 'ग्रह-गुहश्च सनः' (४।४।५९) इट्निषेधः । 'नामिनोऽनिट्' (४।३।३३) सन्कित् । गुणो न, एतत् कित्फलम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[पापचिषते]** पच् । भृशं पुनः पुनर्वा पचति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) चलुक् । 'आ-गुणावन्यादेः' (४।१।४८) आ । पापक्तु(चितु)मिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'अतः' (४।३।८२) अलोपः । 'योऽशिति' (४।३।८०) यलोपः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।।छ।।

## ओर्जा-ऽन्तस्था-पवर्गेऽवर्णे ।।४।१।६०।।

**[ओर्जान्तस्थापवर्गे]** उ षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) ओ । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) ङस्० → र० । जश्च अन्तस्था च(थाश्च) पवर्गश्च = जाऽन्तस्थापवर्गम्, तस्मिन् ।

**[अवर्णे]** अवर्ण सप्तमी ङि ।

**[जिजावयिषति]** 'जुं गतौ' (१९९०) जु इति सौत्रो धातुः । जवन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । जावयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) "जु"द्विः । '**णौ यत्कृतं कार्यं तत्सर्वं स्थानिवद्भवति**' (वक्षस्कार (२)/सूत्र (३५)) इति न्यायात् अनेन उ० → इ० । इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[यियविषति]** 'युक् मिश्रणे' (१०८०) यु । यवितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'इवृध-भ्रस्ज-दम्भ-श्रि-यूर्ण्णु-भर-ज्ञपि-सनि-तनि – पति-वृद्-दरिद्रः सनः' (४।४।४७) इट् । "प्राक् तु स्वरे स्वरविधेरिति 'सन्-यङश्च' (४।१।३) "यु"द्विः । अनेन उ० → इ० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[यियावयिषति]** यु । युवन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । यावयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) "यु"द्विः । अनेन उ० → इ० । इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[रिरावयिषति]** टुक्षु (१०८४) - 'रु शब्दे' (१०८५) रु । रुवन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । रावयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) "रु"द्विः । अनेन उ० → इ० । इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[लिलावयिषति]** 'लूगृश् छेदने' (१५१९) लू । लुनन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । लावयितुमिच्छति । 'तुमर्हादिच्छायां सन्न०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) "लू" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । अनेन उ० → इ० । इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[पिपविषते]** 'पूङ् पवने' (६००) पू । पवितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) "पू"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । अनेन उ० → इ० । 'ऋ-स्मि-पूङ्ञ्जशौ-कृ-गृ-दृ-धृ-प्रच्छः' (४।४।४८) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[पिपावयिषति]** 'पूगृश् पवने' (१५१८) पू । पुनन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । पावयितुमिच्छति । 'तुमर्हादिच्छायां सन्न०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) "पू"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । अनेन उ० → इ० । इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[बिभावयिषति]** 'भू सत्तायाम्' (१) भू । भवन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । भावयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) "भू"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । अनेन उ० → इ० । इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[मिमावयिषति]** 'मूङ् बन्धने' (६०१) मू । मवमानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । मावयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । अनेन इ० ।

**[पापचिषते]** (४।१।५९) सूत्रवत् ।

**[अवतुतावयिषति]** अव 'तुंक् वृत्ति-हिंसा-पूरणेषु' (१०७९) तु । अवतुवन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । अवतावयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । "तु"द्विः । इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[जुहावयिषति]** 卐 'ह्वेंग् स्पर्धा-शब्दयोः' (९९४) ह्वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) ह्वा । ह्वयन्तं प्रयोक्तुमिच्छति । णिग्-सन्प्र० । 'णौ ङ-सनि' (४।१।८८) य्वृत् उ० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'सन्-यङश्च' (४।१।३) "हु"द्विः । 'ग-होर्जः' (४।१।४०) ह० → ज० । इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[बुभूषति]** 'भू सत्तायाम्' (१) भू । भवितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[जुज्यावयिषति]** च्युंङ् (५९४) - 'ज्युंङ् गतौ' (५९५) ज्यु । ज्यवमानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । ज्यावयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'णौ यत्कृतं कार्यं तत्सर्वं स्थानिवद्भवति' (वक्षस्कार (२) / सूत्र ३५) इति न्यायात् 'सन्-यङश्च' (४।१।३) "ज्यु"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) यलोपः । इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[लुलाव]** 'लूगृश् छेदने' (१५१९) लू । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "लू"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

---

P. 卐 'हुंक् दाना-ऽदनयोः' (११३०) हु । जुह्वन्तं प्रयुङ्क्ते । णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । आव् । हावयितुमिच्छति । सन्प्र० । 'सन्-यङश्च' (४।१।३) "हु"द्विः । 'ग-होर्जः' (४।१।४०) ह० → ज० । इट् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[पुस्फारयिषति]** 'स्फुरत् स्फुरणे' (१४६०) स्फुर् । स्फुरन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'चि-स्फुरोर्नवा' (४।२।१२) स्फारादेशः । स्फारयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) "स्फु"द्विः । 'अघोषे शिटः' (४।१।४५) सलोपः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) फु० → पु० । इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[चुक्षावयिषति]** 'टुक्षु शब्दे' (१०८४) क्षु । क्षुवन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । क्षावयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) "क्षु"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) षलोपः । 'क-ङश्च-ञ्' (४।१।४६) कु० → चु० । इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[शुशावयिषति]** 'ट्वोश्वि गति-वृद्ध्योः' (९९७) श्वि । श्वयन्तं प्रयोक्तुमिच्छति । णिग्-सन्प्र० । 'श्वेर्वा' (४।१।८९) य्वृत् इ-व० → उ० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । "शु"द्विः । इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[अचिकीर्तत्]** 'कृतण् संशब्दने' (१६४९) कृत् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'कृतः कीर्त्तिः' (४।४।१२२) कीर्त्ति । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु-कमः कर्त्तरि ङः' (३।४।५८) ङप्र० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "कीर्त्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः'(४।१।३९) ह्रस्वः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

नन्वत्र "णौ यत्कृतं कार्यं तत्सर्वं स्थानिवद्भवति" (न्या० सं० वक्षस्कार (२) /सूत्र (३५)) इति न्यायः तदा उपतिष्ठते यदा णिचि निमित्ते सति कीदेशः स्यात्, अत्र तु सामान्येन कीर्त्यादिश उक्तः, "येन विना यन्न भवति तत्तस्यानिमित्तस्यापि निमित्तम्" (न्या० सं० वक्षस्कार (३)/सूत्र ३) इति न्यायात् चुरादीउनीचता च णिच् अवश्यंभावी इति निमित्तं भवितुमर्हति ।।छ।।

## श्रु-स्रु-द्रु-प्रु-प्लु-च्योर्वा ।।४।१।६१।।

**[श्रुस्रुद्रुप्रुप्लुच्योः]** श्रुश्च स्रुश्च द्रुश्च-प्रुश्च प्लुश्च च्युश्च = तत्, तस्य ।

**[वा]** वा प्रथमा सि ।

**[शिश्रावयिषति, शुश्रावयिषति]** 'श्रुंट् श्रवणे' (१२९६) श्रु । शृण्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । श्रावयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र०, सर्वत्र 'णौ यत्कृतं कार्यं तत्सर्वं स्थानिवद्भवति' (वक्षस्कार(२) / सूत्र ३५)) न्यायात् वृद्ध्यादौ सत्यपि मूलधातुरूपमेव द्विः स्यात् । 'सन्-यङश्च' (४।१।३) "श्रु"द्विः । अनेन उ० → इ० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । गुणे सति अय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[सिस्रावयिषति, सुस्रावयिषति]** इं (११) - दुं (१२) - द्रुं (१३) शुं (१४) - 'स्रुं गतौ' (१५) स्रु । स्रवन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । अग्रे पूर्ववत् । अनेन वा उ० → इ० ।

**[दिद्रावयिषति, दुद्रावयिषति]** इं (११) - दुं (१२) - 'द्रुं गतौ' (१३) द्रु । द्रवन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । अग्रे पूर्ववत् । अनेन वा उ० → इ० ।

P. 卐 प्रवमानं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[पिप्रावयिषति, पुप्रावयिषति]** च्युंङ् (५९४) - ज्युंङ् (५९५) - जुंङ् (५९६) - 'पुंङ् गतौ' (५९७) प्रु । प्रवमाणं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । प्रावयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) "प्रु"द्विः । अनेन वा उ० → इ० । शेषं पूर्ववत् ।

**[पिप्लावयिषति, पुप्लावयिषति]** 'च्युंङ्' (५९४) - ज्युंङ् (५९५) - जुंङ् (५९६) - पुंङ् (५९७) - 'प्लुंङ् गतौ' (५९८) प्लु । प्लवमानं प्रयुङ्क्ते । 'प्रयोक्तृव्या०-' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । प्लावयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । "प्लु" द्वि । अनेन वा उ०→इ० । शेषं पूर्ववत् ।

**[चिच्यावयिषति, चुच्यावयिषति]** 'च्युंङ् गतौ' (५९४) च्यु । च्यवमानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । च्यावयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) 'च्यु'द्विः । अनेन वा उ० → इ० । शेषं पूर्ववत् ।

वचनादेकेन वर्णेन शकारादिनान्तस्थाया व्यवधानमाश्रीयते ।

**[शुश्रूषति(ते)]** 'श्रुंट् श्रवणे' (१२९६) श्रु । श्रोतुमिच्छति । 'तुमर्हादिच्छायां सन्न०' (३।४।२१) सन्प्र० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः ऊ । 'सन्-यङ्श्च' (४।१।३) "श्रू"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[सुस्रूषति]** 'स्रुं गतौ' (१५) स्रु । स्रवि(स्रो)तुमिच्छति । 'तुमर्हादिच्छायां सन्न०' (३।४।२१) सन्प्र० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः ऊ । 'सन्-यङश्च' (४।१।३) "स्रू"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[सोस्रविषति]** स्रु । कुटिलं स्रवति । 'गत्यर्थात् कुटिले' (३।४।११) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) "स्रु"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । सोस्रवितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ॥छ॥

## स्वपो णावुः ॥४।१।६२॥

**[स्वपः]** स्वप् षष्ठी ङस्, अनन्तरसम्बन्धे षष्ठी ।

**[णौ]** णि सप्तमी ङि ।

**[उः]** उ प्रथमा सि ।

सनीति निवृत्ति(त्तं) कार्यान्तरविधानात् ।

**[सुष्वापयिषति]** 'ञिष्वपंक् शये' (१०८८) ष्वप् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्वप् । स्वपन्तं प्रयोक्तुमिच्छति । णिग्-सन्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन उ० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । इट् । गुणे सति अय् । 'णि-स्तोरेवाऽस्वद-स्विद-सहः षणि' (२।३।३७) षत्वम् ।

आनन्तर्यसम्बन्धषष्ठ्याः फलमाह-

**[असुष्वापकीयत्]** स्वप् । स्वपितीति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'ञ्णिति' (४।३।५०)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपान्त्यवृद्धिः आ । स्वापकमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य । 'क्यनि' (४।३।११२) अ० → ई० । स्वापकीयित्वं प्राच्छयत (?) (प्रायुक्त) । 'प्रयोक्तृव्यापारे०' (३।४।२०) णिग्प्र० । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । 'अन्यस्य' (४।१।१८) "स्वा"द्विः । अनेन उ । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[सोष्वाप्यते]** स्वप् । स्वपनं(न्तं) प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । स्वापयतीति क्विप् । 'णेरनिटि' (४।३।८३) णिग्लोपः । स्वापिवाऽऽचरति । 'कर्तुः क्विप्०' (३।४।२५) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) उभयक्विप्लोपः । भृशं पुनः पुनर्वा स्वापति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) "स्वा"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । अनेन अ० → उ० । 'आ-गुणावन्यादेः' (४।१।४८) ओ ।

**[सिष्वापकीयिषति]** स्वापकीयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'अन्यस्य' (४।१।८) "स्वा"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'सन्यस्य' (४।१।५९) इ । इट् । 'अतः' (४।३।८२) अलोपः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । सिष्वापकीयिषति इत्यत्र 'णि-स्तोरेवा०' (२।३।३७) इति नियमात् [न ?] षत्वम् ।

**[सिष्वापयिषति]** स्वपनं = स्वापः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । स्वापं करोति । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिज्(च्)प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । स्वापयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'अन्यस्य' (४।१।८) "स्वा"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्" (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'सन्यस्य' (४।१।५९) इ । इट् । गुणे सति अय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[सोषोपयिषति]** स्वप् । भृशं पुनः पुनर्वा स्वपिति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । 'स्वपेर्यङ्-ङे च' (४।१।८०) य्वृत् व० → उ० । 'सन्-यङश्च' (४।१।३) "सु"द्विः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । सोषुपन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । सोषोपयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । इट् । गुणे सति अय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।।छ।।

## असमानलोपे सन्वल्लघुनि ङे ।।४।१।६३।।

**[असमानलोपे]** समानस्य लोपः = समानलोपः, न समानलोपोऽसमानलोपस्तस्मिन् । यद्वा न विद्यते समानस्य लोपो यस्मिन् सः = असमानलोपः, तस्मिन् ।

**[सन्वत्]** सन् । सनी(नि)व=सन्वत् । 'स्यादेरिवे' (७।१।५२) वत्प्र० । प्रथमा सि । अव्ययस्य' (३।२।७) सिलोपः ।

**[लघुनि]** लघु सप्तमी ङि । 'अनाम्स्वरे नोऽन्तः' (१।४।६४) नोऽन्तः ।

**[ङे]** ङ सप्तमी ङि ।

**[अचीकरत्]** 'डुकृंग् करणे' (८८८) कृ । कुर्वन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । "कृ" द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । पूर्वमनेन इ० । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अजीहरत्]** 'हृंग् हरणे' (८८५) हृ । हरन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । अद्यतनी दि → त् । 'णि-श्रि-द्रु०' (३।४।५८) ङप्र० → अ । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "हृ"द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । पूर्वमनेन इ० । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अजीजवत्]** 'जुं गतौ' (१९९०) जु इति सौत्रो धातुः । जवन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । "जु"द्विः । 'ओर्जान्तस्था०' (४।१।६०) उ० → इ० । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अयीयवत्]** 'युक् मिश्रणे' (१०८०) यु । युवन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । "यु"द्विः । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अरीरवत्]** टुक्षु (१०८४) - 'रु शब्दे' (१०८५) रु । रुवन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । रुद्विः । अनेन - 'ओर्जा-ऽन्तस्था०' (४।१।६०) उ० → इ० । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९९) अट् ।

**[अलीलवत्]** 'लूग्श् छेदने' (१५१९) लू । लुनन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । "लू"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । अनेन - 'ओर्जा-ऽन्तस्था०' (४।१।६०) उ०→इ० । 'उपान्त्यस्या०' (४।२।३५) ह्रस्वः । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अपीपवत्]** 'पूग्श् पवने' (१५१८) पू । पुनन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । "पू"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । अनेन - 'ओर्जा-ऽन्तस्था०' (४।१।६०) उ० → इ० । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अबीभवत्]** 'भू सत्तायाम्' (१) भू । भवन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । "भू"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । अनेन सन्वद्भावात् 'ओर्जा-ऽन्तस्था०' (४।१।६०) उ० → इ० । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अमीमवत्]** 'मूङ् बन्धने' (६०१) मू । मवमानं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० । ''मू''द्विः । ''ह्रस्वः'' (४।१।३९) ह्रस्वः । अनेन सन्वद्भावात् 'ओर्जान्तस्था०' (४।१।६०) उ० → इ० । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अशिश्रवत्, अशुश्रवत्]** 'श्रुंट् श्रवणे' (१२९६) श्रु । शृण्वन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । अद्यतनी दि → त् । 'णि-श्रि-द्रु०' (३।४।५८) ङप्र० → अ । ''श्रु''द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन सन्वद्भावात् 'श्रु-स्रु-द्रु-प्रु-प्लु-च्योर्वा' (४।१।६१) वा उ० → इ० । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अदिद्रवत्, अदुद्रवत्]** इं (११) - दुं (१२) - 'द्रुं गतौ' (१३) द्रु । द्रवन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । ''द्रु''द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन सन्वद्भावात् 'श्रु-स्रु-द्रु-प्रु-प्लु-च्योर्वा' (४।१।६१) वा उ० → इ० । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अपिप्रवत्, अपुप्रवत्]** च्युंङ् (५९४) - ज्युंङ् (५९५) - जुंङ् (५९६) - 'प्रुंङ् गतौ' (५९७) प्रु । प्रवमानं(णं) प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । ''प्रु''द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन सन्वद्भावात् 'श्रु-स्रु-द्रु-प्रु-प्लु-च्योर्वा' (४।१।६१) वा उ० → इ० । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अपिप्लवत्, अपुप्लवत्]** च्युंङ् (५९४) - ज्युंङ् (५९५) - जुंङ् (५९६) - प्रुंङ् (५९७) - 'प्लुंङ् गतौ' (५९८) प्लु । प्लवमानं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । ''प्लु''द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन सन्वद्भावात् 'श्रु-स्रु-द्रु-प्रु-प्लु-च्योर्वा' (४।१।६१) वा उ० → इ० । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अचिच्यवत्, अचुच्यवत्]** 'च्युंङ् गतौ'(५९४) च्यु । च्यवमानं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । ''च्यु''द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन सन्वद्भावात् 'श्रु-स्रु-द्रु-प्रु-प्लु-च्योर्वा' (४।१।६१) वा उ० → इ० । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

卐 **[अतूतवत्]** 'तुंक् वृत्ति- हिंसा-पूरणेषु' (१०७९) तु । तुवन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । ''तु''द्विः । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

---

卐 बृहद्वृत्तौ-अनूनवत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अजूहवत्]** 'ह्वेंग् स्पर्धा-शब्दयोः' (९९४) ह्वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) ह्वा । अह्वत् अह्वत अह्वास्त वा कश्चित्, तं जुह्वांसं अन्यः प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'णौ ङ-सनि' (४।१।८८) य्वृत् वा० → उ० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० । 'आद्योंऽश एकस्वरः' (४।१।२) "हु"द्विः । 'भ्राज-भास-भाष-दीप-पीड-जीव-मील-कण-रण०' (४।२।३६) ह्रस्वः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अततक्षत्]** 'तक्षौ तनूकरणे' (५७१) तक्ष् । अतक्षीत् अताक्षीत् वा कश्चित्, तमन्यः प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । 'आद्योंऽश एकस्वरः' (४।१।२) "त"द्विः । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अबभाणत्]** अण (२५९) - रण (२६०) - वण (२६१) - व्रण (२६२) - बण (२६३) - 'भण शब्दे' (२६४) भण् । 'भ्राज-भास०' (४।२।३६) इति विकल्पेन भणनात् ह्रस्वाभावोऽग्रेतन उदाहरणे भण्यमाने अभणीत् कश्चित्, तमन्यः प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । 'आद्योंऽश एकस्वरः' (४।१।२) "भ"द्विः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अचिक्रमत्]** 'क्रमू पादविक्षेपे' (३८५) क्रम् । क्रामन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । 'आद्योंऽश एकस्वरः' (४।१।२) "क्र"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । अनेन सन्वद्भावात् 'सन्यस्य' (४।१।५९) इ । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः ।

**[अचिक्वणत्]** अण (२५९) - रण (२६०) - वण (२६१) - व्रण (२६२) - बण (२६३) - भण (२६४) - भ्रण (२६५) - मण (२६६) - धण (२६७) - ध्वण (२६८) - धण (२६९) कण (२७०) - 'क्वण शब्दे' (२७१) क्वण् । क्वणन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० । 'आद्योंऽश एकस्वरः' (४।१।२) "क्व"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) वलुक् । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । अनेन सन्वद्भावात् 'सन्यस्य' (४।१।५९) इ । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः ।

**[अजजागरत्]** 'जागृक् निद्राक्षये' (१०९३) जागृ । जाग्रन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग् (३।४।२०) णिग्प्र० । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र०→अ । 'आद्योंऽश एकस्वरः' (४।१।२) "जा" द्वित्वम् । 'ह्रस्वः (४।१।३९) ह्रस्वः । 'नामिनो गुणोऽक्ङिति' (४।३।१) ग० अर् । 'णेरनिटि' (४।३।८३) णिग्लुक् । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अचकमत]** [1]'कमूङ् कान्तौ' (७८९) कम् । 'कमेर्णिङ्' (३।४।२) णिङ् → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । अद्यतनी त । 'णि-श्रि-द्रु-स्रु-कमः कर्तरि ङः' (३।४।५८) ङप्र० । द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः ।

---

P. १. 'कमूङ् कान्तौ (७८९) कम् । अद्यतनी दि । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "कम्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४)मलुक् । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'अड् धातोरादि०' (४।४।२९) अट् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'ह्रस्वः' (४।१।३९) ह्रस्वः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 'णेरनिटि' (४।३।८३) णिङ्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अचकथत्]**+ 'कथण् वाक्यप्रतिबन्धे' (१८८०) कथ । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । 'अतः' (४।३।८२) अकारलोपः । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० । द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अदद्दृषत्]** दृषद् । दृषदमाख्यत् । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिज्(च्)प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अद्लोपः । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अपीपटत्]** पटु । पटुमाख्यत् । 'णिज्बहुलं०' (३।४।४२) णिज्(च्)प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० । द्विः । अनेन सन्वद्भावात् 'सन्यस्य' (४।१।५९) इ । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अलीलघत्]** लघु । लघुमाख्यत् । 'णिज्बहुलं०' (३।४।४२) णिज्(च्)प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० । द्विः । अनेन सन्वद्भावात् 'सन्यस्य' (४।१।५९) इ । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अचीकपत्]** कपि । कपिमाख्यत् । 'णिज्बहुलं०' (३।४।४२) णिज्(च्)प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० । द्विः । अनेन सन्वद्भावात् 'सन्यस्य' (४।१।५९) इ । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अजीहरत्]** हरि । हरिमाख्यत् । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिज्(च्)प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० । द्वि । अनेन सन्वद्भावात् 'सन्यस्य' (४।१।५९) इ । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'णेरनिटि' (४।३।८३) णिज्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अवीवदद्वीणां परिवादकेन]** वद(दि)ण् [परि]भाषणे (१९६३) वद् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । 'ञ्णिति' (४।३।५०) वृ० आ । वादितवन्तं प्रयोजितवान् । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'णेरनिटि' (४।३।८३) णिज्लोपः, । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । "वाद्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन इ० । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।।छ।।

### लघोर्दीर्घोऽस्वरादेः ।।४।१।६४।।

**[लघोर्दीर्घोऽस्वरादेः]** लघु षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) ओ । 'एदोद्भ्यां०' (१।४।३५) ङस् → र० । दीर्घ प्रथमा सि । स्वर आदिर्यस्याऽसौ स्वरादिः, न स्वरादिः = अस्वरादिः, 'नञत्' (३।२।१२५) न० → अ०, तस्य ।

+ धातुपारायणे-कथण् वाक्यप्रबन्धे । वाक्यप्रतिबन्धे इत्यन्ये । वदने इत्यपरे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अचीकरत्]** (४।१।६३) सूत्रवत् ।

**[अलीलवत्]** (४।१।६३) सूत्रवत् ।

**[अतूतवत्]** (४।१।६३) सूत्रवत् ।

**[अबूभुजत्]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भुञ्जन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भु० → बु० । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । अनेन दीर्घः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अचिक्वणत्]** अण (२५९) - रण (२६०) - वण (२६१) - व्रण (२६२) - बण (२६३) - भण (२६४) - भ्रण (२६५) - मण (२६६) - धण (२६७) - ध्वण (२६८) - ध्रण (२६९) - कण (२७०) - 'क्वण शब्दे' (२७१) क्वण् । क्वणन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० → अ । 'आद्योऽश एकस्वरः' (४।१।२) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) वलुक् । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'असमानलोपे०' (४।१।६३) सन्वद्भावात् 'सन्यस्य' (४।१।५९) इ । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् । "**संयोगे पूर्वो गुरु**रिति" न भवति दीर्घः ।

**[और्णुनवत्]** 'ऊर्णुग्क् आच्छादने' (११२३) ऊर्णु । ऊर्णुवन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । अद्यतनी दि → त् । 'णि-श्रि-द्रु०' (३।४।५८) ङप्र० → अ । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 'लोकात्' (१।१।३) "ऊर्" पाठउ विश्लेविषइ । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) द्विः, पूर्वं 'निमित्ताभावे०' (न्या० सं० वक्ष० (१) / सूत्र(२९) ) णु० → नु०, ततो द्विः । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । 'स्वरादेस्तासु' (४।४।३१) वृद्धिः औ । 'णेरनिटि' (४।३।८३) णिग्लोपः ।

**[औरिरवत्]** ऊरु । ऊरुरिवाऽऽचरति । 'कर्तुः क्विप्, गल्भ-क्लीब-होडात्तु ङित्' (३।४।२५) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । ऊर्व्वन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० । 'लोकात्' (१।१।३) "ऊ" पाठउ विश्लेषियइ । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "रु"द्विः । 'उपान्त्यस्याऽस्यमानलोपि०' (४।२।३५) ह्रस्वः । 'असमानलोपे०' (४।१।६३) सनीव कार्यं भवति, तेन 'ओर्जा-ऽन्तस्था०' (४।१।६०) इ० कुरुताम् । 'स्वरादेस्तासु' (४।४।३१) वृद्धिः औ । 'णेरनिटि' (४।३।८३) णिग्लोपः ।

**[अततक्षत्]** (४।१।६३) सूत्रवत् ।

**[अचकमत]** (४।१।६३) सूत्रवत् ।

**[रिरमयिषति]** 'रमिं क्रीडायाम्' (९८९) रम् । रममाणं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'अमोऽकम्यमि-चमः' (४।२।२६) ह्रस्वः । रमयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'सन्यस्य' (४।१।५९) इ । इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अचकथत्]** (४।१।६३) सूत्रवत् ।

**[अददृषत्]** (४।१।६३) सूत्रवत् ।

**[अवीवदद्वीणां परिवादकेन]** (४।१।६३) सूत्रवत् ।।छ।।

**स्मृ-दृ-त्वर-प्रथ-म्रद-स्तृ-स्पशेरः ।।४।१।६५।।**

**[स्मृदृत्वरप्रथमदस्तृस्पशेः]** स्मृश्च दृश्च त्वरश्च प्रथश्च म्रदश्च स्तृश्च स्पशिश्च = स्मृदृत्वरप्रथम्रदस्तृस्पशि, तस्य ।

**[अः]** अ प्रथमा सि ।

**[असस्मरत्]** 'स्मृं चिन्तायाम्' (१८) स्मृ । स्मरन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । 'घटादेर्ह्रस्वो दीर्घस्तु वा ञि-णम्परे' (४।२।२४) ह्रस्वः । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० । द्विः । अनेन पूर्वस्य अ० । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अददरत्]** 'दृश् विदारणे' (१५३५) दृ । दृणन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । 'घटादेर्ह्रस्वो०' (४।२।२४) ह्रस्वः । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० । द्विः । अनेन पूर्वस्य अ० । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् । अत्र परत्वात् दीर्घो न भवति ।

**[अतत्वरत्]** 'ञित्वरिष् संभ्रमे' (१०१०) त्वर् । त्वरमाणं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'घटादेर्ह्रस्वो०' (४।२।२४) ह्रस्वः । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अपप्रथत्]** 'प्रथिष् प्रख्याने' (१००३) प्रथ् । प्रथमानं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'घटादेर्ह्रस्वो०' (४।२।२४) ह्रस्वः । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० । द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अमम्रदत्]** 'म्रदिष् मर्दने' (१००४) म्रद् । म्रदमानं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'घटादेर्ह्रस्वो०' (४।२।२४) ह्रस्वः । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अतस्तरत्]** 'स्तृग्श् आच्छादने' (१५२१) स्तृ । स्तृणन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० । द्विः । 'अघोषे शिटः' (४।१।४५) सलोपः । 'ह्रस्वः' (४।१+३९) ह्रस्वः । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 'णेरनिटि' (४।३।८३) णिग्लोपः ।

**[अपस्पशत्]** पशी (६८) - 'स्पशी बाधनग्रथनयोश्च' (६९) स्पशि(शी)ति सौत्रो धातुः । 'पषी बाधन-स्पर्शनयोः'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(९२६) इत्यस्य स्थाने+ पशी-स्पशी इति केचित् पठन्ति । 'स्पशिण् ग्रहण-श्लेषणयोः' (१८४२) इति यौजादिकस्य वा स्पश् । अस्पाशीत् कश्चित्, तमन्यः प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० । द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'अघोषे शिटः' (४।१।४५) सलोपः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

'स्पशिण् ग्रहण-श्लेषणयोः' (१८४२) स्पश् इत्यस्य तु अपस्पशत कश्चित्, तमन्यः प्रायुक्त । शेषं पूर्ववत् ॥छ॥

## वा वेष्ट-चेष्टः ॥४।१।६६॥

**[वा]** वा प्रथमा सि ।

**[वेष्टचेष्टः]** वेष्टश्च चेष्टश्च(ट् च) = वेष्टचेष्ट्, तस्य ।

**[अववेष्टत्, अविवेष्टत्]** 'वेष्टि वेष्टने' (६७३) वेष्ट् । वि(वे)ष्टमानं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० ।卐 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "वेष्ट्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन वे० → व० । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[अचचेष्टत्, अचिचेष्टत्]** 'चेष्टि चेष्टायाम्' (६७०) चेष्ट् । चेष्टमानं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० ।卐卐 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "चेष्ट्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन चे० → च० । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ॥छ॥

## ई च गणः ॥४।१।६७॥

**[ई]** ई प्रथमा सि, स्वतन्त्रत्वात् ।

**[च]** च प्रथमा सि ।

**[गणः]** गण् षष्ठी ङस् ।

**[अजीगणत्, अजगणत्]** 'गणण् संख्याने' (१८७४) गण । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'अतः' (४।३।८२) अलोपः । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु०' (३।४।५८) ङप्र० ।++ 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ग-होर्जः' (४।१।४०) ग० → ज० । अनेन ई विकल्पेन । 'णेरनिटि' (४।३।८३) णिग्(च्)लोपः । 'अड् धातोरादि०' (४।४।२९) अट् । गणेरदन्तत्वेन समानलोपित्वात् सन्वद्भावो दीर्घत्वं च न प्राप्नोतीतित्वविधिः ॥छ॥

## अस्याऽऽदेराः परोक्षायाम् ॥४।१।६८॥

**[अस्य]** अ षष्ठी ङस् । 'टा-ङसोरिन-स्यौ' (१।४।५) ङस् → स्य ।

---

+ उक्तं च धातुरत्नाकरे - पषी बाधनस्पर्शनयोः इति मूर्धन्यान्तः, तालव्यान्तः, दन्त्यान्तश्च आचार्यभेदेन ।

P. 卐 'आद्योऽश एकस्वरः' (४।१।२) "वे" द्विः ।

P. 卐卐 'आद्योऽश एकस्वरः' (४।१।२) "चे" द्विः ।

P. ++ 'आद्योऽश एकस्वरः' (४।१।२) "ग" द्विः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[आदेशः]** आदि षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) ए० । 'एदोद्भ्यां०' (१।४।३५) र० । आ प्रथमा सि ।

**[परोक्षायाम्]** परोक्षा सप्तमी ङि । 'आपो ङितां०' (१।४।१७) ङि० → याम् ।

**[आटतुः]** 'अट गतौ' (१९४) अट् । परोक्षा अतुस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "अट्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) टलुक् । अनेन अ० → आ० ।

**[आटुः]** अट् । परोक्षा उस् । शेषं 'आटतुः' वत् ।

**[आटिथ]** अट् । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "अट्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) टलुक् । 'स्क्रसृ-वृ-भृ-स्तु-द्रु-श्रु-स्रोर्व्यञ्जनादेः परोक्षायाः' (४।४।८१) इट् ।

**[आदतुः]** 'अदं भक्षणे' (१०५९) अद् । परोक्षा अतुस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "अद्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) दलुक् । अनेन अ० → आ० ।

**[आदुः]** अद् । परोक्षा उस् । शेषं 'आदतुः' वत् ।

**[आदिथ]** अद् । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "अद्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) दलुक् । 'ऋ-वृ-व्ये-ऽद इट्' (४।४।८०) इट् । अनेन अ० → आ० ।

**[ईयतुः]** 'इंण्क् गतौ' (१०७५) इ । परोक्षा अतुस् । द्विः मूलधातोः । 'इणः' (२।१।५१) इय् । 'समानानां०' (१।२।१) दीर्घः ।

**[ईयुः]** 'इंण्क् गतौ' (१०७५) इ । परोक्षा उस् । शेषं 'ईयतुः' वत् ।

**[पपाच]** (४।१।४२) सूत्रवत् ।

परोक्षायामिति उत्तरार्थः । अन्यस्मिन् प्रत्यये द्वित्वे सति पूर्वस्यासंभवात् ॥छ॥

### अनातो नश्चान्त ऋदाद्यशौ-संयोगस्य ॥४।१।६९॥

**[अनातः]** न विद्यते आत् स्थानित्वेन यस्य सः = अनात् । 'अन् स्वरे' (३।२।१२९) अन्, तस्य ।

**[नः]** न प्रथमा सि ।

**[च]** च प्रथमा सि ।

**[अन्तः]** अन्त प्रथमा सि ।

**[ऋदाद्यशौसंयोगस्य]** ऋत् आदिर्यस्याऽसौ ऋदादिः, ऋदादिश्च अशौश्च संयोगश्च = ऋदाद्यशौसंयोगम्, तस्य ।

**[आनृधतुः]** 'ऋधूट् वृद्धौ' (१३०६) ऋध् । परोक्षा अतुस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "ऋध्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । अनेन अकारस्य आ-नोन्तश्च ।

**[आनृधुः]** ऋध् । परोक्षा उस् । शेषं 'आनृधतुः' वत् ।

**[आनृजे]** 'ऋजि गतिस्थानार्जनोर्जनेषु' (६६४) ऋज् । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "ऋज्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । अनेन अकारस्य आ-नोन्तश्च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[आनृजाते] ऋज् । परोक्षा आते । शेषं 'आनृजे'वत् ।

[आनृजिरे] ऋज् । परोक्षा इरे । शेषं 'आनृजे' वत् ।

[आनशे] 'अशौटि व्याप्तौ' (१३१४) अश् । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "अश्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन अकारस्य आ-नोन्तश्च ।

[आनशाते] अश् । परोक्षा आते । शेषं 'आनशे' वत् ।

[आनशिरे] अश् । परोक्षा इरे । शेषं 'आनशे' वत् ।

[आनर्च] 'ऋचत् स्तुतौ' (१३४०) ऋच् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । अनेन अस्य आ-नोन्तश्च । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'र्हादर्ह-स्वरस्याऽनु नवा' (१।३।३१) द्वित्वम् ।

[आनृचतुः] ऋच् । परोक्षा अतुस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । अनेन अस्य आ-नोन्तश्च ।

[आनञ्ज] 'अञ्जौप् व्यक्ति-म्रक्षण-गतिषु' (१४८८) अञ्ज् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन आ-नोन्तश्च ।

[आनञ्जतुः] अञ्ज् । परोक्षा अतुस् । शेषं 'आनञ्ज' वत् ।

[आनङ्ग] उख (६३) - नख (६४) - णख (६५) - वख (६६) - मख (६७) - रख (६८) - लख (६९)- मखु (७०) - रखु (७१) - लघु (७२) - रिखु (७३) - इख (७४) - इखु (७५) - ईखु (७६) - वल्ग (७७) - रगु (७८) - लघु (७९) - तगु (८०) - श्रगु (८१) - श्लगु (८२) - 'अगु गतौ' (८३) अग् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "अङ्ग्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन आ-नोऽन्तश्च ।

[आनङ्गतुः] 'अगु गतौ' (८३) अग् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । परोक्षा अतुस् । शेषं 'आनङ्ग' वत् ।

[आनर्च्छ] 'ऋछत् इन्द्रियप्रलय-मूर्त्तिभावयोः' (१३४२) ऋछ् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । अनेन अस्य आ-नोऽन्तश्च । 'स्कृच्छृतोऽकि परोक्षायाम्' (४।३।८) गु० अर् ।

[आनर्च्छतुः] ऋछ् । परोक्षा अतुस् । शेषं 'आनर्च्छ' वत् ।

[आर] 'ऋंक् गतौ' (११३५) ऋ । 'ऋं प्रापणे च' (२६) ऋ । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "ऋ"द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

[आरतुः] ऋ । परोक्षा अतुस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "ऋ"द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'संयोगादृदर्त्तेः' (४।३।९) गु० अर् । 'समानानां०' (१।२।१) दीर्घः ।

[आश] 'अशश् भोजने' (१५५८) अश् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'समानानां०' (१।२।१) दीर्घः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[आशतुः]** अश् । परोक्षा अतुस् । शेषं 'आश' वत् ।

**[आट]** 'अट गतौ' (१९४) अट् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) टलुक् । 'अस्याऽऽदेराः परोक्षायाम्' (४।१।६८) आ । 'समानानां०' (१।२।१) दीर्घः ।

**[आटतुः]** अट् । परोक्षा अतुस् । शेषं 'आट' वत् ।

**[आञ्छ]** 'आछु आयामे' (१२३) आछ् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) आञ्छ् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । अनेन अ(आ) न स्यात्, यतः पूर्वं आकारत्वात् । 'अस्याऽऽदेराः परोक्षायाम्' (४।१।६८) अस्य आ । अग्रेप्येवम् ।

**[आञ्छतुः]** 'आछु आयामे' (१२३) आछ् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) आञ्छ् । परोक्षा अतुस् । शेषं आञ्छ' वत् ।

**[आनाञ्छ]** 'आछु आयामे' (१२३) आछ् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) आञ्छ् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । मतान्तरे अनेन आ-नोऽन्तश्च ।

**[आनाञ्छतुः]** 'आछु आयामे' (१२३) आछ् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) आञ्छ् । परोक्षा अतुस् । 'शेषं आनाञ्छ' वत् ।।छ।।

## भू-स्वपोरदुतौ ।।४।१।७०।।

**[भूस्वपोरदुतौ]** भूश्च स्वप् च, तयोः । अच्च उच्च अदुतौ ।

**[बभूव, बभूवतुः]** 'भू सत्तायाम्' (१) भू । परोक्षा णव्-अतुस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "भू"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भु० → बु० । अनेन उ० → अ० । 卐 'धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये' (२।१।५०) उव् । 'भुवो वः परोक्षा-ऽद्यतन्योः' (४।२।४३) उ० → ऊ ।

**[बभूवे चैत्रेण]** भू । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "भू" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भु० → बु० । अनेन उ० → अ० । 'धातोरिवर्णोवर्णस्येयुव्०' (२।१।५०) उव् । 'भुवो वः परोक्षा-ऽद्यतन्योः' (४।२।४३) उ० → ऊ० ।

**[अनुबभूवे कम्बलः साधुना]** भू, अनुपूर्व० । परोक्षा ए । शेषं 'बभूवे चैत्रेण' वत् ।

**[सुष्वाप]** 'ञिष्वपंक् शये' (१०८८) ष्वप् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्वप् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "स्वप्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन अकारस्य उ० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[सुष्वपिथ]** स्वप् । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन अ० → उ० । 'सृजि-दृशि-स्कृ-स्वराऽत्वतस्तृज्नित्यानिटस्थवः' (४।४।७८) इट् ।

**[बुभूषति]** 'भू सत्तायाम्' (१) भू । भवितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३)

---

卐 क्रियारत्नसमुच्चये - द्वित्वे वृद्धौ आवि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"भू"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भु० → बु० । 'ग्रह-गुहश्च सनः' (४।४।५९) इण्निषेधः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[बोभवाञ्चकार]** भू । भृशं पुनः पुनर्वा भवति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) "भू"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भु० → बु० । आ-गुणावन्यादेः' (४।१।४८) गु० ओ । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । परोक्षा णव् । 'धातोरनेकस्वरादाम् परोक्षायाः कृभ्वस्ति चानु तदन्तम्' (३।४।४६) णव्० → आम्० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'डुकृंग् करणे' (८८८) कृ । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "कृ"द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ॥छ॥

**ज्या-व्ये-व्यधि-व्यचि-व्यथेरिः ॥४।१।७१॥**

**[ज्याव्येव्यधिव्यचिव्यथेरिः]** ज्याश्च व्येश्च व्यधिश्च व्यचिश्च व्यथिश्च = ज्याव्येव्यधिव्यचिव्यथि, तस्य । इ प्रथमा सि ।

**[जिज्यौ]** 'ज्यांश् हानौ' (१५२४) ज्या । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । अनेन अस्य इ० । 'आतो णव औ' (४।२।१२०) णव्० → औ० । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ ।

**[जिज्यिथ]** ज्या । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । अनेन अ० → इ० । 'सृजि-दृशि-स्कृ०' (४।४।७८) इट् । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलोपः ।

**[संविव्याय]** 'व्येंग् संवरणे' (९९३) व्ये । य्वृद्बाधकमत्र इत्वम् । 'व्यस्थव् णवि' (४।२।३) न आत्वम् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । अनेन इकारस्यापि इ० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[संविव्ययिथ]** व्ये । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) इ० । अनेन इकारस्यापि इ० । 'ऋ-वृ-व्ये-ऽद इट्' (४।४।८०) इट् । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[विव्याध]** 'व्यधंच् ताडने' (११५७) व्यध् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । अनेन इ० ।

卐 **[विव्यधिथ]** व्यध् । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन इ० । इट् ।

**[विव्याच]** 'व्यचत् व्याजीकरणे' (१४३२) व्यच् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन इ० ।

**[विव्याच]** 'व्यचत् व्याजीकरणे' (१४३२)व्यच् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । अनेन इ० । 'व्यचोऽनसि' (४।१।८२) इति अग्रेतनस्य न य्वृत् कुटादित्वात् ङिद्वदिति न वाच्यं गणकृतस्यानित्यत्वात् ।

---

卐 क्रियारत्नसमुच्चये -विव्यधिथ - विव्यद्ध ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

卐 **[विव्यचिथ]** व्यच् । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'स्क्रसृ-वृ-भृ०' (४।४।८१) इट् । अनेन इ० ।

**[विव्यथे]** 'व्यथिष् भय-चलनयोः' (१००२) व्यथ् । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन इ० ।

**[विव्यथाते]** व्यथ् । परोक्षा आते । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन इ० ।

**[विव्यथिरे]** व्यथ् । परोक्षा इरे । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन इ० ।

**[वाव्यथ्यते]** व्यथ् । भृशं पुनः पुनर्वा व्यथते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) 'व्यथ्'द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।।छ।।

### यजादि-वश्-वचः सस्वरान्तस्था य्वृत् ।।४।१।७२।।

**[यजादिवश्वचः]** यज् आदिर्येषां ते = यजादयः, यजादयश्च वश् च वच् च = यजादिवश्वच्, तस्य ।

**[सस्वरान्तस्थाः]** सह स्वरेण वर्त्तत इति सस्वरा, सस्वरा चासौ अन्तस्था च (थाश्च) = सस्वरान्तस्थाः, प्रथमा सि ।

**[य्वृत्]** इश्च उश्च ऋच्च = य्वृत्, प्रथमा सि ।

**[इयाज]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । परोक्षा णव् । 'द्विर्धातुः परोक्षा ङे०' (४।१।१) "यज्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) जलुक् । अनेन य्वृत् य० → इ० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[इयजिथ]** यज् । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "यज्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) जलुक् । अनेन य्वृत् य० → इ० । 'सृजि-दृशि-स्कृ०' (४।४।७८) इट् ।

**[उवाय]** 'वेंग् तन्तुसन्ताने' (९९२) वे । परोक्षा णव् । 'वेर्वय्' (४।४।१९) "वय्" आदेशः । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन व० → उ० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[उवयिथ]** 'वेंग् तन्तुसन्ताने' (९९२) वे । परोक्षा थव् । 'वेर्वय्' (४।४।१९) "वय्" आदेशः । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'स्क्रसृ-वृ-भृ-स्तु०' (४।४।८१) इट् ।

**[उवाप]** 'डुवपीं बीजसन्ताने' (९९५) वप् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन व० → उ० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[उवपिथ]** वप् । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन व० → उ० । 'सृजि-दृशि-स्कृ०' (४।४।७८) इट् ।

**[उवाह]** 'वहीं प्रापणे' (९९६) वह् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्'

---

卐 धातुरत्नाकरे - विविचिथ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(४।१।४४) अनादिव्यञ्जनलोपः । अनेन व० → उ० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[उवहिथ]** वह् । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन व० → उ० । 'सृजि-दृशि-स्कृ०' (४।४।७८) इट् ।

**[उवाद]** 'वद व्यक्तायां वाचि' (९९८) वद् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन व० → उ० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[उवदिथ]** वद् । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन व० → उ० । 'स्क्रसृ-वृ-भृ-स्तु०' (४।४।८१) इट् ।

**[उवास]** 'वसं निवासे' (९९९) वस् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन व० → उ० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[उवसिथ]** वस् । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१० द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन व० → उ० । 'सृजि-दृशि-स्कृ०' (४।४।७८) इट् ।

**[उवाश]** 'वशक् कान्तौ' (११०१) वश् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन य्वृत् व० → उ० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[उवशिथ]** वश् । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन य्वृत् व० → उ० । 'स्क्रसृ-वृ-भृ-स्तु०' (४।४।८१) इट् ।

**[उवाच]** 'वचंक् भाषणे' (१०९६) वच् । 'ब्रूंगक् व्यक्तायां वाचि' (११२५) ब्रू । 'अस्ति-ब्रुवोर्भू-वचावशिति' (४।४।१) ब्रू० → "वच्" आदेशः । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "वच्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन य्वृत् व० → उ० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[उवचिथ]** वच् । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "वच्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । अनेन य्वृत् व० → उ० । 'सृजि-दृशि-स्कृ०' (४।४।७८) इट् ।

**[यायज्यते]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । भृशं पुनः पुनर्वा यजति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) "यज्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[वावच्यते]** 'वचंक् भाषणे' (१०९६) वच् । भृशं पुनः पुनर्वा वक्ति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) "वच्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।।छ।।

### न वयो य् ।।४।१।७३।।

**[न]** न प्रथमा सि ।

**[वयः]** वय् षष्ठी ङस् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[यु]** यु प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः ।

पूर्वस्येति निवृत्तमसंभवात् ।

**[ऊयतुः, ऊयुः]** 'वेंग् तन्तुसन्ताने' (९९२) वे । 'वेर्वय्' (४।४।१९) वे० → वय्० । परोक्षा अतुस्-उस् । 'यजादि-वचः किति' (४।१।७९) य्वृत् व० → उ० । 'यजादि-वश्-वचः सस्वरान्तस्था य्वृत्' (४।१।७२) इति य्वृत् प्राप्नोति यकारस्य त्वनेन निषेधः । द्वि० "उय्" । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) यलुक् । 'समानानां तेन दीर्घः । (१।२।१) दीर्घः ।।छ।।

## वेरयः ।।४।१।७४।।

**[वेः]** वे षष्ठी ङस् । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) ङस्० → र० ।

**[अयः]** न यु = अयु, तस्य ।

**[ववौ]** 'वेंग् तन्तुसन्ताने' (९९२) वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) वा । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "वा"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'आतो णव औ' (४।२।१२०) औ । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ ।

**[वविथ]** 'वेंग् तन्तुसन्ताने' (९९२) वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) वा । परोक्षा थव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "वा"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'सृजि-दृशि-स्कृ०' (४।४।७८) इट । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलोपः ।

**[उवाय]** 'वेंग् तन्तुसन्ताने' (९९२) वे । परोक्षा णव् । 'वेर्वय्' (४।४।१९) वे० → वय्० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "वय्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) यलुक् । 'यजादि-वश्०' (४।१।७२) य्वृत् व० → उ० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[उवयिथ]** 'वेंग् तन्तुसन्ताने' (९९२) वे । परोक्षा थव् । 'वेर्वय्' (४।४।१९) वे० → वय्० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "वय्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) यलुक् । 'यजादि-वश्०' (४।१।७२) य्वृत् व० → उ० । 'स्क्रसृ-वृ-भृ-स्तु-द्रु०' (४।४।८१) इट् ।।छ।।

## अविति वा ।।४।१।७५।।

**[अविति]** व् इत् अनुबन्धो यस्याऽसौ वित्, न वित् = अवित्, 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् ।

**[वा]** वा प्रथमा सि ।

**[ववतुः, ऊवतुः]** 'वेंग् तन्तुसन्ताने' (९९२) वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) वा । परोक्षा अतुस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "वा"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलोपः । अन्यत्र प्रथमं 'यजादि-वचेः०' (४।१।७९) य्वृत् वा० → उ० । द्विः "उ" । 'धातोरिवर्णोवर्णस्येयुव्०' (२।१।५०) उव् । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः ।

**[ववुः, ऊवुः]** वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) वा । परोक्षा उस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "वा"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'इडेत्-पुसि०' (४।३।९४) आलोपः । अन्यत्र प्रथमं 'यजादि-वचेः०' (४।१।७९) य्वृत् वा० → उ० । द्विः "उ" । 'धातोरिवर्णोवर्णस्येयुव्०' (२।१।५०) उव् । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[ऊयतुः, ऊयुः] वे । परोक्षा अतुस्-उस् । 'वेर्वय्' (४।४।१९) वे० → वय्० । 'यजादि-वचेः०' (४।१।७९) य्वृत् व० → उ० । 'यजादि-वश्-वचः०' (४।१।७२) इति य्वृत् प्राप्नोति यकारस्य तस्य 'न वयो य्' (४।१।७३) इत्यनेन निषेधः । द्वि० "उय्" । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) यलुक् । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः ।।छ।।

**ज्यश्च यपि** ।।४।१।७६।।

[ज्यः] ज्या षष्ठी ङस् । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः ।

[च] च प्रथमा सि ।

[यपि] यप् सप्तमी ङि ।

[प्रज्याय, उपज्याय] 'ज्यांश् हानौ' (१५२४) ज्या, प्र-उपपूर्व० । प्रज्यानं पूर्वम् । उपज्यानं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः । 'ज्या-व्यधः क्ङिति' (४।१।८१) इति य्वृत् प्राप्तेऽनेन प्रतिषेधः ।

[प्रवाय, उपवाय] 'वेंग् तन्तुसन्ताने' (९९२) वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) वा, प्र-उपपूर्व० । प्रवाणं पूर्वम् । उपवानं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।।छ।।

**व्यः** ।।४।१।७७।।

[व्यः] व्या षष्ठी ङस् । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः ।

[प्रव्याय, उपव्याय] 'व्येंग् संवरणे' (९९३) व्ये । 'आत् सन्ध्यक्षरस्य' (४।२।१) व्या, प्र-उपपूर्व० । प्रव्याणं पूर्वम् । उपव्यानं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० । 'अनञः क्त्वो यप्' (३।२।१५४) यप् ।।छ।।

**सं-परेर्वा** ।।४।१।७८।।

[संपरेः] सम् च परिश्च = संपरि, तस्मात् ।

[वा] वा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

[संव्याय, संवीय] 'व्येंग् संवरणे' (९९३) व्ये । 'आत् सन्ध्यक्षरस्य' (४।२।१) व्या, संपूर्व० । संव्यानं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'यजादि-वचेः किति' (४।१।७९) य्वृत् या० → इ० । 'दीर्घमवोऽन्त्यम्' (४।१।१०३) दीर्घः ।

[परिव्याय, परिवीय] 'व्येंग् संवरणे' (९९३) व्ये । 'आत् सन्ध्यक्षरस्य' (४।२।१) व्या, परिपूर्व० । परिव्यानं पूर्वम् । शेषं पूर्ववत् ।

निरपेक्षत्वेनान्तरङ्गत्वात् प्रागेव य्वृतो दीर्घत्वं, न तु तोऽन्तः ।।छ।।

**यजादि-वचेः किति** ।।४।१।७९।।

[यजादिवचेः] 卐 यजादयश्च वचिश्च = यजादिवचि, तस्य ।

P. 卐 यज् आदिर्यस्य सः = यजादिः, यजादिश्च वचिश्च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[किति]** क् इत् अनुबन्धो यस्याऽसौ कित्, तस्मिन् ।

नेति निवृत्तम्, प्राप्तेरभावात् ।

**[ईजतुः, ईजुः]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । परोक्षा अतुस्-उस् । अनेन य्वृत् य० → इ० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "इज्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) जलुक् । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः ।

**[इज्यते]** यज् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । अनेन य्वृत् य० → इ० ।

**[इज्यात्]** यज् । आशीः क्यात् → यात् । अनेन य्वृत् य० → इ० ।

**[इष्टः]** यज् । इज्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । अनेन य्वृत् य० → इ० । 'यज-सृज-मृज-राज-भ्राज-भ्रस्ज-व्रस्च-परिव्राजः शः षः' (२।१।८७) ज० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । प्रथमा सि ।

**[इष्टवान्]** यज् । यजति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । अनेन य्वृत् य० → इ० । 'यज-सृज-मृज०' (२।१।८७) ज० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[ईजिवान्]** यज् । इयाज । 'तत्र क्वसु-कानौ तद्वत्' (५।२।२) क्वसुप्र० → वस् । अनेन य्वृत् य० → इ० । 'घसेकस्वराऽऽतः क्वसोः' (४।४।८२) इट् । द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'समानानां०' (१।२।१) दीर्घः ।

**[इष्ट्वा]** यज् । यजनं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । अनेन य्वृत् य० → इ० । 'यज-सृज-मृज०' (२।१।८७) ज० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

**[इष्टिः]** यज् । यजनं = इष्टिः । 'श्वादिभ्यः' (५।३।९२) क्तिप्र० → ति । अनेन य्वृत् य० → इ० । 'यज-सृज--मृज-राज०' (२।१।८७) ज० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ऊयतुः]** 'वेंग् तन्तुसन्ताने' (९९२) वे । परोक्षा अतुस् । 'वेर्वय्' (४।४।१९) वय् । अनेन य्वृत् । द्वि० "उय्" । 'व्यञ्जन०' (४।१।४४) यलुक् । 'समानानां०' (१।२।१) दीर्घः ।

**[ऊयुः]** वे । परोक्षा उस् । शेषं 'ऊयतुः' वत् ।

**[ऊयते]** वे । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । अनेन य्वृत् । 'दीर्घश्च्वि-यङ्-यक्०' (४।३।१०८) दीर्घः ।

**[ऊयात्]** वे । आशीः क्यात्प्र० → यात् । अनेन य्वृत् । 'दीर्घश्च्वि-यङ्०' (४।३।१०८) दीर्घः ।

**[उतः]** वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) वा । ऊयते स्म । 'क्त-क्तवत्' (५।१।१७४) क्तप्र० → त । अनेन य्वृत् वा० → उ० । प्रथमा सि ।

**[उतवान्]** वे । वयति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । अनेन य्वृत् वा० → उ० । प्रथमा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादे०' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[संविव्यतुः]** 'व्येंग् संवरणे' (९९३) व्ये । 'आत् सन्ध्यक्षरस्य' (४।२।१) व्या, संपूर्व० । परोक्षा अतुस् । अनेन य्वृत् या० → इ० । द्विः । 'योऽनेकस्वरस्य' (२।१।५६) यत्वम् ।

**[संविव्युः]** 'व्येंग् संवरणे' (९९३) व्ये । 'आत् सन्ध्यक्षरस्य' (४।२।१) व्या, सम्पूर्व० । परोक्षा उस् । अनेन य्वृत् या० → इ० । द्विः । 'योऽनेकस्वरस्य' (२।१।५६) यत्वम् ।

**[संवीयते]** सम् 'व्येंग् संवरणे' (९९३) व्ये । 'आत् सन्ध्यक्षरस्य' (४।२।१) व्या । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । अनेन य्वृत् या० → इ० । 'दीर्घमवोऽन्त्यम्' (४।१।१०३) दीर्घः ।

**[संवीयात्]** सम् 'व्येंग् संवरणे' (९९३) व्ये । 'आत् सन्ध्यक्षरस्य' (४।२।१) व्या । आशीः क्यात् → यात् । अनेन य्वृत् या० → इ० । 'दीर्घमवोऽन्त्यम्' (४।१।१०३) दीर्घः ।

**[संवीतः]** सम्-व्या । संवीयते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । अनेन य्वृत् या० → इ० । 'दीर्घमवोऽन्त्यम्' (४।१।१०३) दीर्घः । प्रथमा सि ।

**[संवीतवान्]** सम्-व्या । संव्ययति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । अनेन य्वृत् या० → इ० । 'दीर्घमवोऽन्त्यम्' (४।१।१०३) दीर्घः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादे०' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[हूयते]** 'ह्वेंग् स्पर्धा-शब्दयोः' (९९४) ह्वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) ह्वा । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । अनेन य्वृत् वा० → उ० । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः ।

**[हूयात्]** ह्वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) ह्वा । आशीः क्यात्प्र० → यात् । अनेन य्वृत् वा० → उ० । 'दीर्घश्च्वि-यङ्-यक्०' (४।३।१०८) दीर्घः ।

**[हूतः]** ह्वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) ह्वा । हूयते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । अनेन य्वृत् वा० → उ० । 'दीर्घमवोऽन्त्यम्' (४।१।१०३) दीर्घः । प्रथमा सि ।

**[हूतवान्]** ह्वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) ह्वा । ह्वयति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । अनेन य्वृत् वा० → उ० । 'दीर्घमवोऽन्त्यम्' (४।१।१०३) दीर्घः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादे०' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[ऊपतुः]** 'डुवपीं बीजसन्ताने' (९९५) वप् । परोक्षा अतुस् । अनेन य्वृत् व० → उ० । 'द्विर्धातुः परोक्षा-ङे०'(४।१।१) "उप्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) पलुक् । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः ।

**[ऊपुः]** वप् । परोक्षा उस् । शेषं 'ऊपतुः' वत् ।

**[उप्यते]** वप् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । अनेन य्वृत् व० → उ० ।

**[उप्यात्]** वप् । आशीः क्यात्प्र० → यात् । अनेन य्वृत् व० → उ० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[उप्तः] वप् । वपति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । अनेन य्वृत् व० → उ० ।

[उप्तवान्] वप् । वपति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । अनेन य्वृत् व० → उ० ।

[ऊहतुः] 'वहीं प्रापणे' (९९६) वह् । परोक्षा अतुस् । अनेन य्वृत् व० → उ० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "उह्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) हलुक् । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः ।

[ऊहुः] वह् । परोक्षा उस् । शेषं 'ऊहतुः' वत् ।

[उह्यते] वह् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । अनेन य्वृत् व० → उ० ।

[उह्यात्] वह् । आशीः क्यात्प्र० → यात् । अनेन य्वृत् व० → उ० ।

[ऊढः] वह् । उह्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । अनेन य्वृत् व० → उ० । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) धस्य ढत्वम् । 'ढस्तड्ढे' (१।३।४२) ढलोपः - पूर्वस्य दीर्घः ।

[ऊढवान्] वह् । वहति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । अनेन य्वृत् व० → उ० । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) धस्य ढत्वम् । 'ढस्तड्ढे' (१।३।५२) ढलोपः - पूर्वस्य दीर्घः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादे०' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

[शूयते] 'ट्वोश्वि गति-वृद्ध्योः' (९९७) श्वि । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । अनेन य्वृत् उ० । 'दीर्घमवोऽन्त्यम्' (४।१।१०३) दीर्घः ।

[शूयात्] श्वि । आशीः क्यात्प्र० →यात् । अनेन य्वृत् उ० । 'दीर्घमवोऽन्त्यम्' (४।१।१०३) दीर्घः ।

[शूनः] श्वि । शूयते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । अनेन य्वृत् उ० । 'दीर्घमवोऽन्त्यम्' (४।१।१०३) दीर्घः । 'सूयत्याद्योदितः' (४।२।७०) त० → न० । प्रथमा सि ।

[शूनवान्] श्वि । श्वयति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । अनेन य्वृत् उ० । 'दीर्घमवोऽन्त्यम्' (४।१।१०३) दीर्घः । 'सूयत्याद्योदितः' (४।२।७०) त० → न० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादे०' (१।४।९०) दीर्घः । दीर्घङ्याब्० (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

[ऊदतुः] 'वद व्यक्तायां वाचि' (९९८) वद् । परोक्षा अतुस् । अनेन य्वृत् व० → उ० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "उद्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) दलुक् । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः ।

[ऊदुः] वद् । परोक्षा उस् । 'शेषं 'ऊदतुः' वत् ।

[उद्यते] वद् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । अनेन य्वृत् व० → उ० ।

[उद्यात्] वद् । आशीः क्यात्प्र० → यात् । अनेन य्वृत् व० → उ० ।

[उदितः] वद् । उद्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । अनेन य्वृत् व० → उ० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । प्रथमा सि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[उदितवान्]** वद् । वदति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । अनेन य्वृत् व० → उ० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादे०' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[ऊषतुः]** 'वसं निवासे' (९९९) वस् । परोक्षा अतुस् । अनेन य्वृत् व० → उ० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "उस्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) सलुक् । 'समानानां तेन दीर्घः' (१।२।१)दीर्घः । 'घस्-वसः' (२।३।३६) स० → ष० ।

**[ऊषुः]** वस् । परोक्षा उस् । शेषं 'ऊषतुः' वत् ।

**[उष्यते]** वस् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । अनेन य्वृत् व० → उ० । 'घस्-वसः' (२।३।३६) स० → ष० ।

**[उष्यात्]** वस् । आशीः क्यात्प्र० → यात् । अनेन य्वृत् व० → उ० । 'घस्-वसः' (२।३।३६) स० → ष० ।

**[उषितः, उषितवान्]** वस् । उष्यते स्म । वसति स्म । 'श्लिष-शीङ्-स्था-ऽऽस-वस-जन-रुह-जॄ- भजेः क्तः' (५।१।९) क्तप्र० → त । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । अनेन य्वृत् व० → उ० । 'क्षुध-वसस्तेषाम्' (४।४।४३) इट् । 'घस्-वसः' (२।३।३६) षत्वम् ।

**[ऊचतुः]** 'वचंक् भाषणे' (१०९६) वच् । 'ब्रूंग्क् व्यक्तायां वाचि' (११२५) ब्रू । 'अस्ति-ब्रुवोर्भू-वचावशिति' (४।४।१) वचादेशः । परोक्षा अतुस् । अनेन य्वृत् व० → उ० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "उच्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) चलुक् । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः ।

**[ऊचुः]** 'वचंक् भाषणे' (१०९६) वच् । 'ब्रूंग्क् व्यक्तायां वाचि' (११२५) ब्रू । 'अस्ति-ब्रुवोर्भू-वचावशिति' (४।४।१) वचादेशः । परोक्षा उस् । शेषं 'ऊचतुः' वत् ।

**[उच्यते]** वच् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । अनेन य्वृत् व० → उ० ।

**[उच्यात्]** वच् । आशीः क्यात्प्र० → यात् । अनेन य्वृत् व० → उ० ।

**[उक्तः]** वच् । उच्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । अनेन य्वृत् व० → उ० । 'च-जः क-गम्' (२।१।८६) च० → क० ।

**[उक्तवान्]** वच् । वक्ति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । अनेन य्वृत् व० → उ० । 'च-जः क-गम्' (२।१।८६) च० → क० ।

उत इति - क्विपि **उत् उतौ उत** इति, परमते तु **ऊः उवौ उवः**, ते हि 'दीर्घमवोऽन्त्यम्' (४।१।१०३) इत्यत्र अव इति न कुर्वन्ति ।

यौजादिकस्य तु न भवति-

**[वच्यते]** 'वचण् परिभाषणे' (१९५३) वच् । 'युजादेर्नवा' (३।४।१८) अत्र णिच् नागच्छति । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य ।

**[इयाज]** यज् । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "यज्" द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) जलुक् । 'यजादि-वश्-वचः सस्वरान्तस्था य्वृत्' (४।१।७२) य० → इ० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[यक्षीष्ट]** यज् । आशीः सीष्ट । 'यज-सृज-मृज-राज०' (२।१।८७) ज० → ष० । 'ष-ढोः कस्सि' (२।१।६२) ष० → क० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम्, क-षसंयोगे क्ष० ।

**[वावच्यते]** 'वचंक् भाषणे' (१०९६) वच् । भृशं पुनः पुनर्वा वक्ति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) ''व''द्विः । 'आ-गुणावन्यादेः' (४।१।४८) आ ।

**[वक्ता]** वच् । श्वस्तनी ता । 'च-जः क-गम्' (२।१।८६) च० → क० ।।छ।।

**स्वपेर्यङ्-ङे च** ।।४।१।८०।।

**[स्वपेः]** स्वपि षष्ठी ङस् ।

**[यङ्ङे]** यङ् च ङश्च = यङ्ङम्, तस्मिन् ।

**[सोषुप्यते, सोषुपीति]** 'ञिष्वपंक् शये' (१०८८) ष्वप् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्वप् । भृशं पुनः पुनर्वा स्वपिति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । अनेन य्वृत् व० → उ० । 'सन्-यङश्च' (४।१।३) ''सु''द्विः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । सोषुपीति इत्यत्र 'लुप्यय्वृल्लेनत्' (७।४।११२) इति य्वृत् इति य्वृतो (न)निषेधात् यङः स्थानित्वं 'यङ्-तु-रु-स्तोर्बहुलम्' (४।३।६४) ईत् ।

णिमन्तरेण ङस्यासंभवात् स्वपितेर्ण्यन्तो लभ्यते-

**[असूषुपत्]** स्वप् । स्वपन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । अद्यतनी दि → त् । 'णि-श्रि-द्रु-सु०' (३।४।५८) ङप्र० → अ । अनेन य्वृत् व० → उ० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 卐 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) ''सुप्''द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४)पलुक् । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः ऊ । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[सुषुपतुः]** स्वप् । परोक्षा अतुस् । अनेन य्वृत् व० → उ० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१)''सुप्''द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) पलुक् ।

**[सुप्यते]** स्वप् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । अनेन य्वृत् व० → उ० ।

**[सुप्यात्]** स्वप् । आशीः क्यात्प्र० → यात् । अनेन य्वृत् व० → उ० ।

**[सुषुप्सति]** स्वप् । स्वप्तुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'रुद-विद-मुष-ग्रह-स्वप-प्रच्छः सन् च' (४।३।३२) सन् कित् । कित्फलं अनेन य्वृत् । 'सन्-यङश्च' (४।१।३)''सु''द्विः । 'लघोरुपान्त्यस्य' (४।३।४) गुणो न भवति ।

**[असुषुपत्]** स्वप् ! स्वपनं = स्वापः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'स्वापमकरोत्' । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० → इ । 'त्रन्त्यस्वरादेः' (७।४।४३) अलोपः । अद्यतनी दि → त् । 'णि-श्रि-द्रु-सु०' (३।४।५८) ङप्र० । मतान्तरे अनेन य्वृत् । ''सु''द्विः । 'अड् धातोरादि०' (४।४।२९) अट् । 'णेर्रनिटि' (४।३।८३) णिग्(ज्)लोपः । समानलोपित्वान्न दीर्घः ।।छ।।

P. 卐 'आद्योऽंश एकस्वरः' (४।१।२) ''सु''द्विः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्या-व्यधः क्ङिति ॥४।१।८१॥

[ज्याव्यधः] ज्याश्च व्यध् च = ज्याव्यध्, तस्य ।

[क्ङिति] क् च ङ् च = क्ङौ, क्ङावितावनुबन्धौ यस्याऽसौ क्ङित्, तस्मिन् ।

[जिज्यतुः] 'ज्यांश् हानौ' (१५२४) ज्या । परोक्षा अतुस् । अनेन य्वृत् या० → इ० । द्विः । 'योऽनेकस्वरस्य' (२।१।५६) य० ।

[जीयते] ज्या । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । अनेन य्वृत् । 'दीर्घमवोऽन्त्यम्' (४।१।१०३) दीर्घः ।

[जीयात्] ज्या । आशीः क्यात्प्र० → यात् । अनेन य्वृत् । 'दीर्घमवोऽन्त्यम्' (४।१।१०३) दीर्घः ।

[जिनाति] ज्या । वर्त्त० तिव् । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । अनेन य्वृत् । 'दीर्घमवोऽन्त्यम्' (४।१।१०३) दीर्घः । 'प्वादेर्ह्रस्वः' (४।२।१०५) ह्रस्वः । 'शिदवित्' (४।३।२०) इत्यनेन अवित्शित् ङिद्वद् भवति, तत्फलमत्र य्वृत् ।

[जेजीयते] ज्या । भृशं पुनः पुनर्वा जिनाति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । अनेन य्वृत् । 'सन्-यङश्च' (४।१।३) "जि"द्विः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः ।

[जेजेति] ज्या । भृशं पुनः पुनर्वा जिनाति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । अनेन य्वृत् । 'सन्-यङश्च' (४।१।३) "जि"द्विः । 'आ-गुणावन्यादेः'(४।१।४८) गु० ए । 'दीर्घश्च्वि-यङ्-यक्०' (४।३।१०८) दीर्घः । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । वर्त्त० तिव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए ।

[विध्यते] 'व्यधंच् ताडने' (११५७) व्यध् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । अनेन य्वृत् ।

[विध्यात्] व्यध् । आशीः क्यात्प्र० → यात् । अनेन य्वृत् ।

[विद्धः] व्यध् । विध्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । अनेन य्वृत् । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ध० → द० ।

[विध्यति] व्यध् । वर्त्त० तिव् । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । अनेन य्वृत् ।

[वेविध्यते,वेवेद्धि] व्यध् । भृशं पुनः पुनर्वा विध्यति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । अनेन य्वृत् । 'सन्-यङश्च' (४।१।३) "वि"द्विः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । द्वितीये 'बहुलं लुप्' (३।४।१४) यङ्लुप् । लघोरुपान्त्यस्य (४।३।४) गु० ए ।

[ज्याता] ज्या । श्वस्तनी ता ।

[व्यद्धा] व्यध् । श्वस्तनी ता । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ध० → द० ॥छ॥

व्यचोऽनसि ॥४।१।८२॥

[व्यचः] व्यच् षष्ठी ङस् ।

[अनसि] न अस् = अनस्, तस्मिन् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[विचिता]** 'व्यचृत् व्याजीकरणे' (१४३२) व्यच् । विचतीति । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । इट् । प्रथमा सि । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८४) डा । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । अनेन य्वृत् ।

**[विचितुम्]** व्यचनाय । 'क्रियायां क्रियार्थायां तुम्-णकच् भविष्यन्ती' (५।३।१३) तुम् । इट् । अनेन य्वृत् ।

**[वेविच्यते]** व्यच् । भृशं पुनः पुनर्वा विचति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । अनेन य्वृत् । 'सन्-यङश्च' (४।१।३)"वि"द्विः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए ।

**[विचति]** व्यच् । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) शप्र० → अ । अनेन य्वृत् ।

**[ऊरुव्यचाः]** ऊरु-व्यच् । ऊरु विचतीति । 'अस्' (उणा० ९५२) अस्प्र० । कुटादित्वात् ङित्त्वम् ।।छ।।

### वशेरयङि ।।४।१।८३।।

**[वशेः]** वशि षष्ठी ङस् ।

**[अयङि]** न यङ् = अयङ्, तस्मिन् ।

**[उश्यते]** 'वशक् कान्तौ' (११०१) वश् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । अनेन य्वृत् व० → उ० ।

**[ऊशतुः]** वश् । परोक्षा अतुस् । अनेन य्वृत् व० → उ० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "उश्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) शलुक् । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः ।

**[उशितम्]** वश् । वशनम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । अनेन य्वृत् व० → उ० ।

**[उष्टः]** 卐 वश् । उश्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । अनेन य्वृत् । 'यज-सृज-मृज-राज-भ्राज-भ्रस्ज०' (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

**[उशन्ति]** वश् । वर्त्त० अन्ति । अनेन य्वृत् ।

**[वावश्यते]** वश् । भृशं पुनः पुनर्वा वष्टि । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३)+ "वश्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) शलुक् । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[वष्टि]** वश् । वर्त्त० तिव् । 'यज-सृज-मृज-राज-भ्राज०' (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।।छ।।

### ग्रह-व्रस्च-भ्रस्ज-प्रच्छः ।।४।१।८४।।

**[ग्रहव्रस्चभ्रस्जप्रच्छः]** ग्रहश्च व्रस्चश्च भ्रस्जश्च प्रच्छ् च = ग्रहव्रस्चभ्रस्जप्रच्छ्, तस्य ।

**[जगृहतुः]** 'ग्रहीश् उपादाने' (१५१७) ग्रह् । परोक्षा अतुस् । अनेन य्वृत् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१)

---

P. 卐 वश् । वर्त्त० तस् । अनेन य्वृत् । 'यज-सृज-मृज०' (२।१।८७) श० → ष० ।

P. + "व"द्विः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"गृह्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) हलुक् । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'ग-होर्जः' (४।१।४०) ग० → ज० ।

**[जगृहुः]** ग्रह् । परोक्षा उस् । शेषं 'जगृहतुः' वत् ।

**[गृह्यते]** ग्रह् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । अनेन य्वृत् ।

**[गृहीतः]** ग्रह् । गृह्णाति स्म । गृह्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'गृह्णोऽपरोक्षायां दीर्घः' (४।४।३४) दीर्घः ।

**[जिघृक्षति]** ग्रह् । ग्रहीतुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'रुद-विद-मुष-ग्रह-स्वप-प्रच्छः सन् च' (४।३।३२) कित्त्वम् । अनेन य्वृत् । 'सन्-यङश्च' (४।१।३) "गृह्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) हलुक् । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'सन्यस्य' (४।१।५९) इ । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'ग-ड-द-बादेश्चतुर्थान्तस्यैकस्वरस्याऽऽदेश्चतुर्थः स्ध्वोश्च प्रत्यये' (२।१।७७) ग० → घ० । 'ष-ढोः कस्सि' (२।१।६२) ढ० → क० । 'नाम्यन्तस्था०' (२।३।१५) स० → ष०, क-षसंयोगे क्ष० । वर्त्त० तिव् ।

**[गृह्णाति]** ग्रह् । वर्त्त० तिव् । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । अनेन य्वृत् । र-षृवर्णान्नो ण० (२।३।६३) न० → ण० ।

**[जरीगृह्यते]** ग्रह् । भृशं पुनः पुनर्वा गृह्णाति । 'व्यञ्जनादेरेकस्वराद्' (३।४।९) यङ्प्र० । अनेन य्वृत् । 'सन्-यङश्च' (४।१।३) "गृह्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) हलुक् । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'ऋमतां री' (४।१।५५) "री" आगमः । वर्त्त० ते ।

**[जरीगृहीति]** ग्रह् । भृशं पुनः पुनर्वा गृह्णाति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । अनेन य्वृत् । 'सन्-यङश्च' (४।१।३) "गृह्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) हलुक् । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । 'रि-रौ च लुपि' (४।१।५६) "री" आगमः । वर्त्त० तिव् । यङ्-तु-रु-स्तोर्बहुलम् (४।३।६४) ईत् ।

**[वृश्च्यते]** 'ओव्रस्चौत् छेदने' (१३४१) व्रस्च् । 'सस्य श-षौ' (१।३।६१) स० → श० । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । अनेन य्वृत् ।

**[वृक्णः]** व्रश्च् । वृश्च्यते स्म । क्तप्र० → त । 'सूयत्याद्योदितः' (४।२।७०) त० → न० । 'संयोगस्याऽऽदौ स्कोर्लुक्' (२।१।८८) श(स)लुक् । 'च-जः क-गम्' (२।१।८६) च० → क० । अनेन पूर्वं य्वृत्, पश्चात् सर्वं कार्यम् ।

**[वृश्चति]** व्रश्च् । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) शप्र० → अ । अनेन य्वृत् ।

**[वरीवृश्च्यते]** व्रश्च् । भृशं पुनः पुनर्वा वृश्चति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । अनेन य्वृत् । 'सन्-यङश्च' (४।१।३) वृश्च्द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'ऋमतां री' (४।१।५५) "री" आगमः । वर्त्त० ते ।

**[भृज्ज्यते]** 'भ्रस्जींत् पाके' (१३१६) भ्रस्ज् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । अनेन य्वृत् । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) सस्य द० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) दस्य ज० ।

**[भृष्टः]** भ्रस्ज् । भृज्ज्यते स्म । क्तप्र० → त । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) स० → द० । 'तवर्गस्य श्चवर्ग०'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१।३।६०) द० → ज० । 'यज-सृज-मृज-राज०' (२।१।८७) ज० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । अनेन य्वृत् ।

**[भृज्जति]** ℱ भ्रस्ज् । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) शप्र० → अ । अनेन य्वृत् । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) स० → द० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) द० → ज० ।

**[बरीभृज्ज्यते]** भ्रस्ज् । भृशं पुनः पुनर्वा भृज्जति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । अनेन य्वृत् । 'सन्-यङश्च' (४।१।३) "भृस्ज्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'ऋमतां री' (४।१।५५) "री" आगमः । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) स० → द० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) द० → ज० । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[पृच्छ्यते]** 'प्रछंत् ज्ञीप्सायाम्' (१३४७) प्रछ् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । अनेन य्वृत् ।

**[पिपृच्छिषति]** प्रछ् । प्रष्टुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । अनेन य्वृत् । 'सन्-यङश्च' (४।१।३) "पृच्छ्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'सन्यस्य' (४।१।५९) अ० → इ० । 'ऋ-स्मि-पूङञ्जशौ-कॄ-गॄ-दृ-धृ-प्रच्छः' (४।४।४८) इट् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् ।

**[पृष्टः]** प्रछ् । पृच्छ्यते स्म । क्तप्र० → त । अनेन य्वृत् । 'अनुनासिके च च्छ्वः शूट्' (४।१।१०८) च्छ्० → श० । 'यज-सृज-मृज-राज०' (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

**[पृच्छति]** प्रछ् । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) शप्र० → अ । अनेन य्वृत् ।

**[परीपृच्छ्यते]** प्रछ् । भृशं पुनः पुनर्वा पृच्छति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । अनेन य्वृत् । 'सन्-यङश्च' (४।१।३) "पृच्छ्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'ऋमतां री' (४।१।५५) "री" आगमः । वर्त्त० ते ।

**[पृच्छा]** प्रच्छनं = पृच्छा । 'भिदादयः' (५।३।१०८) अङ्प्र० → अ । अनेन य्वृत् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ग्रहीता]** ग्रह् । श्वस्तनी ता । इट् । 'गृह्णोऽपरोक्षायां दीर्घः' (४।४।३४) दीर्घः ।

**[वव्रश्चतुः]** व्रश्च् । परोक्षा अतुस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः ।

**[बभ्रज्जतुः]** भ्रस्ज् । परोक्षा अतुस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) स० → द० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) द० → ज० ।

**[पप्रच्छतुः]** प्रछ् । परोक्षा अतुस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः ।

---

P. ℱ भ्रस्ज् । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) शप्र० । अनेन य्वृत् । 'सस्य श-षौ' (१।३।६१) स० → श० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) श० → ज० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[प्रश्नः]** प्रछ् । प्रच्छनम् । 'यजि-स्वपि-रक्षि-यति-प्रच्छो नः' (४।३।८५) नप्र० । 'अनुनासिके च च्छ्-वः शूट्' (४।१।१०८) च्छ्० → श० ।

**[वाव्यक्तः]** 'व्यचत् व्याजीकरणे' (१४३२) व्यच् । भृशं पुनः पुनर्वा विचति(तः) । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । वर्त्त० तस् ।

**[वाव्यक्तिः]** व्यच् । वाव्यच्यात् । 'तिक्कृतौ नाम्नि' (५।१।७१) तिक्प्र० → ति । 'च-जः क-गम्' (२।१।८६) च० → क० ।

**[वावष्टः]** 'वशक् कान्तौ' (११०१) वश् । भृशं पुनः पुनर्वा वष्टि (उष्टः) । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्'( ४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । वर्त्त० तस् । 'यज-सृज-मृज-राज-भ्राज०' (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

**[वावष्टिः]** वश् । वावश्यात् । 'तिक्कृतौ नाम्नि' (५।१।७१) तिक्प्र० → ति । 'यज-सृज-मृज-राज-भ्राज-भ्रस्ज-व्रस्च-परिव्राजः शः षः' (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

**[वाव्रष्टः]** व्रश्च् । भृशं पुनः पुनर्वा व्र(वृ)श्चतः । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । वर्त्त० तस् ।

**[वाव्रष्टिः]** व्रश्च् । वाव्रश्च्यात् । 'तिक्कृतौ नाम्नि' (५।१।७१) तिक्प्र० → ति ।

**[बाभ्रष्टः]** भ्रस्ज् । भृशं पुनः पुनर्वा भ्र(भृ)ज्जतः । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'आ-गुणावन्यादेः' (४।१।४८) आ । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । वर्त्त० तस् ।

**[बाभ्रष्टिः]** भ्रस्ज् । बाभ्रज्ज्यात् । 'तिक्कृतौ नाम्नि' (५।१।७१) तिक्प्र० → ति । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) स० → द० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) द० → ज० । 'यज-सृज-मृज-राज०' (२।१।८७) ज० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

**[पाप्रष्टः]** प्रच्छ् । भृशं पुनः पुनर्वा प्र(पृ)च्छतः । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । वर्त्त० तस् । 'अनुनासिके०' (४।१।१०८) च्छ्० → श्० । 'यज-सृज-मृज-राज' (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

**[पाप्रष्टिः]** पाप्रच्छ्यात् । 'तिक्कृतौ नाम्नि' (५।१।७१) तिक्प्र० → ति ।

**["तस्यास्त्रयस्त्रीनपि विव्यधुः शरैः"]** 'व्यधंच् ताडने' (११५७) व्यध् । परोक्षा उस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ज्या-व्ये-व्यधि-व्यचि-व्यथेरिः' (४।१।७१) इ० ।।छ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**व्ये-स्यमोर्यङि** ॥४।१।८५॥

**[व्येस्यमोः]** व्येश्च स्यम् च = व्येस्यम्, तस्य (तयोः) ।

**[यङि]** यङ् सप्तमी ङि ।

**[वेवीयते]** 'व्येंग् संवरणे' (९९३) व्ये । 'आत् सन्ध्यक्षरस्य' (४।२।१) व्या । भृशं पुनः पुनर्वा व्ययति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । अनेन य्वृत् या० → इ० । 'सन्-यङश्च' (४।१।३) "वि"द्विः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए० । 卐 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । वर्त्त० ते ।

**[वेवयीति]** 'व्येंग् संवरणे' (९९३) व्ये । 'आत् सन्ध्यक्षरस्य' (४।२।१) व्या । भृशं पुनः पुनर्वा व्ययति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । अनेन य्वृत् या० → इ० । 'सन्-यङश्च' (४।१।३) "वि"द्विः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । वर्त्त० तिव् । 'यङ्-तु-रु-स्तोर्बहुलम्' (४।३।६४) ईत् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।३३) अय् ।

**[सेसिम्यते]** 'स्यमू शब्दे' (३८७) स्यम् । भृशं पुनः पुनर्वा स्यमति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । अनेन य्वृत् । 'सन्-यङश्च' (४।१।३) "सिम्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) मलुक् । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । वर्त्त० ते । 'कर्त्तर्यन०' (३।४।७१) शव् ।

**[सेसिमीति]** 'स्यमू शब्दे' (३८७) स्यम् । भृशं पुनः पुनर्वा स्यमति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । अनेन य्वृत् । 'सन्-यङश्च' (४।१।३) "सिम्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) मलुक् । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । यङ्लुपि 'यङ्-तु-रु-स्तोर्बहुलम्' (४।३।६४) ईत् । वर्त्त० तिव् ।

**[व्ययति]** व्ये । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'एदैतोऽयाय्' (१।२।२३) अय् ॥छ॥

**चायः की** ॥४।१।८६॥

**[चायः]** चाय् षष्ठी ङस् ।

**[की]** की प्रथमा सि ।

**[चेकीयते]** 'चायृग् पूजा-निशामनयोः' (९१७) चाय् । भृशं पुनः पुनर्वा चायति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । अनेन "की" आदेशः । 'सन्-यङश्च' (४।१।३) "की"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । वर्त्त ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[चेकीतः]** 'चायृग् पूजा-निशामनयोः' (९१७) चाय् । भृशं पुनः पुनर्वा चायेते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । अनेन "की" आदेशः । 'सन्-यङश्च' (४।१।३) "की"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । वर्त्त० तस् । दीर्घनिर्देशो यङ्लुबर्थः ॥छ॥

**द्वित्वे ह्वः** ॥४।१।८७॥

**[द्वित्वे]** द्वित्व सप्तमी ङि ।

P. 卐 'दीर्घमवोऽन्त्यम्' (४।१।१०३) दीर्घः ।

[ह्वः] ह्वा षष्ठी ङस् । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः ।

**[जुहाव]** 'ह्वेंग् स्पर्धा-शब्दयोः' (९९४) ह्वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) ह्वा । परोक्षा णव् । अनेन य्वृत् वा० → उ० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "हु"द्विः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[जुहुवतुः]** ह्वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) ह्वा । परोक्षा अतुस् । अनेन य्वृत् वा० → उ० । 'द्विर्धातुः परोक्षा-ङे०'(४।१।१) "हु"द्विः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये' (२।१।५०) उव् ।

**[जोहूयते]** ह्वे । भृशं पुनः पुनर्वा ह्वयति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । अनेन य्वृत् । 'सन्-यङश्च' (४।१।३) "हु"द्विः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । वर्त्त० ते ।

**[जुहूषति]** 卐 ह्वा । ह्वातुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । अनेन य्वृत् । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः । 'सन्-यङश्च' (४।१।३) "हू"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[जिह्वायकीयिषति]** ह्वा । ह्वयतीति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'ऐदैतोऽयाय्' (१।२।२३) आय् । ह्वायकमिच्छति । 'अमाव्ययात् क्यन् च' (३।४।२३) क्यन्प्र० → य । 'क्यनि' (४।३।११२) अ० → ई० । ह्वायकीयितुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) "ह्वा"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'सन्यस्य' (४।१।५९) इ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'अतः' (४।३।८२) अलोपः । षत्वम् ॥छ॥

## णौ ङ-सनि ॥४।१।८८॥

**[णौ]** णिग्(णि) सप्तमी ङि ।

**[ङसनि]** ङश्च सन् च = ङसन्, तस्मिन् ।

**[अजूहवत्]** 'ह्वेंग् स्पर्धा-शब्दयोः' (९९४) ह्वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) ह्वा । ह्वयन्तं प्रायुक्त । णिग्विषये णौ आगन्तुकामे सति मनसि धृते सतीत्यर्थ(:) अनेन य्वृत् वा० → उ० । णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु-कमः कर्त्तरि ङः' (३।४।५८) ङप्र० । 'भ्राज-भास-भाष-दीप-पीड-जीव-मील-कण-रण-बण-भण-श्रण-ह्वे-हेठ-लुट-लुप-लपां नवा' (४।२।३६) ह्रस्वः । 'आद्योऽश एकस्वरः' (४।१।२) "हु"द्विः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[जुहावयिषति]** ह्वा । ह्वयन्तं प्रायुक्तमिच्छति । णिग्विषयेऽनेन य्वृत् ततो णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । हावयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च'

---

P. 卐 ह्वा । ह्वातुमिच्छति । 'तुमर्हा०' (३।४।२१) सन्प्र० । अनेन वा० → उ० । 'सन्-यङश्च' (४।१।३) "हु"द्विः । 'ग-होर्जः' (४।१।३९) ह० → ज० । 'दीर्घमवोऽन्त्यम्' (४।१।१०३) दीर्घः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(४।१।३) "हु"द्विः । 'ग-होर्जः' (४।१।४०) ह० → ज० । इट् । गुणे सति अय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् ।

णाविति विषयसप्तमीति किम् ? णिविषय एवान्तरङ्गमपि यकारं(रागमं) बाधित्वा य्वृद्यथा स्यात् ।

**[ह्वाययति]** ह्वा । ह्वयन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'पा-शा-छा-सा-वे-व्या-ह्वो-यः' (४।२।२०) योऽन्तः । वर्त्त० तिव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।।छ।।

## श्वेर्वा ।।४।१।८९।।

**[श्वेः]** श्वि षष्ठी ङस् ।

**[वा]** वा प्रथमा सि ।

**[अशूशवत्, अशिश्वयत्]** 'ट्वोश्वि गति-वृद्ध्योः' (९९७) श्वि । श्वयन्तं प्रायुक्त । णिग्विषयेऽनेन वा य्वृत् वि० → उ० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । अद्यतनी दि → त् । 'ट्धे-श्वेर्वा' (३।४।५९) ङप्र० → अ । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "शु"द्विः । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'संयोगात्' (२।१।५२) इय् (?) । 'अड् धातोरादि०' (४।४।२९) अट्' ।

**[शुशावयिषति, शिश्वाययिषति]** श्वि । श्वयन्तं प्रयोक्तुमिच्छति । अनेन विकल्पे य्वृत् । णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ-ऐ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'एदैतोऽयाय्' (१।२।२३) आय् । शावयितुमिच्छति । श्वाययितुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) "शु"-"श्वि"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् ।

**[अशिश्वियत्]** श्वि । अद्यतनी दि → त् । 'ट्धे-श्वेर्वा' (३।४।५९) ङप्र० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "श्वि"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'संयोगात्' (२।१।५२) इय् । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[शिश्वयिषति]** श्वि । श्वयितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) "श्वि"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् ।।छ।।

## वा परोक्षा-यङि ।।४।१।९०।।

**[वा]** वा प्रथमा सि ।

**[परोक्षायङि]** परोक्षा च यङ् च = परोक्षायङ्, तस्मिन् ।

**[शुशाव, शिश्वाय]** श्वि । परोक्षा णव् → अ । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "शु" - "श्वि"द्विः । अनेन वा पूर्वं य्वृत् ततो द्विः । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ-ऐ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'एदैतोऽयाय्' (१।२।२३) आय् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अहं शुशव, शिश्वय]** श्वि । परोक्षा णव् । अनेन वा य्वृत् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "शु"-"श्वि"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ-ए । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[शुशुवतुः, शिश्वियतुः]** श्वि । परोक्षा अतुस् । अनेन वा य्वृत् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "शु"-"श्वि"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'संयोगात्' (२।१।५२) इय् । 'धातोरिवर्णो०' (२।१।५०) उव् ।

**[शुशविथ, शिश्वयिथ]** श्वि । परोक्षा थव् । 'स्क्रसृ-वृ-भृ-स्तु-द्रु-श्रु-स्रोर्व्यञ्जनादेः परोक्षायाः' (४।४।८१) इट् । शेषं पूर्ववत् ।

**[शोशूयते, शेश्वीयते]** श्वि । भृशं पुनः पुनर्वा श्वयति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । अनेन वा य्वृत् । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । 'सन्-यङश्च' (४।१।३) "शू"- "श्वी"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ-ए । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[शोशवीति, शेश्वयीति]** श्वि । भृशं पुनः पुनर्वा श्वयति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । अनेन वा य्वृत् । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । 'सन्-यङश्च' (४।१।३) "शू"-"श्वी"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ-ए । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । 'यङ्-तु-रु-स्तोर्बहुलम्' (४।३।६४) ईत् ।

अवित्परोक्षायां कित्त्वाद्यजादित्वेन प्राप्ते विति परोक्षायां यङि चाप्राप्ते विभाषा ॥छ॥

## प्यायः पी ॥४।१।९१॥

**[प्यायः]** प्याय् षष्ठी ङस् ।

**[पी]** पी प्रथमा सि ।

**[आपिप्ये]** 'स्फायैङ्' (८०४) - 'ओप्यायैङ् वृद्धौ' (८०५) प्याय्, आङ्पूर्व० । परोक्षा ए । अनेन प्याय्० → पी० । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) "पी"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'योऽनेकस्वरस्य' (२।१।५६) य० ।

**[आपिप्यिरे]** प्याय्, आङ्पूर्व० । परोक्षा इरे । अनेन प्याय्० → पी । 'द्विर्धातुःपरोक्षा-ङे०' (४।१।१) "पी"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'योऽनेकस्वरस्य' (२।१।५६) य० ।

**[पेपीयते]** प्याय् । भृशं पुनः पुनर्वा प्यायते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । अनेन प्याय्० → पी० । 'सन्-यङश्च' (४।१।३) "पी"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए ।

**[प्रपेपीयते]** प्याय्, प्रपूर्व० । भृशं पुनः पुनर्वा प्रप्यायते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । अनेन प्याय् → पी० । 'सन्-यङश्च' (४।१।३) "पी"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

दीर्घनिर्देशो यङ्लुबर्थः-

**[आपेपेति]** प्याय्, आङ्पूर्व० । भृशं पुनः पुनर्वा आप्यायते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । अनेन प्याय्० → पी० । 'सन्-यङश्च' (४।१।३) "पी"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । वर्त्त० तिव् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[आपेपीतः]** प्याय्, आङ्पूर्व० । भृशं पुनः पुनर्वा आप्यायेते । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । अनेन प्याय्० → पी० । 'सन्-यङश्च' (४।१।३) "पी"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । वर्त्त० तस् ।।छ।।

## क्तयोरनुपसर्गस्य ।।४।१।९२।।

**[क्तयोः]** क्त अवयवयोगात् क्तवतुरपि, क्तश्च क्तश्च = क्तौ, तयोः = क्तयोः । 'स्यादावसंख्येयः' (३।१।११९) एकशेषः । 'एद् बहुस्भोसि' (१।४।४) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[अनुपसर्गस्य]** न विद्यते उपसर्गो यस्याऽसौ अनुपसर्गस्तस्य ।

**[पीनं मुखम्]** प्याय् । प्यायते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।१) क्तप्र० । 'सूयत्याद्योदितः' (४।२।७०)त० → न० । अनेन पी० । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[पीनवन् मुखम्]** प्याय् । प्यायते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । 'सूयत्याद्योदितः' (४।२।७०) त० → न० । अनेन पी० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अनतो लुप्' (१।४।५९) सिलोपः ।

卐 **[प्याय्यते]** प्याय् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य ।

**[प्रप्यानो मेघः]** प्याय्, प्रपूर्व० । प्रप्यायते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः । 'व्यञ्जनान्तस्थाऽऽतोऽख्या-ध्यः' (४।२।७१) तस्य न०, सूयत्यादित्वाद्वा ।।छ।।

## आङोऽन्धूधसोः ।।४।१।९३।।

**[आङः]** आङ् षष्ठी ङस् ।

**[अन्धूधसोः]** अन्धुश्च ऊधस् च = अन्धूधसौ, तयोः = अन्धूधसोः, सप्तमी ओस् ।

**[आपीनोऽन्धुः]** आप्यायते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'सूयत्याद्योदितः' (४।२।७०) त० → न० । अनेन पी० ।

**[आपीनमूधः]** आप्यायते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'सूयत्याद्योदितः' (४।२।७०) त० → न० । अनेन पी० ।

अन्धुर्व्रणमूधसो वा पर्यायः, तर्हि ऊधोग्रहणं किमर्थः, अन्धुग्रहणेनैव तस्य संगृहीत्वात्, ना अन्धुग्रहणेनास्य विशेषणत्वं ऊध्म(स)द्वारेण छद्मपर्यायत्वं विशेषणत्वं वेति पृथगुपादानम् ।

**[प्रप्यानोऽन्धुः]** प्रप्यायते स्म । शेषं पूर्ववत् ।

**[परिप्यानमूधः]** परिप्यायते स्म । शेषं पूर्ववत् ।

**[आप्यानश्चन्द्रः]** आप्यायते स्म । क्तप्र० । 'व्यञ्जनान्तस्था०' (४।२।७१) त० → न० । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः ।

आङोन्धौ इति सिद्धे ऊधसग्रहणं बोधयति व्रणे विशेषणतया ऊधसि च पर्यायेण आपीन इति सिद्ध्यति, आङ एव नियमात् प्राप्यानमूधः इत्यत्र, अत्र पूर्वसूत्रादनुपसर्गस्येत्येवानुवर्त्तनीयम्, तेनाङ्पूर्वस्य प्यायः पीः, कथंभूतस्याङ ? अनुपसर्गस्य,

卐 बृहद्वृत्तौ - प्यायते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किमुक्तं भवति ? केवलस्येत्यर्थः, यद्वा गम्यमान एवकारसूत्रे द्रष्टव्यः सावधारणानि वाक्यानि भवन्त्येवकारो वा द्रष्टव्यः ।

**[प्राप्यानमूधः]** प्र-आङ् प्याय् । प्राप्यायते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० । 'सूयत्याद्योदितः' (४।२।७०) त० —> न० । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः इत्यत्राङन्तादुपसर्गान्न भवति ।

**[पीनोऽन्धु(:), पीनवानन्धु(:)]** प्यायते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० —> तवत् ।.'सूयत्याद्योदितः' (४।२।७०) त० —> न० । 'क्तयोरनुपसर्गस्य' (४।१।९२) "पी" आदेशः ।

**[आप्याय्यः]** आप्याय् । आप्यायते(नं) पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० । 'अनञः क्त्वो यप्' (३।२।१५४) यप् ॥छ॥

## स्फायः स्फी वा ॥४।१।९४॥

**[स्फायः]** स्फाय् षष्ठी ङस् ।

**[स्फी]** स्फी प्रथमा सि ।

**[वा]** वा प्रथमा सि ।

**[स्फीतः, स्फातः]** 'स्फायैङ् वृद्धौ' (८०४) स्फाय् । स्फायते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० । अनेन वा "स्फी" आदेशः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः ।

**[स्फीतवान्, स्फातवान्]** स्फाय् । स्फायते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० —> तवत् । अनेन वा "स्फी" आदेशः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः । शेषं पूर्ववत् ।

**[स्फातिः]** स्फायनं = स्फातिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० —> ति । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलोपः ।

**[स्फीति]** स्फायते स्म । क्तप्र० । स्फीत इवाचरति । 'कर्तुः क्विप्०' (३।४।२५) क्विप्प्र० । स्फीततीति । 'स्वरेभ्य इः' (उणा० ६०६) इप्र० ॥छ॥

## प्रसमः स्त्यः स्ती ॥४।१।९५॥

**[प्रसमः]**卐 प्रात् सम्=प्रसम्, तस्य ।

**[स्त्यः]** स्त्या षष्ठी ङस् । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः ।

**[स्ती]** स्ती प्रथमा सि ।

**[प्रसंस्तीतः]** 'ष्ट्यैं' (३९) - 'स्त्यैं सङ्घाते च' (४०) स्त्यै । 'आत् सन्ध्यक्षरस्य' (४।२।१) स्त्या, प्रसम्पूर्व० । प्रसंस्त्यायति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० । अनेन स्ती आदेशः ।

**[प्रसंस्तीतवान्]** स्त्या, प्रसम्पूर्व० । प्रसंस्त्यायति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० —> तवत् । अनेन स्ती आदेशः ।

**[संप्रस्त्यानः]** संप्रस्त्यायति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० —> त । 'व्यञ्जनान्तस्थाऽऽतोऽख्या-

P. 卐 प्रश्च सम् च = प्रसम्, तस्मात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ध्यः' (४।२।७१) त० → न० ।

**[संप्रस्त्यानवान्]** संप्रस्त्यायति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । 'व्यञ्जनान्तस्थाऽऽतोऽख्या-ध्यः' (४।२।७१) त० → न० ।

प्रपूर्वस्यैव इच्छन्ति अन्ये न प्रसमः समुदायस्य ।।छ।।

### प्रात् तश्च मो वा ।।४।१।९६।।

**[प्रात्]** प्र पञ्चमी ङसि ।

**[तः]** त् षष्ठी ङस् ।

**[च]** च प्रथमा सि ।

**[मः]** म प्रथमा सि ।

**[वा]** वा प्रथमा सि ।

**[प्रस्तीमः, प्रस्तीतः]** प्रस्त्यायति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । अनेन स्ती - तस्य मश्च विकल्पेन ।

**[प्रस्तीमवान्, प्रस्तीतवान्]** प्रस्त्यायति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । अनेन स्ती-तस्य मश्च विकल्पेन ।।छ।।

### श्यः शीर्द्रवमूर्त्तिस्पर्शे नश्चाऽस्पर्शे ।।४।१।९७।।

**[श्यः]** श्या षष्ठी ङस् । लुगाऽऽतोऽनापः (२।१।१०७) आलोपः ।

**[शी]** शी प्रथमा सि ।

**[द्रवमूर्त्तिस्पर्शे]** द्रवस्य मूर्त्तिः = द्रवमूर्त्तिः द्रवमूर्त्तिश्च स्पर्शश्च = द्रवमूर्त्तिस्पर्शम्, तस्मिन् ।

**[नः]** न प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[च]** च प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[अस्पर्शे]** न स्पर्शः = अस्पर्शस्तस्मिन् ।

**[शीनं घृतम्]** 'श्यैङ् गतौ' (६०६) श्यै । 'आत् सन्ध्यक्षरस्य' (४।२।१) श्या । श्यायते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । अनेन शी-तस्य नश्च । घृत प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[शीनवद् घृतम्]** श्यायते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । अनेन शी-तस्य नश्च ।

द्रवावस्थायाः काठिन्यं गतमित्यर्थः ।

स्पर्शे- **[शीतं वर्तते]** श्यायते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । अनेन शी० । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**एवं शीतो वायुः** गुणमात्रे तद्वति चार्थे स्पर्शविषयो भवति ।

**[संश्यानो वृश्चिकः]** संश्यायते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'व्यञ्जनान्तस्थाऽऽ-तोऽख्या-ध्यः' (४।२।७१) त० → न० । प्रथमा सि । वृश्चिकः । शीतेन सङ्कुचित इत्यर्थः ।।छ।।

**प्रतेः** ।।४।१।९८।।

**[प्रतेः]** प्रति पञ्चमी ङसि ।

**[प्रतिशीनः]** प्रति-श्या । प्रतिश्यायते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । अनेन शी-तस्य न० ।

**[प्रतिशीनवान्]** प्रतिश्यायते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । एतौ द्वावपि कर्त्तर्यागच्छतः, अनेन शी-तस्य न० । प्रतिपूर्वोऽयं रा(रो)गे वर्त्तते । पूर्वेणाप्राप्तौ वचनम् ।।छ।।

**वाऽभ्यवाभ्याम्** ।।४।१।९९।।

**[वा]** वा प्रथमा सि ।

**[अभ्यवाभ्याम्]** अभिश्च अवश्च = अभ्यवौ, ताभ्यां = अभ्यवाभ्याम्, पञ्चमी भ्याम् ।

पूर्वसूत्रेऽस्पर्श इति नोक्तं रोगेऽसंभवात्, अत्र तु अस्पर्शे-क्तयोस्तस्य नो भवति ।

**[अभिशीनः, अभिश्यानः]** अभि-श्या । अभिश्यायते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । अनेन शी-तस्य नश्च । द्वितीये 'व्यञ्जनान्तस्थाऽऽतोऽख्या-ध्यः' (४।२।७१) त० → न० ।

**[अभिशीनवान्, अभिश्यानवान्]** अभिश्यायते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । अनेन शी-तस्य नश्च । द्वितीये 'व्यञ्जनान्तस्थाऽऽतोऽख्या-ध्यः' (४।२।७१) त० → न० ।

**[अवशीनः, अवश्यानः]** अव-श्या । अवश्यायते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । अनेन शी-तस्य नश्च । द्वितीये 'व्यञ्जनान्तस्थाऽऽतोऽख्या-ध्यः' (४।२।७१) त० → न० ।

**[अवशीनवान्, अवश्यानवान्]** अवश्यायते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । अनेन शी-तस्य नश्च । द्वितीये 'व्यञ्जनान्तस्थाऽऽतोऽख्या-ध्यः' (४।२।७१) त० → न० ।

**[अभिशीनं, अभिश्यानं घृतम्]** अभि-श्या । अभिश्यायते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । अनेन शी-तस्य नश्च । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । घृत प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् ।

**[अवशीनं, अवश्यानं हिमम्]** अवश्यायते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । अनेन शी-तस्य नश्च ।

**[अभिशीतो वायुः]** स्पर्शत्वान्न नत्वम् ।

**[अभिश्यानो वायुः]** अभि-श्या । अभिश्यायते स्म । क्तप्र० । 'व्यञ्जनान्तस्थाऽऽतोऽख्या-ध्यः' (४।२।७१) त० → न० । स्पर्शेऽपि नत्वम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[संश्यानः]** संश्यायते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'व्यञ्जनान्तस्थाऽऽतोऽख्या-ध्यः' (४।२।७१) त० → न० ।

**[संश्यानवान्]** संश्यायते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । 'व्यञ्जनान्तस्थाऽऽतोऽख्या-ध्यः' (४।२।७१) त० → न० ।

**[अभिसंशीनः, अभिसंश्यानः]** अभिसंश्यायते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । मतान्तरेऽनेन विकल्पे शी-तस्य नश्च । द्वितीये 'व्यञ्जनान्तस्थाऽऽतोऽख्या-ध्यः' (४।२।७१) तस्य न० ।

**[अभिसंशीनवान्, अभिसंश्यानवान्]** अभिसंश्यायते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । मतान्तरेऽनेन विकल्पे शी-तस्य नश्च । द्वितीये 'व्यञ्जनान्तस्थाऽऽतोऽख्या-ध्यः' (४।२।७१) तस्य न० ।

**[अवसंशीनः, अवसंश्यानः]** अवसंश्यायते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । मतान्तरेऽनेन विकल्पे शी-तस्य नश्च । द्वितीये 'व्यञ्जनान्तस्थाऽऽतोऽख्या-ध्यः' (४।२।७१) त० → न० ।

**[अवसंशीनवान्, अवसंश्यानवान्]** अवसंश्यायते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । मतान्तरेऽनेन विकल्पे शी-तस्य नश्च । द्वितीये 'व्यञ्जनान्तस्थाऽऽतोऽख्या-ध्यः' (४।२।७१) त० → न० ।

तदाऽभ्यवाभ्यां तृतीया व्याख्येया ।

**[समभिश्यानः]** समभिश्यायते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'व्यञ्जनान्तस्थाऽऽतोऽख्या-ध्यः' (४।२।७१) त० → न० ।

**[समभिश्यानवान्]** समभिश्यायते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । 'व्यञ्जनान्तस्थाऽऽतोऽख्या-ध्यः' (४।२।७१) त० → न० ।

**[समवश्यानवान्]** समवश्यायते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । 'व्यञ्जनान्तस्थाऽऽतोऽख्या-ध्यः' (४।२।७१) त० → न० ।।छ।।

### श्रः शृतं हविः-क्षीरे ।।४।१।१००।।

**[श्रः]** श्रा षष्ठी ङस् । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः ।

**[शृतं]** शृत प्रथमा सि ।

**[हविःक्षीरे]** हविश्च क्षीरं च = हविःक्षीरम्, तस्मिन् ।

**[शृतं हविः, शृतं क्षीरं स्वयमेव]** 'सैं' (४५)- 'श्रैं पाके' (४६) श्रै । 'श्रांक् पाके' (१०६५) श्रा । श्रायति स्म वा हविः क्षीरं देवदत्तः, स एवं विवक्षिते नाहं श्रायामि-श्रामि, किन्तु श्रायते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । अनेन शृ० । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । यद्वा श्रायति स्म, श्राति स्म वा हविःक्षीरं स्वयमेव । 'गत्यर्था-ऽकर्मक-पिव-भुजेः' (५।१।११) क्तप्र० → त । श्राति-श्रायती हि अकर्मकौ कर्मकर्तृविषयस्य पचेरर्थे वर्त्त(र्त्त)ते, तयोश्चैतन्निपातनम्, अतो न कर्मकर्तरि आत्मनेपदं स्यात् ।

**[श्राणा यवागूः]** श्रायति स्म, श्राति स्म वा यवाग्वं चैत्रः, स एवं विवक्षते नाहं श्रायामि स्म, श्राति स्म वा, किन्तु श्रायते स्म यवागूः स्वयमेव । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'व्यञ्जनान्तस्थाऽऽतोऽख्या-ध्यः' (४।२।७१) त० → न० । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । 'आत्' (२।४।१८) आप्प्र० → आ ।।छ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**श्रपेः प्रयोक्त्रैक्ये** ॥४।१।१०१॥

**[श्रपेः]** श्रपि षष्ठी ङस् । 'ङित्यदिति' (१।४।२३) ए । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) र० ।

**[प्रयोक्त्रैक्ये]** एकस्य भावः कर्म वा = ऐक्यम् । 'पति-राजान्त-गुणाङ्ग-राजादिभ्यः कर्मणि च' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः । प्रयोक्तुरैक्यं = प्रयोक्त्रैक्यम्, तस्मिन् ।

**[शृतं हविश्चैत्रेण, शृतं क्षीरं चैत्रेण]** श्राति श्रायति वा हविः-क्षीरं वा स्वयमेव, तत् श्रान् श्रायद्वा चैत्रः प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'अर्त्ति-री-व्ली-ह्री-क्नूयि-क्ष्माय्यातां पुः' (४।२।२१) पोऽन्तः । 'घटादेर्ह्रस्वो दीर्घस्तु वा ञि-णम्परे' (४।२।२४) ह्रस्वः । श्रप्यते स्म । क्तप्र० । णिगा सह शृादेशोऽनेन ।

**[श्रपितं हविश्चैत्रेण मैत्रेण]** हविस् । श्रा(श्र)प्यते हविश्चैत्रेण, तत एवं विवक्षते न मया श्रप्यते, किन्तु श्रप्यते हविश्चैत्रेण मैत्रेण । द्वितीयो णिग् । 'णेरनिटि' (४।३।८३) प्रथमणिग्लोपः । श्रप्यते स्म । क्तप्र० । 'स्ताद्यशितो०' (४।४।३२) इट् । 'सेट्क्तयोः' (४।३।८४) णिग्लोपः ।

**[श्रपिता यवागूः]** श्राति स्म, श्रायति स्म वा यवागूः स्वयमेव सा श्राणवती चैत्रेण प्रयुज्यते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'अर्त्ति-री-व्ली-ह्री०' (४।२।२१) पोऽन्तः । 'घटादेर्ह्रस्वो दीर्घस्तु वा ञि-णम्परे' (४।२।२४) ह्रस्वः । श्रप्यते स्म । क्तप्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'सेट्क्तयोः' (४।३।८४) णिग्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ । यवागू प्रथमा सि ।।छ।।

**य्वृत् सकृत्** ॥४।१।१०२॥

**[य्वृत्]** इश्च उश्च ऋच्च = य्वृत् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलोपः ।

**[सकृत्]** एक । एको वारोऽस्य । 'एकात् सकृच्चास्य' (७।२।१११) सुच्प्र० सकृदादेशः । 'पदस्य' (२।१।८९) स्लोपः । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[संवीयते]** सम् 'व्येंग् संवरणे' (९९३) व्ये । 'आत् सन्ध्यक्षरस्य' (४।२।१) व्या । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'यजादि-वचेः किति' (४।१।७९) य्वृत् । 卐 'दीर्घमवोऽन्त्यम्'( ४।१।१०३) दीर्घः ।

**[विध्यते]** 'व्यधंच् ताडने' (११५७) व्यध् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'ज्या-व्यधः क्ङिति' (४।१।८१) य्वृत् इ० ।

**[विच्यते]** 'व्यचत् व्याजीकरणे' (१४३२) व्यच् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'व्यचोऽनसि' (४।१।८२) य्वृत् इ० ।

**[वेवीयते]** 'व्येंग् संवरणे' (९९३) व्ये । भृशं पुनः पुनर्वा व्ययति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'व्ये-स्यमोर्यङि' (४।१।८५) य्वृत् । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । 'सन्-यङश्च' (४।१।३) "वी"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । वर्त्त० ते ।

**[वेविध्यते]** 'व्यधंच् ताडने' (११५७) व्यध् । भृशं पुनः पुनर्वा विध्यति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'ज्या-व्यधः क्ङिति' (४।१।८१) य्वृत् । 'सन्-यङश्च' (४।१।३) "विध्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) धलुक् । 'आ-

P. 卐 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुणावन्यादेः' (४।१।४८) गु० ए । वर्त्त० ते ।

**[वेविच्यते]** 'व्यचत् व्याजीकरणे' (१४३२) व्यच् । भृशं पुनः पुनर्वा विचति । 'व्यञ्जनादेरेकस्वराद०' (३।४।९) यङ्प्र० । 'व्यचोऽनसि' (४।१।८२) य्वृत् । 'सन्-यङश्च' (४।१।३) "विच्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) यलुक् । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । वर्त्त० ते ।।छ।।

## दीर्घमवोऽन्त्यम् ।।४।१।१०३।।

**[दीर्घम्]** दीर्घ प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलोपः ।

**[अवः]** न वा = अवा । 'नञत्' (३।२।१२५) न० → अ०, तस्य = अवः । षष्ठी ङस् । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः ।

**[अन्त्यम्]** अन्त । अन्ते भवं = अन्त्यम् । 'दिगादिदेहांशाद् यः' (६।३।१२४) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । सि-अम् ।

**[जीनः]** 'ज्यांश् हानौ' (१५२४) ज्या । 卐 जिनाति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'ज्या-व्यधः क्ङिति' (४।१।८१) य्वृत् । अनेन दीर्घः । 'ॠ-ल्वादेरेषां तो नोऽप्रः' (४।२।६८) त० → न० ।

**[जीनवान्]** जिनाति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । 'ज्या-व्यध-क्ङिति' (४।१।८१) य्वृत् । अनेन दीर्घः । 'ॠ-ल्वादेरेषां तो नोऽप्रः' (४।२।६८) त० → न० ।

**[जिनाति]** ज्या । वर्त्त० तिव् । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'ज्या-व्यधः क्ङिति' (४।१।८१) य्वृत् । अनेन दीर्घः । 'प्वादेर्ह्रस्वः' (४।२।१०५) ह्रस्वः ।

**[संवीतः]** सम् 'व्येंग् संवरणे' (९९३) व्ये । 'आत् सन्ध्यक्षरस्य' (४।२।१) व्या । संवीयते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'यजादि-वचेः किति' (४।१।७९) य्वृत् इ० । अनेन दीर्घः ।

**[हूतः]** 'ह्वेंग् स्पर्धा-शब्दयोः' (९९४) ह्वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) ह्वा । हूयते स्म । क्तप्र० → त । 'यजादि-वचेः किति' (४।१।७९) य्वृत् । अनेन दीर्घः ।

**[शूनः]** 'ट्वोश्वि गति-वृद्ध्योः' (९९७) श्वि । शूयते स्म । क्तप्र० → त । 'यजादि-वचेः किति' (४।१।७९) य्वृत् । अनेन दीर्घः । 'सूयत्याद्योदितः' (४।२।७०) त० → न० ।

**[उतः]** 'वेंग् तन्तुसन्ताने' (९९२) वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) वा । ऊयते स्म । क्तप्र० । 'यजादि-वचेः किति' (४।१।७९) य्वृत् ।

**[उतवान्]** वयति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । 'यजादि०' (४।१।७९) य्वृत् ।

**[सुप्तः]** 'ञिष्वपंक् शये' (१०८८) ष्वप् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्वप् । स्वपिति स्म । 'ज्ञानेच्छा-ऽर्चार्थ-जीच्छील्यादिभ्यः क्तः' (५।२।९२) क्तप्र० → त । 'स्वपेर्यङ्-ङे च' (४।१।८०) य्वृत् व० → उ० ।

**[उप्तः]** 'डुवपीं बीजसंताने' (९९५) वप् । उप्यते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'यजादि-वचेः किति' (४।१।७९) य्वृत् व० → उ० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।।छ।।

P. 卐 जीयते स्म ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**स्वर-हन-गमोः सनि धुटि** ॥४।१।१०४॥

**[स्वरहनगमोः]** स्वरश्च हन् च (हनश्च) गमुश्च = स्वरहनगमु, तस्य ।

**[सनि]** सन् सप्तमी ङि ।

**[धुटि]** धुट् सप्तमी ङि ।

**[चिचीषति]** 'चिंग्ट् चयने' (१२९०) चि । चेतुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० → स । अनेन दीर्घः । 'सन्-यङश्च' (४।१।३) "ची"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् ।

**[नुनूषति]** 'णुक् स्तुतौ' (१०८१) णु । 'पाठे धात्वादेर्णो नः' (२।३।९७) नु । नवितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । अनेन दीर्घः । 'सन्-यङश्च' (४।१।३) "नू"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् ।

**[चिकीर्षति]** 'डुकृंग् करणे' (८८८) कृ । कर्तुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । अनेन दीर्घः । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'सन्-यङश्च' (४।१।३) किर्द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) रलुक् । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'भ्वादेर्नामिनो दीर्घो र्वोर्व्यञ्जने' (२।१।६३) दीर्घः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् ।

**[जिघांसति]** 'हनंक् हिंसा-गत्योः' (११००) हन् । हन्तुमिच्छति । सन्प्र० । अनेन दीर्घः । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) नलुक् । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'म्नां धुड्वर्गे०' (१।३।३९) अनुनासिकः (?) । ('शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः) ।

**[जिगांस्यते]** 'इंण्क् गतौ' (१०७५) इ । एतुमिच्छति । सन्प्र० । 'सनीङश्च' (४।४।२५) गमु० → गम्० । अनेन दीर्घः । 'सन्-यङश्च' (४।१।३)卐 द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) मलुक् । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'सन्यस्य' (४।१।५९) इ । इरूपसाम्यादिण्स्थानस्यापि' 'समो गमृच्छि-प्रच्छि०' (३।३।८४) इत्यस्य प्रवृत्तौ 'प्राग्वत्' (३।३।७४) इति प्रवर्त्तते । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य ।

**[संजिगांसते]** सम्-इ । समेतुमिच्छति । सन्प्र० । 'सनीङश्च' (४।४।२५) गमु० → गम्० । अनेन दीर्घः । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) मलुक् । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'सन्यस्य' (४।१।५९) इ । इरूपसाम्यादिण्स्थानस्यापि 'समो गमृच्छि-प्रच्छि०' (३।३।८४) इत्यस्य प्रवृत्तौ 'प्राग्वत्' (३।३।७४) इति प्रवर्त्तते । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[अधिजिगांस्यते माता]** अधि 'इंक् स्मरणे' (१०७४) इ । अध्येतुमिष्यते । सन्प्र० । 'सनीङश्च' (४।४।२५) इ० → "गमु" आदेशः । अनेन दीर्घः । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्'(४।१।४४) मलुक् । 'ग-होर्जः' (४।१।४०) ग० ज० । 'सन्यस्य' (४।१।५९) इ । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'अतः' (४।३।८२) अलोपः ।

**[अधिजिगांसते सूत्रम्]** अधि 'इंङ्क् अध्ययने' (११०४) इ । अध्येतुमिच्छति । सन्प्र० । 'सनीङश्च' (४।४।२५)

---

P. 卐 "गा" द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इ० → "गमु" आदेशः → गम् । अनेन दीर्घः । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) मलुक् । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'सन्यस्य' (४।१।५९) इ । वर्त्त० ते । 'कर्त्तर्य०' (३।४।७१) शव् । 'लुगस्या०' (२।१।११३) अलोपः ।

**[संजिगंसते वत्सो मात्रा]** 'गम्लृं गतौ' (३९६) गम् । संगन्तुमिच्छति । 'तुमर्हादिच्छायां' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जन०' (४।१।४४) मलुक् । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'सन्यस्य' (४।१।५९) इ । वत्स प्रथमा सि । मातृ तृतीया टा ।

**[जिगंस्यते]** 'इंण्क् गतौ' (१०७५) इ । एतुमिच्छति । शेषं पूर्ववत् ।

**[संजिगंसते]** समेतुमिच्छति । सन्प्र० । शेषं पूर्ववत् ।

**[अधिजिगंस्यते माता]** 'इंक् स्मरणे' (१०७४) इ, अधिपूर्व० । अध्येतुमिष्यते । सन्प्र० । शेषं पूर्ववत् ।

**[स्तुतः]** 'ष्टुंग्क् स्तुतौ' (११२४) ष्टु । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्तु । 'निमित्ताभावे नैमित्तिकस्याप्यभावः' (वक्षस्कार (१) /सूत्र (२९)) स्तु । स्तूयते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त ।

**[यियविषति]** 'युक् मिश्रणे' (१०८०) यु । यवितुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'इवृध-भ्रस्ज-दम्भ-श्रि-यूर्ण्णु-भर-ज्ञपि-सनि-तनि-पति-वृद्-दरिद्रः सनः' (४।४।४७) इट् । 'नामिनो०' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'सन्-यङश्च' (४।१।३) प्रथमं "यु"द्विः । 'ओर्जा-ऽन्तस्था-पवर्गेऽवर्णे' (४।१।६०) उकारस्य इ । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।।छ।।

### तनो वा ।।४।१।१०५।।

**[तनः]** तन् षष्ठी ङस् ।

**[वा]** वा प्रथमा सि ।

**[तितांसति, तितंसति]** 'तनूयी विस्तारे' (१४९९) तन् । तनितुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । अनेन वा दीर्घः । 'सन्-यङश्च' (४।१।३) "तान्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) नलुक् । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'सन्यस्य' (४।१।५९) इ । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः ।

**[तितनिषति]** तन् । तनितुमिच्छति । सन्प्र० । 'इवृध-भ्रस्ज-दम्भ-श्रि-यूर्ण्णु-भर-ज्ञपि-सनि-तनि-पति-वृद्-दरिद्रः सनः' (४।४।४७) इट् विकल्पः । 'सन्यस्य' (४।१।५९) इ ।

**[ततनिषति]** तन् । भृशं पुनः पुनर्वा तनोति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) "तन्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) नलुक् । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । ततनितुमिच्छति । सन्प्र० । 'इवृध-भ्रस्ज-दम्भ०' (४।४।४७) इट् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । ततांसति इत्यपि भवति इट्विकल्पत्वात् ।।छ।।

### क्रमः क्त्वि वा ।।४।१।१०६।।

**[क्रमः]** क्रम् षष्ठी ङस् ।

**[क्त्वि]** क्त्वा सप्तमी ङि । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलोपः ।

**[वा]** वा प्रथमा सि ।

**[क्रान्त्वा, क्रन्त्वा]** 'क्रमू पादविक्षेपे' (३८५) क्रम् । क्रमणं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनेन विकल्पेन दीर्घः ।

**[क्रमित्वा]** क्रम् । क्रमणं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'ऊदितो वा' (४।४।४२) इट् ।

**[प्रक्रम्य]** प्रक्रमणं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । अत्र त्वन्तरङ्गमपि दीर्घत्वं बाधित्वा प्रागेव यप्, एतच्च 'यपि चादो जग्ध्' (४।४।१६) इत्यत्र ज्ञापयिष्यते ।।छ।।

**अहन्-पञ्चमस्य क्वि-क्ङिति ।।४।१।१०७।।**

**[अहन्पञ्चमस्य]** न हा = अहा, अहा चासौ पञ्चमश्च = अहन्पञ्चमस्तस्य ।

**[क्विक्ङिति]** क् च ङ् च = क्ङौ, क्ङावितावनुबन्धो(धौ) यस्याऽसौ क्ङित्, क्विश्च क्ङिच्च = क्विक्ङित्, तस्मिन् ।

हन्वर्जनादुपदेशावस्थायां पञ्चमान्तो गृह्यते, तेन सुगण् इत्यत्र अदन्तत्वादुपदेशे न भवन्ति ।

**[प्रशान्]** 'शमू उपशमे' (१२३०) शम्, प्रपूर्व० । प्रशाम्यतीति क्विप् । 'मो नो म्वोश्च' (२।१।६७) मस्य नकारः । 'नाम्नो नोऽनह्नः' (२।१।९१) इति परे नकारलोपकार्ये कर्त्तव्येऽसत् वेदितव्यः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेन दीर्घः ।

**[प्रतान्]** 'तमूच् काङ्क्षायाम्' (१२३२) तम्, प्रपूर्व० । प्रताम्यतीति क्विप् । 'मो नो म्वोश्च' (२।१।६७) मस्य नकारः । 'नाम्नो नोऽनह्नः' (२।१।९१) इति परे नकारलोपकार्ये कर्त्तव्येऽसत् वेदितव्यः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेन दीर्घः ।

**[प्रदान्]** 'दमूच् उपशमे' (१२३१) दम्, प्रपूर्व० । प्रदाम्यतीति क्विप् । 'मो नो म्वोश्च' (२।१।६७) मस्य नकारः । 'नाम्नो नोऽनह्नः' (२।१।९१) इति परे नकारलोपकार्ये कर्त्तव्येऽसत् वेदितव्यः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेन दीर्घः ।

**[प्रशामौ]** प्रशाम्यत इति क्विप् । अनेन सर्वत्र दीर्घः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । औ ।

**[प्रतामौ]** प्रताम्यत इति क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । औ ।

**[प्रदामौ]** प्रदाम्यत इति क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । औ ।

**[शान्तः]** शाम्यति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । अनेन दीर्घः ।

**[शान्तवान्]** शाम्यति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । अनेन दीर्घः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[शान्त्वा]** शमनं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । अनेन दीर्घः ।

**[शान्तिः]** शमनं = शान्तिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । अनेन दीर्घः ।

**[तान्तः]** ताम्यति स्म । क्तप्र० । अनेन दीर्घः ।

**[दान्तः]** दाम्यति स्म । क्तप्र० । अनेन दीर्घः ।

**[शंशान्तः]** शम् । भृशं पुनः पुनर्वा 卐 शाम्यतः । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३)

---

P. 卐 शाम्यति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्विः । 'मुरतोऽनुनासिकस्य' (४।१।५१) मोऽन्तः । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । अनेन दीर्घः । वर्त्त० तस् । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) म० → न० ।

**[तन्तान्तः]** तम् । भृशं पुनः पुनर्वा ताम्यतः । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'मुरतोऽनुनासिकस्य' (४।१।५१) मोऽन्तः । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । अनेन दीर्घः । वर्त्त० तस् । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) म० → न० ।

**[दन्दान्तः]** दम् । भृशं पुनः पुनर्वा दाम्यतः । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'मुरतोऽनुनासिकस्य' (४।१।५१) मोऽन्तः । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । अनेन दीर्घः । वर्त्त० तस् । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) म० → न० ।

**[ओदनपक्]** ओदन 'डुपचींष् पाके' (८९२) पच् । ओदनं पचतीति क्विप् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'च-जः क-गम्' (२।१।८६) च० → क० ।

**[पक्त्वा]** पचनं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'च-जः क-गम्' (२।१।८६) च० → क० ।

**[वृत्रहणि]** वृत्र 'हनंक् हिंसा-गत्योः' (११००) हन् । वृत्रं हतवान् । 'ब्रह्म-भ्रूण-वृत्रात् क्विप्' (५।१।१६१) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । सप्तमी ङि → इ । 'कवर्गैकस्वरवति' (२।३।७६) न० → ण० ।

**[भ्रूणहनि]** भ्रूण 'हनंक् हिंसा-गत्योः' (११००) हन् । भ्रूणं हतवान् । 'ब्रह्म-भ्रूण-वृत्रात् क्विप्' (५।१।१६१) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । सप्तमी ङि → इ ।

**[गन्ता]** गम् । गच्छतीति । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । प्रथमा सि । 'ऋदुदनस्-पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८४) डा → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) म० → न० ।

**[यम्यते]** 'यमूं उपरमे' (३८६) यम् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य ।

**[यंयम्यते]** यम् । भृशं पुनः पुनर्वा यच्छति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'मुरतोऽनुनासिकस्य' (४।१।५१) मोऽन्तः । वर्त्त० ते ।

**[कामति]** कम् । कमिवाऽऽचरति । 'कर्तुः क्विप्०' (३।४।२५) क्विप्प्र० । मतान्तरे अनेन दीर्घः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव् (३।४।७१) शव् ।

**[शामति]** शम् । शमिवाऽऽचरति । 'कर्तुः क्विप्०' (३।४।२५) क्विप्प्र० । मतान्तरेऽनेन दीर्घः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[कीमति]** किम् । किमिवाऽऽचरति । 'कर्तुः क्विप्०' (३।४।२५) क्विप्प्र० । मतान्तरेऽनेन दीर्घः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[इदामति]** इदम् । इदमिवाऽऽचरति । 'कर्तुः क्विप्०' (३।४।२५) क्विप्प्र० । मतान्तरेऽनेन दीर्घः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।।छ।।

## अनुनासिके च च्छ्-वः शूट् ।।४।१।१०८।।

**[अनुनासिके]** अनुनासिक सप्तमी ङि ।

**[च्छ्वः]** च्छ् च व् च = च्छ्व्, तस्य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[शूट्] श् च ऊट् च, 卐 तत् ।

[प्रश्नः] 'प्रछंत् ज्ञीप्सायाम्' (१३४७) प्रछ् । प्रच्छनं = प्रश्नः । 'यजि-स्वपि-रक्षि-यति-प्रच्छो नः' (५।३।८५) नप्र० । अनेन छ० → श० ।

[विश्नः] 'विछत् गतौ' (१३४३) विछ् । विच्छनं = विश्नः । 'विच्छो नङ्' (५।३।८६) नङ्प्र० → न । अनेन छ० → श० । छस्य द्विःपाठत् द्वयोरपि शकारः, अपिशब्दात् केवलस्य, तेन 'वाछु इच्छायाम्' (१२२) इत्यस्य वान्, वांशौ, वांश इत्यादि सिद्धम्, सूत्रे द्विच्छकारपाठत् केवलस्य न स्यादिति न वाच्यम्, छ् च च्छ् चेति कृते 'पदस्य' (२।१।८९) इत्यनेन एकस्य लोपे निमित्ताभावेन चस्य छत्वे 'अघोषे०' (१।३।५०) इत्यनेन छस्य चत्वे च च् छ् इति साधितत्वात्, यद्वा पूर्वं द्विः च्छकारः द्वितीयस्तु लघु ततः च्छ् च छ् चेति कृते 'पदस्य' (२।१।८९) इति लघुछकारस्य लुक्, तदा निमित्ताभाव इत्यादि न क्रियते ।

[शब्दप्राट्] शब्द 'प्रछंत् ज्ञीप्सायाम्' (१३४७) प्रछ् । शब्दं पृच्छतीत्येवंशीलः ।

[शब्दप्राशौ] शब्दं पृच्छत इत्येवंशीलौ । 'दिद्युद्-ददृद्-जगज्जुहू-वाक्-प्राट्-धी-श्री-द्रू-स्रू-ज्वायतस्तू-कटप्रू-परिव्राड्-भ्राजादयः क्विप्' (५।२।८३) क्विप् निपातनात् य्वृदभावो दीर्घत्वं च । अनेन छ० → श० ।

[गोविट्] गो 'विछत् गतौ' (१३४३) विछ् । गां विच्छतीति ।

[गोविशौ] गां विच्छत इति ।

[पृष्टः] 'प्रछंत् ज्ञीप्सायाम्' (१३४७) प्रछ् । पृच्छति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । अनेन छ० → श० । 'यज-सृज-मृज-राज०' (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् ।

[पृष्टवान्] पृच्छति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । अनेन छ० → श० । 'यज-सृज-मृज०' (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् ।

[प्रष्टा] पृच्छतीति । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । अनेन छ० → श० । 'यज-सृज-मृज०' (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । प्रथमा सि । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८७) सि० → डा० → आ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

[प्रष्टुम्] प्रच्छनाय । 'क्रियायां क्रियार्थायां तुम् णकच् भविष्यन्ती' (५।३।१३) तुमप्र० । अनेन छ० → श० । 'यज-सृज-मृज०' (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

[स्योमा] 'षिवूच् उतौ' (११६४) षिव् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सिव् । सीव्यतीति । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) मन्प्र० । अनेन व० → ऊट् । 'इवर्णादेरस्वे स्वरे य-व-र-लम्' (१।२।२१) यत् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः ।

[स्योनः] सिव् । सीव्यतीति स्योनः । 'प्या-धा-पन्यनि-स्वदि-स्वपि-वस्यज्यति-सिविभ्यो नः' (उणा० २५८) नप्र० । अनेन व० → ऊट् । 'इवर्णादेरस्वे०' (१।२।२१) यत् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ ।

[अक्षद्यूः] अक्ष 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव् । अक्षान् दीव्यतीति । क्विप् । अनेन

P. 卐 शूट् प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलुप् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व० → ऊट् । 'इवर्णादेरस्वे०' (१।२।२१) यत् ।

卐 **[हिरण्यष्ठ्यूः]** 'ष्ठिवू निरसने' (११६६) ष्ठिव् । हिरण्यं हिरण्येन वा ष्ठीव्यतीति क्विप् । अनेन व० → ऊट् । 'इवर्णादेरस्वे०' (१।२।२१) यत् ।

**[द्यूतः]** दिव् । दीव्यति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । अनेन व० → ऊट् । 'इवर्णादेरस्वे०' (१।२।२१) यत् ।

**[द्यूतवान्]** दिव् । दीव्यति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । अनेन व० → ऊट् । 'इवर्णादेरस्वे०' (१।२।२१) यत् ।

**[दुद्यूषति]** दिव् । देवितुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । अनेन व० → ऊट् । 'इवर्णादेरस्वे०' (१।२।२१) यत् । 'सन्-यङश्च' (४।१।३) "द्यू"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) यलुक् । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

वकारस्य विकल्पेनानुनासिकत्वाद्वन्-क्वनिपोः-

**[सुस्योवा, सुसेवा]** सु 'षिवूच् उतौ' (११६४) षिव् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सिव् । सुष्ठु सीव्यतीति । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) वन्प्र० । अनेन व० → ऊट् । 'इवर्णादेरस्वे०' (१।२।२१) यत् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । पक्षे सुसेवा । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) वलोपः ।

**[सुस्यूवा, सुसित्वा]** सु 'षिवूच् उतौ' (११६४) षिव् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सिव् । सुष्ठु सीव्यतीति । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) क्वनिप्प्र० → वन् । अनेन व० → ऊट् । 'इवर्णादेरस्वे०' (१।२।२१) यत् । पक्षे सुसित्वा । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) वलुक् । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः ।

**[द्युभ्याम्]** 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव् । दीव्यतीति । 'दिवेर्डिव्' (उणा० ९४९) डिद् इव्प्र० । तृतीया भ्याम् । 'उः पदान्तेऽनूत्' (२।१।११८) व० → उ० । 'इवर्णादेरस्वे०' (१।२।२१) यत् ।

**[द्युभिः]** दिव् । दीव्यतीति । 'दिवेर्डिव्' (उणा० ९४९) डिद् इव्प्र० । तृतीया भिस् । 'उः पदान्तेऽनूत्' (२।१।११८) व० → उ० । 'इवर्णादेरस्वे०' (१।२।२१) यत् ।

**[द्यूभ्याम्]** 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव् । दीव्यतीति क्विप् । अनेन व० → ऊट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । भ्याम् सानुबन्धकत्वात् दिव ऊटि कृते 'उः पदान्तेऽनूत्' (२।१।११८) इति न भवति ।

**[द्यूभिः]** दिव् । दीव्यतीति क्विप् । अनेन व० → ऊट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । भिस् सानुबन्धकत्वात् दिव ऊटि कृते 'उः पदान्तेऽनूत्' (२।१।११८) इति न भवति ।

**[देद्योति]** दिव् । भृशं पुनः पुनर्वा दीव्यति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । 'बहुलं लुप्' (३।४।१४) यङ्लुप्, ततो द्विः । अनेन व० → ऊट् । वर्त्त० तिव् ।

**[देद्योषि]** दिव् । भृशं पुनः पुनर्वा दीव्यति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । 'बहुलं लुप्' (३।४।१४) यङ्लुप्, ततो द्विः । अनेन व० → ऊट् । वर्त्त० सिव् ।

**[सेष्योति]** सिव् । भृशं पुनः पुनर्वा सीव्यति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । 'बहुलं लुप्' (३।४।१४) यङ्लुप्, ततो द्विः । अनेन व० → ऊट् । वर्त्त० तिव् ।

卐 मध्यमवृत्तौ - बृहद्वृत्तौ च "हिरण्यद्यूः" ।

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

**[सेष्योषि]** सिव् । भृशं पुनः पुनर्वा सीव्यति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । 'बहुलं लुप्' (३।४।१४) यङ्लुप्, ततो द्विः । अनेन व० → ऊट् । वर्त्त० सिव् ।

**[देद्यूतः]** दिव् । भृशं पुनः पुनर्वा दीव्यति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । 'बहुलं लुप्' (३।४।१४) यङ्लुप्, ततो द्विः । अनेन व० → ऊट् । वर्त्त० तस् ।

**[सेष्यूतः]** सिव् । भृशं पुनः पुनर्वा सीव्यति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । 'बहुलं लुप्' (३।४।१४) यङ्लुप्, ततो द्विः । अनेन व० → ऊट् । वर्त्त० तस् ।

अन्ये तु "देदेति", "सेसेति" इत्येवमिच्छन्ति, तन्मतसंग्रहार्थः क्ङितीत्यनुवर्त्तनीयम् । यजादिसूत्रे च छग्रहणं विधेयं प्रष्टा(टे)त्यस्यार्थम्, टकार 'ऊटा' (१।२।१३) इत्यत्र विशेषणार्थः ।।छ।।

**मव्यवि-श्रिवि-ज्वरि-त्वरेरुपान्त्येन** ।।४।१।१०९।।

**[मव्यविश्रिविज्वरित्वरेः]** मविश्च अविश्च श्रिविश्च ज्वरिश्च त्वरिश्च = मव्यविश्रिविज्वरित्वरि, तस्य ।

**[उपान्त्येन]** उपगतोऽन्त्य उपान्त्यः, तेन ।

**[मोमा]** 'मुर्वै' (४७९) - 'मव बन्धने' (४८०) मव् । मवतीति मोमा । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) मन्प्र० । अनेन अकारेण सह वस्य ऊट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[मूः]** मवतीति क्विप् । अनेन अकारेण सह वस्य ऊट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'सो रुः' (२।१।७२) र० ।

**[मुवौ]** मवत इति क्विप् । अनेन अकारेण सह वस्य ऊट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा औ । 'धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये' (२।१।५०) उव् ।

**[मुवः]** मवन्तीति क्विप् । अनेन अकारेण सह वस्य ऊट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् । 'धातोरिवर्णोवर्णस्येयुव्०' (२।१।५०) उव् ।

**[मूतिः]** मव् । मवनं = मूतिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । अनेन अकारेण सह वस्य ऊट् ।

**[मामोति]** मव् । भृशं पुनः पुनर्वा मवति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) द्विः । 'आ-गुणावन्यादेः' (४।१।४८) आ । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । वर्त्त० तिव् । अनेन अकारेण सह वस्य ऊट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ ।

**[मामूतः]** भृशं पुनः पुनर्वा मवति(तः) । व्यञ्जनादेरेकस्वराद्० (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'आ-गुणावन्यादेः' (४।१।४८) आ । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । वर्त्त० तस् । अनेन अकारेण सह वस्य ऊट् ।

**[ओम्]** 'अव रक्षण-गति-कान्ति-तृप्त्यवगमन-प्रवेश-श्रवण-स्वाम्यर्थ-याचन-क्रियेच्छा-दीप्त्यवाप्त्या-ऽऽलिङ्गन-हिंसा-दहन-भाव-वृद्धिषु' (४८९) अव् । अवति-रक्षति ध्यायमानो ध्यातॄन् अपायेभ्य इति ओम् । 'अवेर्मः' (उणा० ९३३) मप्र० । अनेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अकारेण सह वस्य ऊट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

**[ओमा]** अव् । अवतीति । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) मन्प्र० । अनेन अकारेण सह वस्य ऊट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'नाम्नो नोऽनह्नः'(२।१।९१) नलोपः ।

**[ऊः]** अव् । अवतीति क्विप् । अनेन अकारेण सह वस्य ऊट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'सो रुः' (२।१।७२) र० ।

**[उवौ]** अव् । अवत इति क्विप् । अनेन अकारेण सह वस्य ऊट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा औ । 'धातोरिवर्णोवर्णस्येयुव्०' (२।१।५०) उव् ।

**[उवः]** अव् । अवन्तीति क्विप् । अनेन अकारेण सह वस्य ऊट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् । 'धातोरिवर्णोवर्णस्येयुव्०' (२।१।५०) उव् ।

**[ऊतिः]** अव् । अवनं = ऊतिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० —> ति । अनेन अकारेण सह वस्य ऊट् ।

**[श्रोमा]** 'श्रिवूच् गति-शोषणयोः' (११६५) श्रिव् । श्रीव्यतीति । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) मन्प्र० । अनेन इकारेण सह वस्य ऊट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलोपः ।

**[श्रूः]** श्रिव् । श्रीव्यतीति क्विप् । अनेन इकारेण सह वस्य ऊट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'सो रुः' (२।१।७२) र० ।

**[श्रुवौ]** श्रिव् । श्रीव्यत इति क्विप् । अनेन इकारेण सह वस्य ऊट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा औ । 'धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये' (२।१।५०) उव् । ('संयोगात्' (२।१।५२) उव्) ।

**[श्रुवः]** श्रिव् । श्रीव्यन्तीति क्विप् । अनेन इकारेण सह वस्य ऊट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् । 'धातोरिवर्णोवर्णस्येयुव्' स्वरे प्रत्यये' (२।१।५०) उव् । ('संयोगात्' (२।१।५२) उव्) ।

**[श्रूतः]** श्रिव् । श्रीव्यति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।१) क्तप्र० —> त । अनेन इकारेण सह वस्य ऊट् । प्रथमा सि ।

**[श्रूतवान्]** श्रिव् । श्रीव्यति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० —> तवत् । अनेन इकारेण सह वस्य ऊट् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदस्य' (२।१।८९) तलोपः ।

**[श्रूतिः]** श्रवणं = श्रूतिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० —> ति । अनेन इकारेण सह वस्य ऊट् ।

**[शेश्रोति]** श्रिव् । भृशं पुनः पुनर्वा श्रीव्यति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) "श्रि"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । वर्त्त० तिव् । अनेन इकारेण सह वस्य ऊट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ ।

**[शेश्रूतः]** श्रिव् । भृशं पुनः पुनर्वा श्रीव्यतः । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । शेषं पूर्ववत् । वर्त्त० तस् ।

**[जूर्मा]** 'ज्वर रोगे' (१०५४) ज्वर् । ज्वरतीति । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) मन्प्र० । अनेन व० —> ऊट् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[जूः]** ज्वरतीति क्विप् । अनेन व० → ऊट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि ।

**[जूरौ]** ज्वरत इति क्विप् । अनेन व० → ऊट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा औ ।

**[जूरः]** ज्वरन्तीति क्विप् । अनेन व० → ऊट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् ।

**[जूर्त्तिः]** ज्वरणं = जूर्त्तिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । अनेन व० → ऊट् ।

**[जाजूर्ति]** भृशं पुनः पुनर्वा ज्वरति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) "ज्व"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । वर्त्त० तिव् । अनेन व० → ऊट् ।

**[जाजूर्तः]** भृशं पुनः पुनर्वा ज्वरतः । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । शेषं पूर्ववत् ।

**[तूर्मा]** 'ञित्वरिष् संभ्रमे' (१०१०) त्वर् । त्वरति(ते) इति । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) मन्प्र० । अनेन व० → ऊट् ।

**[तूः]** त्वरते इति क्विप् । अनेन व० → ऊट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि ।

**[तूरौ]** त्वरेते इति क्विप् । अनेन व० → ऊट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा औ ।

**[तूरः]** त्वरन्ते इति क्विप् । अनेन व० → ऊट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् ।

**[तूर्णः]** त्वरते स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । ('ज्ञानेच्छा-ऽर्चार्थ०' (४।२।९२) क्तप्र० → त) । अनेन व० → ऊट् । 'रदादमूर्च्छ-मदः क्तयोर्दस्य च' (४।२।६९) त० → न० । 'श्वस-जप-वम-रुष-त्वर-संघुषाऽऽस्वनाऽमः' (४।४।७५) विकल्पत्वादत्रेट् नाऽऽगतः । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[तूर्तिः]** त्वरणं = तूर्तिः । 'श्वादिभ्यः' (५।३।९२) क्तिप्र० → ति । अनेन व० → ऊट् ।

**[तातूर्ति]** त्वर् । भृशं पुनः पुनर्वा त्वरति(ते) । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । वर्त्त० तिव् । अनेन व० → ऊट् ।

**[तातूर्तः]** भृशं पुनः पुनर्वा त्वरतः(रेते) । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । वर्त्त० तस् । अनेन व० → ऊट् ।

ज्वर-त्वरोरुपान्त्योऽकारो वकारात्परः । श्रिव्यवि-मवां तु पूर्वः ॥छ॥

### राल्लुक् ॥४।१।११०॥

**[रात्]** र पञ्चमी ङसि ।

**[लुक्]** लुक् प्रथमा सि ।

**[मोर्मा]** 'मुर्छा मोह-समुच्छ्राययोः' (१२६) मुर्छ् । मूर्छतीति । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) मन्प्र० । अनेन छलुक् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[होर्मा]** 'हुर्छा कौटिल्ये' (१२५) हुर्छ् । हूर्छतीति । 'मन्-वन्-क्वनिप्-विच्-क्वचित्' (५।१।१४७) मन्प्र० । अनेन छलुक् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[मूः]** मूर्छतीति क्विप् । अनेन छलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदान्ते' (२।१।६४) दीर्घः ।

**[मुरौ]** मूर्छत इति क्विप् । अनेन छलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा औ ।

**[मुरः]** मूर्छन्तीति क्विप् । अनेन छलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् ।

**[हूः]** हूर्छतीति क्विप् । अनेन छलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलोपः । 'पदान्ते' (२।१।६४) दीर्घः ।

**[हुरौ]** हूर्छत इति क्विप् । अनेन छलुक् । 'अप्रयोगीत्' (१।१।३७) क्विपलोपः । प्रथमा औ ।

**[हुरः]** हूर्छन्तीति क्विप् । अनेन छलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् ।

**[मूर्तः]** मूर्छति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'आदितः' (४।४।७१) इण्निषेधः । अनेन छलुक् । 'भ्वादेर्नामिनो दीर्घो र्वोर्व्यञ्जने' (२।१।६३) दीर्घः ।

**[मूर्तवान्]** मूर्छति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । 'आदितः' (४।४।७१) इण्निषेधः । अनेन छलुक् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः ।

**[मोमोर्ति]** भृशं पुनः पुनर्वा मूर्छति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) "मु"द्विः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । वर्त्त० तिव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[जोहोर्ति]** भृशं पुनः पुनर्वा हूर्छति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।४) "हु"द्विः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । वर्त्त० तिव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[तोर्मा]** 'उर्वै' (४७०)- 'तुर्वै हिंसायाम्'( ४७१) तुर्व् । तूर्वतीति । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) मन्प्र० । अनेन वलुक् । 'लघोरुपान्त्यस्य' (४।३।४) गु०ओ । प्रथमा सि ।

**[धोर्मा]** 'उर्वै' (४७०) - 'तुर्वै' (४७१) - 'थुर्वै' (४७२) - 'दुर्वै' (४७३) - 'धुर्वै हिंसायाम्' (४७४) धुर्व् । धूर्वतीति । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) मन्प्र० । अनेन वलुक् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । प्रथमा सि ।

**[तूः]** तूर्वतीति क्विप् । अनेन वलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलोपः । 'पदान्ते' (२।१।६४) दीर्घः ।

**[तुरौ]** तूर्वत इति क्विप् । अनेन वलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा औ ।

**[तुरः]** तुर्वन्तीति क्विप् । अनेन वलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् ।

**[धूः]** धूर्वतीति क्विंप् । अनेन वलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलोपः । 'पदान्ते' (२।१।६४) दीर्घः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[धुरौ]** धूर्वत इति क्विप् । अनेन वलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा औ ।

**[धुरः]** धूर्वन्तीति क्विप् । अनेन वलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् ।

**[तूर्णः]** तूर्वति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । अनेन वलुक् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । 'रदादमूर्च्छ-मदः क्तयोर्दस्य च' (४।२।६९) तस्य न० । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । प्रथमा सि ।

**[तूर्णवान्]** तूर्वति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । अनेन वलुक् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । 'रदादमूर्च्छ-मदः क्तयोर्दस्य च' (४।२।६९) त० → न० । 'र-षृवर्णान्नो ण०' (२।३।६३) नस्य ण० । प्रथमा सि । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः ।

**[तूर्तिः]** तूर्वणं = तूर्तिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । अनेन वलुक् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः ।

**[धूर्णः]** धूर्वति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । अनेन वलुक् । 'डीय-श्व्यैदितः क्तयोः' (४।४।६१) इति इट् न भवति । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । 'रदादमूर्च्छ-मदः क्तयोर्दस्य च' (४।२।६९) तस्य न० । 'र-षृवर्णान्नो ण०' (२।३।६३) नस्य ण० ।

**[धूर्णवान्]** धूर्वति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । अनेन वलुक् । 'डीय-श्व्यैदितः क्तयोः' (४।४।६१) इति इट् न भवति । 'भ्वादेर्नामिनो दीर्घो०' (२।१।६३) दीर्घः । 'रदादमूर्च्छ०' (४।२।६९) तस्य न० । 'र-षृवर्णान्नो ण०' (२।३।६३) नस्य ण० ।

**[धूर्तिः]** धूर्वणं = धूर्तिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । अनेन वलुक् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः ।

**[धूर्तः]** धूर्वतीति । 'शी-री-भू-दू-मू-घृ-पा-धाग्-चित्यर्त्यञ्जि-पुसि-मुसि-वुसि-विसि-रमि-धुर्वि-पूर्विभ्यः कित्' (उणा० २०१) कित् तप्र० । अनेन वलुक् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः ।

**[मूर्छा]** मूर्छनं = मूर्छा । 'भिदादयः' (५।३।१०८) अङ्प्र० → अ । 'क्तेटो गुरोर्व्यञ्जनात्' (५।३।१०६) अप्र० न भवति, आदितत्वात् निषेधः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[तूर्विता]** तूर्वतीति । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'भ्वादेर्नामिनो दीर्घो०' (२।१।६३) दीर्घः । प्रथमा सि । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८४) डा । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ॥छ॥

**क्तेऽनिटश्च-जोः क-गौ घिति ॥४।१।१११॥**

**[क्ते]** ककारेणोपलक्षितस्तः क्तस्तस्मिन् ।

**[अनिटः]** न विद्यते इट् यस्मात् असौ अनिट्, तस्य ।

**[चजोः]** चश्च ज् च = चजौ, तयोः ।

**[कगौ]** कश्च ग् च = कगौ, प्रथमा औ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[घिति]** घ् इत् अनुबन्धो यस्य सः घित्, तस्मिन् ।

**[पाकः]** 'डुपचींष् पाके' (८९२) पच् । पच्यते = पाकः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । अनेन च० → क० ।

**[सेकः]** 'षिचींत् क्षरणे' (१३२१) षिच् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सिच् । सिच्यते = सेकः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । अनेन च० → क० ।

**[पाक्यम्]** पच्यत इति । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । अनेन च० → क० ।

**[सेक्यम्]** सिच्यत इति । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । अनेन च० → क० ।

**[त्यागः]** 'त्यजं हानौ' (१७२) त्यज् । त्यज्यते । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । अनेन ज० → ग० ।

**[रागः]** 'रञ्जीं रागे' (८९६) रञ्ज् । रज्यते । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । घञि भाव-करणे (४।२।५२) नलोपः पूर्वम्, ततो वृद्धिः ।

**[भोग्यम्]** भुजंप् पालना-ऽभ्यवहारयोः (१४८७) भुज् । भुज्यते = भोग्यम् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । अनेन ज० → ग० ।

**[योग्यम्]** 'युजूंपी योगे' (१४७६) युज् । युज्यते = योग्यम् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । अनेन सर्वत्र गत्वम् ।

**[संपर्की]** 'पृचैप् संपर्के' (१४८२) पृच्, संपूर्व० । संपृणक्तीत्येवंशीलः । 'समः पृचैप्-ज्वरेः' (५।२।५६) घिनण्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । अनेन च० → क० । 'र्हादर्ह-स्वरस्याऽनु नवा' (१।३।३१) द्वित्वम् ।

**[संसर्गी]** 'सृजीं(जं)त् विसर्गे' (१३४९) सृज्, संपूर्व० । संसृजतीत्येवंशीलः । 'सं-वेः सृजः' (५।२।५७) घिनण्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । अनेन ज० → ग० । 'र्हादर्ह-स्वरस्याऽनु नवा' (१।३।३१) द्वित्वम् ।

**[सङ्कोचः]** 'कुच सम्पर्चन-कौटिल्य-प्रतिष्टम्भ-विलेखनेषु' (९६१) कुच् । 'कुचत् सङ्कोचने' (१४३१) कुच्, सम्पूर्व० । सङ्कोचनम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[कूजः]** क्षीज (१५०) - 'कूज अव्यक्ते शब्दे' (१५१) कूज् । कूजनं = कूजः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ ।

**[खर्जः]** 'खर्ज मार्जने च' (१४५) खर्ज् । खर्जनं = खर्जः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ ।

**[गर्जः]** 'गर्ज शब्दे' (१६३) गर्ज् । गर्जनं = गर्जः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ ।

**[परिव्राज्यम्]** धृज (१३०) - धृजु (१३१) - ध्वज (१३२) - ध्वजु (१३३) - धज (१३४) - धजु (१३५) - वज (१३६) - 'व्रज गतौ' (१३७) व्रज्, परिपूर्व० । परिव्रज्यत इति । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[उदाजः] 'अज क्षेपणे च' (१३९) अज्, उत्पूर्व० । उदजनं = उदाजः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

[समाजः] 'अज क्षेपणे च' (१३९) अज्, सम्पूर्व० । समजनं = समाजः । 'भावाऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

[अर्चः] 'अर्च पूजायाम्' (१०४) अर्च् । अर्चनं = अर्चः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ ।

[अर्च्यम्] अर्च्यते । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य ।

[याच्यम्] 'डुयाचृग् याच्ञायाम्' (८९१) याच् । याच्यते । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य ।

[रोच्यम्] 'रुचि अभिप्रीत्यां च' (९३८) रुच् । रुच्यते । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

[अर्कः] अर्च्यते सूयते जनैरित्यर्कः । 'भीण्-शलि-वलि-कल्यति-मर्च्यर्चि-मृजि-कु-तु-स्तु-दा-धा-रा-त्रा-का-पा-निहा-नञ्शुभ्यः कः' (उणा० २१) कप्र० अर्कनिपातः ।

[याच्ञा] याचनं = याच्ञा । 'मृगयेच्छा-याच्ञा-तृष्णा-कृपा-भा-श्रद्धा-ऽन्तर्द्धा' (५।३।१०१) याच्ञा स्त्रियां निपातः ।

[रुक्मम्] रोचनम् । 'रुक्म-ग्रीष्म-कूर्म-सूर्म-जाल्म-गुल्म-घ्रोम-परिस्तोम-सूक्ष्मादयः' (उणा० ३४६) किन्मप्र० निपातः इति प्रयोगेषु अनिटोऽपि क्ते सेट इति कत्वं न भवति ।

[पचनम्] पच्यते = पचनम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् ।

[त्यजनम्] त्यज्यते । 'अनट्' (५।३।१२४) अनट्प्र० → अन । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् ।।छ।।

## न्यङ्-कूद्ग-मेघाऽऽदयः ।।४।१।११२।।

[न्यङ्कूद्गमेघाऽऽदयः] न्यङ्कुश्च उद्गश्च मेघश्च = न्यङ्कूद्गमेघाः, ते आदयो येषां ते ।

[न्यङ्कुः] 'अञ्चू गतौ च' (१०५) अञ्चू, निपूर्व० । नितरामञ्चतीति । 'नेरञ्चेः' (उणा० ७२४) उप्र० । अनेन निपातः ।

[शोकः] 'शुच शोके' (९९) शुच् । शोचनं → शोकः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । अनेन निपातः ।

[रोकः] 'रुचि अभिप्रीत्यां च' (९३८) रुच् । रोचनम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । अनेन निपातः ।

[शोच्यम्] शुच्यते । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

[रोच्यम्] रुच्यते । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

[श्वपाकः] श्वन् 'डुपचींष् पाके' (८९२) पच् । श्वानं पचतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । अनेन कत्वनिपातः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[मांसपाकः]** मांसं पचतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । अनेन कत्वनिपातः ।

**[पिण्डपाकः]** पिण्डं पचतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । अनेन कत्वनिपातः ।

**[कपोतपाकः]** कपोतं पचतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । अनेन कत्वनिपातः ।

**[उलूकपाकः]** उलूकं पचतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । अनेन कत्वनिपातः ।

अणभावे - **[श्वपचः]** श्वानं पचति । 'लिहादिभ्यः' (५।१।५०) अच्प्र० → अ ।

**[नीचेपाकः]** नीच सप्तमी ङि । 'डुपचींष् पाके' (८९२) पच् । नीचे पचति ओदनं देवदत्तः, स एवं विवक्षिते नाहं पचामि, किन्तु नीचे पच्यते स्वयमेव । 'अच्' (५।१।४९) अच्प्र० → अ ।

**[दूरेपाकः]** दूरे पचत्योदनं देवदत्तः, स एवं विवक्षिते नाहं दूरे पचामि, किन्तु दूरे पच्यते स्वयमेव । 'अच्' (५।१।४९) अच्प्र० → अ ।

**[फलेपाकः]** फले पचत्योदनं देवदत्तः, स एवं विवक्षिते नाहं फले पचामि, किन्तु फले पच्यते स्वयमेव । 'अच्' (५।१।४९) अच्प्र० → अ ।

**[क्षणेपाकः]** क्षणे पचत्योदनं देवदत्तः, स एवं विवक्षिते नाहं क्षणे पचामि, किन्तु क्षणे पच्यते स्वयमेव । 'अच्' (५।१।४९) अच्प्र० → अ । अत्र कर्मकर्तर्यचि दीर्घत्वं च निपातनात् । 'तत्पुरुषे कृति' (३।२।२०) इति बहुलाधिकारात् सप्तम्या अलुप् ।

"**नीचेपाकुः**' इत्यादिषु वाक्यं पूर्ववत् । अत एव निपातनादुकारः ।

**[अनुवाकः]** अनु 'ब्रूंगूक् व्यक्तायां वाचि' (११२५) ब्रू । अनुब्रवीति । 'अच्' (५।१।४९) अच्प्र० । 'अस्ति-ब्रुवोर्भू-वचावशिति' (४।४।१) वचादेशः ।

**[सोमप्रवाकः]** सोम 'वचंक् भाषणे' (१०९६) वच्, प्रपूर्व० । सोमं प्रवक्तीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । अनेन निपातः ।

**[न्योको वृक्षः शकुन्तो वा]** नि 'उचच् समवाये' (११७६) उच् । न्युच्यति समवैतीति । 'लिहादिभ्यः' (५।१।५०) अच्प्र० → अ । अनेन निपातः, वृक्षः शकुन्तो वा ।

**[उद्गः, समुद्गः, न्युद्गः, अभ्युद्गः]** 'उब्जत् आर्जवे' (१३४८) उब्ज्, सम्-नि-अभिपूर्व० । उब्जनम् । समुब्जनम् । न्युब्जनम् । अभ्युब्जनम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । अनेन क्ते सेट्त्वाद् गत्वमुपान्त्यस्य च दत्वं निपात्यते ।

**[सर्गः, विसर्गः, अवसर्गः, उपसर्गः]** 'सृजीं(जं)त् विसर्गे' (१३४९) सृज्, वि-अव-उपपूर्व० । सृजति । विसृजति । अवसृजति । उपसृजतीति । 'लिहादिभ्यः' (५।१।५०) अच्प्र० → अ । अनेन निपातः ।

**[व्यतिषङ्गः]** 'षञ्जं सङ्गे' (१७३) षञ्ज् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सञ्ज्, वि-अतिपूर्व० । व्यतिषजते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अच्' (५।१।४९) अच्प्र० → अ । 'स्था-सेनि-सेध-सिच-सञ्जां द्वित्वेऽपि' (२।३।४०) स० → ष० । अनेन निपातः ।

**[अनुषङ्गः]** सञ्ज्, अनुपूर्व० । अनुषजते(ति) । 'अच्' (५।१।४९) अच्प्र० → अ । 'स्था-सेनि-सेध-सिच-सञ्जां द्वित्वेऽपि' (२।३।४०) स० → ष० । अनेन निपातः ।

**[मद्गुः]** 'टुमस्जोंत् शुद्धौ' (१३५२) मस्ज् । मज्जतीति । 'भृ-मृ-तृ-त्सरि-तनि-धन्यनि-मनि-मस्जि-शी-वटि-कटि-पटि-गडि-चञ्च्यसि-वसि-त्रपि-शॄ-स्वृ-स्निहि-क्लिदि-कन्दीन्दि-विन्द्यन्दि-बन्ध्यणि-लोष्टि-कुन्थिभ्य उः' (उणा० ७१६) उप्र० । अत्र अनेन जस्य गत्वे, 'निमित्ताभावे०' (वक्षस्कार (१) / सूत्र (२९)) शविवृतिदन्त्यसकारावस्थाने 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) इत्यनेन दन्त्यसस्य दत्वम् ।

**[भृगुः]** 'भ्रस्जींत् पाके' (१३१६) भ्रस्ज् । भृज्जतीति । 'स्पशि-भ्रस्जेः स्लुक् च' (उणा० ७३१) किद् उप्र० - सलोपश्च । अनेन भृगुनिपातः ।

**[गोयोगः]** 'युजूंपी योगे' (१४७६) युज् । योजनं = योगः । गां योगः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० । अनेन ग० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[मेघः]** 'मिहं सेचने' (५५१) मिह् । मेहति-सिञ्चति पृथ्वीमिति मेघः । 'लिहादिभ्यः' (५।१।५०) अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । अनेन घ० ।

**[ओघः प्रवाहः]** 'वहीं प्रापणे' (९९६) वह् । वहतीति । अच्प्र० । अनेन अनुपसर्गस्य वस्य उ(ओ)कारश्च वकारेण ह घत्वं निपात्यते । प्रवहतीति । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) दीर्घः ।

**[प्रवहः]** प्रवहतीति ।

**[विवहः]** विवहतीति ।

**[परिवहः]** परिवहतीति ।

**[संवहः]** संवहतीति ।

**[उद्वहः]** उद्वहतीति ।

**[अभिवहः]** अभिवहतीति ।

**[निवहः]** निवहतीति, सर्वत्र अच्प्र० ।

**[निदाघः ऋतुविशेषः]** 'दहं भस्मीकरणे' (५५२) दह्, निपूर्व० । निदह्यते = निदाघः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । अनेन हस्य घत्वम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[अवदाघः केवलपानीयपक्वोऽपूपः]** 'दहं भस्मीकरणे' (५५२) दह्, अवपूर्व० । अवाग् दह्यते = अवदाघः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । अनेन हस्य घत्वम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । केवलपानीयपक्वोऽपूपः ।

**[अर्घो मूल्यं पूजाद्रव्यं च]** 'अर्ह पूजायाम्' (५६४) अर्ह् । अर्हति तमित्यर्घः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । अनेन ह० → घ० निपातः ।

**[अर्हः]** अर्हतीति । 'अर्होऽच्' (५।१।९१) अच्प्र० → अ ।

एवमविहितलक्षणानि कत्वगत्वघत्वानि द्रष्टव्यानि ।।छ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## न वञ्चेर्गतौ ।।४।१।११३।।

**[न]** न प्रथमा सि ।

**[वञ्चेः]** वञ्चि षष्ठी ङस् ।

**[गतौ]** गति सप्तमी ङि ।

**[वञ्चं 卐 वञ्चन्ति]** 'वञ्चू गतौ' (१०६) वञ्च् । वच्यत इति । घञ्प्र० । द्वितीया अम् । वञ्च् । वर्त्त० अन्ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । गन्तव्यं गच्छतीत्यर्थः ।

यदुक्तम् - पश्यैते **व्याधवार्केण्यसङ्कुले वित्तवत्तमाः** ।
रात्रावपि महाऽरण्ये वञ्चं वञ्चन्ति **वाणिजाः** ।।१।।

**[व्याधवार्केण्यसङ्कुले]** वृक एव = वार्केण्यः । 'वृकाट्टेण्यण्' (७।३।६४) टेण्यण्प्र० → एण्य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आर् । व्याधश्च वार्केण्यश्च = व्याधवार्केण्यौ, ताभ्यां सङ्कुलम्, तस्मिन् ।

**[वित्तवत्तमाः]** वित्त । वित्तं विद्यते येषां ते = वित्तवन्तः । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्तापञ्चमवर्गान् मतोर्मो वः' (२।१।९४) म० → व० । प्रकृष्टा वित्तवन्तः = वित्तवत्तमाः । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । प्रथमा जस् ।

**[वाणिजाः]** 'पणि व्यवहार-स्तुत्योः' (७१०) पण् । 'गुपौ-धूप-विच्छि-पणि-पनेरायः' (३।४।१) आयप्र० । पणायत इति । 'भृ-पणिभ्यामिज् भुरवणौ च' (उणा० ८७५) इज्प्र० पस्य व० । वणिज एव = वाणिजाः । 'प्रज्ञादिभ्योऽण्' (७।२।१६५) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः । प्रथमा जस् ।

**[वङ्कं काष्ठम्]** वच्यत इति । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'क्तेऽनिटश्चजोः क-गौ घिति' (४।१।१११) च० → क० । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) न० → ङ० । सि-अम् । काष्ठ सि-अम् । कुटिलमित्यर्थः ।।छ।।

## यजेर्यज्ञाङ्गे ।।४।१।११४।।

**[यजेः]** यजि षष्ठी ङस् ।

**[यज्ञाङ्गे]** यज्ञस्य अङ्गं = यज्ञाङ्गम्, तस्मिन् ।

**[पञ्च प्रयाजाः]** पञ्चन् प्रथमा जस् । 'डति-ष्णः संख्याया लुप्' (१।४।५४) जस्लुप् । 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज्, प्रोपसर्गपूर्व० । प्रेज्यन्त एभिरिति । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[त्रयोऽनुयाजाः]** त्रि प्रथमा जस् । 'जस्येदोत्' (१।४।२२) ए । 'एदैतोऽयाय्' (१।२।२३) अय् । अन्विज्यन्ते एभिरिति । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० । अनुयजनानि वा । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[एकादशोपयाजाः]** उपेज्यन्ते एभिरिति । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० । उपयजनानि वा । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । ''ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

卐 मध्यमवृत्तौ-बृहद्वृत्तौ च-वञ्चति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[उपांशुयाजाः]** उपांशु एकान्ते यजनानि । 'सप्तमी शौण्डाद्यैः' (३।१।८८) समासः । प्रथमा जस् ।

**[पत्नीसंयाजाः]** पत्न्या संयजनानि । 'ऊनार्थपूर्वाद्यैः' (३।१।६७) समासः ।

**[ऋतु(सं)याजाः]** ऋतून् संयजन्ते । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[याजः]** यजनं = याजः । घञ्प्र० ।

**[प्रयागः]** 卐 प्रेज्यते । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) ज० → ग० । प्रथमा सि ।

**[अनुयागः]** अनुयजनं = अनुयागः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'क्तेऽनिटश्च-जोः०' (४।१।१११) ज० → ग० ।

**[यागः]** यजनं = यागः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'क्तेऽनिटश्च-जोः०' (४।१।१११) ज० → ग० ॥छ॥

## घ्यण्यावश्यके ॥४।१।११५॥

**[घ्यणि]** घ्यण् सप्तमी ङि ।

**[आवश्यके]** अवश्यमो भावः । 'योपान्त्याद् गुरूपोत्तमादसुप्रख्यादकञ्' (७।१।७२) अकञ्प्र० → अक । 'त्रन्त्यस्वरादेः' (७।४।४३) अम्लोपः । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः, तस्मिन्, उपाधिके विशेषणे इत्यर्थः ।

**[अवश्यपाच्यम्]** अवश्यम् 'डुपचींष् पाके' (८९२) पच् । अवश्यं पच्यते । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'कृत्येऽवश्यमो लुक्' (३।२।१३८) मलुक् ।

**[अवश्यरेच्यम्]** अवश्यम् 卐卐 'रिचत् स्तुतौ' ( ) रिच् (?) । ('रिचूंपी विरेचने' (१४७४) रिच्) । अवश्यं रिच्यते । 'ऋवर्ण-व्यञ्जनाद्०' (५।१।१७) घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'कृत्योऽवश्यमो०' (३।२।१३८) मलोपः ।

**[अवश्यरञ्ज्यम्]** 'रञ्जीं रागे' (८९६) रञ्ज्, अवश्यम्पूर्व० । अवश्यं रज्यते ।

**[अवश्यभञ्ज्यम्]** 'भञ्जोंप् आमर्दने' (१४८६) भञ्ज्, अवश्यंपूर्व० । अवश्यं भज्यते । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । कृत्येऽवश्यमो लुक् (३।२।१३८) मलुक् ॥छ॥

## नि-प्राद युजः शक्ये ॥४।१।११६॥

**[निप्रात्]** निश्च प्रश्च = निप्रम्, तस्मात् ।

**[युजः]** युज् षष्ठी ङस् ।

**[शक्ये]** 'शक्लृंट् शक्तौ' (१३००) शक् । शक्यत इति । 'शकि-तकि-चति-यति-शसि-सहि-यजि-भजि-पवर्गात्' (५।१।२९) यप्र०, तस्मिन् ।

---

P. 卐 प्रयजन्ति अत्रेति ।

卐卐 तुदादिगणपाठे - 'ऋचत् स्तुतौ' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[नियोज्यः]** 'युजूंपी योगे' (१४७६) युज्, निपूर्व० । नियोक्तुं शक्यः । 'शक्तार्हे कृत्याश्च' (५।४।३५) घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[प्रयोज्यः]** 'युजूंपी योगे' (१४७६) युज्, प्रपूर्व० । प्रयोक्तुं शक्यः । 'शक्तार्हे कृत्याश्च' (५।४।३५) घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[नियोग्यः]** नितरां युज्यते । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) ज० → ग० ।

**[प्रयोग्यः]** प्रयुज्यते । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) ज० → ग० ।।छ।।

**भुजो भक्ष्ये** ।।४।१।११७।।

**[भुजः]** भुज् षष्ठी ङस् ।

**[भक्ष्ये]** भक्ष्य सप्तमी ङि ।

**[भोज्यमन्नम्]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भुज्यत इति । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[भोज्या यवागूः]** भुज्यत इति भोज्या । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[भोग्यः कम्बलः]** भुज्यत इति भोग्यः । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) ज० → ग० । 'आत्' (२।४।१८) आप्प्र० → आ । अपूपाः-पालनीया इत्यर्थः ।।छ।।

भक्ष्यमभ्यवहार्यमात्रं न खरविशदमेवेति कठिनप्रत्यक्षमेव कठोरप्रत्यक्षमेवेत्यर्थः अखरविशदमपि भक्षं(क्ष्यं) दृष्टमिति दृष्टान्तमाह-अब्भक्ष्येति-अ(आ)पो द्रवरूपं न कठिनं प्रत्यक्षं त्वस्ति वायुस्तु कठिनो न प्रत्यक्षस्तस्यानुमानेन गम्यत्वात् तेन भोज्यं पय इत्यादि सिद्धम् । अब्भक्षतीत्येवंशीलः । 'शीलि-कामि-भक्ष्याचरीक्षि-क्षमो णः' (५।१।७३) णप्र० → अ, अपूक्षः(पः) वायुभक्षः(क्ष्यः) ।।छ।।

**त्यज-यज-प्रवचः** ।।४।१।११८।।

**[त्यजयजप्रवचः]** त्यज् च (जश्च) यज् च (जश्च) प्रवच्च = त्यज्(ज)यज्(ज)प्रवच्, तस्य ।

**[त्याज्यम्]** 'त्यजं हानौ' (१७२) त्यज् । त्यज्यत इति त्याज्यम् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

**[याज्यम्]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । इज्यत इति । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

**[प्रवाच्यो नाम पाठविशेषः]** 'वचंक् भाषणे' (१०९६) वच्, प्रपूर्व० । पोच्यत इति । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । प्रवाच्यो नाम पाठविशेषः, तदुपलक्षितो ग्रन्थोऽप्युच्यते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपसर्गनियमार्थं वा । प्रपूर्वस्यैव वचेरशब्दसंज्ञायां प्रतिषेधो भवति नान्योपसर्गपूर्वस्य ।

**[अधिवाक्यं नाम दशरात्रस्य यज्ञस्य यद्दशममहः]** अध्युच्यत इत्यधिवाक्यम् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) च० → क० ।

दशन् । रात्रि । दशानां रात्रीणां समाहारः । 'संख्यातैक-पुण्य-वर्षा-दीर्घाच्च रात्रेरत्' (७।३।११९) अत्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) इलोपः । दशरात्रनिष्पाद्यो यज्ञोऽपि दशरात्र उपचारात्, तथा दशरात्रमस्याऽस्तीति अभ्रादित्वाद्वा अः । षष्ठी ङस् ।

यज्ञ षष्ठी ङस् । यद् प्रथमा सि । अहन् प्रथमा सि । 'अह्नः' (२।१।७४) न० → रु० → र० । यस्मिन् याज्ञिका अधिब्रुवते तस्मिनि(ने)वाभिधानम् । अधिवाच्यमन्यत्र । प्रवचिग्रहणं शब्दसंज्ञार्थम् ॥छ॥

## वचोऽशब्दनाम्नि ॥४।१।११९॥

**[वचः]** वच् षष्ठी ङस् ।

**[अशब्दनाम्नि]** शब्दस्य नाम = शब्दनाम, न शब्दनाम = अशब्दनाम, तस्मिन् ।

**[वाच्यमाह]** 卐 'वचंक् परिभाषणे' (१०९६) वच् । उच्यत इति वाच्यम् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[अवाच्यमाह]** वा(नो)च्यते इति अवाच्यम् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[वाक्यम्]** उच्यत इति वाक्यम् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) च० → क० । विशिष्टपदसमुदायः ॥छ॥

## भुज-न्युब्जं पाणि-रोगे ॥४।१।१२०॥

**[भुजन्युब्जम्]** भुजश्च न्युब्जश्च = भुजन्युब्जम् ।

**[पाणिरोगे]** पाणिश्च रोगश्च = पाणिरोगम्, तस्मिन् ।

**[भुजः पाणिः]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भुज्यतेऽनेनेति भुजः पाणिः । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । अनेन निपातः गत्वाऽभावो गुणाभावश्च ।

**[न्युब्जो नाम रोगविशेषः]** 'उब्जत् आर्जवे' (१३४८) उब्ज्, निपूर्व० । न्युब्जिताः शेरतेऽस्मिन्निति न्युब्जो नाम रोगविशेषः । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । अनेन निपातो गत्वाऽभावः ।

**[भोगः]** भुज्यतेऽनेनेति । घञ्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) ज० → ग० ।

**[न्युद्गः]** न्युब्जनं = न्युद्गः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'न्यङ्कूद्ग-मेघाऽऽदयः' (४।१।११२) न्युद्गनिपात्यते ॥छ॥

---

卐 लघुवृत्तौ-वचंक् भाषणे । हैमधातुपारायणे-वचण् भाषणे, संदेशने इत्येके (चन्द्रः) ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वीरुन्-न्यग्रोधौ ।।४।१।१२१।।**

**[वीरुन्न्यग्रोधौ]** वीरुध् च न्यग्रोधश्च = वीरुन्न्यग्रोधौ । 'धुटस्तृतीयः' (२।१।७६) ध० → द० । 'तृतीयस्य पञ्चमे' (१।३।१) द० → न० ।

**[वीरुत्]** 卐 रुहं जन्मनि प्रादुर्भावे (९८८) रुह्, विपूर्व० । विरोहतीति । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'गति-कारकस्य-नहि-वृति-वृषि-व्यधि-रुचि-सहि-तनौ क्वौ' (३।२।८५) दीर्घः वी । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेन हस्य ध० । प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलोपः । 'धुटस्तृतीयः' (२।१।७६) ध० → द० । 'विरामे वा' (१।३।५१) द० → त० ।

**[न्यग्रोधः]** रुहं जन्मनि प्रादुर्भावे (९८८) रुह्, न्यग्पूर्व० । न्यग्रोहतीति । 'लिहादिभ्यः' (५।१।५०) अच्प्र० । अनेन हस्य ध० । 'च-जः क-गम्' (२।१।८६) च० → क० । 'धुटस्तृतीयः' (२।१।७६) क० → ग० ।

**[अवरोधः]** अवरोहतीति । अच्प्र० ।।छ।।

***इति श्रीसिद्धहेमचन्द्रव्याकरणे बृहद्वृत्तौ चतुर्थस्याध्यायस्य***
***प्रथमः पादः समाप्तः ।।***

---

卐 क्रियारत्नसमुच्चये-हैमधातुपारायणे च- 'रुहं जन्मनि' । बीजजन्मनि इत्यन्ये ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ॥ अकारादिवर्णक्रमेण सूत्रान्तर्गतोदाहरणसूचिः ॥


अकारयिषातां कटौ देवदत्तेन ३। ४। ५८
अकारि कटः ३। ४। ६८
अकारि कटः स्वयमेव ३। ४। ८६
अकारि कटश्चैत्रेण ३। ४। ९०
अकारि कटो भवता ३। ४। ७०
अकार्क्षीत् ३। ४। ५४
अकीर्ष्ट पांसुः स्वयमेव ३। ४। ९३
अकृक्षत् ३। ४। ५४
अकृत अकारि कटः स्वयमेव ३। ४। ९०
अकृत्वा ३। २। १५४
अकृषातां कटौ चैत्रेण ३। ४। ५३
अकोषि ३। ४। ७४
अकोषीत् ३। ४। ५५
अकोषीत् ३। ४। ६४
अक्राक्षीत् ३। ४। ५४
अक्रियेतां कटौ ३। ४। ७०
अक्षकितवः ३। २। २०
अक्षति ३। ४। ७६
अक्षद्यूः ४। १। १०८
अक्षशौण्डः ३।२।१८
अक्षशौण्डः ३। २। २०
अक्ष्णोति ३। ४। ७६
अगः पर्वतः ३। २। १२७
अगदङ्कारः ३। २। ११२
अगमत् ३। ४। ६४
अगा वृक्षाः ३। २। १२७
अगीर्ष्ट ग्रासः स्वयमेव ३। ४। ९३
अगो वृषलः शीतेन ३। २। १२७
अगोष्पदेष्वरण्येषु विश्वासमुपजग्मिवान् ३। २। ४८
अग्नामरुतौ ३। २। ४१
अग्नामरुतौ ३। २। ४३
अग्नाविष्णू ३। २। ४१
अग्निमिन्धः ३। २। ११४
अग्निवायू ३। २। ४१
अग्निसोमौ माणवकौ ३। २। ४२
अग्नीवरुणौ ३। २। ४२
अग्नीवरुणौ ३। २। ४३
अग्नीषोमौ ३। २। ४२
अग्नेन्द्रौ ३। २। ४१
अग्नेन्द्रौ ३। २। ४२
अग्रन्थिष्ट ग्रन्थः स्वयमेव ३। ४। ९३
अग्रहीषाताम् ३। ४। ६९
अग्राहिषाताम् ३। ४। ६९
अग्रुचत् ३। ४। ६५
अग्रोचीत् ३। ४। ६५
अग्लुचत् ३। ४। ६५
अग्लुचत् ३। ४। ६५
अग्लुञ्चीत् ३। ४। ६५
अग्लोचीत् ३। ४। ६५
अघानिषाताम् ३। ४। ६९
अङ्कयति ३। ४। ४२
अङ्गजातीया ३। २। ५८
अङ्गवृन्दारिकाः ३। २। ५७
अङ्गुलिव्रणः ३। २। २२
अचकथत् ४। १। ६३, ४। १। ६४
अचकमत ३। ४। ५८, ४। १। १
अचकमत ४। १। ६३, ४। १। ६४
अचकाणत् ४। १। २
अचचेष्टत् ४। १। ६६
अचाख्यासीत् ३। ४। ६०
अचिकीर्तत् ४। १। ६०
अचिकीर्षिष्ट कटः स्वयमेव ३। ४। ९३
अचिक्रमत् ४। १। ६३
अचिक्कणत् ४। १। ६३, ४। १। ६४
अचिचेष्टत् ४। १। ६६
अचिच्यवत् ४। १। ६३
अचीकपत् ४। १। ६३
अचीकमत् ३। ४। ५८
अचीकरत कटः स्वयमेव ३। ४। ५८
अचीकरत् ३। ४। ५८
अचीकरत् ४। १। ४८, ४। १। ६३, ४। १। ६४
अचुच्यवत् ४। १। ६३
अचूचुरत गौः स्वयमेव ३। ४। ९२
अचूचुरत् ३। ४। ५८
अचौरः पन्थाः ३। २। १२५
अच्छोदम् ३। २। १०७
अजगणत् ४। १। ६७
अजजागरत् ४। १। ६३
अजथ्यं यूथम् ३। २। ५०
अजनि ३। ४। ६७
अजनिष्ट ३। ४। ६७
अजरत् ३। ४। ६५
अजारीत् ३। ४। ६५
अजिरवती ३। २। ७८
अजिहीत ४। १। ५८
अजीगणत् ४। १। ६७
अजीजवत् ४। १। ६३
अजीहरत् ४। १। ६३
अजीहरत् ४। १। ६३
अजूहवत् ४। १। ६३
अजूहवत् ४। १। ८८
अञ्जनागिरिः ३। २। ७७
अट ३। ४। ३५
अटाट्यते ३। ४। १०, ४। १। ४, ४। १। ४४, ४। १। ४८
अटाट्या ३। ४। ३५
अटिटिषति ४। १। ४
अड्डिडिषति ४। १। ५
अततक्षत् ४। १। ६३, ४। १। ६४
अतत्वरत् ४। १। ६५
अतप्त तपांसि साधुः ३। ४। ९१
अतस्तरत् ४। १। ६५
अतापि पृथिवी राजा ३। ४। ९१


Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतायि ३। ४। ६७
अतायिष्ट ३। ४। ६७
अताप्र्सीत् ३। ४। ५४
अतिक्षिपति बटुम् ३। ३। १०२
अतिमार्ग: ३। २। ८६
अतिरुक् ३। २। ८५
अतिशयनम् ३। २। ८६
अतिशायनम् ३। २। ८६
अतिस्वर: ३। २। ७
अतिहस्तयति ३। ४। ४२
अतीरुक् ३। २। ८५
अतीरुक् ३। २। ८५
अतीसार: (२) ३। २। ८६
अतूतवत् ४। १। ६३, ४। १। ६४
अतृपत् ३। ४। ५४
अत्ति ३। ४। ७१
अत्यश्वयति ३। ४। ४२
अत्याप: ३। २। १०९
अत्युच्चैस: ३। २। ७
अत्युपवधु: ३। २। ६
अत्राप्सीत् ३। ४। ५४
अदती ३। ४। ७१
अददरत् ४। १। ६५
अददृषत् ४। १। ६३, ४। १। ६४
अदद्यङ् ३। २। १२२
अदद्यञ्च: ३। २। १२२
अदद्यञ्चौ ३। २। १२२
अदधत् ३। ४। ५९
अदधत् ४। १। १
अदर्शिषाताम् ३। ४। ६९
अदात् ४। १। १
अदायिषाताम् ३। ४। ६९
अदायिष्यत ३। ४। ६९
अदाप्र्सीत् ३। ४। ५४
अदास्यत ३। ४। ६९
अदिद्युतत् ४। १। ४१
अदिद्रवत् ४। १। ६३
अदिषाताम् ३। ४। ६९
अदीपि ३। ४। ६७
अदीपि भवता ३। ४। ६७
अदीपिषाताम् ३। ४। ६७
अदीपिष्ट ३। ४। ६७
अदुग्ध अदोहि गौ: स्वयमेव ३। ४। ९०
अदुग्ध गौ: पय: स्वयमेव ३। ४। ८७, ३। ४। ८८
अदुग्धे गौ: पय: स्वयमेव ३। ४। ८७
अदुद्रवत् ४। १। ६३
अदुद्रुवत् ३। ४। ५८
अदृक्षाताम् ३। ४। ६९
अदृपत् ३। ४। ५४
अदोहि गौ: पयो गोपालकेन ३। ४। ८८
अदोहि गौ: स्वयमेव ३। ४। ९३
अदोहि गौ: स्वयमेव ३। ४। ८८
अदोहि गौर्बल्लवेन ३। ४। ९०
अद्युतत् ३। ४। ६४
अद्राक्षीत् ३। ४। ५५
अद्राप्सीत् ३। ४। ५४
अद्विक्षत् ३। ४। ५५
अधाक्षीत् ३। ४। ५५
अधात् ३। ४। ५९
अधासीत् ३। ४। ५९
अधिजगे ४। १। १
अधिजिगंस्यते माता ४। १। १०४
अधिजिगांसते सूत्रम् ४। १। १०४
अधिजिगांस्यते माता ४। १। १०४
अधिषातां गावौ वत्सेन ३ । ४ । ५९
अधिस्त्रि ३। २। २, ३। २। ६
अधीकण्ठ: ३। २। ८६
अधीकर्ण: ३। २। ८६
अधीदन्त: ३। २। ८६
अधीपाद: ३। २। ८६
अधुक्षत गौ: पय: स्वयमेव ३। ४। ८७
अधुक्षत् ३। ४। ५५
अध्यर्द्धपाद्यम् ३। २। ९६
अध्याकुरुते जिघांसु: ३। ३। ७६
अनंस्त दण्ड: स्वयमेव ३। ४। ९३
अनजम् ३। २। १२९
अनन्तो जिन: ३। २। १२९
अनभ्याशमित्यम् ३। २। ११३
अनश्न: ३। २। १२९
अनादि: ३। २। १२९
अनीनिजत् ४। १। ५७
अनुकूलयति ३। ४। ४२
अनुक्रामति ३। ३। ४९
अनुक्रीडते ३। ३। ३४
अनुक्रीडमाण: ३। ३। ३४
अनुचिकीर्षति ३। ३। ७४
अनुतूलयति ३। ४। ४२
अनुबभूवे कम्बल: साधुना ४। १। ७०
अनुयाग: ४। १। ११४
अनुलोमयति ३। ४। ४२
अनुवदते आचार्यस्य शिष्य: ३। ३। ८१
अनुवदते चैत्रो मैत्रस्य ३। ३। ८१
अनुवाक: ४। १। ११२
अनुषङ्ग: ४। १ । ११२
अनूकाश: ३। २। ८७
अनूपो देश: ३। २। ११०
अनेनेक् ४। १। ५७
अनैषीत् ३। ४। ५३
अन्तरीपम् ३। २। १०९
अन्तवासी ३। २। २५
अन्तिकादागत: ३। २। १०
अन्तेगुरु: ३। २। २१
अन्तेवासी ३। २। २५
अन्धयति ३। ४। ४२
अन्यत्कारक: ३। २। १२१
अन्यत्कारिका ३। २। १२१
अन्यदर्थ: (२) ३। २। ११९
अन्यदर्थम् ३। २। ११९
अन्यदा ३। २। ६१
अन्यदाशा ३। २। १२०
अन्यदाशी: ३। २। १२०
अन्यदास्था ३। २। १२०
अन्यदास्थित: ३। २। १२०
अन्यदीय: ३। २। १२१
अन्यदीयम् ३। २। १२१
अन्यदुत्सुक: ३। २। १२०


Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यदूति: ३। २। १२०
अन्यद्राग: ३। २। १२०
अन्यादृक्ष: ३। २। १५२
अन्यादृक् ३। २। १५२
अन्यादृश: ३। २। १५२
अन्यार्थ: (४) ३। २। ११९
अन्यार्थम् ३। २। ११९
अन्याशी: ३। २। १२०
अन्यास्थित: ३। २। १२०
अन्योऽन्यस्य व्यतिलुनन्ति ३। ३। २३
अन्वतप्त चैत्रेण ३। ४। ९१
अन्ववातप्त कितव: स्वयमेव ३। ४। ९१
अन्ववातप्त पाप: पापेन कर्मणा ३। ४। ९१
अन्वीपं वनम् ३। २। ११०
अन्वीपम् ३। २। १०९
अपकर: ३। २। ४८
अपक्तोदुम्बर: फलं स्वयमेव ३। ४। ८७, ३। ४। ८८
अपक्षीयते ३। ३। ३
अपचसि त्वं जाल्म ! ३। २। १२६
अपचाव ३। ३। २७
अपटपटा पटपटा करोति ३। ४। ३०
अपप्रथत् ४। १। ६५
अपमार्ग: ३। २। ८६
अपमित्सते यवान् ४। १। २०
अपराध ४। १। २३
अपराध्यते ४। १। २३
अपराह्णकाले ३। २। २४
अपराह्णतन: ३। २। २४
अपराह्णशय: ३। २। २५
अपराह्णेकाले ३। २। २४
अपराह्णेतन: ३। २। २४
अपरेद्युरुपक्रामति ३। ३। ५१
अपरेधिम ४। १। २३
अपरेधिव ४। १। २३
अपवदति परं स्वभावत: ३। ३। ९७
अपस्करो स्थाङ्गे ३। २। ४८
अपस्किरते कुक्कुटो भक्ष्यार्थी ३। ३। ३०
अपस्किरते वृषभो हृष्ट: ३। ३। ३०
अपस्किरते श्वा आश्रयार्थी ३। ३। ३०
अपस्पशत् ४। १। ६५
अपहस्तयति ३। ४। ४२
अपह्नुयते ३। ३। ५८
अपाक्षीत् ३। ४। ५३
अपाचि उदुम्बर: फलं वायुना ३। ४। ८८
अपाच्योदन: स्वयमेव ३। ४। ८७, ३। ४। ८८
अपाच्योदनश्चैत्रेण ३। ४। ६८
अपापयत् ४। १। ३३
अपामार्ग औषधि: ३। २। ८६
अपास्थत ३। ४। ६०
अपिदधाति ३। २। १५६
अपिधानम् ३। २। १५६
अपिनद्धम् ३। २। १५६
अपिप्रवत् ४। १। ६३
अपिप्लवत् ४। १। ६३
अपिहितम् ३। २। १५६
अपीपचतौदन: स्वयमेव ३। ४। ९२
अपीपटत् ४। १। ६३
अपीपलत् ४। १। ३३
अपीपवत् ४। १। ६३
अपीप्यताम् ४। १। ३३
अपीप्यत् ४। १। ३३
अपीप्यन् ४। १। ३३
अपुतित्रीयत् ४। १। ८
अपुत्रीयियत् ४। १। ८
अपुपुत्रीयत् ४। १। ८
अपुप्रवत् ४। १। ६३
अपुप्लवत् ४। १। ६३
अपुषत् ३। ४। ६४
अपूरि ३। ४। ६७
अपूरिष्ट ३। ४। ६७
अपोषीत् ३। ४। ६४
अपोषीत् ३। ४। ६४
अप्यायि ३। ४। ६७
अप्यायिष्ट ३। ४। ६७
अप्सरायते ३। ४। २७, ३। ४। २८
अप्सव्य: ३। २। २८
अप्सुचर: ३। २। २८
अप्सुजम् ३। २। २६
अप्सुमति: ३। २। २८
अप्सुयोनि: ३। २। २८
अबभाणत् ४। १। ६३
अबिभित्सिष्ट कुशूल: स्वयमेव ३। ४। ९३
अबीभवत् ४। १। ६३
अबुद्ध ३। ४। ६७
अबूभुजत् ४। १। ६४
अबूभुषत कन्या स्वयमेव ३। ४। ९३
अबोधि ३। ४। ६७
अबोधिष्ट ३। ४। ६७
अब्जम् ३। २। २६
अभवत् ३। ३। १०
अभविष्यत भवता ३। ४। ७०
अभावि ३। ४। ७०
अभिक्षिपति बटुम् ३। ३। १०२
अभित्त ३। ४। ६५
अभिदत् ३। ४। ६५
अभिमनाय्य गत: ३। ३। ४
अभिमिमनायिषते ३। ३। ४
अभिवह: ४। १। ११२
अभिशीतो वायु: ४। १। ९९
अभिशीन: ४। १। ९९
अभिशीनं घृतम् ४। १। ९९
अभिशीनवान् ४। १। ९९
अभिश्यान: ४। १। ९९
अभिश्यानं घृतम् ४। १। ९९
अभिश्यानवान् ४। १। ९९
अभिश्यानो वायु: ४। १। ९९
अभिषेणयति ३। ४। ४२
अभिसंशीन: ४। १। ९९
अभिसंशीनवान् ४। १। ९९
अभिसंश्यान: ४। १। ९९
अभिसंश्यानवान् ४। १। ९९
अभीरुक् ३। २। ८५
अभूत् ३। ४। ६०
अभूषीत् ३। ४। ६४
अभेदि कुशूल: स्वयमेव ३। ४। ८६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभेदि कुशूल: स्वयमेव ३।४।९०
अभैत्सीत् ३।४।५५
अभैत्सीत् ३।४।६५
अभ्यमनायत ३।३।४
अभ्याशादागत: ३।२।१०
अभ्युद्र: ४।१।११२
अमक्षिकं वर्तते ३।२।१२५
अममण्डत कन्या स्वयमेव ३।४।९३
अमम्रदत् ४।१।६५
अमरावती ३।२।७८
अमरिष्यत् ३।३।४२
अमशकं वर्तते ३।२।१२५
अमहापुत्रीयत् ३।३।४
अमार्क्षीत् ३।४।५४
अमिमीत ४।१।५८
अमीमवत् ४।१।६३
अमूदृक् ३।२।१५२
अमूदृश: ३।२।१५२
अमूदृक्ष: ३।२।१५२
अमृक्षत् ३।४।५४
अमृत ३।३।४२
अम्बरीषश्च नाभागो, बुभुजाते चिरं महीम् ३।३।३८
अम्राक्षीत् ३।४।५४
अम्रियत ३।३।४२
अम्रुचत् ३।४।६५
अम्रोचीत् ३।४।६५
अम्लुचत् ३।४।६५
अम्लोचीत् ३।४।६५
अयस्कार: ३।२।८५
अयस्कृतम् ३।२।८५
अयस्कृत् ३।२।८५
अयीयवत् ४।१।६३
अरञ्जि ३।४।७४
अरण्येतिलका: ३।२।१८
अरण्येमाषका: ३।२।१८
अरार्यते ३।४।१०, ४।१।६
अरियरीति ४।१।३७
अरियर्ति ४।१।३७
अरिरिषति ४।१।४
अरिरिषति ४।१।६
अरीरवत् ४।१।६३
अरुंतुद: ३।२।१११
अरुचत् ३।३।४४
अरुचत् ३।४।६४
अरुद्ध ३।४।६५
अरुद्ध गौ: स्वयमेव ३।४।८९
अरुधत् ३।४।६५
अरोचिष्ट ३।३।४४
अरोधि गौर्गोपालकेन ३।४।८९
अरौत्सीत् ३।४।६५
अर्क: ४।१।१११
अर्घो मूल्यं पूजा द्रव्यं च ४।१।११२
अर्च: ४।१।१११
अर्चिचिषति ४।१।६
अर्च्यम् ४।१।१११
अर्तिता ३।४।४
अर्थान् प्रतीषिषति ३।४।२१
अर्थापयति ३।४।४४
अर्दिधिषति ४।१।१७
अर्द्धप्रस्थभार्य: ३।२।५५
अर्ह: ४।१।११२, ४।१।११३
अलं कृत्वा ३।२।१५४
अलंकरिष्यते कन्या स्वयमेव ३।४।९३
अलंकुरुते कन्या स्वयमेव ३।४।९३
अलङ्कारवती ३।२।७८
अलमकृत कन्या स्वयमेव ३।४।९३
अलविष्ट अलावि केदार: स्वयमेव ३।४।९०
अलिक्षत् ३।४।५५
अलिपत ३।४।६३
अलिपत् ३।४।६२
अलिप्त ३।४।६३
अलीलघत् ४।१।६३
अलीलवत् ४।१।६३, ४।१।६४
अल्पशो देहि ३।२।५०
अल्पान्मुक्त: ३।२।१०
अवकर: ३।२।४८
अवकिरते पांसु: स्वयमेव ३।४।९३
अवकीर्षीष्ट पांसु: स्वयमेव ३।४।९३
अवक्रय: ३।२।१५६
अवक्रीणीते ३।३।२७
अवगल्भते ३।४।२५
अवगल्भांचक्रे ३।४।२५
अवगिरते ३।३।६७
अवचूर्णयति ३।४।४२
अवट: ३।२।१५५
अवतंस: ३।२।१५६
अवतप्तेनकुलस्थितम् ३।२।२०
अवतुतावयिषति ४।१।६०
अवतूलयति ३।४।४२
अवत्तम् ३।२।८८
अवदाघ: केवलपानीय० ४।१।११२
अवदातं मुखम् ३।३।५
अवदानम् ३।४।७
अवदिग्याते ४।१।३२
अवदिग्यिरे ४।१।३२
अवदिग्ये ४।१।३२
अवधिषाताम् ३।४।६९
अवमानयति ३।४।७
अवरपरा: सार्था गच्छन्ति ३।२।४८
अवरस्परा: सार्था गच्छन्ति ३।२।४८
अवरोध: ४।१।१२१
अवर्त्तिष्यत ३।३।४५
अवर्त्स्यत् ३।३।४५
अवलोष्टयति ३।४।४२
अववेष्टत् ४।१।६६
अवशीन: ४।१।९९
अवशीनं हिमम् ४।१।९९
अवशीनवान् ४।१।९९
अवश्यंलावक: ३।२।१३८
अवश्यकरणीयम् ३।२।१३८
अवश्यकर्तव्यम् ३।२।१३८
अवश्यकार्यम् ३।२।१३८
अवश्यदेयम् ३।२।१३८
अवश्यपाच्यम् ४।१।११५
अवश्यभञ्ज्यम् ४।१।११५
अवश्यरञ्जयम् ४।१।११५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अवश्यरेच्यम् ४। १। ११५
अवश्यस्तुत्यम् ३। २। १३८
अवश्यान: ४। १। ९९
अवश्यानं हिमम् ४। १। ९९
अवश्यानवान् ४। १। ९९
अवसंशीन: ४। १। ९९
अवसंशीनवान् ४। १। ९९
अवसंश्यान: ४। १। ९९
अवसंश्यानवान् ४। १। ९९
अवसर्ग: ४। १। ११२
अवसाय: ३। २। ८६
अवस्करोऽन्नमलम् ३। २। ४८
अवहार: ३। २। ८६
अवाकीर्ष्ट पांसु: स्वयमेव ३। ४। ९३
अवाच्यमाह ४। १। ११९
अवावचीत् ३। ४। ६०
अवाव्यते ३। ४। ९
अविकटोरण: ३। २। १९
अविक्षत् ३। ४। ५५
अविद्धकर्ण: ३। २। ८४
अविवेष्टत् ४। १। ६६
अवीवदद् वीणां० ४। १। ६३, ४। १। ६४
अवोचत ३। ४। ६०
अवोचत कथा स्वयमेव ३। ४। ९३
अवोचत् ३। ४। ६०
अशकत् ३। ४। ६४
अशमयिषाताम् ३। ४। ६९
अशमयिष्यत ३। ४। ६९
अशमिषाताम् ३। ४। ६९
अशमिष्यत ३। ४। ६९
अशय्यत भवता ३। ४। ७०
अशामिषाताम् ३। ४। ६९
अशामिष्यत ३। ४। ६९
अशायि भवता ३। ४। ६८
अशाशासीत् ३। ४। ६०
अशाश्यते ३। ४। १०
अशाश्यते ४। १। ४
अशासिषातां शिष्यौ गुरुणा ३। ४। ६०
अशिश्रवत् ४। १। ६३
अशिश्रियत् ३। ४। ५८
अशिश्वयत् ४। १। ८९
अशिश्वियत् ३। ४। ५९, ३। ४। ६५
अशिश्वियत् ४। १। ८९
अशिश्वीयिषति ४। १। ७
अशिषत् ३। ४। ६०
अशुश्रवत् ४। १। ६३
अशूशवत् ४। १। ८९
अश्रन्थिष्ट माला स्वयमेव ३। ४। ९३
अश्लिषत् जतु च काष्ठं च ३। ४। ६४
अश्लेषीत् ३। ४। ५६
अश्वाति ३। ४। ८०
अश्वं जानीते ३। ३। ९६
अश्वति ३। ३। ३, ३। ४। २५
अश्वत्थ: ३। २। १५५
अश्वत्थाम ३। २। १५५
अश्वत् ३। ४। ५९, ३। ४। ६५
अश्वयति ३। ४। ४५
अश्वयीत् ३। ४। ५९, ३। ४। ६५
अश्वाची ३। २। १२२
अश्वायते ३। ४। २६
अश्वीयियिषति ४। १। ७
अश्वीयिषिषति ४। १। ७
अश्वेन विक्रामति ३। ३। ५०
अश्वेन संचरते ३। ३। ३२
अश्वेन संचिचरिषते ३। ३। ७४
अष्टकपालम् ३। २। ७३
अष्टकर्ण: ३। २। ८४
अष्टगवं ब्राह्मणधनम् ३। २। ७४
अष्टगुणमैश्वर्यम् ३। २। ७५
अष्टगुश्रैत्र: ३। २। ७४
अष्टचत्वारिंशत् ३। २। ९३
अष्टतुरगो रथ: ३। २। ७४
अष्टदण्ड: (दंष्ट्र:) ३। २। ७५
अष्टनवति: ३। २। ९३
अष्टनवा: ३। २। ९२
अष्टपञ्चाशत् ३। २। ९३
अष्टपात्रं हवि: ३। २। ७३
अष्टशतम् ३। २। ९२
अष्टषष्टि: ३। २। ९३
अष्टसप्तति: ३। २। ९३
अष्टसहस्रम् ३। २। ९२
अष्टाकपालं हवि: ३। २। ७३
अष्टागवं शकटम् ३। २। ७४
अष्टात्रिंशत् ३। २। ९२
अष्टानवति: ३। २। ९३
अष्टापञ्चाशत् ३। २। ९३
अष्टापद: कैलाश: ३। २। ७५
अष्टापदं सुवर्णम् ३। २। ७५
अष्टावक्रो मुनि: ३। २। ७५
अष्टाविटपो नाम कश्चित् ३। २। ७५
अष्टाषष्टि: ३। २। ९३
अष्टासप्तति: ३। २। ९३
असंग्रामयत शूर: ३। ३। ४
असत्य: ३। २। १२८
असयति ३। ४। ४२
असरत् ३। ४। ६१
असरिसारीत् ३। ४। ६१
असर्जि मालां धार्मिक: ३। ४। ८४
असस्मरत् ४। १। ६५
असार्षीत् ३। ४। ६१
असिक्त ३। ४। ६३
असिचत ३। ४। ६३
असिचत् ३। ४। ६२
असुष्वापकीयत् ४। १। ६२
असुसुवत् ३। ४। ५८
असूयियिषति ४। १। ९
असूषुपत् (२) ४। १। ८०
असृपत् ३। ४। ६४
अस्तभत् ३। ४। ६५
अस्तम्भीत् ३। ४। ६५
अस्तुङ्कार: ३। २। ११२
अस्तेयम् ३। २। १२५
अस्पार्क्षीत् ३। ४। ५४
अस्पृक्षत् ३। ४। ५४
अस्प्राक्षीत् ३। ४। ५३
अस्मादृक्ष: ३। २। १५२
अस्मादृक् ३। २। १५२


Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्मादृश: ३। २। १५२
अस्यसि ३। २। ७२
अहं जजर ४। १। २६
अहं ततर ४। १। २५
अहं पचामि ३। ३। १७
अहं पपच ४। १। २४
अहं शिश्वय ४। १। ९०
अहं शुशव ४। १। ९०
अहसाताम् ३। ४। ६९
अहिं वक्ष्ययति ३। ३। ८९
अहिंसा ३। २। १२५
अहीवती ३। २। ७८
अहत्वा ३। २। १५४
आक्रमते चन्द्र: ३। ३। ५२
आक्रमते सूर्य: ३। ३। ५२
आक्रामति धूमो हर्म्यतलम् ३। ३। ५२
आक्रामति माणवक:
कुतु(त)पम् ३। ३। ५२
आक्रीडते ३। ३। ३४
आक्रोष्टार: ३। ४। १९
आक्षिकता ३। २। ५९
आक्षिकत्वम् ३। २। ५९
आख्यत ३। ४। ६०
आख्यत् ३। ४। ६०
आख्यानम् ३। ४। ४२
आगच्छति ३। ३। १००
आगमयति विद्याम् ३। ३। ५५
आगमयते गुरून् ३। ३। ५५
आगमयस्व तावत् ३। ३। ५५
आग्नावैष्णवं चरुं निर्वपेत् ३। २। ४३
आग्निमारुतं कर्म ३। २। ४३
आग्निवारुणीमनड्वाहीमालभेत ३। २। ४३
आग्निसौमं कर्म ३। २। ४३
आग्नेन्द्रं कर्म ३। २। ४३
आग्नेय: ३। २। ५२
आग्नेय: स्थालीपाक: ३। २। ५२
आघानिर्षीष्ट गौ: स्वयमेव ३। ४। ९२
आघानिष्ट गौ: स्वयमेव ३। ४। ९२
आचर्यं कर्म शोभनम् ३। २। ४८
आचार्यपुत्र: ३। २। ३७
आचिक्रंसते ३। ३। ७४
आञ्छ ४। १। ६९
आञ्छतु: ४। १। ६९
आट ४। १। ६९
आटतु: ४। १। ४४
आटतु: ४। १। ६८, ४। १। ६९
आटिटत् ४। १। १
आटिटत् ४। १। ४
आटिथ ४। १। ६८
आटु: ४। १। ६८
आढ्य: ३। २। १५५
आढ्यम्भविष्णु: ३। २। १११
आढ्यम्भावुक: ३। २। १११
आत्मनाचतुर्थ: ३। २। १४
आत्मनाज्ञायी ३। २। १५
आत्मनाद्वितीय: ३। २। १४
आत्मनापञ्चम: ३। २। १४
आत्मनाषष्ठ: ३। २। १४
आत्मनेपदम् ३। २। १७
आत्मनेभाषा ३। २। १७
आत्मनैकादश: ३। २। १४
आत्महितम् ३। २। १७
आदतु: ४। १। ६८
आदयते चैत्रेण ३। ३। ९४
आदिथ ४। १। ६८
आदु: ४। १। ६८
आनर्च ३। ४। ४८
आनर्च्छ ३। ४। ४८
आनर्च्छतु: ४। १। ६९
आनशाते ४। १। ६९
आनशे ४। १। ६९
आनाञ्छ ४। १। ६९
आनाञ्छतु: ४। १। ६९
आनुकूलिकता ३। २। ५९
आनुकूलिकत्वम् ३। २। ५९
आनुते शृगाल: ३। ३। ५४
आनुलेपिकम् ३। २। ५४
आनृजाते ४। १। ६९
आनृजिरे ४। १। ६९
आनृजे ४। १। ६९
आनृधतु: ४। १। ६९
आनृधु: ४। १। ६९
आपदम् ३। २। ४८
आपिप्याते ४। १। ९१
आपिप्यिरे ४। १। ९१
आपिप्ये ४। १। ९१
आपीनमूध: ४। १। ९३
आपीनोऽन्धु: ४। १। ९३
आपृच्छते गुरून् ३। ३। ५४
आपृच्छस्व प्रियसखम् ३। ३। ५४
आपेपीत: ४। १। ९१
आपेपेति ४। १। ९१
आप्यानश्चन्द्र: ४। १। ९३
आप्याय्य: ४। १। ९३
आप्स्यति ४। १। १६
आभि: सखीभि: परस्परां भोज्यते। ३। २। १
आभि: सखीभि: परस्परेण भोज्यते। ३।२।१
आमलकितरा ३। २। ६६
आमलकीतरा ३। २। ६४
आमलकीतरा ३। २। ६६
आमुष्यकुलिका ३। २। ३३
आमुष्यपुत्रिका ३। २। ३३
आमुष्यायण: ३। २। ३३
आयच्छते ३। ३। ८६
आयच्छते पादम् ३। ३। ८६
आयच्छते वस्त्रम् ३। ३। ९८
आयसं क्ष्णौति ३। ३। २९
आयस्यति ३। ४। ७३
आयामयते सर्पम् ३। ३। ९४
आयासयते मैत्रम् ३। ३। ९४
आर ४। १। १, ४। १। ५८, ४। १। ६९
आरग्वध: ३। २। १५५
आरतु: ४। १। ६९
आरत् ३। ४। ६१
आरमति ३। ३। १०५
आरराधतु: ४। १। २३
आरराधिथ ४। १। २३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आरर्यत् ४। १। ६
आरात्रिविवासम् ३। ४। ४२
आरारीत् ३। ४। ६१
आरिप्सते ४। १। २१
आरिरात्सति गुरून् ४। १। २२
आरोहन्ति हस्तिनं हस्तिपकाः ३। ३। ८८
आरोहयते ३। ३। १०७
आरोहयते हस्ती स्वयमेव ३। ३। ८८
आरोहयते हस्ती हस्तिपकान् ३। ३। ८८
आरोहयन्ति महामात्रेण हस्तिपकाः ३।३।८८
आर्चिचत् ४। १। ६
आर्षम् ३। ३। १
आर्षीत् ३। ४। ६१
आवां पचावः ३। ३। १७
आवोवचम् ३। २। ४८
आश ४। १। ६९
आशतुः ४। १। ६९
आशयति चैत्रमन्नम् ३। ३। १०८
आशितम्भवो वर्तते ३। २। १११
आशिशत् ४। १। ४
आशीविषः ३। २। १५५
आश्लिक्षत् कन्यां देवदत्तः ३। ४। ५६
आश्लेषि कन्या देवदत्तेन ३। ४। ५६
आश्चर्यं नीला द्यौः ३। २। ४८
आष्टमातुरः ३। २। ९२
आसयति चैत्रम् ३। ३। १०७
आसि भवता ३। ४। ६८
आसीत् ३। ४। ६०
आसुतीवलः ३। २। ८२
आसूयियत् ४। १। ९
आस्ते ३। ४। ७०
आस्थत् ३। ४। ६०
आस्पदं प्रतिष्ठायाम् ३। २। ४८
आहत गौः स्वयमेव ३। ४। ९२
आहते ३। ३। ८६
आहते गौः स्वयमेव ३। ४। ९३
आहते शिरः ३। ३। ८६
आहनिष्यते गौः स्वयमेव ३। ४। ९३
आहन्ता गौः स्वयमेव ३। ४। ९३
आह्वत ३। ४। ६३
आह्वत् ३। ४। ६२
आह्वरयति ३। ४। ४५
आह्वास्त ३। ४। ६३
इक्षुमती ३। २। ७८
इचेली ३। २। ६६
इज्यते ४। १। ७९
इज्यात् ४। १। ७९
इतरेतरस्य व्यतिलुनन्ति ३। ३। २३
इदंकाम्यति ३। ४। २२
इदमिच्छति ३। ४। २३
इदामति ४। १। १०७
इन्द्रापूषणौ ३। २। ४१
इन्द्राबृहस्पती ३। २। ४१
इन्द्रावरुणौ ३। २। ४१
इन्द्रासोमौ ३। २। ४१
इन्द्रिद्रीयिषति ४। १। ५
इन्धांचक्रे ३। ४। ४९
इमाः परस्परस्माद् बिभ्यति । ३। २। १
इमाः परस्परस्मिन् स्निह्यन्ति । ३। २। १
इमाः परस्परस्य स्मरन्ति । ३। २। १
इमाः परस्परां बिभ्यति । ३। २। १
इमाः परस्परां स्निह्यन्ति । ३। २। १
इमाः परस्परां स्मरन्ति । ३। २। १
इमाः सख्यः परस्परस्मै प्रयच्छन्ति । ३। २। १
इमाः सख्यः परस्परां प्रयच्छन्ति । ३। २। १
इमे नराः परस्परं भोजयन्ति । ३। २। १
इमे सख्यौ परस्परं भोजयतः । ३। २। १
इमे सख्यौ परस्परां भोजयतः । ३। २। १
इयजिथ ४। १। ७२
इयर्ति ४। १। ३७, ४। १। ५८
इयाज ४। १। १, ४। १। ३७, ४। १। ७२, ४। १। ७९
इयान् ३। २। १५३
इयृयात् ४। १। ५८
इयेष ३। ४। ४८, ४। १। ३७
इरूपा ३। २। ६६
इष्टः ४। १। ७९
इष्टः पुत्रः ३। ४। २२
इष्टवान् ४। १। ७९
इष्टिः ४। १। ७९
इष्ट्वा ४। १। ७९
इष्विषवि ३। २। ७२
ईक्षांचक्रे ३। ३। ७५
ईक्षांबभूव ३। ३। ७५
ईक्षामास ३। ३। ७५
ईचिक्षिषते ४। १। ५
ईचेली ३। २। ६६
ईजतुः ४। १। ७९
ईजिवान् ४। १। ७९
ईजुः ४। १। ७९
ईडाञ्चक्रे ३। ४। ४८
ईदृक्षः ३। २। १५३
ईदृक् ३। २। १५३
ईदृशः ३। २। १५३
ईधे ३। ४। ४९
ईप्सति ४। १। १६
ईयतुः ४। १। ६८
ईयुः ४। १। ६८
ईयुः ४। १। ६८
ईरूपा ३।२।६६
ईर्त्सति ४। १। १७
ईर्ष्यियिषति ४। १। ११
ईर्ष्यिषिषति ४। १। ११
ईषतुः ३। ४। ४८, ४। १। ३७
ईषदाढ्यं भवं भवता ३। ३। २१
ईषुः ३। ४। ४८
ईहांचक्रे ३। ३। ७५
ईहांचक्रे ३। ४। ४८
ईहांबभूव ३। ४। ४८
ईहामास ३। ४। ४८
उक्तः ४। १। ७९
उक्तवान् ४। १। ७९
उक्षां प्रचक्रुर्नगरस्य मार्गान् ३। ४। ४६
उचिच्छिषति ४। १। ४४
उच्चैःकृत्य ३। २। १५४
उच्छ्रयते दण्डः स्वयमेव ३। ४। ९३
उच्छ्रयिता दण्डः ३। ४। ९३


Jain Education International For Private & Personal Use Only www.jainelibrary.org

उच्छ्रूयिष्यते दण्ड: ३। ४। ९३
उच्छ्रायिता दण्ड: स्वयमेव ३। ४। ९२
उच्छ्रायिषीष्ट दण्ड: स्वयमेव ३। ४। ९२
उच्यते ४। १। ७९
उच्यात् ४। १। ७९
उज्जयिन्या: प्रदोषे प्रस्थितो माहिष्मत्यां सूर्यमुद्गमयति ३। ४। २०
उज्छांचकार ३। ४। ४८
उत: ४। १। ७९
उत: ४। १। ७९, ४। १। १०३
उतवान् ४। १। ७९, ४। १। १०३
उतिच्छिषति ४। १। ४३
उतौ ४। १। ७९
उत्कूलयति ३। ४। ४२
उत्कुरुते ३। ३। ७६
उत्तपति सुवर्णं सुवर्णकार: ३। ३। ८७
उत्तपति सुवर्णं सुवर्णकार: ३। ४। ८५
उत्तपते रवि: ३। ३। ८७
उत्तभान ३। ४। ८०
उत्तभ्नुहि ३। ४। ८०
उत्तरतारम् ३। २। १४२
उत्तरतीरम् ३। २। १४२
उत्तरपूर्वस्यै ३। २। ६१
उत्तरापथ: ३। २। ८६
उत्तूस्तयति ३। ४। ४२
उत्तृणयति ३। ४। ४२
उत्पुच्छयते ३। ३। २२
उत्पुच्छयते ३। ४। ३९
उत्पुच्छयमान: ३। ३। २२
उत्सङ्गावल: ३। २। ८२
उत्साहवल: ३। २। ८२
उत्सुकायित्वा ३। ३। ४
उत्सुसुकायिषते ३। ३। ४
उत् ४। १। ७९
उदककुम्भ: ३। २। १०५
उदकगाह: ३। २। १०६
उदकघट: ३। २। १०५
उदकदेश: ३। २। १०५
उदकपर्वत: ३। २। १०५
उदकपात्रम् ३। २। १०५
उदकबिन्दु: ३। २। १०६
उदकभार: ३। २। १०६
उदकमन्थ: ३। २। १०६
उदकवज्र: ३। २। १०६
उदकवीवध: ३। २। १०६
उदकसक्तु: ३। २। १०६
उदकस्थालम् ३। २। १०५
उदकहार: ३। २। १०६
उदकामत्रम् ३। २। १०५
उदकुम्भ: ३। २। १०५
उदकेविशीर्णम् ३। २। २०
उदकौदन: ३। २। १०६
उदगाह: ३। २। १०६
उदघट: ३। २। १०५
उदधि: घट: ३। २। १०४
उदपत्साताम् ३। ४। ६६
उदपात्रम् ३। २। १०५
उदपादि भिक्षा ३। ४। ६६
उदपानं निपानम् ३। २। १०७
उदपुपुच्छत गौ: स्वयमेव ३। ४। ९२
उदपेषं पिनष्टि तगरम् ३। २। १०४
उदबिन्दु: ३। २। १०६
उदभार: ३। २। १०६
उदमन्थ: ३। २। १०६
उदरेमणि: ३। २। २२
उदवज्र: ३। २। १०६
उदवास: ३। २। १०४
उदवाहन: ३। २। १०४
उदवीवध: ३। २। १०६
उदशिश्रियत दण्ड: स्वयमेव ३। ४। ९२
उदसक्तु: ३। २। १०६
उदहार: ३। २। १०६
उदाकुरुते माम् ३। ३। ७६
उदाज: ४। १। १११
उदित: ४। १। ७९
उदितवान् ४। १। ७९
उदुम्बर: फलं पच्यते स्वयमेव ३। ४। ८७
उदुम्बरावती ३। २। ७८
उदूखलम् ३। २। १५५
उदौदन: ३। २। १०६
उद्गृ: ४। १। ११२
उद्यच्छते भारम् ३। ३। ९८
उद्यते ४। १। ७९
उद्यात् ४। १। ७९
उद्युङ्क्ते ३। ३। २६
उद्वह: ४। १। ११२
उद्वासयति ३। ४। ४२
उद्वेमुस्तत्र रुधिरं० ४। १। २६
उन्दिदिषति ४। १। ५
उन्मत्तगङ्गं देशे वसति ३। २। ५
उन्मनायते ३। ४। २९
उपकर्तृ ३। २। २, ३। २। ६
उपकुम्भं तिष्ठति । ३। २। २
उपकुम्भं देहि । ३। २। २
उपकुम्भं निधेहि ३। २। ४
उपकुम्भं पश्य । ३। २। २
उपकुम्भं स्वामी । ३। २। २
उपकुम्भात् । ३। २। २, ३। २। ६
उपकुम्भाभ्याम् ३। २। ६
उपकुम्भे ३। २। ६
उपकुम्भे निधेहि ३। २। ४
उपकुम्भेन ३। २। ६
उपकुम्भेभ्य: ३। २। ६
उपक्रमते ३। ३। ४९
उपक्रमते ३। ३। ५१
उपक्रमते भ ेक्तुम् ३। ३। ५१
उपक्रामति ३। ३। ४९
उपगङ्गे ३। २। ५
उपच्छन्दनम् ३। ३। ७८
उपच्छन्दयति ३। ४। ४२
उपज्याय ४। १। ७६
उपनद्धम् ३। २। ८५
उपयमुने ३। २। ५
उपयुङ्क्ते ३। ३। २६
उपरमति संताप: ३। ३। १०६
उपरमते संताप: ३। ३। १०६
उपरि क्रीडति ३। ३। ३४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपरि क्रीणाति ३।३।२७
उपवधु ३।२।२, ३।२।६
उपवाय ४।१।७६
उपवीणयति ३।४।४२
उपव्याय ४।१।७७
उपश्लोकयति ३।४।४२
उपसर्गः ४।१।११२
उपस्किरति ३।३।३०
उपांशुयाजाः ४।१।११४
उपादास्त ३।३।५
उपानत् ३।२।८५
उपायंस्त महास्त्राणि ३।३।५९
उपावृत् ३।२।८५
उपाश्लिषत् जतु च काष्ठं च ३।४।५७
उप्तः ४।१।१०३
उप्तवान् ४।१।७९
उप्यते ४।१।७९
उप्यात् ४।१।७९
उब्जांचकार ३।४।४८
उब्जिजिषति ४।१।५
उभौ लोकौ संचरसि, इमं चामुं च देवल ! ३।३।३२
उरसिजः ३।२।२६
उरसिलोमा ३।२।२२
उरोजः ३।२।२६
उलूकः ३।२।१५५
उलूकपाकः ४।१।११२
उलूखलमुशले ३।२।४१
उवः ४।१।१०९
उवः ४।१।७९
उवचिथ ४।१।७२
उवदिथ ४।१।७२
उवपिथ ४।१।७२
उवयिथ ४।१।७२, ४।१।७४
उवशिथ ४।१।७२
उवसिथ ४।१।७२
उवहिथ ४।१।७२
उवाच ४।१।७२
उवाद ४।१।७२
उवाप ४।१।३७
उवाप ४।१।७२
उवाय ४।१।७२, ४।१।७४
उवाश ४।१।७२
उवास ४।१।७२
उवाह ४।१।७२
उवोष ३।४।४९, ४।१।३७
उवौ ४।१।१०९
उवौ ४।१।७९
उशन्ति ४।१।८३
उशितम् ४।१।८३
उश्यते ४।१।८३
उषतुः ४।१।३७
उषासानक्तम् ३।२।४६
उषासानक्ते ३।२।४६
उषितः ४।१।७९
उषितवान् ४।१।७९
उष्टः ४।१।८३
उष्ट्रासिका आस्यन्ते ३।३।२१
उष्ट्रो मुखं व्याददाति ३।३।५३
उष्णंकरणम् ३।२।११६
उष्यते ४।१।७९
उष्यात् ४।१।७९
उह्यते ४।१।७९
उह्यात् ४।१।७९
ऊः ४।१।१०९
ऊः ४।१।७९
ऊचतुः ४।१।७९
ऊचुः ४।१।७९
ऊढः ४।१।७९
ऊढवान् ४।१।७९
ऊतिः ४।१।१०९
ऊदतुः ४।१।७९
ऊदुः ४।१।७९
ऊपतुः ४।१।७९
ऊपुः ४।१।७९
ऊयतुः ४।१।७३, ४।१।७५, ४।१।७९
ऊयते ४।१।७९
ऊयात् ४।१।७९
ऊयुः ४।१।७३, ४।१।७५, ४।१।७९
ऊरुव्यचाः ४।१।८२
ऊवतुः ४।१।७५
ऊवुः ४।१।७५
ऊशतुः ४।१।८३
ऊषतुः ४।१।३७
ऊषतुः ४।१।७९
ऊषुः ४।१।७९
ऊष्मायते ३।४।३३
ऊहतुः ४।१।७९
ऊहुः ४।१।७९
ऋचिच्छिषति ४।१।४४
ऋतिच्छिषति ४।१।४३
ऋतीयते ३।३।३
ऋतीयते ३।४।३
ऋतीयिता ३।४।४
ऋतीषट् ३।२।८५
ऋतुसंयाजाः ४।१।११४
ऋषीवती ३।२।७८
ऋषीवहः ३।२।८९
ऋषीवहम् ३।२।८९
एककाम्यति ३।२।६१
एकक्षीरम् ३।२।६१
एकचितीकः ३।२।८३
एकमयम् ३।२।६१
एकरूप्यम् ३।२।६१
एकविंशतिभारद्वाजं वसति ३।२।५
एकादश ३।२।९१
एकादशः ३।२।१५२
एकादशोपयाजाः ४।१।११४
एकादृक्षः ३।२।१५२
एकादृक् ३।२।१५२
एकान्तमपवदते ३।३।९७
एतता ३।२।५९
एतत्वम् ३।२।५९
एतभार्यः ३।२।४९
एतयति ३।२।५१
एतावान् ३।२।१५२
एत्यः ३।२।५१


Jain Education International For Private & Personal Use Only www.jainelibrary.org

एदिधिषते ३। ३। ७४
एधते ३। ३। ३, ३। ३। २२
एधमान: ३। ३। २२
एधोदकस्योपस्कुरुते ३। ३। ७६
एनीयति ३। २। ५१
एन्य: ३। २। ५१
एहि मन्ये ३। ३। १७
ऐडविडजातीया ३। २। ५८
ऐडविडभार्या ३। २। ४९
ऐडविडवृन्दारिका ३। २। ५७
ऐत्यम् ३। २। ५१
ऐन्द्या गार्हपत्यमुपतिष्ठते ३। ३। ६०
ऐन्द्रम् ३। ३। १
ऐर्ष्यियत् ४। १। ११
ओघ: प्रवाह: ४। १। ११२
ओजसाकृतम् ३।२।१२
ओजायते ३। ४। २८, ३। ४। २९
ओजोभाव: ३।२।१२
ओदनं भुक्तं भवता ३। ३। २१
ओदनं भुङ्क्ते ३। ३। ३७
ओदनपक् ४। १। १०७
ओदनपाकं स्थीयते ३। ३। २१
ओदनस्य पूर्णाश्छात्रा विकुर्वते ३। ३। ८५
ओमा ४। १। १०९
ओम् ४। १। १०९
ओलण्डयति ३। ४। १६
ओषांचकार ३। ४। ४९
ओष्ठौ निर्भुजति ३। ३। ३७
औचत् ३। ४। ६४
औजढत् ३। ४। ५८
औत्सुकायत ३। ३। ४
औदमेघि: पुत्र: ३। २। १०७
औदवाहि: पुत्र: ३। २। १०७
औन्दिदत् ४। १। ५
औपगव: ३। ३। १
औपगव: ३। २। ८
औपयिकम् ३। ३। ४०
औरिरवत् ४। १। ६४
और्णुनवत् ४। १। ६४
औशिजदेशीया ३। २। ५८
औशिजवृन्दारिका ३। २। ५७
औशिज्य: ३। २। ५१
कंसं घातयति ३। ४। २०
कंसवधम् ३। ४। ४२
कक्षायते ३। ४। ३१
कटं कारयते ३। ३। १०७
कठजातीया ३। २। ५८
कठमानिनी ३। २। ५६
कठवृन्दारिका ३। २। ५७
कठीता ३। २। ५९
कठीत्वम् ३। २। ५९
कठीभार्य: ३। २। ५६
कण्डू: ३। ४। ८
कण्डूयति ३। ३। ३
कण्डूयति ३। ४। ८
कण्डूयते ३। ३। ९५, ३। ४। ८
कण्डूयियिषति ४। १। ९
कण्ड्व: ३। ४। ८
कण्ड्वौ ३। ४। ८
कतिपयान्मुक्त: ३।२।१०
कतीह कुष्णाना: पादा: ३। ४। ७४
कतीह रजमानानि वस्त्राणि ३। ४। ७४
कत्तृणा नाम रौहिषाख्या
तृणजाति: ३। २। १३२
कत्त्रय: ३। २। १३३
कत्त्रि: ३। २। १३३
कथम् ३। २। ७
कदग्नि: ३। २। १३७
कदन्नम् ३। २। १३०
कदशनम् ३। २। १३०
कदश्व: ३। २। १३०
कदा ३। २। ६१
कदुष्ट्र: ३। २। १३०
कदुष्णम् ३। २। १३७
कद्र्यङ् ३। २। १२२
कद्र्यञ्च: ३। २। १२२
कद्र्यञ्चौ ३। २। १२२
कद्रथ: ३। २। १३१
कद्रुब्रुवा ३। २। ६७
कद्रूब्रूवा ३। २। ६७
कद्वद: ३। २। १३१
कन्यापुरम् ३। २। ६१
कन्यामुपयच्छते ३। ३। ५९
कपित्थ: ३। २। १५५
कपीवती ३। २। ७८
कपीवह: ३। २। ८९
कपीवहम् ३। २। ८९
कपोतपाक: ४। १। ११२
कमण्डलुकल्पा ३।२।६७
कमण्डलूकल्पा ३।२।६७
कमलरुक् ३। २। ८५
कमिता ३। ४। ४
कम्पयति ३। ३। १०८
करकमलम् ३। २। २२
करकर: ३। २। ४८
करणीय: कटो भवता ३। ३। २१
करणीयम् ३। ३। २१
करभोरूजातीया ३। २। ५८
करभोरूभार्य: ३। २। ४९
करस्करो गिरि-वृक्षयो: ३। २। ४८
करिष्यते ३। ४। ६९
करिष्यमाण: ३। ३। २१
करोति ३। ३। २, ३। ३। १००
करोति ३। ४। ८३
कर्कन्धु: ३। २। १५५
कर्णयति ३। ४। ४२
कर्णेजप: ३। २। २०
कर्तव्य: कटो भवता ३। ३। २१
कर्तव्यम् ३। ३। २, ३। ३। २१
कर्तृकारयितारौ ३। २। ३९
कर्त्रीता ३। २। ५९
कर्त्रीत्वम् ३। २। ५९
कर्मकरानुपनयते ३। ३। ३९
कर्मकरानुपवदते ३। ३। ७८
कर्हि ३। २। ६१
कलकण्ठीदेश्या ३। २। ५६
कलहायते ३। ४। ३५


Jain Education International For Private & Personal Use Only www.jainelibrary.org

कल्पितासे ३।३।४६
कल्पिष्यते ३।३।४५
कल्प्स्यति ३।३।४५
कल्प्तासि ३।३।४६
कल्याणभार्यः ३।२।४९
कल्याणमनोज्ञा ३।२।५७
कल्याणाभिनिवेशः ३।२।२०
कल्याणीतनयः ३।२।५३
कल्याणीदशमा रात्रयः ३।२।५३
कल्याणीदुर्भगः ३।२।५३
कल्याणीदुहितृकः ३।२।५३
कल्याणीपञ्चमा रात्रयः ३।२।५३
कल्याणीप्रमाणाः ३।२।५३
कल्याणीभक्तिः ३।२।५३
कल्याणीस्वः ३।२।५३
कवाग्निः ३।२।१३७
कवोष्णम् ३।२।१३७
कवोष्णो देशः ३।२।१३७
कष्टश्रितः ३।२।२
कष्टाय तपसे क्रामति ३।४।३१
कष्टायते (२) ३।४।३१
कस्त्वामुल्लापयते ३।३।९०
काकशावः ३।२।६२
काकाण्डम् ३।२।६२
काकीशावः ३।२।६२
काक्यण्डम् ३।२।६२
काक्षः (२) ३।२।१३४
काक्षः पाशकादिः ३।२।१३४
काक्षम् ३।२।१३४
काक्षो रथः ३।२।१३४
काग्निः ३।२।१३७
काच्छम् ३।२।१३६
काण्डलावभार्यः ३।२।५५
कापथः ३।२।१३४
कापथो देशः ३।२।१३४
कापुरुषः (२) ३।२।१३५
कापुरुषो ग्रामः ३।२।१३५
कापेयम् ३।३।६०
कापोतपाक्यजातीया ३।२।५८
कापोतपाक्यवृन्दारिका ३।२।५७
कामति ४।१।१०७
कामधुरम् ३।२।१३६
कामयते ३।३।३, ३।३।२२
कामयते ३।४।२
कामयमानः ३।३।२२
कामयिता ३।४।४
कामुककल्पा ३।२।५४
काम्पील्यसिद्धः ३।२।२९
काम्लम् ३।२।१३६
कायवलम् ३।२।८२
कारकरः ३।२।४८
कारकवृन्दारिका ३।२।५७
कारयति ३।३।१, ३।३।३, ३।४।२०
कारयते कटः ३।३।८८
कारयते कटः स्वयमेव ३।४।९३
कारस्करो वृक्षे ३।२।४८
काराबन्धः ३।२।२३
कारिकाकल्पा ३।२।५४
कारिकातमा ३।२।६४
कारिकाभार्यः ३।२।५४
कारिकायते ३।२।५४
कारिष्यते ३।४।६९
कारिष्यते कटः स्वयमेव ३।४।८६
कारीषग्निरध्यापयति ३।४।२०
कार्तवीर्यीभार्यः ३।२।५५
कार्यः कटो भवता ३।३।२१
कार्यम् ३।३।१
कालवणम् ३।२।१३६
कालिंमन्या ३।२।१११
कालेजः ३।२।२७
कालोदः ३।२।१०७
काषायबृहतिकः ३।२।५५
काष्ठवहम् ३।२।८९
कासांचक्रे ३।४।४७
कासांबभूव ३।४।४७
कासामास ३।४।४७
किं त्वं करिष्यसि रथ्या, संचरति चैत्रोऽरण्ये ३।३।३२
किं न उपकुम्भम्। ३।२।३
किं न उपकुम्भेन ३।२।३
किं न प्रियोपकुम्भेन ३।२।३
किंत्रयः ३।२।१३३
किंशुकागिरिः ३।२।७७
किंशुलकागिरिः ३।२।७७
किकल्पा ३।२।६६
किगोत्रा ३।२।६६
कियान् ३।२।१५३
किरते पांसुः स्वयमेव ३।४।९३
किशोरितमा ३।२।६३
किष्किन्ध इति गुहा-पर्वतयोः ३।२।४८
किष्कुरुः प्रहरणे ३।२।४८
कीकल्पा ३।२।६६
कीगोत्रा ३।२।६६
कीटो रोमन्थं वर्तयति ३।४।३२
कीदृक्षः ३।२।१५३
कीदृक् ३।२।१५३
कीदृशः ३।२।१५३
कीमति ४।१।१०७
कीर्षीष्ट पांसुः स्वयमेव ३।४।९३
कुक्कुटागिरिः ३।२।७७
कुक्कुटाण्डम् ३।२।६२
कुक्कुट्यण्डम् ३।२।६२
कुञ्चिकया भाययति ३।३।९२
कुञ्जरः ३।२।१५५
कुटीजातीया ३।२।५८
कुटीतरा ३।२।६६
कुटीभार्यः ३।२।४९
कुट्टाकमानिनी ३।२।५४
कुतुम्बुरुस्तिन्दुकवृक्षः ३।२।४८
कुतृणानि ३।२।१३२
कुपथः ३।२।१३४
कुपथं वनम् ३।२।१३४
कुपुरुषः (२) ३।२।१३५
कुपुरुषो ग्रामः ३।२।१३५
कुबेरवनम् ३।२।७६
कुब्राह्मणः ३।२।१३०


Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुमारिकल्पा ३।२।६४
कुमारितरा ३।२।६३
कुमारी ब्राह्मण: ३।२।५०
कुमारीनिवास: ३।२।६१
कुम्भकार: ३।२।८
कुरथो राजा ३।२।१३१
कुरुचर: ३।२।२०
कुरुते ३।४।८३
कुरुते तपांसि साधु: ३।४।८५
कुरुमता ३।२।६७
कुरून् सुप्यते ३।३।२१
कुरूमता ३।२।६७
कुर्वन्ति कर्मकरा: ३।३।९५
कुर्वन् ३।४।८३
कुर्वाण: ३।४।८३
कुलटा ३।२।१५५
कुलभार्यामुपवदते ३।३।७८
कुवदो मूर्ख: ३।२।१३१
कुवलिरूपा ३।२।६६
कुवलीरूपा ३।२।६६
कुशावती ३।२।७८
कुशेशयम् ३।२।२५
कुष्णाति पादं रोग: ३।४।७४
कुष्यति पाद: स्वयमेव ३।४।७४
कुष्यते पाद: स्वयमेव ३।४।७४
कुष्यन्ती ३।४।७४
कुष्यन् पाद: स्वयमेव ३।४।७४
कुष्यमाण: पाद: स्वयमेव ३।४।७४
कुस्तुम्बुरूणि ३।२।४८
कूज: ४।१।१११
कूप: ३।२।११०
कूपेपिशाचिका: ३।२।१८
कूलं व्याददाति ३।३।५३
कूलमुद्रुज: ३।२।१११
कूलमुद्वह: ३।२।१११
कूष्ट्रो देश: ३।२।१३०
कूष्णो देश: ३।२।१३७
कृकलाश: ३।२।१५५
कृच्छ्रान्मुक्त: ३।२।१०
कृच्छ्रायते ३।४।३१
कृत: कटो भवता ३।३।२१
कृतं भवता ३।३।२१
कृतयति ३।४।४२
कृत्य: कटो भवता ३।३।२१
कृत्यं भवता ३।३।२१
कृषीवल: ३।२।८२
कृष्णगिरि: ३।२।७७
केतनम् ३।४।६
केतयति ३।४।६
केशश्मश्रु वपते ३।३।९५
केशाकेशि ३।२।७२
कोकूयते खर: ४।१।४७
कोटरावणम् ३।२।७६
कोषिष्यमाण: ३।४।७४
कोष्ण: ३।२।१३७
कोष्णम् ३।२।१३७
कौञ्जायन्यदेशीया ३।२।५८
कौञ्जायन्यवृन्दारिका ३।२।५७
कौण्डिन्य: ३।२।५१
क्रन्त्वा ४।१।१०६
क्रमते ३।३।४७
क्रमन्तेऽस्मिन् योगा: ३।३।४८
क्रान्त्वा ४।१।१०६
क्रामति ३ ४।७३
क्रामति ३।३।४७
क्राम्यति ३।४।७३
क्रियते कट: ३।४।७०
क्रियते कट: स्वयमेव ३।४।८६
क्रियते कटश्चैत्रेण ३।३।२१
क्रियते कटेन ३।४।८६
क्रियते भवता ३।३।२१
क्रियमाण: ३।३।२१
क्रियमाण: कट: स्वयमेव ३।४।८६
क्रिया ३।४।७०
क्रीणाति ३।३।३
क्रीणाति ३।४।७९
क्रीणीव: ३।३।२७
क्रोधं विनयते ३।३।४०
क्रोशमधीयते ३।३।२१
क्रोशो गुडधानाभिर्भूयते ३।३।२१
क्रोष्टा विकुरुते स्वरान् ३।३।८५
क्लामति ३।४।७३
क्लाम्यति ३।४।७३
क्लीबते ३।४।२५
क्लीबायते ३।४।२६
क्षणेपाक: ४।१।११२
क्षत्रियादेश्या ३।२।५६
क्षत्रियाभार्य: ३।२।५६
क्षन्तार: ३।४।१९
क्षरज: ३।२।२६
क्षरेज: ३।२।२६
क्षीरोद: ३।२।१०७
क्षीरोदा नाम नदी ३।२।१०७
क्षेत्रे चिकित्स्य: पारदारिक: ३।४।६
क्षेपयति ३।४।४२
क्षेमङ्कर: ३।२।१११
क्षोदयति ३।४।४२
क्ष्णौति ३।३।२९, ३।३।३०
क्ष्मंमन्य: ३।२।९
खचर: ३।२।२०
खट्वंमन्या ३।२।१११
खट्वावृन्दारिका ३।२।५७
खड्गागिरि: ३।२।७७
खदिरवती ३।२।७८
खदिरसार: ३।२।८६
खपुरवती ३।२।७८
खर्ज: ४।१।१११
खलपुंमन्य: ३।२।१११
खलपुदृष्टि: ३।२।४९
खलु कृत्वा ३।२।१५४
खशय: ३।२।२५
खादिरेष: ३।२।५५
खेचर: ३।२।२०
खेशय: ३।२।२५
गङ्गातीरम् ३।२।१४२
गणयते गण: ३।३।८८
गणयते गणो गोपालकम् ३।३।८८


Jain Education International For Private & Personal Use Only www.jainelibrary.org

गतगता ३। २। ५०
गन्ता ४। १। १०७
गन्तुकाम: ३। २। १४०
गन्धयति ३। ४। ४२
गमयते ३। ३। ९५
गर्गदेशीया ३। २। ५८
गर्गवृन्दारिका: ३। २। ५७
गर्ज: ४। १। १११
गर्दभति ३। ४। २५
गर्दभायते ३। ४। २६
गर्हितं गृणाति ३। ४। १३
गलत्युदकं वलीकेभ्य: ३। ४। ८६
गलन्त्युदकं वलीकानि ३। ४। ८६
गलरोग: ३। २। २२
गलव्रण: ३। २। २२
गल्भते ३। ४। २५
गल्भांचक्रे ३। ४। २५
गल्भायते ३। ४। २६
गवा ३। ४। २५
गवांचकार ३। ४। ४६
गवांबभूव ३। ४। ४६
गवामास ३। ४। ४६
गव्यति ३। ४। २३
गहनायते ३। ४। ३१
गां जानीते ३। ३। ९६
गांमन्य: ३। २। ९
गार्ग: ३। २। ५१
गार्गिक: ३। २। ५१
गार्गिमता ३। २। ६४
गार्ग्यदेशीया ३। २। ५८
गार्ग्यवृन्दारिका ३। २। ५७
गालोडयति ३। ४। ४५
गिरते ग्रास: स्वयमेव ३। ४। ९३
गिलगिल: ३। २। ११५
गीर्षीष्ट ग्रास: स्वयमेव ३। ४। ९३
गुप्तदेशीया ३। २। ५८
गुप्तवृन्दारिका ३। २। ५७
गुप्तापाशा ३। २। ५४
गुप्ताभार्य: ३। २। ५४
गुप्तामानिनी ३। २। ५४
गुप्तिबन्ध: ३। २। २३
गुरुवचनमुच्चरते ३। ३। ३१
गुरुशिष्यौ ३। २। ३९
गुहाशय: ३। २। २५
गृहिणीनेत्रा: ३। २। ४९
गृहीत: ४। १। ८४
गृहे संचरति ३। ३। १००
गृह्णाति ४। १। ८४
गृह्यते ४। १। ८४
गोदोह: सुप्यते ३। ३। २१
गोपदम् ३। २। ४८
गोपनम् ३। ४। ५
गोपायति ३। ३। ३
गोपायति ३। ३। ७४, ३। ४। १
गोपायिता ३। ४। ४
गोप्ता ३। ४। ४
गोमतीभूता ३। २। ६०
गोयोग: ४। १। ११२
गोरिमत्तरा ३। २। ६५
गोविट् ४। १। १०८
गोविशौ ४। १। १०८
गोषुचर: ३। २। २०
गोष्पदं गोसेविते प्रमाणे च ३। २। ४८
गौरखर: ३। २। १८
गौरितमा ३। २। ६४
गौरितरा ३। २। ६४
गौरिमतिकल्पा ३। २। ६५
गौरिमतिचेली ३। २। ६५
गौरिमतितमा ३। २। ६५
गौरिमतितरा ३। २। ६५
गौरिमतिमता ३। २। ६५
गौरिमतिहता ३। २। ६५
गौरिमतीतरा ३। २। ६५
गौरिहता ३। २। ६४
ग्रथ्नीते ग्रन्थ: स्वयमेव ३। ४। ९३
ग्रन्थते ग्रन्थ: स्वयमेव ३। ४। ९३
ग्रहीता ३। ४। ६९
ग्रहीता ४। १। ८४
ग्रहीषीष्ट ३। ४। ६९
ग्रहीष्यते ३। ४। ६९
ग्रामं गतं भवता ३। ३। २१
ग्रामकारक: ३। २। २०
ग्रामणिंमन्य: ३। २। १११
ग्रामणिदृष्टि: ३। २। ४९
ग्रामणीकल्पा ३। २। ६४
ग्राममध्ये प्रवेक्ष्यामि
भव मे त्वं प्रतिष्कश: ३। २। ४८
ग्रामवास: ३। २। २५
ग्रामसूकर: ३। २। १८
ग्रामेवास: ३। २। २५
ग्रासमुच्चरते ३। ३। ३१
ग्राहिता ३। ४। ६९
ग्राहिषीष्ट ३। ४। ६९
ग्राहिष्यते ३। ४। ६९
ग्रीवयते ३। ४। ३८
ग्रेथतु: ४। १। २७
ग्रेथिथ ४। १। २७
घनाघन: ४। १। १३
घातयत्यात्मा ३। ३। ८८
घानिता ३। ४। ६९
घानिषीष्ट ३। ४। ६९
घानिष्यते ३। ४। ६९
चंक्रन्ति ३। ४। १४
चंक्रमीति ३। ४। १४
चंक्रम्यते ३। ४। ११
चंक्रम्यते ३। ४। १४
चकणतु: ४। १। २४
चकणिथ ४। १। २४
चकार ४। १। ३८, ४। १। ३९, ४। १। ४६
चकासांचकार ३। ४। ४६
चकासांबभूव ३। ४। ४६
चकासामास ३। ४। ४६
चक्नस: ४। १। १४
चक्रतु: ४। १। १
चक्रबन्ध: (२) ३। २। २३
चक्रवाकवती ३। २। ७८
चक्रसक्थ: ३। २। ८४


Jain Education International For Private & Personal Use Only www.jainelibrary.org

चक्राणः ३।३।२१
चक्रुः ४।१।१४
चक्रे कटः स्वयमेव ३।४।८६
चक्रेबन्धः ३।२।२३
चखान ४।१।४२
चखान ४।१।४६
चञ्चलँः ४।१।५१
चञ्चल्यँते ४।१।५१
चञ्चुरीति ४।१।५३, ४।१।५४
चञ्चूर्त्ति ४।१।५४
चञ्चूर्यते ३।४।१२, ४।१।५३, ४।१।५४
चनीकसीति ४।१।५०
चनीकस्यते ४।१।५०
चनीस्कद्यते ४।१।५०
चनीस्कन्दीति ४।१।५०
चन्दनसारः ३।२।८६
चन्द्रमुखता ३।२।५९
चन्द्रमुखत्वम् ३।२।५९
चन्द्रमुखदेशीया ३।२।५८
चन्द्रमुखीभार्यः ३।२।५६
चन्द्रमुखीयते ३।२।५६
चन्द्रसूर्यौ ३।२।४१
चराचरः ४।१।१३
चरिकर्ति ४।१।५६
चरीकर्ति ४।१।५६
चर्कर्ति ४।१।५६
चलयति ३।३।१०८
चलाचलः ४।१।१३
चलिकल्प्ति ४।१।५६
चलिक्लृपीति ४।१।५६
चलीकल्प्ति ४।१।५६
चलीक्लृपीति ४।१।५६
चलीक्लृप्यते ४।१।५५
चल्कल्पित ४।१।५६
चल्क्लृपीति ४।१।५६
चस्कन्द ४।१।४५
चाकरीति ४।१।५६
चाकर्ति ४।१।५६
चाकिरति ४।१।५६
चाकीर्तः ४।१।५६
चाचलः ४।१।५१
चाचल्यते ४।१।५१
चाश्चार्यते ४।१।५४
चायिष्यते ३।४।६९
चारकबन्धः ३।२।२३
चिकल्पिषते ३।३।४५
चिकाय ४।१।३६
चिकित्स्यानि क्षेत्रे तृणानि ३।४।६
चिकीर्षति ३।३।३, ३।४।२१, ४।१।३, ४।१।१०४
चिकीर्षते कटः स्वयमेव ३।४।९३
चिकीर्षितुमिच्छति ३।४।२१
चिकीर्षिष्यते कटः स्वयमेव ३।४।९३
चिकीषति ४।१।३६
चिक्ये ४।१।३६
चिक्रंसते ३।३।७४
चिक्लिदः ४।१।१४
चिक्लृप्सति ३।३।४५
चिचयिथ ४।१।३०
चिचाय ४।१।३६
चिचीषति ४।१।३६, ४।१।१०४
चिचेथ ४।१।३०
चिच्छेद ४।१।४२
चिच्यावयिषति ४।१।६१
चिच्ये ४।१।३६
चित्तशयः ३।२।२५
चित्रं करोति ३।४।३७
चित्रगुः ३।२।८
चित्रीयते ३।४।३७
चीयते ३।४।६९
चीवरयते ३।४।४१
चुकुवे ४।१।४७
चुकुषे ३।४।७४
चुक्षावयिषति ४।१।६०
चुच्यावयिषति ४।१।६१
चुलुम्पांचकार ३।३।३
चुलुम्पांचकार ३।४।४६
चुलुम्पांबभूव ३।४।४६
चुलुम्पामास ३।४।४६
चुश्च्योत ४।१।४५
चूर्त्तिः ४।१।५४
चेकीतः ४।१।८६
चेकीयते ४।१।८५
चेक्रीयते ४।१।५५
चेचीयते ४।१।३६, ४।१।४८
चेच्यः ३।४।१५
चेतयति ३।३।१०७
चेता ३।३।२
चेयम् ३।३।२
चेष्यति ३।४।६९
चेष्यते ३।४।६९
चैत्रं प्रति शुश्रूषते ३।३।७१
चैत्रस्य पितृभ्रातरौ ३।२।३९
चैत्रस्य स्वसृदुहितरौ ३।२।३९
चैत्रेणोक्ते मैत्रो वदति ३।३।७९
चोकवीति ४।१।४७
चोकूयते ४।१।४७
चोपयति शाखाम् ३।३।१०८
चोरयति ३।३।३, ३।४।१७, ३।४।७१
चोरयति ३।३।९५
चोरयते गौः स्वयमेव ३।४।९३
चौरकुलम् ३।२।३०
छिद्रकर्णः ३।२।८४
छिद्रयति ३।४।४२
छिन्नकर्णः ३।२।८४
जंगमः ३।४।११
जंघन्यते ४।१।३४
जंजपीति ३।४।१४
जंजप्ति ३।४।१४
जंजप्यते ३।४।१४
जगणतुः ३।४।१६
जगणिथ ३।४।१६
जगाम ४।१।४०
जगृहतुः ४।१।८४
जगृहुः ४।१।८४
जग्मतुः ४।१।१
जग्रन्थ ४।१।२७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | |
|---|---|
| जग्रन्थतुः | ४। १। २७ |
| जग्रन्थिथ | ४। १। २७ |
| जग्ले | ४। १। १, ४। १। ४४ |
| जघास | ४। १। ४० |
| जङ्गमीति | ४। १। ५१ |
| जङ्गम्यते | ४। १। ५१ |
| जङ्घनीति | ४। १। ३४ |
| जङ्घावलिः | ३। २। २२ |
| जजरतुः | ४। १। २६ |
| जजरिथ | ४। १। २६ |
| जजागार | ३। ४। ४९, ४। १। २ |
| जझाम | ४। १। ४२ |
| जञ्जपीति | ४। १। ५२ |
| जञ्जप्यते | ३। ४। १२, ४। १। ५२ |
| जञ्जभीति | ४। १। ५२ |
| जञ्जभ्यते | ३। ४। १२, ४। १। ५२ |
| जटाभिरालापयते | ३। ३। ९० |
| जटाभिरालाप्यते जटिलेन | ३। ३। ९० |
| जटिलो विस्मापयते | ३। ३। ९१ |
| जनमेजयः | ३। ४। ७१ |
| जनयति पुण्यम् | ३। ३। १०८ |
| जनवादान् प्रकुरुते | ३। ३। ७६ |
| जनुषान्धः | ३।२।१३ |
| जरिगर्ढि | ४। १। ५५ |
| जरिहर्ति | ४। १। ५६ |
| जरीगृहीति | ४। १। ८४ |
| जरीगृह्यते | ४। १। ५५ |
| जरीगृह्यते | ४। १। ८४ |
| जरीहर्ति | ४। १। ५६ |
| जर्गर्ढि | ४। १। ५५ |
| जर्हर्ति | ४। १। ५६ |
| जलकुक्कुटः | ३।२।१८ |
| जलासट् | ३। २। ८५ |
| जल्पाकभार्यः | ३। २। ५४ |
| जवनः | ३। ३। ३ |
| जहाति | ४। १। ४०, ४। १। ५८ |
| जहाति | ४। १। ४९ |
| जहे | ४। १। ५८ |
| जहेति | ४। १। ४९ |
| जहौ | ४। १। ४० |
| जागरांचकार | ३। ३। ७५ |
| जागरांचकार | ३। ४। ४९ |
| जागरांबभूव | ३। ४। ४९ |
| जागरामास | ३। ४। ४९ |
| जागरूकरूपा | ३। २। ५४ |
| जागल्ति | ४। १। ५६ |
| जाजाग्रीयते | ३। ४। ९ |
| जाजूर्तः | ४। १। १०९ |
| जाजूर्ति | ४। १। १०९ |
| जाज्वल्यते | ३। ४। ९ |
| जायते | ३। ३। ३ |
| जिगंस्यते | ४। १। १०४ |
| जिगमिषति | ३। ४। २१ |
| जिगांस्यते | ४। १। १०४ |
| जिगाय | ४। १। ३५ |
| जिगीषति | ४। १। ३५ |
| जिघांसति | ४। १। ३४ |
| जिघृक्षति | ४। १। ८४ |
| जिजावयिषति | ४। १। ६० |
| जिज्ञपयिषति | ४। १। १६ |
| जिज्यतुः | ४। १। ३५ |
| जिज्यतुः | ४। १। ८१ |
| जिज्यिथ | ४। १। ७१ |
| जिज्यौ | ४। १। ७१ |
| जिनाति | ४। १। ८१, ४। १। १०३ |
| जिनेन्द्रमुपतिष्ठते | ३। ३। ६० |
| जिहननीयिषति | ४। १। ३४ |
| जिहासति | ४। १। ४० |
| जिहीते | ४। १। ५८ |
| जिहीर्षति | ४। १। ४० |
| जिह्रयांचकार | ३। ४। ५० |
| जिह्राय | ३। ४। ५० |
| जिह्रायकीयिषति | ४। १। ५९, ४। १। ८७ |
| जीनः | ४। १। १०३ |
| जीनवान् | ४। १। १०३ |
| जीमूतः | ३। २। १५५ |
| जीयते | ४। १। ८१ |
| जीयात् | ४। १। ८१ |
| जुगुप्सते | ३। ३। ३, ३। ३। ७४, ३। ४। ५ |
| जुगुप्सिषते | ३। ४। २१ |
| जुघोष | ४। १। ४२ |
| जुज्यावयिषति | ४। १। ६० |
| जुहवांचकार | ३। ४। ५० |
| जुहवांचक्रे | ३। ४। ५० |
| जुहवानि | ४। १। १२ |
| जुहाव | ३। ४। ५०, ४। १। ८७ |
| जुहावयिषति | ४। १। ६०, ४। १। ८८ |
| जुहुवतुः | ४। १। ८७ |
| जुहुवे | ३। ४। ५० |
| जुहोति | ४। १। १२, ४। १। ४० |
| जुह्वत् | ४। १। १२ |
| जूः | ४। १। १०९ |
| जूरः | ४। १। १०९ |
| जूरौ | ४। १। १०९ |
| जूर्त्तिः | ४। १। १०९ |
| जूर्मा | ४। १। १०९ |
| जूहूर्षति | ४। १। ८७ |
| जेगीयते | ४। १। १ |
| जेघ्रीयते | ४। १। १ |
| जेजीयते | ४। १। ३५ |
| जेजीयते | ४। १। ८१ |
| जेजेति | ४। १। ८१ |
| जेरतुः | ४। १। २६ |
| जेरिथ | ४। १। २६ |
| जेहीयते | ४। १। ४८, ४। १। ४९ |
| जेह्रीयते | ४। १। ५५ |
| जोगुपीति | ३। ४। १ |
| जोगोप्ति | ३। ४। १ |
| जोघुण्यते | ४। १। ५१ |
| जोहूयते | ४। १। ८७ |
| जोहोर्ति | ४। १। ११० |
| ज्ञंमन्यः | ३। २। १११ |
| ज्ञंमन्यः | ३। २। ९ |
| ज्ञानमस्य ज्ञेयेषूपतिष्ठते | ३। ३। ८३ |
| ज्ञितमा | ३। २। ६६ |
| ज्ञिब्रुवा | ३।२।६६ |
| ज्ञीतमा | ३। २। ६६ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञीप्सति ४।१।१६
ज्ञीब्रुवा ३।२।६६
ज्याता ४।१।८१
ञिङ्कारीयिषति ४।१।४६
ञुञ्ङ्वे ४।१।४६
टिठकारयिषति ४।१।४२
टिष्ठेव ४।१।४३
टुष्ठ्यूषति ४।१।४३
टेष्ठीव्यते ४।१।४३
डुढौके ४।१।४२
तं हाऽधिचक्रे ३।३।७७
तक्षति काष्ठम् ३।४।७७
तक्षमाण: ३।४।७७
तक्ष्णुवान: ३।४।७७
तक्ष्णोति काष्ठम् ३।४।७७
तत: ३।२।७
ततक्षतु: ४।१।२४
ततक्षिथ ४।१।२४
ततनिषति ४।१।१०५
तत्कर: ३।२।४८
तत्र ३।२।७
तत्रसतु: ४।१।२६
तत्रसिथ ४।१।२६
तथा ३।२।६१
तदा ३।२।६१
तद्यङ् ३।२।१२२
तद्यञ्च: ३।२।१२२
तद्यञ्चौ ३।२।१२२
तनुगात्रीचरी ३।२।५६
तनुते ३।४।८३
तनोति ३।३।३
तनोति ३।४।८३
तन्तनीति ४।१।५१
तन्तन्यते ४।१।५१
तन्तयँ: ४।१।५१
तन्तय्यँते ४।१।५१
तन्तान्तः ४।१।१०७
तन्त्रितरा ३।२।६६
तन्वन् ३।४।८३
तन्वान: ३।४।८३
तपसि वदते ३।३।७८
तपस्यति ३।४।३६
तपस्यति शत्रून् ३।४।३६
तपांसि साधु(धुं) तपति(न्ति) ३।४।८५
तप्यते तप: साधु : ३।४।८५
तरिष्यते ३।४।६९
तरीष्यते ३।४।६९
तर्हि ३।२।६१
तष्ठ्यौ ४।१।४३
तस्करश्चौरे ३।२।४८
तस्थौ ४।१।४२
तस्थौ ४।१।४३
तस्यास्त्रयस्त्रीनपि० ४।१।८४
तातय: ४।१।५१
तातय्यते ४।१।५१
तातर्ति ४।१।५६
तातूर्त: ४।१।१०९
तातूर्ति ४।१।१०९
तान्त: ४।१।१०७
तारिष्यते ३।४।६९
तावान् ३।२।१५२
तिग्मरुक् ३।२।८५
तितंसति ४।१।१०५
तितनिषति ४।१।१०५
तितवनीयिषति ४।१।१
तितांसति ४।१।१०५
तितिक्षते ३।३।७४, ३।४।५
तितिक्षते ४।१।३
तितिक्षयति ३।३।७४
तितीर्वान् ४।१।२५
तिमिंगिलगिल: ३।२।११५
तिमिङ्गिल: ३।२।११५
तिमिङ्गिलगिल: ३।२।११५
तिरश्च: ३।२।१२४
तिरश्चा ३।२।१२४
तिरश्ची ३।२।१२४
तिरश्चीन: ३।२।१२४
तिर्यक्षु ३।२।१२४
तिर्यग्भि: ३।२।१२४
तिर्यग्भ्य: ३।२।१२४
तिर्यग्भ्याम् ३।२।१२४
तिर्यङ् ३।२।१२४
तिर्यञ्च: ३।२।१२४
तिर्यञ्चौ ३।२।१२४
तिष्ठते कन्या छात्रेभ्य: ३।३।६४
तिष्ठते वृषली ग्राम्येभ्य: ३।३।६४
तिष्ठेव ४।१।४३
तिष्ठेव ४।१।४५
तीर्थकर: ३।२।११७
तीर्थंकर: ३।२।११७
तीर्थकाक: ३।२।१८
तीव्ररुक् ३।२।८५
तुत्रोके ४।१।३९
तुदति ३।३।३
तुदति ३।४।८१
तुदन् ३।४।८१
तुदमान: ३।४।८१
तुर: ४।१।११०
तुरासट् ३।२।८५
तुरौ ४।१।११०
तुष्ठ्यूषति ४।१।४३
तू: ४।१।१०९, ४।१।११०
तूर: ४।१।१०९
तूरौ ४।१।१०९
तूर्ण: ४।१।१०९, ४।१।११०
तूर्ति: ४।१।१०९, ४।१।११०
तूर्मा ४।१।१०९
तूर्विता ४।१।११०
तूष्णींगङ्गं वसति ३।२।५
ते पचन्ति ३।३।१७
तेजनम् ३।४।५
तेजयति ३।३।७४, ३।४।५
तेतिम्यते ४।१।५१
तेरतु: ४।१।२५
तेरिथ ४।१।२५
तेष्ठीव्यते ४।१।४३
तैलं सर्पिषो जानाति ३।३।८२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तोर्मा ४। १। ११०
तौ पचत: ३। ३। १७
त्यजनम् ४। १। १११
त्याग: ४। १। १११
त्याज्यम् ४। १। ११८
त्यादृक्ष: ३। २। १५२
त्यादृक् ३। २। १५२
त्यादृश: ३। २। १५२
त्रय:पञ्चाशत् ३। २। ९३
त्रय:षष्टि: ३। २। ९३
त्रय:सप्तति: ३। २। ९३
त्रयश्चत्वारिंशत् ३। २। ९३
त्रयस्त्रिंशत् ३। २। ९२
त्रयोऽनुयाजा: ४। १। ११४
त्रयोदश ३। २। ९२
त्रयोनवति: ३। २। ९३
त्रयोविंशति: ३। २। ९२
त्रसति ३। ४। ७३
त्रस्यति ३। ४। ७३
त्रिकोशलम् ३। २। ५
त्रिचतुरा: ३। २। ९२
त्रिचत्वारिंशत् ३। २। ९३
त्रिचत्वारिंशा: ३। २। ९३
त्रिचितीक: ३। २। ८३
त्रिनवति: ३। २। ९३
त्रिपच्चाशद् गौतमम् ३। २। ५
त्रिपञ्चाशत् ३। २। ९३
त्रिपाद्यम् ३। २। ९६
त्रिमुनि व्याकरणस्य ३। २। ९२
त्रिलोकी तिलकयति ३। ४। ४२
त्रिशतम् ३। २। ९२
त्रिषष्टि: ३। २। ९३
त्रिसप्तति: ३। २। ९३
त्रिसहस्रम् ३। २। ९२
त्रुटति ३। ४। ७३
त्रुट्यति ३। ४। ७३
त्रेपाते ४। १। २५
त्रेपिरे ४। १। २५
त्रेपे ४। १। २५
त्रेसतु: ४। १। २६
त्रेसिथ ४। १। २६
त्रैमातुर: ३। २। ९२
त्र्यशीति: ३। २। ९२
त्र्यशीति: ३। २। ९३
त्वं पचसि ३। ३। १७
त्वक्सार: ३। २। १८
त्वचयति ३। ४। ४२
त्वचिसार: ३। २। १८
त्वद्भवति ३। ३। १७
त्वादृक्ष: ३। २। १५२
त्वादृक् ३। २। १५२
त्वादृश: ३। २। १५२
दंदशीति ३। ४। १२, ४। १। ५२
दक्षिणतारम् ३। २। १४२
दक्षिणतीरम् ३। २। १४२
दक्षिणापथ: ३। २। ८६
दक्षिणोत्तरपूर्वाणाम् ३।२।६१
दण्डयति ३। ४। ४२
दण्डादण्डि ३। २। ७२
दत्त: ३। २। १०८
दत्तजातीया ३। २। ५८
दत्तवृन्दारिका ३। २। ५७
दत्ताता ३। २। ५९
दत्तात्वम् ३। २। ५९
दत्तात् ४। १। ३१
दत्ताभार्य: ३। २। ५४
दत्तारूपा ३। २। ५४
दत्तारूपा ३। २। ६४
ददात ४। १। ३०
ददिरे ४। १। ३०
ददे ४। १। ३०
ददम्भ ४। १। २८
ददम्भिथ ४। १। २९
दधयति ३। ४। २५
दधित्थ: ३। २। १५५
दधौ ४। १। ४२
दनीध्वंस: ३। ४। १५
दनीध्वंसीति ४। १। ५०
दनीध्वस्यते ४। १। ५०
दन्तावल: ३। २। ८२
दन्दश्यते ३। ४। १२, ४। १। ५२
दन्दहीति ४। १। ५२
दन्दह्यते ३। ४। १२, ४। १। ५२
दन्दान्त: ४। १। १०७
दन्द्रम्यते ३। ४। ११
दमदमायति ३। ४। ३०
दमदमायते ३। ४। ३०
दमयतेऽश्वम् ३। ३। ९४
दयांचक्रे ३। ४। ४७
दयांचक्रे ४। १। १
दयांबभूव ३। ४। ४७
दयामास ३। ४। ४७
दरीदृश्यते ४। १। ५५
दरीधृज्यते ४। १। ५५
दर्शनीयकल्पा ३। २। ५०
दर्शनीयका ३। २। ५०
दर्शनीयदेश्या ३। २। ५०
दर्शनीयपाशा ३। २। ५०
दर्शनीयमानिनी ३। २। ५०
दर्शनीयमानिनीयमस्या: ३। २। ५०
दर्शनीयमानी अयमस्या: ३। २। ५०
दर्शनीयरूपा ३। २। ५०
दर्शनीयामाता ३। २। ४९
दर्शयति प्रदीपो भृत्यान् ३। ३। ८८
दर्शयते राजा भृत्यान् भृत्यैरिति वा ३। ३। ८८
दर्शिता ३। ४। ६९
दर्शिषीष्ट ३। ४। ६९
दर्शिष्यते ३। ४। ६९
दवयति ३। ४। ४२
दाक्षि: ३। ३। १
दातं बर्हि: ३। ३। ५
दाता ३। ४। ६९
दातार: ३। ४। १९
दात्राकर्ण: पशु: ३। २। ८४
दादरिद्यते ३। ४। ९
दान्त: ४। १। १०७
दायिता ३। ४। ६९

दायिषीष्ट ३। ४। ६९
दायिष्यते ३। ४। ६९
दारदजातीया ३। २। ५८
दारदवृन्दारिका ३। २। ५७
दारदिका ३। २। ५०
दारद्य: ३। २। ५१
दारुवहम् ३। २। ८९
दाशुषी ४। १। १५
दाश्वांसौ ४। १। १५
दाश्वान् ४। १। १५
दासभार्या ३।२।३०
दासीपुत्र: ३।२।३१
दासीष्ट ३। ४। ६९
दास्यति ३। ४। ६९
दास्यते ३। ४। ६९
दिग्धपादोपहत: ३। २। ९५
दिग्याते ४। १। ३२
दिग्यिरे ४। १। ३२
दिग्ये ४। १। ३२
दित्सति दण्डम् ४। १। २०
दित्सति वस्त्रम् ४। १। २०
दित्सते पुत्रम् ४। १। २०
दित्सते वस्त्रम् ४। १। २०
दिदम्भिषति ४। १। १८
दिदिवतु: ४। १। २४
दिदीर्वान् ४। १। १
दिदृक्षते देवम् ३। ३। ७२
दिदेविथ ४। १। २४
दिद्युते ४। १। ४१
दिद्रावयिषति ४। १। ६१
दिव:पृथिव्यौ ३। २। ४५
दिवस्पति: ३।२।३६
दिवस्पृथिव्यौ ३। २। ४५
दिवाकरनिशाकरौ ३। २। ४१
दिवामन्या रात्रि: ३। २। १११
दिविज: ३। २। २७
दिविस्पृक् ३। २। २०
दिवोदास: ३। २। ३६
दिवौकस: ३। २। १५५
दिशोदण्ड: ३। २। ३२
दीदांसति ३। ४। ७
दीदांसते ३। ४। ७
दीर्घकेशजातीया ३। २। ५८
दीर्घकेशमानिनी ३। २। ५६
दीर्घकेशवृन्दारिका ३। २। ५७
दीर्घकेशीभार्य: ३। २। ५६
दीव्यति ३। ३। ३, ३। ३। १००, ३। ४। ७२
दीव्यन् ३। ४। ७२
दु:खायते ३। ४। ३४
दुग्धे गौ: पय: स्वयमेव ३। ४। ८७
दुग्धे गौ: स्वयमेव ३। ४। ९३
दुग्धे गौ: स्वयमेव ३। ४। ८७
दुद्यूषति ४। १। १०८
दुद्रावयिषति ४। १। ६१
दुर्वृत्तानवकुरुते ३। ३। ७६
दुहितापुत्रौ ३। २। ४०
दुहितु:पति: ३।२।३८
दुहितृपति: ३।२।३८
दूडभ: ३। २। १५५
दूडास: ३। २। १५५
दूढ्य: ३। २। १५५
दूणास: ३। २। १५५
दूरादागत: ३।२।१०
दूरेपाक: ४। १। ११२
दृक्षीष्ट ३। ४। ६९
दृढभक्ति: ३। २। ५३
दृषदिमाषक: ३।२।१९
देदेति ४। १। १०८
देद्युत्यते ४। १। ४१
देद्यूत: ४। १। १०८
देद्योति ४। १। १०८
देद्योषि ४। १। १०८
देध्मीयते ४। १। १
देभतु: ४। १। २८
देभिथ ४। १। २९
देभु: ४। १। २८
देय: कटो भवता ३। ३। २१
देयं भवता ३। ३। २१
देव: ३। २। १०८
देवदत्त: ३। २। १०८
देवद्र्यङ् ३। २। १२२
देवद्र्यञ्च: ३। २। १२२
देवद्र्यञ्चौ ३। २। १२२
देवयुक् ३। २। १२२
देवानांप्रिय: ३। २। ३४
देहि (२) ४। १। ३१
दोर्दोषि ३। २। ७२
दोषामन्यमह: ३। २। १११
दौहार्दम् ३। २। ९४
द्यावाक्षमे ३। २। ४४
द्यावानक्ते ३। २। ४४
द्यावापृथिव्यौ ३। २। ४५
द्युदास: ३। २। ३६
द्युपति: ३। २। ३६
द्युभि: ४। १। १०८
द्युभ्याम् ४। १। १०८
द्यूत: ४। १। १०८
द्यूतवान् ४। १। १०८
द्योतते ३। ३। ४४
द्रक्ष्यते ३। ४। ६९
द्रष्टा ३। ४। ६९
द्रावयत्यय: ३। ३। १०८
द्रुणिंमन्य: ३। २। १११
द्रुणीतमा ३।२।६६
द्रुणीदेशीया ३। २। ५८
द्रुणीभार्य: ३। २। ४९
द्रुमवती ३। २। ७८
द्रोणीभार्य: ३। २। ४९
द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति ३। ३। २६
द्वयङ्गुलाकर्ण: ३। २। ८४
द्वाचत्वारिंशत् ३। २। ९३
द्वात्रिंशत् ३। २। ९२
द्वादश ३। २। ९२
द्वादृक्ष: ३। २। १५२
द्वादृक् ३। २। १५२
द्वादृश: ३। २। १५२
द्वानवति: ३। २। ९३


Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वापञ्चाशत् ३। २। ९३
द्वारमुद्घाटयति ३। ४। ४२
द्वाविंशति: ३। २। ९२
द्वाषष्टि: ३। २। ९३
द्वासप्तति: ३। २। ९३
द्विगुणाकर्ण: ३। २। ८४
द्विचत्वारिंशत् ३। २। ९३
द्विचत्वारिंशा: ३। २। ९३
द्विचितीक: ३। २। ८३
द्वितीयता ३। २। ५९
द्वितीयत्वम् ३। २। ५९
द्वितीयाकल्पा ३। २। ५४
द्वितीयाभार्य: ३। २। ५४
द्वित्रा: ३। २। ९२
द्विदशा: ३। २। ९२
द्विधा ३। २। ७
द्विनवति: ३। २। ९३
द्विपञ्चाशत् ३। २। ९३
द्विपाद्यम् ३। २। ९६
द्विमुनि व्याकरणस्य ३। २। ९२
द्वियमुनं वसति ३। २। ५
द्विशतम् ३। २। ९२
द्विषष्टि: ३। २। ९३
द्विष्पचतीत्याह ३। ३। २७
द्विसप्तति: ३। २। ९३
द्विसहस्रम् ३। २। ९२
द्वीपम् ३। २। १०९
द्वैमातुर: ३। २। ९२
द्व्यशीति: ३। २। ९२
द्व्यशीति: ३। २। ९३
धत्तात् ४। १। ३१
धनमादत्ते ३। ३। ५३
धनुर्धनुषि ३। २। ७२
धन्वकारक: ३। २। २०
धर्मं जिज्ञासते ३। ३। ७०
धर्मरुचि: ३। २। २०
धर्मे विवदन्ते ३। ३। ७८
धापयते शिशुम् ३। ३। ९४
धारय: ३। ४। ७१
धित्सति श्रुतम् ४। १। २०
धित्सति स्तनम् ४। १। २०
धित्सते श्रुतम् ४। १। २०
धिप्सति ४। १। १८
धीप्सति ४। १। १८
धीरूपा ३। २। ६६
धुर: ४। १। ११०
धुरौ ४। १। ११०
धू: ४। १। ११०
धूपायति ३। ४। १
धूपायिता ३। ४। ४
धूपिता ३। ४। ४
धूम आक्रामति ३। ३। ५२
धूम उच्चरति ३। ३। ३१
धूमायति ३। ४। ३०
धूमायते ३। ४। ३०, ३। ४। ३३
धूमावती ३। २। ७८
धूर्गिल: ३। २। ११५
धूर्ण: ४। १। ११०
धूर्णवान् ४। १। ११०
धूर्त: ४। १। ११०
धूर्ति: ४। १। ११०
धेनुभव्या ३। २। ११८
धेनुम्भव्या ३। २। ११८
धेहि ४। १। ३१
धोर्मा ४। १। ११०
न चोपलेभे वणिजां पणाया: ३। ४। १
न पाचको जाल्म: ३। २। १२६
न भुङ्क्ते ३। २। १२५
न: ३। ४। १९
न:क्षुद्र: ३। २। ९९
नकुल: (२) ३। २। १२८
नक्र: ३। २। १२८
नक्षत्रम् ३। २। १२८
नख: ३। २। १२८
नग: पर्वत: ३। २। १२७
नगरवायस: ३। २। १८
नगा वृक्षा: ३। २। १२७
नग्न: ३। २। १२८
नदी सुप्यते ३। ३। २१
नदीकुक्कुटिका ३। २। १८
नदीकूलं पिपतिषति ३। ४। २१
नदीचर: ३। २। २०
नध्री(दृध्री)दोह: ३। २। १९
ननान्दा ३। २। १२८
ननान्दायातरौ ३। २। ३९
ननान्दु:पति: ३। २। ३८
ननान्दृपति: ३। २। ३८
नपात् (२) ३। २। १२८
नपुंसकम् ३। २। १२८
नभ: ३। २। १२८
नभाग: ३। २। १२८
नभ्राट् (२) ३। २। १२८
नम: करोति ३। ४। ३७
नमति पल्लवो वातेन ३। ४। ९३
नमते दण्ड: स्वयमेव ३। ४। ९३
नमस्यति देवान् ३। ४। ३७
नमुचि: ३। २। १२८
नमेरु: ३। २। १२८
नयति ३। ३। १००
नयते तत्त्वार्थे ३। ३। ३९
नयते विद्वान् स्याद्वादे ३। ३। ३९
नरंमन्य: ३।२।९
नरक: ३। २। ८६
नरिनर्त्ति ४। १। ४८, ४। १। ५६
नरिनृतीति ४। १। ५६
नरीनर्ति ४। १। ५६
नरीनृतीति ४। १। ५६
नरीनृत्यते ४। १। ४८, ४। १। ५५, ४। १। ५६
नरै: परस्परेण भोज्यते। ३। २। १
नर्त्तकिरूपा ३। २। ६४
नर्त्तयते नटम् ३। ३। ९४
नर्नर्ति ४। १। ४८, ४। १। ५६
नर्नृतीति ४। १। ५६
नलागिरि: ३। २। ७७
नलोपाख्यानम् ३। ४। ४२
नवेदा: (२) ३। २। १२८


Jain Education International For Private & Personal Use Only www.jainelibrary.org

नस्त: ३। २। ९९
नस्यम् ३। २। १००
नाक: ३। २। १२८
नाग: ३। २। १२८
नागवलम् ३। २। ८२
नाचिकेत: ३। २। १२८
नाटयति ३। ४। १६
नादेयीरूपा ३। २। ५५
नानाकृत्य ३। २। १५४
नान्तरीयकम् ३। २। १२८
नापित: ३। २। १२८
नायक: ३। ३। १
नाययति ३। ३। १
नारक: ३। २। ८६
नारङ्गम् ३। २। १२८
नाराच: ३। २। १२८
नावंमन्य: ३। २। ९
नावा ३। ४। २५
नाव्यति ३। ४। २३
नाशयति पापम् ३। ३। १०८
नासत्य: ३। २। १२८
नासत्यौ ३। २। १२८
नासिक्यं नगरम् ३। २। १००
नासिक्यो वर्ण: ३। २। १००
नास्तिक: ३। २। १२८
नि:स्तोक: ३। २। १०
निकाश: ३। २। ८६
निगारयति ३। ३। १०८
निगिरते ग्रास: स्वयमेव ३। ४। ९३
निगीर्षीष्ट ग्रास: स्वयमेव ३। ४। ९३
निजेगिल्यते ३। ४। १२
नित्यं शब्दं आतिष्ठते ३। ३। ६५
निदाघ ऋतुविशेष: ४। १। ११२
निद्रायति ३। ३। ४३
निद्रायते ३। ३। ४३
निनयिथ ४। १। १
निनाय ३। ४। ४८, ४। १। १
निनाय ४। १। ३९
निनिक्षति ४। १। ५७
निनेज ४। १। ५७
निन्यतु: ४। १। १
नियोग्य: ४। १। ११६
नियोज्य: ४। १। ११६
निरर्थकत्व ३। २। ५९
निरस्यति शत्रून् ३। ३। २५
निरुक् ३। २। ८५
निरूपयति ३। ४। ४२
निर्युनक्ति ३। ३। २६
निर्लयनी ३। २। १५५
निवह: ४। १। ११२
निविविक्षते ३। ३। ७४
निविशते ३। ३। २४
निशातमायाम् ३। २। २४
निशानम् ३। ४। ७
निषाद: ३। २। ८६
निष्क्रमते ३। ३। ४९
निष्टपति ३। ३। ८७
निहार: ३। २। ८६
नीकाश: ३। २। ८६, ३। २। ८७
नीक्लेद: ३। २। ८६
नीचेपाक: ४। १। ११२
नीचेपाकु: ४। १। ११२
नीत्तम् ३। २। ८८
नीपम् ३। २। १०९
नीमार्ग: ३। २। ८६
नीमेद: ३। २। ८६
नीरुक् ३। २। ८५
नीरुक् ३। २। ८५
नीवार: ३। २। ८६
नीवृत् ३। २। ८५
नीशार: ३। २। ८६
नीहारो हिमम् ३। २। ८६
नुनूषति ४। १। १०४
नेनिक्ते ४। १। ५७
नेनिज्यात् ४। १। ५७
नेनेक्ति ४। १। ५७
नेनेक्तु ४। १। ५७
नेन्य: ३। ४। १५
नेमतु: ४। १। २४
नेमिथ ४। १। २४
नेमु: ४। १। २४
नेष्टोद्गातारौ ३। २। ३९
न्यगीर्ष्ट ग्रास: स्वयमेव ३। ४। ९३
न्यगूहीत् ३। ४। ५५
न्यग्रोध: ४। १। १२१
न्यघुक्षत् ३। ४। ५५
न्यविशत ३। ३। २४
न्युद्ग: ४। १। ११२
न्युद्ग: ४। १। १२०
न्युब्जो नाम रोग० ४। १। १२०
न्योको वृक्ष: शकुन्तो वा ४। १। ११२
पक्त्वा ४। १। १०७
पक्तमा ३। २। ५०
पक्तरा ३। २। ५०
पक्ष्यते ओदन : स्वयमेव ३। ४। ८७
पङ्करुहम् ३। २। २०
पङ्केरुहम् ३। २। २०
पङ्गुचेली ३। २। ६७
पङ्गूचेली ३। २। ६७
पचच्चेली ३। २। ६३
पचत: ३। ३। १७
पचति ३। ३। १७
पचतितराम् ३। २। ७
पचते ३। ३। १७, ३। ३। ९५
पचत्कल्पा ३। २। ६३
पचत्तमा ३। २। ६३
पचत्तरा ३। २। ६३
पचत्पाशा ३। २। ६३
पचत्योदनं चैत्र: ३। ४। ८६
पचथ: ३। ३। १७
पचद्गोत्रा ३। २। ६३
पचद्धता ३। २। ६३
पचद्रूपा ३। २। ६३
पचद्ब्रुवा ३। २। ६
पचध्वे ३। ३। १७
पचनम् ४। १। १११
पचन्ति ३। ३। १७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पचन्ति पाचकाः ३।३।९५
पचन्तिकल्पा ३।२।६३
पचन्तिगोत्रा ३।२।६३
पचन्तिचेली ३।२।६३
पचन्तितमा ३।२।६३
पचन्तितरा ३।२।६३
पचन्तिब्रुवा ३।२।६३
पचन्तिमता ३।२।६३
पचन्तिरूपा ३।२।६३
पचन्तिहता ३।२।६३
पचन्तीकल्पा ३।२।६३
पचन्तीगोत्रा ३।२।६३
पचन्तीचेली ३।२।६३
पचन्तीतमा ३।२।६३
पचन्तीतरा ३।२।६३
पचन्तीब्रुवा ३।२।६३
पचन्तीमता ३।२।६३
पचन्तीरूपा ३।२।६३
पचन्तीहता ३।२।६३
पचन्ते ३।३।१७
पचन्मता ३।२।६३
पचन् ४।१।७१
पचमानः ४।१।७१
पचसि ३।३।१७
पचामः ३।३।१७
पचामहे ३।३।१७
पचामि ३।३।१७
पचावः ३।३।१७
पचावहे ३।३।१७
पचे ३।३।१७
पचेते ३।३।१७
पचेथे ३।३।१७
पच्छब्दः ३।२।९८
पच्छो गायत्रीं शंसति ३।२।९७
पच्यते ३।४।७१, ४।१।२४
पच्यते ओदनः स्वयमेव ३।४।८७
पञ्च प्रयाजाः ४।१।११४
पञ्च वारान् भुज्यते भवता ३।३।२१
पञ्चकर्णः ३।२।८४
पञ्चगर्गाः ३।२।५०
पञ्चदश ३।२।९२
पञ्चमजातीया ३।२।५८
पञ्चमता ३।२।५९
पञ्चमत्वम् ३।२।५९
पञ्चमवृन्दारिका ३।२।५७
पञ्चमीदेश्या ३।२।५४
पञ्चमीभार्यः ३।२।५४
पञ्चमीयते ३।२।५४
पटपटायति ३।३।४३, ३।४।३०
पटपटायते ३।३।४३, ३।४।३०
पटयति ३।४।४२
पटयति ३।२।५१
पटिष्ठा ३।२।५१
पटीयसी ३।२।५१
पटुचरी ३।२।५०
पटुजातीया ३।२।५८
पटुता ३।२।५९
पटुत्वम् ३।२।५९
पटुदेशीया ३।२।५८
पटुभार्यः ३।२।४९
पटुभार्यः ३।२।५६
पटुरुक् ३।२।८५
पटूभूता ३।२।६०
पट्विका ३।२।५०
पट्वीभूता ३।२।६०
पट्वीमयम् ३।२।५०, ३।२।५१, ३।२।५९
पट्वीरूप्यम् ३।२।५०, ३।२।५१, ३।२।५९
पठिष्यते ३।४।६९
पणायति ३।४।१
पणायिता ३।४।४
पणिता ३।४।४
पण्डितंमन्यः ३।२।१११
पण्डितमानी ३।२।१११
पतङ्गः ३।२।१११
पतापतः ४।१।१३
पत्काषी ३।२।९६
पत्नीसंयाजाः ४।१।११४
पदं मिथ्या कारयते ३।३।९३
पदं मिथ्या वाचयति ३।३।९३
पदगः ३।२।९५
पदयते ३।४।१६
पदाजिः ३।२।९५
पदातिः ३।२।९५
पदिकः ३।२।९६
पदुपहतः ३।२।९६
पदोपहतः ३।२।९५
पद्रः ३।२।९६
पद्घोषः ३।२।९८
पद्धतिः ३।२।९६
पद्धिमम् ३।२।९६
पद्मावती ३।२।७८
पद्यं घृतम् ३।२।९६
पद्याः पांसवः ३।२।९६
पद्याः शर्कराः ३।२।९६
पनायति ३।४।१
पनायिता ३।४।४
पनिता ३।४।४
पनीपतीति ४।१।५०
पनीपत्यते ४।१।५०
पनीपदीति ४।१।५०
पनीपद्यते ४।१।५०
पन्निष्कः ३।२।९८
पन्मिश्रः ३।२।९८
पपक्थ ४।१।२४
पपतुः ४।१।१
पपाच ३।४।४६, ४।१।१, ४।१।४२, ४।१।४४, ४।१।५९, ४।१।६८
पपाठ ४।१।१
पपार ४।१।५८
पपौ ४।१।१
पपौ ४।१।३९
पप्रच्छतुः ४।१।८४
पप्सौ ४।१।४५
पफणतुः ४।१।२६


Jain Education International For Private & Personal Use Only www.jainelibrary.org

पफणिथ ४। १। २६
पफाल ४। १। ४२
पम्पशीति ४। १। ५२
पम्पश्यते ४। १। ५२
पम्फाल्यते ४। १। ५४
पम्फुलीति ४। १। ५३
पम्फुल्ति ४। १। ५४
पम्फुल्यते ४। १। ५३
पय उपयोजयते चैत्रेण ३। ३। १०८
पयस्यते ३। ४। २७
पयायते ३। ४। २७
पयो व्रतयति ३। ४। ४३
परदारानुपवदते ३। ३। ७८
परदारान् प्रकुरुते ३। ३। ७६
परमकृत्वा ३। २। १५४
परमपत्काषी ३। २। ९६
परमोच्चैः ३। २। ७
परशयति ३। ४। ४२
परस्परस्य व्यतिलुनन्ति ३। ३। २३
परस्मैपदम् ३। २। १७
परस्मैभाषा ३। २। १७
परहितम् ३। २। १७
पराक्रमते ३। ३। ४९
पराक्रामति ३। ३। ४९
पराचिकीर्षति ३। ३। ७४
पराजयते ३। ३। २८
परापम् ३। २। १०९
परिक्रीडते ३। ३। ३४
परिक्रीणीते ३। ३। २७
परिचीवरयते ३। ४। ४१
परिणमते मृत् स्वयमेव ३। ४। ९३
परिपुच्छयते ३। ४। ३९
परिपूर्णभक्तिः ३। २। ५३
परिप्यानमूधः ४। १। ९३
परिभाण्डयते ३। ४। ४०
परिमृष्यति ३। ३। १०४
परिमोहयते चैत्रम् ३। ३। ९४
परिरमति ३। ३। १०५
परिरोधः ३। २। ८६
परिवस्त्रयति ३। ४। ४२
परिवहः ४। १। ११२
परिवहति ३। ३। १०४
परिवारयन्ते कण्टका वृक्षं स्वयमेव ३। ४। ९४
परिवासयति ३। ४। ४२
परिवीय ४। १। ७८
परिव्याय ४। १। ७८
परिव्राज्यम् ४। १। १११
परिष्करिष्यते कन्या स्वयमेव ३। ४। ९३
परिष्कुरुते कन्या स्वयमेव ३। ४। ९३
परिहारः ३। २। ८६
परीणत् ३। २। ८५
परीणामः (२) ३। २। ८६
परीतत् ३। २। ८५
परीत्तम् ३। २। ८८
परीत्तवान् ३। २। ८८
परीत्त्रिमम् ३। २। ८८
परीपर्त्ति ४। १। ५८
परीपृच्छ्यते ४। १। ५५
परीपृच्छ्यते ४। १। ८४
परीरोधो मृगावरोधः ३। २। ८६
परीवृट् ३। २। ८५
परीहारो देशानुग्रहः ३। २। ८६
पर्पर्त्ति ४। १। ५८
पर्यङ्कीयति मञ्चके ३। ४। २४
पर्यस्कृत कन्या स्वयमेव ३। ४। ९३
पलायांचक्रे ३। ४। ४७
पलायांबभूव ३। ४। ४७
पलायामास ३। ४। ४७
पश्यतोहरः ३। २। ३२
पश्चिमतारम् ३। २। १४२
पश्चिमतीरम् ३। २। १४२
पाकः ३। ३। १, ३। ३। २१, ४। १। १११
पाकं करोति ३। ३। २१
पाकभार्यः ३। २। ५४
पाकाः ३। ३। २१
पाको वर्तते ३। ३। २१
पाकौ ३। ३। २१
पाक्यम् ३। ३। १
पाक्यम् ४। १। १११
पाचकजातीया ३। २। ५८
पाचकता ३। २। ५९
पाचकत्वम् ३। २। ५९
पाचकदेशीया ३। २। ५८
पाचकवृन्दारिका ३। २। ५७
पाचयति ३। ४। २०
पाचयांचकार ३। ३। ७५
पाचयांचक्रे ३। ३। ७५
पाचयिता ओदनः ३। ४। ९३
पाचयिष्यते ओदनः ३। ४। ९३
पाचिकामानिनी ३। २। ५४
पाचिकारूपा ३। २। ५४
पाचिता ओदनः स्वयमेव ३। ४। ९२
पाचिषीष्ट ओदनः स्वयमेव ३। ४। ९२
पाटवम् ३। २। ५१
पाटूपटः ४। १। १३
पात्रीभार्यः ३। २। ४९
पादघोषः ३। २। ९८
पादनिष्कः ३। २। ९८
पादमिश्रः ३। २। ९८
पादयते ३। ४। ३८
पादशः कार्षापणं ददाति ३। २। ९७
पादशः श्लोकं व्याचष्टे ३। २। ९७
पादशब्दः ३। २। ९८
पाद्यम् ३। २। ९६
पापचिषते ४। १। ५९, ४। १। ६०
पापचीति ४। १। ४८
पापच्यते ३। ३। ३, ३। ३। २२, ३। ४। [illegible]
४। १। ३, ४। १। ४८, ४। १। ५१
पापच्यमानः ३। ३। २२
पापच्यस्व ३। ४। ९
पाप्मिन उल्लाघयति ३। ४। ४२
पाप्रष्टः ४। १। ८४
पाप्रष्टिः ४। १। ८४
पामनपुत्रः ३। २। १२५
पाययति ४। १। ३३
पाययते बटुम् ३। ३। ९४
पाययते मधु पायकान् ३। ३। ८८

पारकर: ३। २। ४८
पारय: ३। ४। ७१
पारस्करो देशे ३। २। ४८
पार्थदेशीया ३। २। ५८
पार्थवृन्दारिका ३। २। ५७
पिङ्गलागिरि: ३। २। ७७
पिण्डपाक: ४। १। ११२
पिण्डवहम् ३। २। ८९
पितरौ ३। २। ४७
पितापुत्रौ ३। २। ४०
पितु:पुत्र: ३। २। ३७
पितु:ष्वसा ३। २। ३८
पितु:स्वसा ३। २। ३८
पितुरन्तेवासी ३। २। ३७
पितृगृहम् ३। २। ३७
पितृपितामहौ ३। २। ३९
पितृवल: ३। २। ८२
पितृष्वसा ३। २। ३८
पित्सति ४। १। २१
पित्सते ४। १। २१
पिदधाति ३। २। १५६
पिधानम् ३। २। १५६
पिनद्धम् ३। २। १५६
पिपक्षति ४। १। ३७
पिपक्षति ४। १। ५९
पिपतिषति ४। १। २१
पिपर्त्ति(२) ४। १। ५८
पिपविषते ४। १। ६०
पिपावयिषति ४। १। ६०
पिपासति ४। १। ५९
पिपूर्त्त: ४। १। ५८
पिपूर्यात् ४। १। ५८
पिपृच्छिषति ४। १। ८४
पिपृयात् ४। १। ५८
पिप्रावयिषति ४। १। ६१
पिप्लावयिषति ४। १। ६१
पिहितम् ३। २। १५६
पीनं मुखम् ४। १। ९२
पीनवन् मुखम् ४। १। ९२
पीनवानन्धु: ४। १। ९३
पीनोऽन्धु: ४। १। ९३
पीलुवहम् ३। २। ८९
पुंसानुज: ३। २। १३
पुच्छयते ३। ४। ३९
पुटपाक: ३। २। २३
पुतित्रीयिषति ४। १। ८
पुतेवलि: ३। २। २२
पुत्रकाम्यति ३। ३। ३, ३। ४। २२
पुत्रकाम्यति ३। २। ८
पुत्रकाम्यत्यसौ ३। ४। २२
पुत्रयति ३। ४। ४२
पुत्रावल: ३। २। ८२
पुत्रीयति ३। ३। ३, ३। ४। २३
पुत्रीयति ३। २। ८
पुत्रीयति छात्त्रम् ३। ४। २४
पुत्रीयियिषति ४। १। ८
पुत्रीयिषिषति ४। १। ८
पुनन्ति ३। ३। २३
पुपुत्रीयिषति ४। १। ८
पुपूषति ४। १। ३७
पुप्रावयिषति ४। १। ६१
पुप्लावयिषति ४। १। ६१
पुमनुजा ३। २। १३
पुरगावणम् ३। २। ७६
पुरुष: ३। २। ८६
पुरोडाश: ३। २। १५५
पुलिनवती ३। २। ७८
पुषाण ३। ४। ८०
पुष्करावती ३। २। ७८
पुष्पयति ३। ४। ४२
पुष्येण योजयति चन्द्रम् ३। ४। २०
पुस्फारयिषति ४। १। ६०
पूरुष: ३। २। ८६
पूर्वतारम् ३। २। १४२
पूर्वतीरम् ३। २। १४२
पूर्वाह्णकाले ३। २। २४
पूर्वाह्णतन: ३। २। २४
पूर्वाह्णतमे ३। २। २४
पूर्वाह्णतरे ३। २। २४
पूर्वाह्णशय: ३। २। २५
पूर्वाह्णेकाले ३। २। २४
पूर्वाह्णेतन: ३। २। २४
पूर्वाह्णेतमाम् ३। २। २४
पूर्वाह्णेतराम् ३। २। २४
पूर्वाह्णेस्फोटका: ३। २। १८
पूर्वेद्यु: प्रक्रामति ३। ३। ५१
पृच्छति ४। १। ८४
पृच्छयति ३। ४। ४२
पृच्छा ४। १। ८४
पृच्छ्यते ४। १। ८४
पृषोदर: ३। २। १५५
पृषोदरम् ३। २। १५५
पृषोद्धारम् ३। २। १५५
पृषोद्वानम् ३। २। १५५
पृषोद्वारम् ३। २। १५५
पृष्ट: ४। १। ८४, ४। १। १०८
पृष्टवान् ४। १। १०८
पेचतु: ४। १। २४
पेचिथ ४। १। २४
पेचिम ४। १। २४
पेचिव ४। १। २४
पेचिवान् ४। १। २४
पेचु: ४। १। २४
पेचुषी ४। १। २४
पेपीयते ४। १। ९१
पैतृकमश्वा अनुहरन्ते (३) ३। ३। ३८
पैलुशीर्षि: ३। २। १०३
पैलुशीर्ष्या ३। २। १०१
पोपुव: ३। ४। १५
पोपूया ३। ४। १४
प्यायते ४। १। ९२
प्रकार: ३। २। ८६
प्रकृत्य ३। २। १५४
प्रक्रमते ३। ३। ५१
प्रक्रमते भोक्तुम् ३। ३। ५१
प्रक्रम्य ४। १। १०६
प्रजातभार्य: ३। २। ४९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रजिघाय ४। १। ३४
प्रजिघाययिषति ४। १। ३४
प्रजिघीषति ४। १। ३४
प्रजेघीयते ४। १। ३४
प्रजेघेति ४। १। ३४
प्रज्याय ४। १। ७६
प्रणिददाति ३। ३। ५
प्रणिदधाति ३। ३। ५
प्रणिदयते ३। ३। ५
प्रणिदाता ३। ३। ५
प्रणिदापयति ३। ३। ५
प्रणिद्यति ३। ३। ५
प्रणिधयति ३। ३। ५
प्रणिधापयति ३। ३। ५
प्रणीत्त्रिमम् ३। २। ८८
प्रणौति ३। ३। ५४
प्रतान् ४। १। १०७
प्रताप: ३। २। ८६
प्रतामौ ४। १। १०७
प्रतिकशोऽश्व: ३। २। ४८
प्रतिकाश: ३। २। ८६
प्रतिकूलयति ३। ४। ४२
प्रतिक्रमते ३। ३। ४९
प्रतिक्षिपति बटुम् ३। ३। १०२
प्रतिरित्सति ४। १। २२
प्रतिवेश: ३। २। ८६
प्रतिशीन: ४। १। ९८
प्रतिशीनवान् ४। १। ९८
प्रतीकार: (२) ३। २। ८६
प्रतीकाश: ३। २। ८६
प्रतीबोध: (२) ३। २। ८६
प्रतीम् ३। २। १०९
प्रतीवेश: ३। २। ८६
प्रतीषिषति ४। १। ५९
प्रतीहार: (२) ३। २। ८६
प्रत्तम् ३। २। ८८
प्रदान् ४। १। १०७
प्रदामौ ४। १। १०७
प्रदित्सति दानम् ४। १। २०
प्रपेपीयते ४। १। ९१
प्रप्यानो मेघ: ४। १। ९२
प्रप्यानोऽन्धु: ४। १। ९३
प्रफुल्ल: ४। १। ५४
प्रफुल्लवान् ४। १। ५४
प्रफुल्लि: ४। १। ५४
प्रभाव: ३। २। ८६
प्रमित्सति शत्रून् ४। १। २०
प्रमित्सते भूमिम् ४। १। २०
प्रमित्सते शत्रून् ४। १। २०
प्रयस्यति ३। ४। ७३
प्रयाग: ४। १। ११४
प्रयोग्य: ४। १। ११६
प्रयोज्य: ४। १। ११६
प्रवह: ४। १। ११२
प्रवहति ३। ३। १०३
प्रवाच्यो नाम पाठ विशेष: ४। १। ११८
प्रवाय ४। १। ७६
प्रवाहेमूत्रितम् ३। २। २०
प्रव्याय ४। १। ७७
प्रशान् ४। १। १०७
प्रशामौ ४। १। १०७
प्रशास्ताप्रतिहर्तारौ ३। २। ३९
प्रश्न: ४। १। ८४, ४। १। १०८
प्रष्टा ४। १। १०८
प्रष्टुम् ४। १। १०८
प्रसंस्तीत: ४। १। ९५
प्रसंस्तीतवान् ४। १। ९५
प्रसाद: ३। २। ८६
प्रसूतभार्य: ३। २। ४९
प्रस्तीत: ४। १। ९६
प्रस्तीतवान् ४। १। ९६
प्रस्तीम: ४। १। ९६
प्रस्तीमवान् ४। १। ९६
प्रस्नाविषीष्ट गौ: स्वयमेव ३। ४। ९२
प्रस्नुते गौ: स्वयमेव ३। ४। ९३
प्रस्नोता गौ: ३। ४। ९३
प्रस्नोष्यते गौ: ३। ४। ९३
प्रस्नौति गौर्दोग्धु: कौशलेन ३। ४। ९३
प्रहार: ३। २। ८६
प्रहत्य ३। २। १५४
प्राकारो वप्र: ३। २। ८६
प्राङ् ३। २। १२३
प्राजीहयत् ४। १। ३४
प्राश्नौ ३। २। १२३
प्राणिणिनिषत् ४। १। १०
प्राणिणिषति ४। १। ५
प्रापम् ३। २। १०९
प्रापयति ३। ४। ४२
प्राप्यानमूध: ४। १। ९३
प्रायश्चित्तप्रायश्चित्ती अतीचारशोधने ३।२।४८
प्रावयति राज्यम् ३। ३। १०८
प्रावृट् ३। २। ८५
प्रावृषिज: ३। २। २७
प्राशिश्रियत् ४। १। १
प्रासादीयत् ३। ३। ४
प्रासादीय्य गत: ३। ३। ४
प्रासादो गृहम् ३। २। ८६
प्रासिसादीयिषति ३। ३। ४
प्रास्नाविष्ट गौ: स्वयमेव ३। ४। ९२
प्रास्नोष्ट गौ: स्वयमेव ३। ४। ९२
प्रियसहकृत्वा ३। २। १४३
प्रियाकल्याणीक: ३। २। ५३
प्रियाक्षान्त: ३। २। ५३
प्रियाचपल: ३। २। ५३
प्रियाबाल: ३। २। ५३
प्रियावाम: ३। २। ५३
प्रियासुभग: ३। २। ५३
प्रियोपकुम्भस्तिष्ठति। ३। २। २
प्रियोपकुम्भाय देहि। ३। २। २
प्रियोपकुम्भे निधेहि ३। २। ४
प्रियोपवधु: ३। २। ६
प्रीणाति ३। ४। ७९
प्रेङ्खोलयति ३। ३। ३
प्रेन्धांचक्रे ३। ४। ४९
प्रोर्णुनवत् ४। १। ६
प्रोर्णुनविषति ४। १। ४
प्रोर्णुनविषति ४। १। ६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रोर्णुनाव ३। ४। ४८, ४। १। ४, ४। १। ६
प्रोर्णोनूयते ३। ४। १०, ४। १। ६
फलेपाकः ४। १। ११२
फेणतुः ४। १। २६
फेणिथ ४। १। २६
फेनायते ३। ४। ३३
फेलतुः ४। १। २५
फेलिथ ४। १। २५
बटुं गर्धयते ३। ३। ८९
बटुं वञ्चयते ३। ३। ८९
बदरितमा ३। २। ६६
बदरीतमा ३। २। ६६
बदरीतरा ३। २। ६४
बनीभ्रंशीति ४। १। ५०
बनीभ्रश्यते ४। १। ५०
बभक्थ ४। १। २५
बभणतुः ४। १। २४
बभणिथ ४। १। २४
बभार ३। ४। ५०
बभार ४। १। ४२
बभार ४। १। ५८
बभूव ४। १। ७०
बभूवतुः ४। १। ७०
बभूवे ३। ४। ७०
बभूवे चैत्रेण ४। १। ७०
बभ्रजतुः ४। १। ८४
बभ्रमतुः ४। १। २६
बभ्रमिथ ४। १। २६
बभ्राजे ४। १। २६
बभ्रासे ४। १। २६
बभ्रुः ४। १। १४
बभ्लासे ४। १। २६
बम्भज्यते ४। १। ५२
बम्भणीति ४। १। ५१
बम्भण्यते ४। १। ५१
बरीभृज्यते ४। १। ८४
बलयति ३। ४। ४२
बलाहकः ३। २। १५५
बलिं बन्धयति नटः ३। ४। २०
बलीवर्दः ३। २। १५५
बहुतः ३। २। ५०
बहुतिथी ३। २। ५०
बहुत्र ३। २। ५०
बहुवि जयति वनम् ३। ३। २८
बहुशो देहि ३। २। ५०
बह्वृचदेशीया ३। २। ५८
बह्वृचवृन्दारिका ३। २। ५७
बह्वृचश्चरणः ३। २। ५३
बह्वृचीचरी ३। २। ५६
बह्वृचीभार्यः ३। २। ५६
बाधयति ३। ४। ७
बाभञ्जीति ४। १। ५२
बाभाम्यते ४। १। ५१
बाभ्रष्टः ४। १। ८४
बाभ्रष्टिः ४। १। ८४
बालकमुल्लापयति ३। ३। ९०
बालङ्गिलो राक्षसः ३। २। ११५
बाष्पायते ३। ४। ३३
बाहाबाहवि व्यासजेताम् ३। २। ७२
बाहूबाहवि व्यासजेताम् ३। २। ७२
बिडालः ३। २। १५५
बिभयांचकार ३। ३। ७५
बिभयांचकार ३। ४। ५०
बिभयांबभूव ३। ४। ५०
बिभयामास ३। ४। ५०
बिभरांचकार ३। ३। ७५
बिभरांचकार ३। ४। ५०
बिभरांचक्रे ३। ३। ७५
बिभर्त्ति ४। १। ५८
बिभाय ३। ४। ५०
बिभावयिषति ४। १। ६०
बिभित्सते कुशूलः स्वयमेव ३। ४। ९३
बिभित्सिष्यते कुशूलः स्वयमेव ३। ४। ९३
बिभिदे कुशूलः स्वयमेव ३। ४। ८६
बिभृते ३। ३। ९५
बिभृयात् ४। १। ५८
बिलशयः ३। २। २५
बिलेशयः ३। २। २५
बीभत्सते ३। ४। ७
बुबोभूयिषते ४। १। १०
बुभूषति ४। १। ६०
बुभूषति ४। १। ७०
बृहत्पतिः ३। २। ४८
बृहस्पतिर्देवतायाम् ३। २। ४८
बेभिदीति ४। १। ४८
बोधयति पद्मं रविः ३। ३। १०८
बोभवाञ्चकार ४। १। ७०
बोभवीति ३। ३। १००
बोभवीति ३। ४। १४
बोभूयते ३। ४। १४
बोभोति ३। ४। १४
ब्रह्मचूर्तिः ४। १। ५४
ब्रह्मप्रजापती ३। २। ४१
ब्रह्मबन्धुतरा ३। २। ६७
ब्रह्मबन्धूतरा ३। २। ६७
ब्रह्मबन्धूभार्यः ३। २। ४९
ब्रह्मबन्धूवृन्दारिका ३। २। ५७
ब्राह्मणपुत्रः ३। २। ३१
ब्राह्मणवत् ३। २। ७
ब्राह्मणाच्छंसिनौ ३। २। ११
ब्राह्मणाच्छंसी ३। २। ११
ब्राह्मणिब्रुवा ३। २। ६४
ब्रूते कथा स्वयमेव ३। ४। ९३
भद्रं सहसङ्घायाचार्याय ३। २। १४८
भद्रंकरणम् ३। २। ११६
भनक्ति ३। ४। ८२
भर्तृगृहम् ३। २। ३७
भर्तृशिष्यः ३। २। ३७
भर्तृस्वसा ३। २। ३८
भवता कार्यम् ३। ३। २१
भवता शयनीयम् ३। ३। २१
भवता शयितव्यम् ३। ३। २१
भवता शेयम् ३। ३। २१
भवति ३। ३। ३, ३। ३। १०, ३। ४। ७१
भवतु ३। ३। १०
भवते ३। ४। १९
भवत्काम्यति ३। २। ६१


Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवत्पुत्रः ३। २। ६१
भवदीयम् ३। २। ५१
भवन्तः पचन्ति ३। ३। १७
भवन्तौ पचतः ३। ३। १७
भवादृक्षः ३। २। १५२
भवादृक् ३। २। १५२
भवादृशः ३। २। १५२
भवान् पचति ३। ३। १७
भवामहे ३। ४। १९
भविता ३। ४। ७०
भविषीष्ट ३। ४। ७०
भविष्यते ३। ४। ७०
भवेत् ३। ३। १०
भव्याप्रियः ३। २। ५३
भव्यामनोज्ञः ३। २। ५३
भस्मनिमीढम् ३। २। २०
भाञ्जनागिरिः ३। २। ७७
भापनम् ३। ३। ९२
भामा ३। २। १०८
भार्यामुपरमति ३। ३। १०६
भार्यामुपरमते ३। ३। १०६
भावत्कम् ३। २। ५१
भावयते ३। ४। १९
भिक्षुको दातृकुलमुपतिष्ठति ३। ३। ६१
भिक्षुको दातृकुलमुपतिष्ठते ३। ३। ६१
भिद्यते कुशूलः स्वयमेव ३। ४। ८६
भिद्यते कुशूलेन ३। ४। ८६
भिद्यते कुसूलेन ३। ४। ७०
भिद्यमानः कुशूलः पात्राणि भिनत्ति ३।४।८६
भिनत्ति ३। ४। ८२
भिन्ते ३। ४। ८२
भिन्नकर्णः ३। २। ८४
भीरुहता ३। २। ६७
भीरूहता ३। २। ६७
भीषा ३। ३। ९२
भुजः पाणिः ४। १। १२०
भुवंमन्यः ३। २। ९
भुवस्तृणवत्त्वम् ३। २। ५९
भूमिपाशः ३। २। १८
भूमिशयः ३। २। २५
भूयते भवता ३। ३। २१
भूयमानं भवता ३। ३। २१
भूषयते कन्या ३। ३। ८८
भूषयते कन्या स्वयमेव ३। ४। ९३
भूषयिष्यते कन्या स्वयमेव ३। ४। ९३
भृगुः ४। १। ११२
भृज्जति ४। १। ८४
भृज्ज्यते ४। १। ८४
भृशं चकास्ति ३। ४। ९
भृशं प्राप्ति ३। ४। ९
भृशं रोचते ३। ४। १३
भृशं शोभते ३। ४। १३
भृशमभीक्ष्णं वा क्रामति ३। ४। ११
भृशमीक्षते ३। ४। ९
भृशायते ३। ४। २९
भृष्ट : ४। १। ८४
भेजिथ ४। १। २५
भोक्तुं व्रजति ३। ४। २१
भोक्तुमनाः ३। २। १४०
भोगः ४। १। १२०
भोगवतिगोत्रा ३। २। ६५
भोगवतितरा ३। २। ६५
भोगवतितरा ३। २। ६५
भोगवतिब्रुवा ३। २। ६५
भोगवतिरूपा ३। २। ६५
भोगवतिहता ३। २। ६५
भोगवतीतरा ३। २। ६५
भोगवत्तरा ३। २। ६५
भोगावती ३। २। ७८
भोग्यः कम्बलः ४। १। ११७
भोग्यम् ४। १। १११
भोग्या अपूपाः ४। १। ११७
भोजं भोजं व्रजति ३। २। ७
भोजनकाल उपतिष्ठते ३। ३। ८३
भोजनमिच्छति देवदत्तस्य ३। ४। २१
भोजयति ३। ३। १०८
भोज्यमन्नम् ४। १। ११७
भोज्या यवागूः ४। १। ११७
भ्रमति ३। ४। ७३
भ्रमरः ३। २। १५५
भ्रातुष्पुत्रकाम्यति ३। ४। २२
भ्रातृवलः ३। २। ८२
भ्राम्यति ३। ४। ७३
भ्राष्ट्रमिन्धः ३। २। ११४
भ्रासते ३। ४। ७३
भ्रास्यते ३। ४। ७३
भ्रूणहनि ४। १। १०७
भ्रेजे ४। १। २६
भ्रेमतुः ४। १। २६
भ्रेमिथ ४। १। २६
भ्रेसे ४। १। २६
भ्लासते ३। ४। ७३
भ्लास्यते ३। ४। ७३
भ्लेसे ४। १। २६
मंमवँः ४। १। ५१
मंमव्यँते ४। १। ५१
मकरीति समुद्रः ३। २। ४८
मकरो ग्राहः ३। २। ४८
मघाभिर्योजयति गणकः ३। ४। २०
मणीवती ३। २। ७८
मण्डयते कन्या स्वयमेव ३। ४। ९३
मण्डयिष्यते कन्या स्वयमेव ३। ४। ९३
मत्स्यङ्गिलः ३। २। ११५
मद्गुः ४। १। ११२
मद्भवति ३। ३। १७
मद्रकजातीया ३। २। ५८
मद्रकता ३। २। ५९
मद्रकत्वम् ३। २। ५९
मद्रकदेशीया ३। २। ५८
मद्रचरः ३। २। २०
मद्रबाहुरूपा ३। २। ६७
मद्रबाहूदेशीया ३। २। ५८
मद्रबाहूरूपा ३। २। ६७
मद्राः कारं विनयन्ते ३। ३। ३९
मद्रिकातरा ३। २। ६४
मद्रिकाभार्यः ३। २। ५४
मद्रिकाभार्या ३। २। ५७


Jain Education International For Private & Personal Use Only www.jainelibrary.org

मद्रिकायते ३। २। ५४
मधुनो जानीते ३। ३। ८२
मधुनो नाथते ३। ३। ३६
मधुमती ३। २। ७८
मधुलेहति ३। ४। २५
मध्यन्दिनम् ३। २। ११३
मध्यमभार्य: ३। २। ५५
मध्याह्नेस्फोटका: ३। २। १८
मध्येगुरु: ३। २। २१
मनसागुप्ता ३। २। १६
मनसाज्ञायी ३। २। १५
मनसादत्ता ३। २। १६
मनसादेवी ३। २। १६
मनसासंगता ३। २। १६
मनसिज: ३। २। २६
मनसिशय: ३। २। २५
मनीषी ३। २। १५५
मनोज: ३। २। २६
मनोदत्ता कन्या ३। २। १६
मनोरोग: ३। २। २३
मन्तूयति ३। ३। १००, ३। ४। ८
मम ३। ४। ३५
ममार ३। ३। ४२
ममे ४। १। ५८
मम्ले ४। १। १, ४। १। ४४
मयूर: ३। २। १५५
मयूराण्डम् ३। २। ६२
मयूर्यण्डम् ३। २। ६२
मरिष्यति ३। ३। ४२
मर्तासि ३। ३। ४२
मर्मर्त्ति ३। ३। ४२
मर्मावित् ३। २। ८५
मलयवती ३। २। ७८
मल्लो मल्लमाह्वयते ३। ३। ५६
मशकावती ३। २। ७८
मस्करी परिव्राजके ३। २। ४८
मस्करो वेणुदण्डयो: ३। २। ४८
मस्तकशिख: ३। २। २२
महंमन्य: ३। २। १११
महतीपति: ३। २। ७०
महतीपुत्र: ३। २। ७०
महतीप्रिय: ३। २। ७१
महतीमनोज्ञ: ३। २। ७१
महत्कार: ३। २। ६८
महत्तर: ३। २। ७०
महद्धास: ३। २। ६८
महद्भूतश्चन्द्रमा: ३। २। ७०
महद्भूता कन्या ३। २। ६०
महद्भूता कन्या ३। २। ७०
महद्विशिष्ट: ३। २। ६८
महाकर: ३। २। ६९, ३।२।७०
महाकार: ३। २। ६८
महाकीर्त्ति: ३। २। ७०
महाघास: ३। २। ६८, ३।२।६९, ३।२।७०
महाजातीय: ३। २। ७०
महाजातीया ३। २। ७०
महादेवी ३। २। ७०
महामात्रानुपकुरुते ३। ३। ७६
महामानी ३। २। ७०
महामुनि: ३। २। ७०
महायशा: ३। २। ७०
महाराज्ञी ३। २। ७०
महाविशिष्ट:३। २। ६८, ३।२।६९, ३।२।७०
महावीर: ३। २। ७०
महास्तुति: ३। २। ७०
महित्थ: ३। २। १५५
महिष: ३। २। १५५
महीं भुनक्ति ३। ३। ३७
महीयते ३। ३। २२, ३। ४। ८
महीयमान: ३। ३। २२
मांसदहनी ३। २। १४१
मांसदाह: ३। २। १४१
मांसपक्ति: ३। २। १४१
मांसपचनम् ३। २। १४१
मांसपचनी ३। २। १४१
मांसपाक: ३। २। १४१
मांसपाक: ४। १। ११२
मांस्पचनम् ३। २। १४१
मांस्पचनी ३। २। १४१
मांस्पाक: ३। २। १४१
माञ्जिष्ठबृहतिक: ३। २। ५५
माणवकमनुक्रीडति ३। ३। ३४
माणवकमुपनयते ३। ३। ३९
मातरं संजानाति ३। ३। ६९
मातरपितरयो: ३। २। ४७
मातरपितराभ्याम् ३। २। ४७
मातरपितरौ ३। २। ४७
मातादुहितरौ ३। २। ३९
मातापितरौ ३। २। ३९
मातापितरौ ३। २। ४७
मातापितृभ्याम् ३। २। ४७
मातापित्रो: ३। २। ४७
मातापुत्रौ ३। २। ४०
मातु: संजानाति ३। ३। ६९
मातु:ष्वसा ३। २। ३८
मातु:स्वसा ३। २। ३८
मातुलान्तेवासी ३। २। ३७
मातृकं गावोऽनुहरन्ते ३। ३। ३८
मातृवल: ३। २। ८२
मातृष्वसा ३। २। ३८
माथुरजातीया ३। २। ५८
माथुरता ३। २। ५९
माथुरत्वम् ३। २। ५९
माथुरीदेश्या ३। २। ५५
माथुरीभार्य: ३। २। ५५
मादृक्ष: ३। २। १५२
मादृक् ३। २। १५२
मादृश: ३। २। १५२
मानयति ३। ३। ७४
मानाय्य: ३। २। ५१
मामव: ४। १। ५१
मामव्यते ४। १। ५१
मामूत: ४। १। १०९
मामेति ४। १। १०९
मार्गमुच्चरते ३। ३। ३१
मार्गशीर्षी पौर्णमासी ३। २। १०३
मार्ष्टि ३। ३। १

मास आसितः ३। ३। २१
मास आसितव्यः ३। ३। २१
मास आस्यते ३। ३। २१
मासं स्वासम् ३। ३। २१
मासमासितम् ३। ३। २१
मासमासितव्यम् ३। ३। २१
मासमास्यते ३। ३। २१
मासो दुरासः ३। ३। २१
मितङ्गमः ३। २। १११
मित्रावरुणौ ३। २। ४१
मित्सति ४। १। २०
मित्सति शतम् ४। १। २०
मित्सते ४। १। २०
मित्सते शतम् ४। १। २०
मिमावयिषति ४। १। ६०
मिमासति ४। १। २०
मिमीते ४। १। ५८
मिश्रकावणम् ३। २। ७६
मिश्रयत्योदनम् ३। ४। ४२
मीढ्वान् ४। १। १५
मीमांसते ३। ३। ७४, ३। ४। ७
मीमांसयति ३। ३। ७४
मुकुटेकार्षापणः ३। २। १९
मुक्तावुत्तिष्ठते ३। ३। ६२
मुखकामः ३। २। २२
मुखपुरुषा शाला ३। २। २२
मुण्डयति ३। ३। ३
मुण्डयति ३। ४। ४२
मुण्डयति छात्रम् ३। ४। ४२
मुण्डो बेभाययति ३। ३। ९२
मुण्डो भापयते ३। ३। ९२
मुण्डो भीषयते ३। ३। ९२
मुनी इत्याह ३। ३। २७
मुनीवती ३। २। ७८
मुनींवहः ३। २। ८९
मुनीवह्वम् ३। २। ८९
मुमुक्षति चैत्रः ४। १। १९
मुमुक्षते वत्सः स्वयमेव ४। १। १९
मुमूर्षति ३। ३। ७४, ३। ३। १००
मुरः ४। १। ११०
मुरौ ४। १। ११०
मुवः ४। १। १०९
मुवौ ४। १। १०९
मुषाण ३। ४। ८०
मुष्टामुष्टि ३। २। ७२
मुष्टीमुष्टि ३। २। ७२
मुसलम् ३। २। १५५
मुहूर्त्तम् ३। २। १५५
मूः ४। १। १०९, ४। १। ११०
मूकभार्यः ३। २। ५४
मूतिः ४। १। १०९
मूर्छा ४। १। ११०
मूर्तः ४। १। ११०
मूर्तवान् ४। १। ११०
मूर्द्धशिखः ३। २। २२
मृगक्षीरम् ३। २। ६२
मृगपदम् ३। २। ६२
मृगरमणम् ३। ४। ४२
मृगशावः ३। २। ६२
मृगान् रमयति ३। ४। २०
मृगावती ३। २। ७८
मृगीक्षीरम् ३। २। ६२
मृगीपदम् ३। २। ६२
मृगीशावः ३। २। ६२
मृणालः ३। २। १५५
मृदु पच्यते भवता ३। ३। २१
मृदूकृता ३। २। ६०
मृद्विका ३। २। ५०
मृद्वीकृता ३। २। ६०
मृषीष्ट ३। ३। ४२
मेखला ३। २। १५५
मेघः ४। १। ११२
मेघङ्करः ३। २। १११
मैत्रं शपति ३। ३। ३५
मैत्राय शपते (३) ३। ३। ३५
मोक्षति चैत्रः ४। १। १९
मोक्षते वत्सः स्वयमेव ४। १। १९
मोमा ४। १। १०९
मोमूत्र्यते ३। ४। १०
मोमोर्ति ४। १। ११०
मोर्मा ४। १। ११०
म्रियताम् ३। ३। ४२
म्रियते ३। ३। ४२
म्रियेत ३। ३। ४२
यक्षीष्ट ४। १। ७९
यजति ३। ४। १८
यजते ३। ३। ९५
यजन्ति याजकाः ३। ३। ९५
यथा ३। २। ६१
यदा ३। २। ६१
यम्यते ४। १। १०७
यम्यम्यते ४। १। ४८, ४। १। १०७
ययुः ४। १। १४
यर्हि ३। २। ६१
यवयति ३। ४। ४२
यशः समूहन्निव दिग्विकीर्णम् ३। ३। २५
यष्टायष्टि ३। २। ७२
यष्टीयष्टि ३। २। ७२
यसति ३। ४। ७३
यस्यति ३। ४। ७३
यागः ४। १। ११४
याचितारः ३। ४। १९
याच्ञा ४। १। १११
याच्यम् ४। १। १११
याजः ४। १। ११४
याज्यम् ४। १। ११८
यातस्ते पितेति प्रहासे ३। ३। १७
यादृक्षः ३। २। १५२
यादृक् ३। २। १५२
यादृशः ३। २। १५२
यायज्यते ४। १। ७२
यावान् ३। २। १५२
यियविषति ४। १। ६०, ४। १। १०४
यियावयिषति ४। १। ६०
युधिष्ठिरः ३। २। १८
युवजानिः ३। २। ४९
युवां पचथः ३। ३। १७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

युष्मादृक्षः ३। २। १५२
युष्मादृक् ३। २। १५२
युष्मादृशः ३। २। १५२
यूथवृषः ३। २। १९
यूपचषालौ ३। २। ४१
यूयं पचथ ३। ३। १७
योगे योग उपतिष्ठते ३। ३। ८३
योग्यम् ४। १। १११
योजयति ३। ४। १८
योधयति काष्ठानि ३। ३। १०८
योयूयः ३। ४। १६
यौवत्तम् ३। २। ५१
रङ्क्ष्यमाणं स्वयमेव ३। ४। ७४
रज्य(ज)ति वस्त्रं शिल्पी ३। ४। ७४
रज्यति वस्त्रं स्वयमेव ३। ४। ७४
रज्यते वस्त्रं स्वयमेव ३। ४। ७४
रज्यद्वस्त्रं स्वयमेव ३। ४। ७४
रज्यन्ती ३। ४। ७४
रज्यमानं वस्त्रं स्वयमेव ३। ४। ७४
रथपा ३। २। ४८
रथिकानुपतिष्ठते ३। ३। ६०
रथेन यास्यसि ३। ३। १७
ररञ्जे ३। ४। ७४
रराजतुः ४। १। २६
रराजिथ ४। १। २६
रसवत्या धूमवत्त्वम् ३। २। ५९
रागः ४। १। १११
राजकरः ३। २। ६८
राजनति ३। ४। २५
राजपुरुषः ३। २। ८
राजागमनम् ३। ४। ४२
राजानमागमयति ३। ४। २०
राजीयति ३। ४। २३
रात्रयिता ३। २। ११७
रात्रिं विवासयति कथकः ३। ४। २०
रात्रिंकरणम् ३। २। ११७
रात्रिंचर ३। २। ११७
रात्रिंचरी ३। २। ११७
रात्रिंमन्यमहः ३। २। १११
रात्रिंमन्यमहः ३। २। ११७
रात्रिकरणम् ३। २। ११७
रात्रिकाले ३। २। २४
रात्रिचरः ३। २। ११७
रात्रिचरः ३। २। २०
रात्रिचरी ३। २। ११७
रात्रितरायाम् ३। २। २४
रात्रिमटः ३। २। ११७
रात्रिमाटः ३। २। ११७
रात्रिसुखम् ३। २। ११७
रात्र्यटः ३। २। ११७
रात्र्याटः ३। २। ११७
रामप्रव्रजनम् ३। ४। ४२
रायंमन्यः ३। २। ९
रिरमयिषति ४। १। ६४
रिरावयिषति ४। १। ६०
रुक्मम् ४। १। १११
रुणद्धि ३। ३। ३
रुणद्धि ३। ४। ८२
रुन्द्धे ३। ४। ८२
रूपयति ३। ४। ४२
रूपेण विस्माययति ३। ३। ९१
रेजतुः ४। १। २६
रेजिथ ४। १। २६
रेणिथ ४। १। २४
रेधतुः ४। १। २३
रेधिथ ४। १। २३
रेधुः ४। १। २३
रेणतुः ४। १। २४
रैवतकात् प्रस्थितः शत्रुञ्जये
सूर्यं पातयति ३। ४। २०
रोकः ४। १। ११२
रोचयते मैत्रम् ३। ३। ९४
रोच्यम् ४। १। १११
रोच्यम् ४। १। ११२
रोमन्थायते गौः ३। ४। ३२
रोरवीति ३। ४। १४
रोरूयः ३। ४। १६
रोरूयते ३। ४। १४
रोरोति ३। ४। १४
रौचनिकीकल्पा ३। २। ५४
रौचनिकीरूपा ३। २। ५४
रौहिणेयः ३। २। ५२
लक्षयते ३। ३। ९५
लक्ष्मिकल्पा ३। २। ६६
लघयति ३। ४। ४२
लघयति ३। २। ५१
लम्बकर्णः ३। २। ८४
लवणयति सूपम् ३। ४। ४२
लवणोदः ३। २। १०७
लविष्यते ३। ४। ६९
लषति ३। ४। ७३
लष्यति ३। ४। ७३
लाक्षिकबृहतिका ३। २। ५७
लाक्षिकीदेश्या ३। २। ५४
लाक्षिकीबृहतिकः ३। २। ५४
लाक्षिकीभार्यः ३। २। ५४
लावकः ३। ३। १
लावयति ३। ३। १
लावयति केदारं चैत्रः ३। ३। ८८
लावयते केदारः ३। ३। ८८
लाविष्यते ३। ४। ६९
लिप्सते ४। १। २१
लिलावयिषति ४। १। ६०
लुण्टाकायते ३। २। ५४
लुनन्ति ३। ३। २३
लुनीहि ३। ४। ८०
लुनीहि लुनीहीत्येवायं० ३। ४। ९
लुलविथ ४। १। ३०
लुलाव ४। १। ३९
लुलाव ४। १। ६०
लुलूषति ४। १। ५९
लुलोके ४। १। ३९
लोकंप्रिणः ३। २। ११३
लोकम्पृणः ३। २। ११३
लोलवीति ४। १। ४८
लोलुप्यते ३। ४। १२
लोलुवः ३। ४। १५


Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोलूयते ४।१।३, ४।१।४८
लोलूया ३।४।१४
लोलूयांचक्रे ३।४।४६
लोलूयांबभूव ३।४।४६
लोलूयामास ३।४।४६
लोलूयिषते ३।३।७४
लोहितगङ्गं वसति ३।२।५
लोहितागिरिः ३।२।७७
लोहितायति ३।३।४३, ३।४।३०
लोहितायते ३।३।४३, ३।४।३०
लोहितोदम् ३।२।१०७
लोहितोदा नाम नदी ३।२।१०७
लौहित्यम् ३।२।५१
लौहेषः ३।२।५५
वंशावती ३।२।७८
वक्ता ४।१।७९
वक्रयः ३।२।१५६
वङ्कं काष्ठम् ४।१।११३
वच्यते ४।१।७९
वश्चं वश्चन्ति ४।१।११३
वडवा ३।२।१५५
वडवाभार्यः ३।२।४९
वतंसः ३।२।१५६
वदते धीमांस्तत्त्वार्थे ३।३।७८
वदते विद्वान् स्याद्वादे ३।३।७८
वदावदः ४।१।१३
वधिषीष्ट ३।४।६९
वधुंमन्यः ३।२।१११
वधुंमन्या ३।२।९
वनं बहुवि क्रीणाति ३।३।२७
वनचरः ३।२।२०
वनपतिः ३।२।४८
वनवासी ३।२।२५
वनस्पतिः पुष्पं विना फलवति वृक्षे ३।२।४८
वनीवच्यते ४।१।४८, ४।१।५०
वनीवश्चीति ४।१।५०
वनेकशेरुकाः ३।२।१८
वनेचरः ३।२।२०
वनेबल्वजाः ३।२।१८
वनेवासी ३।२।२५
वयं पचामः ३।३।१७
वरजः ३।२।२६
वरटाभार्यः ३।२।४९
वरिवस्यति गुरून् ३।४।३७
वरिवृश्चीति ४।१।५६
वरिवृष्टि ४।१।५५
वरिवृष्टि ४।१।५६
वरीवृत्यते ४।१।५५
वरीवृध्यते ४।१।५५
वरीवृश्च्यते ४।१।५५
वरीवृश्च्यते ४।१।८४
वरीवृश्चीति ४।१।५६
वरीवृष्टि ४।१।५६
वरेजः ३।२।२६
वर्णयति ३।४।४२
वर्तिष्यमाणः ३।३।४५
वर्त्तते ३।३।४५
वर्त्तिष्यते ३।३।४५
वर्त्स्यति (२) ३।३।४५
वर्त्स्यन् ३।३।४५
वर्धते ३।३।३
वर्धिष्यते ३।३।४५
वर्वृश्चीति ४।१।५६
वर्वृष्टि ४।१।५५
वर्वृष्टि ४।१।५६
वर्षजः ३।२।२६
वर्षासुजः ३।२।२७
वर्षेजः ३।२।२६
वलयवती कन्या ३।२।७८
ववणतुः ४।१।३०
ववणिथ ४।१।३०
ववतुः ४।१।७५
ववमतुः ४।१।२६
ववमिथ ४।१।२६
ववलाते ४।१।३०
ववलिरे ४।१।३०
ववले ४।१।३०
वविथ ४।१।७४
ववुः ४।१।७५
ववृधे ४।१।३८
ववौ ४।१।७४
वव्रश्चतुः ४।१।८४
वष्टि ४।१।८३
वस्ते मैत्रो न नग्नः ३।३।९४
वस्त्रीयति कम्बलम् ३।४।२४
वहति नदी ३।३।८७
वहेगडुः ३।२।२२
वाक्पतिः ३।२।३६
वाक्यम् ४।१।११९
वाग्मन्यः ३।२।९
वाचस्पतिः ३।२।३६
वाचिकषडिकौ न संवदेते ३।३।८१
वाचोयुक्तिः ३।२।३२
वाच्यति ३।४।२३
वाच्यमाह ४।१।११९
वातण्ड्यजातीया ३।२।५८
वातण्ड्यवृन्दारिका ३।२।५७
वातावती ३।२।७८
वादयते शिशुम् ३।३।९४
वामोरुतमा ३।२।६७
वामोरूतमा ३।२।६७
वाय्वग्नी ३।२।४१
वार्दावान् नामः गिरिः ३।२।७८
वावच्यते ४।१।७२, ४।१।७९
वावश्यते ४।१।८३
वावष्टः ४।१।८४
वावष्टिः ४।१।८४
वाव्यक्तः ४।१।८४
वाव्यक्तिः ४।१।८४
वाव्यध्यते ४।१।७१
वाव्रष्टः ४।१।८४
वाव्रष्टिः ४।१।८४
वासयति ३।४।४२
वासयति भिक्षा ३।४।२०
वासयति मैत्रम् ३।३।९४
वासयते पान्थम् ३।३।९४
वास्तुपतिः ३।२।३६

वास्तोष्पतिः ३। २। ३६
वाहनकर्णः ३। २। ८४
विकरोति शब्दम् ३। ३। ८५
विकरोत्यध्यायम् ३। ३। ८५
विकुर्वते सैन्धवाः ३। ३। ८५
विकुर्वते सैन्धवाः स्वयमेव ३। ४। ९३
विक्रामति राजा ३। ३। ५०
विक्रीणीते ३। ३। २७
विक्लीबते ३। ४। २५
विगणय्य ३। ३। ४०
विचति ४। १। ८२
विचिकित्सति ३। ४। ६
विचिता ४। १। ८२
विचितुम् ४। १। ८२
विच्छायति ३। ४। १
विच्छायिता ३। ४। ४
विच्छिता ३। ४। ४
विच्यते ४। १। १०२
विजयते ३। ३। २८
विजिगीषते ४। १। ३५
विजिग्ये ४। १। ३५
वितंसः ३। २। ८६
विततम् ३। २। ८५
वितपति पृथिवीं सविता ३। ३। ८७
वितपते पाणिम् ३। ३। ८७
वितपते रविः ३। ३। ८७
वितीर्णम् ३। २। ८८
वितूस्तयति ३। ४। ४२
विदांकरवाणि ३। ४। ५२
विदांकरोतु ३। ४। ५२
विदांकुरु ३। ४। ५२
विदांचकार ३। ४। ५१, ४। १। १
विदांबभूव ३। ४। ५१
विदामास ३। ४। ५१
विदिद्युतिषते ४। १। ४१
विदिद्योतिषते ४। १। ४१
विदुषिकल्पा ३। २। ६३
विदुषिगोत्रा ३। २। ६३
विदुषिचेली ३। २। ६३
विदुषितमा ३। २। ६३
विदुषितरा ३। २। ६३
विदुषिब्रुवा ३। २। ६३
विदुषिमता ३। २। ६३
विदुषिरूपा ३। २। ६३
विदुषिहता ३। २। ६३
विदुषीकल्पा ३। २। ६३
विदुषीगोत्रा ३। २। ६३
विदुषीचेली ३। २। ६३
विदुषीतमा ३। २। ६३
विदुषीतरा ३। २। ६३
विदुषीब्रुवा ३। २। ६३
विदुषीमता ३। २। ६३
विदुषीरूपा ३। २। ६३
विदुषीहता ३। २। ६३
विदूरादागतः ३। २। १०
विद्धः ४। १। ८१
विद्धि ३। ४। ५२
विद्याः शिक्षते ३। ३। ७३
विद्यामादत्ते ३। ३। ५३
विद्वच्चेली ३। २। ६३
विद्वत्कल्पा ३। २। ६३
विद्वत्तमा ३। २। ६३
विद्वत्तरा ३। २। ६३
विद्वद्गोत्रा ३। २। ६३
विद्वद्धता ३। २। ६३
विद्वद्रूपा ३। २। ६३
विद्वद्ब्रुवा ३। २। ६३
विद्वद्वृन्दारिका ३। २। ६३
विद्वन्मता ३। २। ६३
विध्यति ४। १। ८१
विध्यते ४। १। ८१, ४। १। १०२
विध्यात् ४। १। ८१
विनश्यति ३। ३। ३
विपरिणमते ३। ३। ३
विपर्यस्यति ३। ३। २५
विपर्यस्यते ३। ३। २५
विपादिका व्याददाति ३। ३। ५३
विपाशयति ३। ४। ४२
विपुच्छयते ३। ४। ३९
विप्रकृष्टादागतः ३। २। १०
विप्रवदन्ति मौहूर्त्ताः ३। ३। ८०
विप्रवदन्ते मौहूर्त्ताः ३। ३। ८०
विरमति ३। ३। १०५
विवर्त्तिषते ३। ३। ४५
विवर्धिषते ३। ३। ४५
विवहः ४। १। ११२
विवृत्सति (२) ३। ३। ४५
विवेद ३। ४। ५१
विव्यचिथ ४। १। ७१
विव्यथाते ४। १। ७१
विव्यथिरे ४। १। ७१
विव्यथे ४। १। ७१
विव्यधिथ ४। १। ७१
विव्याच ४। १। ७१
विव्याध ४। १। ७१
विशशरतुः ४। १। ३०
विशशरिथ ४। १। ३०
विशशसतुः ४। १। ३०
विशशसिथ ४। १। ३०
विश्रः ४। १। १०८
विश्वकभार्यः ३। २। ६१
विश्वनरो राजा ३। २। ८०
विश्वमित्रो माणवकः ३। २। ७९
विश्वमित्रो मुनिः ३। २। ७९
विश्वयुक् ३। २। १२२
विश्वराजः ३। २। ८१
विश्वराजौ ३। २। ८१
विश्वसेनः ३। २। ८०
विश्वानरो नाम कश्चित् ३। २। ८०
विश्वामित्रो नामर्षिः ३। २। ७९
विश्वाराट् ३। २। ८१
विश्वावसुः ३। २। ८१
विषमस्थः ३। २। २९
विषादः ३। २। ८६
विषूची ३। २। १२२
विष्कभाण ३। ४। ८०
विष्टकर्णः ३। २। ८४


Jain Education International For Private & Personal Use Only www.jainelibrary.org

विष्णुशक्रौ ३। २। ४१
विष्वगञ्चनम् ३। २। १२२
विष्वग्युक् ३। २। १२२
विष्वङ् ३। २। १२२
विष्वद्यङ ३। २। १२२
विष्वद्यञ्चः ३। २। १२२
विष्वद्यञ्चौ ३। २। १२२
विसर्गः ४। १। ११२
विस्कभ्नुहि ३। ४। ८०
विस्मापनम् ३। ३। ९१
विहङ्गमः ३। २। १११
विहोडते ३। ४। २५
वीकाशः ३। २। ८७
वीतंसः पक्षिबन्धनम् ३। २। ८६
वीपम् ३। २। १०९
वीरणावती ३। २। ७८
वीरयति ३। ४। ४२
वीरुत् ४। १। १२१
वीसर्पः (२) ३। २। ८६
वृक्णः ४। १। ८४
वृक्षयति ३। ४। ४२
वृजिकाभार्यः ३। २। ५४
वृजिकामानिनी ३। २। ५४
वृत्रहणि ४। १। १०७
वृश्च्यते ४। १। ८४
वृश्चति ४। १। ८४
वृषलीपतिः ३। २। ३०
वृसी ३। २। १५५
वेटावान् नाम गिरिः ३। २। ७८
वेत्तु ३। ४। ५२
वेदानि ३। ४। ५२
वेदापयति ३। ४। ४४
वेदो वैधर्म्यं विधत्ते ३। ३। ९५
वेमतुः ४। १। २६
वेमिथ ४। १। २६
वेवयीति ४। १। ८५
वेविच्यते ४। १। ८२, ४। १। १०२
वेविध्यते ४। १। ८१, ४। १। १०२
वेवीयते ४। १। ८५, ४। १। १०२
वेवेक्ति ४। १। ५७
वेवेद्धि ४। १। ८१
वेवेष्टि ४। १। ५७
वेहायते ३। ४। २९
वैदर्भीभार्यः ३। २। ५५
वैदर्भीमानिनी ३। २। ५५
वैदिशीभार्यः ३। २। ५५
वैद्यश्चिकित्सामुद्यच्छति ३। ३। ९८
वैयाकरणभार्यः ३। २। ५५
वैरायते ३। ४। ३५
वैलेपिकम् ३। २। ५४
व्यद्यङ् ३। २। १२२
व्यद्यञ्चः ३। २। १२२
व्यद्यञ्चौ ३। २। १२२
व्यकृत कटः स्वयमेव ३। ४। ९२
व्यकृत सैन्धवः स्वयमेव ३। ४। ९२
व्यतिगच्छन्ति ३। ३। २३
व्यतिगम्यन्ते ग्रामाः ३। ३। २३
व्यतिघ्नन्ति ३। ३। २३
व्यतिजल्पन्ति ३। ३। २३
व्यतिपठन्ति ३। ३। २३
व्यतिपुनते ३। ३। २३
व्यतिलुनते ३। ३। २३
व्यतिवहन्ते भारम् ३। ३। २३
व्यतिषङ्गः ४। १। ११२
व्यतिसर्पन्ति ३। ३। २३
व्यतिहन्यन्ते दस्यवः ३। ३। २३
व्यतिहरन्ते भारम् ३। ३। २३
व्यतिहसन्ति ३। ३। २३
व्यतिहिंसन्ति ३। ३। २३
व्यत्यपुक्षत ३। ४। ६४
व्यत्यशासिष्ट ३। ४। ६०
व्यत्यशिषत ३। ४। ६०
व्यत्यश्लिक्षन्त मिथुनानि ३। ४। ५७
व्यत्यसृष्ट माले मिथुनम् ३। ४। ८४
व्यद्धा ४। १। ८१
व्यद्युतत् ३। ३। ४४
व्यद्योतिष्ट ३। ३। ४४
व्यद्योतिष्ट ३। ४। ६४
व्ययति ४। १। ८५
व्याकरणं सूत्रयति ३। ४। ३६, ३। ४। ४२
व्याधिं चिकित्सति ३। ४। ६
व्युछांचकार ३। ४। ४८
व्रीहिमती ३। २। ७८
शंशान्तः ४। १। १०७
शकन्धुः ३। २। १५५
शकुली मत्स्यविशेषः ३। २। ४८
शङ्कूकर्णः ३। २। ८४
शतं प्रकुरुते ३। ३। ७६
शतं विनयते ३। ३। ३९
शतं संजानीते ३। ३। ६९
शतधारवनम् ३। २। ७६
शतमपजानीते ३। ३। ६८
शतस्य पणते ३। ४। १
शतेन संजानीते ३। ३। ६९
शत्स्यति ३। ३। ४१
शनैर्गङ्गं वसति ३। २। ५
शब्द उच्चरति ३। ३। ३१
शब्दप्राट् ४। १। १०८
शब्दप्राशौ ४। १। १०८
शब्दायते ३। ४। ३५
शमयिता ३। ४। ६९
शमयिषीष्ट ३। ४। ६९
शमयिष्यते ३। ४। ६९
शमिता ३। ४। ६९
शमिषीष्ट ३। ४। ६९
शमिष्यते ३। ४। ६९
शयानः ३। ३। २२
शयितं भवता ३। ३। २१
शयिष्यते ३। ४। ६९
शय्यतां भवता ३। ४। ७०
शय्यते भवता ३। ४। ७०
शरजः ३। २। २६
शरदिजः ३। २। २७
शरवती तूणा ३। २। ७८
शरावती ३। २। ७८
शरेजः ३। २। २६
शत्स्र्यति ३। ३। ४५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | | | | |
|---|---|---|---|---|---|
| शर्धिष्यते | ३।३।४५ | शिश्वियतुः | ४।१।९० | शेश्रूतः | ४।१।१०९ |
| शशाङ्कवती | ३।२।७८ | शिशृत्सति | ३।३।४५ | शेश्रोति | ४।१।१०९ |
| शश्रन्थ | ४।१।२७ | शीतो वायुः | ४।१।९७ | शेश्वयीति | ४।१।९० |
| शश्रन्थतुः | ४।१।२७ | शीनं घृतम् | ४।१।९७ | शेश्वीयते | ४।१।९० |
| शश्रन्थिथ | ४।१।२७ | शीनवद् घृतम् | ४।१।९७ | शैर्षम् | ३।२।१०३ |
| शष्कुली कृतान्त्रे | ३।२।४८ | शीयते | ३।३।४१ | शोकः | ४।१।११२ |
| शान्तः | ४।१।१०७ | शीर्षच्छेद्यं परिच्छिद्य | ३।२।१०३ | शोच्यम् | ४।१।११२ |
| शान्तवान् | ४।१।१०७ | शीर्षण्यः स्वरः | ३।२।१०१ | शोभनकर्णः | ३।२।८४ |
| शान्तिः | ४।१।१०७ | शीर्षण्याः केशाः | ३।२।१०२ | शोभनतरभार्यः | ३।२।५५ |
| शान्त्वा | ४।१।१०७ | शीर्षिकः | ३।२।१०३ | शोभनभक्तिः | ३।२।५३ |
| शामति | ४।१।१०७ | शीलयति | ३।४।४२ | शोशवीति | ४।१।९० |
| शामिता | ३।४।६९ | शीशांसति | ३।४।७ | शोशूयते | ४।१।९० |
| शामिषीष्ट | ३।४।६९ | शीशांसते | ३।४।७ | शोषयते व्रीहीनातपः | ३।३।८८, ३।३।९५, ३।३।१०७ |
| शामिष्यते | ३।४।६९ | शुक्लतमे | ३।२।२४ | | |
| शाययति मैत्रम् | ३।३।१०७ | शुक्लतरे | ३।२।२४ | श्मशानम् | ३।२।१५५ |
| शायिष्यते | ३।४।६९ | शुचीमती | ३।२।७८ | श्येतता | ३।२।५९ |
| शालाया दण्डित्वम् | ३।२।५९ | शुनःपुच्छः | ३।२।३५ | श्येतत्वम् | ३।२।५९ |
| शास्त्रेऽस्य क्रमते बुद्धिः | ३।३।४८ | शुनःशेपः | ३।२।३५ | श्येतभार्यः | ३।२।४९ |
| शिक्षति | ३।३।७३ | शुनासीरौ | ३।२।४१ | श्येतयति | ३।२।५१ |
| शिक्षति | ४।१।२१ | शुनोलाङ्गूलः | ३।२।३५ | श्येतायते | ३।२।५० |
| शिक्षांचक्रे | ३।३।७३ | शुशविथ | ४।१।९० | श्येत्यः | ३।२।५१ |
| शिरसिशिखः | ३।२।२२ | शुशाव | ४।१।१ | श्येनायते | ३।३।३, ३।३।२२, ३।४।२५, ३।४।२६ |
| शिरस्कल्पः | ३।२।१०३ | शुशाव | ४।१।९० | | |
| शिरस्तः | ३।२।१०१ | शुशावयिषति | ४।१।६० | श्येनायमानः | ३।३।२२ |
| शिरस्यः | ३।२।१०२ | शुशावयिषति | ४।१।८९ | श्येनो वर्त्तिकामपकुरुते | ३।३।७६ |
| शिरस्यति | ३।२।१०१ | शुशुवतुः | ४।१।९० | श्येनो वर्त्तिकामपलापयते | ३।३।९० |
| शिरस्याः केशाः | ३।२।१०२ | शुश्रावयिषति | ४।१।६१ | श्यैत्यम् | ३।२।५१ |
| शिववैश्रवणौ | ३।२।४१ | शुश्रूषति (ते) | ४।१।६१ | श्यैनेयः | ३।२।५२ |
| शिशत्सति | ३।३।७४ | शुश्रूषते गुरून् | ३।३।७१ | श्रथ्नीते माला स्वयमेव | ३।४।९३ |
| शिशयिषते | ३।३।७४ | शूद्रापाशा | ३।२।५६ | श्रन्थते माला स्वयमेव | ३।४।९३ |
| शिशर्धिषते | ३।३।४५ | शूद्राभार्यः | ३।२।५६ | श्रपितं हविश्चैत्रेण मैत्रेण | ४।१।१०१ |
| शिशीर्वान् | ४।१।१ | शूनः | ४।१।७९, ४।१।१०३ | श्रपिता यवागूः | ४।१।१०१ |
| शिशुमुदानयते | ३।३।३९ | शूनवान् | ४।१।७९ | श्रमं विनयते | ३।३।४० |
| शिश्येनायिषते | ३।३।७४ | शूयते | ४।१।७९ | श्राणा यवागूः | ४।१।१०० |
| शिश्रावयिषति | ४।१।६१ | शूयात् | ४।१।७९ | श्रियंमन्यः | ३।२।९ |
| शिश्वयिथ | ४।१।९० | शूरयति | ३।४।४२ | श्रियंमन्यं कुलम् | ३।२।९ |
| शिश्वयिषति | ४।१।८९ | शृतं क्षीरं चैत्रेण | ४।१।१०१ | श्रीतरा | ३।२।६६ |
| शिश्वाय | ४।१।९० | शृतं हविश्चैत्रेण | ४।१।१०१ | श्रुते वदते | ३।३।७८ |
| शिश्वाययिषति | ४।१।८९ | शेते | ३।३।२२ | श्रुवः | ४।१।१०९ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रुवौ ४। १। १०९
श्रूः ४। १। १०९
श्रूतः ४। १। १०९
श्रूतवान् ४। १। १०९
श्रूतिः ४। १। १०९
श्रेथतुः ४। १। २७
श्रेथिथ ४। १। २७
श्रेयश्चेली ३। २। ६३
श्रेयसिगोत्रा ३। २। ६३
श्रेयसिचेली ३। २। ६३
श्रेयसितमा ३। २। ६३
श्रेयसितरा ३। २। ६३
श्रेयसिब्रुवा ३। २। ६३
श्रेयसिमता ३। २। ६३
श्रेयसिरूपा ३। २। ६३
श्रेयसिहता ३। २। ६३
श्रेयसीगोत्रा ३। २। ६३
श्रेयसीतमा ३। २। ६३
श्रेयसीतरा ३। २। ६३
श्रेयसीब्रुवा ३। २। ६३
श्रेयसीमता ३। २। ६३
श्रेयसीरूपा ३। २। ६३
श्रेयसीहता ३। २। ६३
श्रेयस्तमा ३। २। ६३
श्रेयस्तरा ३। २। ६३
श्रेयोगोत्रा ३। २। ६३
श्रेयोब्रुवा ३। २। ६३
श्रेयोमता ३। २। ६३
श्रेयोरूपा ३। २। ६३
श्रेयोहता ३। २। ६३
श्रोमा ४। १। १०९
श्रोयसीचेली ३। २। ६३
श्लक्ष्णयति वस्त्रम् ३। ४। ४२
श्वपदम् ३। २। ९०
श्वपाकः ४। १। ११२
श्वपुच्छम् ३। २। ९०
श्वपुच्छम् ३। २। ३५
श्वफल्कः ३। २। ९०
श्वमुखः ३। २। ९०
श्वलाङ्गूलम् ३। २। ३५
श्वशेपम् ३। २। ३५
श्वश्रुगोत्रा ३। २। ६७
श्वश्रूगोत्रा ३। २। ६७
श्वा मुमूर्षति ३। ४। २१
श्वाकर्णः ३। २। ९०
श्वाकर्दः ३। २। ९०
श्वादंष्ट्रा ३। २। ९०
श्वादन्तः ३। २। ९०
श्वानं गर्धयति ३। ३। ८९
श्वापदं व्याघ्रादिः ३। २। ९०
श्वापुच्छम् ३। २। ९०
श्वावित् ३। २। ८५
श्वेतगिरिः ३। २। ७७
श्वेतते ३। ३। ३
श्वेतयति ३। ४। ४५
श्वेतरुक् ३। २। ८५
शृतं क्षीरं स्वयमेव ४। १। १००
शृतं हविः स्वयमेव ४। १। १००
षड्ढा ३। २। ९१
षड्धा ३। २। ९१
षष्ठदेशीया ३। २। ५८
षष्ठवृन्दारिका ३। २। ५७
षष्ठीमानिनी ३। २। ५४
षोडती ३। २। ९१
षोडन्तः ३। २। ९१
षोडन्तौ ३। २। ९१
षोडन् ३। २। ९१
षोडश ३। २। ९१
षोडीयति ३। २। ९१
षोढा ३। २। ९१
स पचति ३। ३। १७
संक्रीडते ३। ३। ३३
संक्रीडन्ति शकटानि ३। ३। ३३
संक्रीडमाणः ३। ३। ३३
संक्ष्णुते शस्त्रम् ३। ३। २९
संगच्छते ३। ३। ८४
संचीवरयते (२) ३। ४। ४१
संजिगंसते ४। १। १०४
संजिगंसते वत्सो मात्रा ४। १। १०४
संजिगांसते ४। १। १०४
संतक्षति वाग्भिः शिष्यम् ३। ४। ७७
संततम् ३। २। १३९
संपर्की ४। १। १११
संपश्यते ३। ३। ८४
संपाशयति ३। ४। ४२
संपृच्छते ३। ३। ८४
संप्रवदन्ति शकुनयः ३। ३। ८०
संप्रवदन्ते ग्राम्याः ३। ३। ७९
संप्रवदन्ते वैयाकरणाः ३। ३। ८०
संप्रस्त्यानः ४। १। ९५
संप्रस्त्यानवान् ४। १। ९५
संप्रहरन्ते राजानः ३। ३। २३
संभविष्याव एकस्यामभिजानासि मातरि ३। ३। ८२
संभाण्डयते ३। ४। ४०, ३। ४। ४२
संयच्छते व्रीहीन् ३। ३। ९८
संयसति ३। ४। ७३
संयस्यति ३। ४। ७३
संयुक् ३। २। १२३
संयुज्यते ३। ३। ३
संयुनक्ति ३। ३। २६
संवर्मयति ३। ४। ४२
संवस्त्रयति ३। ४। ४२
संवहः ४। १। ११२
संवाहयति ३। ४। १६
संवित्ते ३। ३। ८४
संविवहन्ते वर्गैः ३। ३। २३
संविव्यतुः ४। १। ७९
संविव्ययिथ ४। १। ७९
संविव्याय ४। १। ७९
संविव्युः ४। १। ७९
संवीतः ४। १। ७९, ४। १। १०३
संवीतवान् ४। १। ७९
संवीय ४। १। ७८
संवीयते ४। १। ७९, ४। १। १०२
संवीयात् ४। १। ७९
संव्याय ४। १। ७८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संशय्य कर्णादिषु तिष्ठते यः ३।३।६४
संश्यानः ४।१।९९
संश्यानवान् ४।१।९९
संश्यानो वृश्चिकः ४।१।९७
संशृणुते ३।३।८४
संसर्गी ४।१।१११
संस्वरते ३।३।८४
संहिततम् ३।२।१३९
सकलं ज्योतिषमधीते ३।२।१४७
सकाकणीको माषः ३।२।१४५
सकामः ३।२।१४०
सकाष्ठम् ३।२।१४७
सकेशभार्यः ३।२।५६
सक्तूनुच्चरते ३।३।३१
सक्षत्रं यदूनाम् ३।२।१४६
सगोत्रः ३।२।१४९
सङ्कोचः ४।१।१११
सजातीयः ३।२।१४९
सततनैशतमोवृतमन्यतः ३।२।१२
सततम् ३।२।१३९
सतीर्थ्यः ३।२।१४९
सतृणमभ्यवहरति ३।२।१४६
सत्यङ्कारः ३।२।११२
सत्यभामा ३।२।१०८
सत्या ३।२।१०८
सत्यापयति ३।४।४४
सत्रायते ३।४।३१
सदृक्षः ३।२।१५१
सदृक् ३।२।१५१
सदृशः ३।२।१५१
सद्रोणा खारी ३।२।१४५
सधर्मः ३।२।१४९
सधर्मा ३।२।१४९
सधुरं प्राज ३।२।१४६
सध्रीचः ३।२।१२३
सध्रीचा ३।२।१२३
सध्रीची ३।२।१२३
सध्रीचीनः ३।२।१२३
सध्र्यङ् ३।२।१२३
सध्र्यञ्चः ३।२।१२३
सध्र्यञ्चौ ३।२।१२३
सनाम ३।२।१४९
सनामा ३।२।१४९
सनीस्रंसः ३।४।१५
सनीस्रंसीति ४।१।५०
सनीस्रस्यते ४।१।५०
सन्ततं तिमिरमिन्दुरुदासे ३।३।२५
सपलाशम् ३।२।१४४
सपिशाचा वात्या ३।२।१४५
सपुत्र आगतः ३।२।१४३
सपुत्र आगतः ३।२।१४८
सप्तगोदावरं वसति ३।२।५
सफलत्वम् ३।२।५९
सब्रह्म साधूनाम् ३।२।१४६
सब्रह्मचारी ३।२।१५०
समगंस्त ३।४।६४
समञ्चनम् ३।२।१२३
समनाः ३।२।१४०
समपादि विद्या ३।४।६६
समभिश्यानः ४।१।९९
समभिश्यानवान् ४।१।९९
समवश्यानः ४।१।९९
समवश्यानवान् ४।१।९९
समवैति ३।३।३
समश्वयति ३।४।४२
समस्थः ३।२।२९
समाजः ४।१।१११
समानगोत्रः ३।२।१४९
समानदृक् ३।२।१५१
समानरूपः ३।२।१४९
समानवचनः ३।२।१४९
समानवयाः ३।२।१४९
समानवर्णः ३।२।१४९
समापो देवयजनम् ३।२।१०९
समारत ३।४।६१
समार्ष्ट ३।४।६१
समाश्लिषत् गुरुकुलम् ३।४।५७
समाषः कार्षापणः ३।२।१४५
समिधिमाषकः ३।२।१९
समिन्धांचक्रे ३।४।४९
समियृते ३।३।८४
समीचः ३।२।१२३
समीचा ३।२।१२३
समीची ३।२।१२३
समीचीनः ३।२।१२३
समीधे ३।४।४९
समीपम् ३।२।१०९
समुद्रः ४।१।११२
समुशलो व्रीहिकंसः ३।२।१४५
समुहूर्त्तम् ३।२।१४७
समूलघातं हन्ति ३।२।१४६
समूहति ३।३।२५
समूहते ३।३।२५
समूहते पदार्थान् ३।३।२५
समृच्छते (२) ३।३।८४
समृच्छिष्यते ३।३।८४
सम्भाण्डयते ३।४।४२
सम्यङ् ३।२।१२३
सम्यञ्चः ३।२।१२३
सम्यञ्चौ ३।२।१२३
सरसा दूर्वा ३।२।१४४
सरसिजम् ३।२।२६
सरसिरुहम् ३।२।२०
सरस्यते ३।४।२७
सराक्षसी(सि)का विद्युत् ३।२।१४५
सरायते ३।४।२७
सरूपः ३।२।१४९
सरोजम् ३।२।२६
सरोरुहम् ३।२।२०
सर्गः ४।१।११२
सर्पिषो जानीते ३।३।८२
सर्पिषो नाथते ३।३।३६
सर्वकभार्यः ३।२।६१
सर्वकाम्यति ३।२।६१
सर्वदा ३।२।६१
सर्वद्यङ् ३।२।१२२
सर्वद्यञ्चः ३।२।१२२

सर्वद्र्यञ्चौ ३। २। १२२
सर्वद्रीच: ३। २। १२२
सर्वद्रीचा ३। २। १२२
सर्वद्रीची ३। २। १२२
सर्वप्रिय: ३। २। ६१
सर्वमनोज्ञ: ३। २। ६१
सर्वस्त्रिय: ३। २। ६१
सलोकबिन्दुसारमधीते पूर्वधर: ३। २। १४६
सलोमक: ३। २। १४३
सवचन: ३। २। १४९
सवया: ३। २। १४९
सवर्ण: ३। २। १४९
सविधादागत: ३। २। १०
सवृत्तं सुविहितानाम् ३। २। १४६
सशिंशपम् ३। २। १४४
सशिरस्क: ३। २। १०१
सशिष्य: ३। २। १४३
सषड्जीवनिकमधीते श्रावक: ३। २। १४६
सस्रौ ४। १। ४५
सस्यमतु: ४। १। २६
सस्यमिथ ४। १। २६
सस्वनतु: ४। १। २६
सस्वनिथ ४। १। २६
सहकृत्वप्रिय: ३। २। १४३
सहकृत्वा ३। २। १४३
सहचर: कुरण्टक: ३। २। १४४
सहज: ३। २। १४३
सहजन्या अप्सरा: ३। २। १४४
सहति ३। ३। ३, ३। ४। १८
सहदेव: कुरु: ३। २। १४४
सहदेवा ओधि: ३। २। १४४
सहपुत्र आगत: ३। २। १४३
सहपुत्र आगत: ३। २। १४८
सहपूर्वाह्णं शेते ३। २। १४६
सहयुक् ३। २। १२३
सहयुध्वा ३। २। १४३, ३। २। १४६
सहलोमक: ३। २। १४३
सहशिष्य आगत: ३। २। १४३
सहस्रं विनयते ३। ३। ३९
सहाश्वनम् ३। २। १२३
सहापराह्णं भुङ्क्ते ३। २। १४६
सहितम् ३। २। १३९
सांकाश्यसिद्ध: ३। २। २९
साग्नि: कपोत: ३। २। १४५
साधु पदं कारयति ३। ३। १००
साधु विक्रमते गज: ३। ३। ५०
साधु स्थाली पचति ३। ४। ८६
साध्वसिश्छिनत्ति ३। ४। ८६, ३। ४। ९४
सान्त्वयति ३। ४। ४२
सापत्न: ३। २। ५१
सामयति ३। ४। ४२
सारिकावणम् ३। २। ७६
साल्वागिरि: ३। २। ७७
सावद्यान्नं व्रतयति ३। ४। ४३
सावित्र्या सूर्यमुपतिष्ठते ३। ३। ६०
साश्वत्थम् ३। २। १४४
सासद्यते ३। ४। १२
साहयति ३। ४। १८
साह्वांसौ ४। १। १५
साह्वान् ४। १। १५
सिंह: ३। २। १५५
सितोदम् ३। २। १०७
सिध्यत्योदन: स्वयमेव ३। ४। ८६
सिध्रकावणम् ३। २। ७६
सिनुते ३। ४। ७५
सिनोति ३। ४। ७५
सिन्वन् ३। ४। ७५
सिन्वान: ३। ४। ७५
सिष्वापकीयिषति ४। १। ६२
सिष्वापयिषति ४। १। ६२
सिसेके ४। १। ३९
सिस्यन्त्सति ३। ३। ४५
सिस्यन्दिषते ३। ३। ४५
सिस्रावयिषति ४। १। ६१
सीका ३। ४। ३५
सीताहरणम् ३। ४। ४२
सुकटंकराणि वीरणानि ३। ३। २१
सुकर: कटो भवता ३। ३। २१
सुकरं भवता ३। ३। २१
सुकेशता ३। २। ५९
सुकेशत्वम् ३। २। ५९
सुखं वेदयते प्रसाधको देवदत्तस्य ३। ४। ३४
सुखायते ३। ४। ३४
सुग्लानं कृपणेन ३। ३। २१
सुज्ञानं तत्त्वं मुनिना ३। ३। २१
सुदतितरा ३। २। ६३
सुदत्तम् ३। २। ८८
सुनुते ३। ४। ७५
सुनोति ३। ३। ३
सुनोति ३। ४। ७५
सुन्वन् ३। ४। ७५
सुन्वान: ३। ४। ७५
सुप्त: ४। १। १०३
सुप्यते ४। १। ८०
सुप्यात् ४। १। ८०
सुभगङ्करणम् ३। २। १११
सुभगमानी ३। २। १११
सुमगधं वसति ३। २। ५
सुमद्रं वसति ३। २। ५
सुशयं भवता ३। ३। २१
सुषुपतु: ४। १। ८०
सुषुप्सति ४। १। ८०
सुष्वपिथ ४। १। ७०
सुष्वाप ४। १। ७०
सुष्वापयिषति ४। १। ६२
सुसित्वा ४। १। १०८
सुसेवा ४। १। १०८
सुसोषुपिषते ४। १। १०
सुस्मूर्षते पूर्ववृत्तम् ३। ३। ७२
सुस्यूवा ४। १। १०८
सुस्योवा ४। १। १०८
सुस्रावयिषति ४। १। ६१
सुस्रूषति ४। १। ६१
सूत्रमध्यापयति शिष्यम् ३। ३। १०८
सूत्राय क्रमते ३। ३। ४८
सूप: ३। २। ११०
सूर्याचन्द्रमसौ ३। २। ४१


Jain Education International For Private & Personal Use Only www.jainelibrary.org

सृगाल: ३। २। १५५
सृज्यते मालां धार्मिक: ३। ४। ८४
सेक: ४। १। १११
सेक्यम् ४। १। १११
सेना परा जयति ३। ३। २८
सेनानीरूपा ३। २। ६४
सेनोत्तिष्ठति ३। ३। ६२
सेष्माययति ३। ३। ९१
सेष्यूत: ४। १। १०८
सेसिमीति ४। १। ८५
सेसिम्यते ४। १। ८५
सेसेति ४। १। १०८
सेहाते ४। १। २४
सेहिथ ४। १। २४
सेहिरे ४। १। २४
सेहे ४। १। २४
सैन्या: ३। २। ५९
सोदर्य: ३। २। १४९
सोमप्रवाक: ४। १। ११२
सोमारुद्रौ ३। २। ४१
सोषुपीति ४। १। ८०
सोषुप्यते ४। १। ८०
सोषोपयिषति ४। १। ६२
सोष्योति ४। १। १०८
सोष्योषि ४। १। १०८
सोष्वाप्यते ४। १। ६२
सोसूच्यते ३। ४। १०
सोसूत्र्यते ३। ४। १०
सोस्रविषति ४। १। ६१
सौतङ्गमीभार्य: ३। २। ५५
सौतङ्गमीयते ३। २। ५५
सौहार्दम् ३। २। ९४
सौहार्द्यम् ३। २। ९४
स्कन्दविशाखौ ३। २। ४१
स्कभ्नाति ३। ४। ७८
स्कभ्नोति ३। ४। ७८
स्कुनाति ३। ४। ७८
स्कुनीते ३। ४। ७८
स्कुनुते ३। ४। ७८
स्कुनोति ३। ४। ७८
स्कुभ्नाति ३। ४। ७८
स्कुभ्नोति ३। ४। ७८
स्तब्ध : ३। ४। ७८
स्तब्धवान् ३। ४। ७८
स्तब्ध्वा ३। ४। ७८
स्तभ्नाति ३। ३। ३
स्तभ्नाति ३। ४। ७८
स्तभ्नान: ३। ४। ७८
स्तभ्नुवान: ३। ४। ७८
स्तभ्नोति ३। ४। ७८
स्तम्बेरम: ३। २। २०
स्तम्भित्वा ३। ४। ७८
स्ताविष्यते ३। ४। ६९
स्तुत: ४। १। १०४
स्तुभ्नाति ३। ४। ७८
स्तुभ्नोति ३। ४। ७८
स्तूपेशाण: ३। २। १९
स्तोकभयम् ३। २। १०
स्तोकान्मुक्त: ३। २। १०
स्तोकापेत: ३। २। १०
स्तोतव्यम् ३। ३। २
स्तोता ३। ३। २
स्तोष्यते ३। ४। ६९
स्त्रितरा ३। २। ६६
स्त्रिमता ३। २। ६६
स्त्रिहता ३। २। ६६
स्त्रींमन्य: ३। २। ९
स्त्रीतरा ३। २। ६६
स्त्रीमता ३। २। ६६
स्त्रीमानी ३। २। ९
स्त्रीहता ३। २। ६६
स्थण्डिलवर्ती ३। २। २९
स्थण्डिलशायी ३। २। २९
स्थवयति ३। ४। ४२
स्थविरवती ३। २। ७८
स्थस्पा नद्याम् ३। २। ४८
स्थापयति ३। ४। ४२
स्थिरभक्ति: ३। २। ५३
स्थूलशिरयति ३। २। १०३
स्थौलशीर्षम् ३। २। १०३
स्थौलशीर्षि: ३। २। १०३
स्पर्धते ३। ३। २२
स्पर्धमान: ३। ३। २२
स्फात: ४। १। ९४
स्फातवान् ४। १। ९४
स्फाति: ४। १। ९४
स्फापयति ३। ४। ४२
स्फीत: ४। १। ९४
स्फीतवान् ४। १। ९४
स्फीति: ४। १। ९४
स्मरयत्येनं वनगुल्म: ३। ३। ८८
स्यन्त्स्यति ३। ३। ४५
स्यन्दिष्यते ३। ३। ४५
स्याद्वादं संगिरते ३। ३। ६६
स्येमतु: ४। १। २६
स्येमिथ ४। १। २६
स्योन: ४। १। १०८
स्योमा ४। १। १०८
स्रक्ष्यते मालां धार्मिक: ३। ४। ८४
स्रवत्युदकं कुण्डिका ३। ४। ८६
स्रवत्युदकं कुण्डिकाया: ३। ४। ८६
स्रावयति तैलम् ३। ३। १०८
स्रौघ्नीमानिनी ३। २। ५५
स्रुवकर्ण: ३। २। ८४
स्रौघ्नता ३। २। ५९
स्रौघ्नत्वम् ३। २। ५९
स्रौघ्नदेशीया ३। २। ५८
स्रौघ्नवृन्दारिका ३। २। ५७
स्रौघ्नीभार्य ३। २। ५५
स्व: काम्यति ३। ४। २२
स्वरिच्छति ३। ४। २३
स्वसादुहितरौ ३। २। ३९
स्वसु:पति: ३। २। ३८
स्वसृपति: ३। २। ३८
स्वस्ति गुरवे सहशिष्याय ३। २। १४८
स्वस्ति भवते सगवे ३। २। १४८
स्वस्ति भवते सवत्साय ३। २। १४८


Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वस्ति भवते सहगवे ३। २। १४८
स्वस्ति भवते सहलाय ३। २। १४८
स्वस्ति भवते सहवत्साय ३। २। १४८
स्वस्ति भवते सहहलाय ३। २। १४८
स्वस्ति राज्ञे सहराष्ट्राय ३। २। १४८
स्वस्तिककर्णः ३। २। ८४
स्वांचकार ३। ४। ४६
स्वांबभूव ३। ४। ४६
स्वापः ३। २। १०९
स्वामास ३। ४। ४६
स्वेनतुः ४। १। २६
स्वेनिथ ४। १। २६
हंसकारण्डववती ३। २। ७८
हतशायिकाः शय्यन्ते ३। ३। २१
हनिष्यते ३। ४। ६९
हन्ता ३। ४। ६९
हरिणिंमन्या ३। २। १११
हरिणींमन्या ३। २। ९
हलेत्रिपदिका ३। २। १९
हलेद्विपदिका ३। २। १९
हस्तबन्धः ३। २। २३
हस्तयति ३। ४। ३८
हस्तयते ३। ३। ३
हस्तयते ३। ४। ३८
हस्तायते ३। ४। २६
हस्तिनीयति ३। २। ५१
हस्तिन्यः ३। २। ५१
हारिकाभार्यः ३। २। ५४
हार्दम् ३। २। ९४
हास्तिकम् ३। २। ५१
हास्तिपदः ३। २। ९६
हास्तिशीर्षिः ३। २। १०३
हास्तिशीर्ष्या ३। २। १०१
हिनस्ति ३। ४। ८२
हिरण्यवती ३। २। ७८
हिरण्यष्ठ्यूः ४। १। १०८
हुरः ४। १। ११०
हुरौ ४। १। ११०
हूः ४। १। ११०
हूतः ४। १। ७९, ४। १। १०३
हूतवान् ४। १। ७९
हूयते ४। १। ७९
हूयात् ४। १। ७९
हृच्छङ्कुः ३। २। ९४
हृच्छयः ३। २। २५
हृच्छल्यम् ३। २। ९४
हृच्छूलम् ३। २। ९४
हृच्छोकः ३। २। ९४
हृत्कमलम् ३। २। ९४
हृत्पुण्डरीकम् ३। २। ९४
हृदयकमलम् ३। २। ९४
हृदयदाहः ३। २। ९४
हृदयदुःखम् ३। २। ९४
हृदयपुण्डरीकम् ३। २। ९४
हृदयरोगः ३। २। ९४
हृदयलेखः ३। २। ९४
हृदयशङ्कुः ३। २। ९४
हृदयशल्यम् ३। २। ९४
हृदयशूलम् ३। २। ९४
हृदयशोकः ३। २। ९४
हृदिस्पृक् ३। २। २०
हृद्दाहः ३। २। ९४
हृद्यः(२) ३। २। ९४
हृद्यम् ३। २। ९४
हृद्रोगः ३। २। ९४
हृद्दुःखम् ३। २। ९४
हृल्लासः ३। २। ९४
हृल्लेखः ३। २। ९४
होडते ३। ४। २५
होडायते ३। ४। २६
होतापुत्रौ ३। २। ४०
होतापोतारौ ३। २। ३९
होतुःपुत्रः ३। २। ३७
होतुःस्वसा ३। २। ३८
होतुरन्तेवासी ३। २। ३७
होतृधनम् ३। २। ३७
होतृपतिः ३। २। ३८
होतृस्वसा ३। २। ३८
होर्मा ४। १। ११०
ह्नुते ३। ३। २२
ह्नुवानः ३। ३। २२
ह्रीतमा ३। २। ६६
ह्लाययति ४। १। ८८


❖❖❖

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# દ્વિતીય વિભાગ અંગે વિદ્વાનોના પ્રતિભાવ

સિદ્ધહેમવ્યાકરણની ઢુંઢિકાવૃત્તિનો બીજો ભાગ વ્યાકરણના અભ્યાસીઓ માટે ઘણો જ ઉપયોગી ગ્રંથ પરિશ્રમપૂર્વક સંપાદિત કરી પ્રકાશિત કરવા બદલ અમારાં ખૂબ ખૂબ અભિનંદન. તમારી આવી સાહિત્યસેવા નિરંતર નિરપાય પ્રવર્તતી રહે તેવી મંગલ કામના.

**પૂજ્ય આચાર્યશ્રી વિજયહેમચન્દ્રસૂરિજી મ.**

સિદ્ધહેમવ્યાકરણની ઢુંઢિકા ટીકાનો દ્વિતીય વિભાગ મળવાથી ઘણી પ્રસન્નતા થઈ. આપશ્રીના પરિશ્રમથી સંસ્કૃતવ્યાકરણસાહિત્યની સમૃદ્ધિ વધી છે. હું **M.A.**માં પાણિનીયવ્યાકરણ ભણાવું છું, તુલના કરવા માટે આપનો આ ગ્રંથ ઘણો ઉપયોગી થશે.

**અનિલ ર. દ્વિવેદી, જામનગર**

विद्यावृद्ध्यर्थबद्धपरिकरैः तपःपूतैर्भवद्भिः ढुण्ढिकाविभूषितं सिद्धहेमचन्द्रशब्दानुशासनमित्यभिधानं ग्रन्थरत्नं यदा प्रकाश्यते तदा न केवलं संस्कृतव्याकरणशास्त्राध्यायकाध्यापकानां कृते अपितु भारोपीय-भाषाशास्त्रगवेषकाणां कृतेऽपि महदुपकरिष्यति । ढुण्ढिकासमलङ्कृतोऽयं ग्रन्थः सर्वतन्त्रस्वतन्त्रप्रज्ञस्य आचार्यहेमचन्द्रस्य सूक्ष्मेक्षिकां प्रकटयन् गुजराती-हिन्दी-मराठी इत्यर्वाचीनभारतीयभाषाणामैतिहासिकविकासस्य कालक्रमं सुचारुरूपेण निःशङ्कं विस्पष्टयिष्यति इति दृढो मे विश्वासः ।

डॉ. किशोरचन्द्रपाठकः, अमरेली

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## श्रीसिद्धहेमचन्द्रशब्दानुशासने अज्ञातकर्तृका ढुण्ढिका ના

અદ્યાવધિ બે ભાગ પ્રકાશિત થઈ ચૂક્યા છે.

अर्हम् ॥

कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यविरचिते

**श्रीसिद्धहेमचन्द्रशब्दानुशासने अज्ञातकर्तृका ढुण्ढिका ॥**

[प्रथमो विभागः]

[प्रथमाऽध्यायस्य प्रथमपादतः आरभ्य द्वितीयाऽध्यायस्य प्रथमपादपर्यन्तम्]

सम्पादकः

मुनि-विमलकीर्तिविजयः



श्रीहेमचन्द्राचार्य

प्रकाशकः

कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी

स्मृति संस्कार शिक्षणनिधि - अहमदाबाद.

ई. २००८. वि. सं. २०६५

अर्हम् ॥

कलिकालसर्वज्ञ - श्रीहेमचन्द्राचार्यविरचिते

**श्रीसिद्धहेमचन्द्रशब्दानुशासने अज्ञातकर्तृका ढुण्ढिका ॥**

[द्वितीयो विभागः]

[ द्वितीयाध्यायस्य द्वितीयपादत आरभ्य तृतीयाध्यायस्य प्रथमपादपर्यन्तम् ]

सम्पादकः

आचार्य-श्रीविजयशीलचन्द्रसूरि-शिष्यः

मुनि-विमलकीर्तिविजयः



श्रीहेमचन्द्राचार्य

प्रकाशकः

कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी

स्मृति संस्कार शिक्षणनिधि - अहमदाबाद.

ई. २००९. वि. सं. २०६५

હજી આગળ ચારેક ગ્રંથોમાં આ ઢુંઢિકા પૂર્ણ થશે તેવી સંભાવના છે.

**પ્રાપ્તિસ્થાન :**

**શ્રીવિજયનેમિસૂરીશ્વરજી સ્વાધ્યાય મંદિર**
૧૨, ભગતબાગ, નવા શારદા મંદિર રોડ,
શેઠ આણંદજી કલ્યાણજીની પેઢી પાસે,
પાલડી, અમદાવાદ-૩૮૦૦૦૭
ફોન : ૨૬૬૨૨૪૬૫

**સરસ્વતી પુસ્તક ભંડાર**
૧૧૨, હાથીખાના, રતનપોળ,
અમદાવાદ-૩૮૦૦૦૧

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीहेमसूरयोऽप्यत्रालोक्य व्याकरणव्रजम् ।
शास्त्रं चक्रुर्नवं श्रीमत्, सिद्धहेमाख्यमद्भुतम् ॥
द्वात्रिंशत्पादसंपूर्णमष्टाध्यायमुणादिमत् ।
धातुपारायणोपेतं, रङ्गल्लिङ्गनुशासनम् ॥
सूत्रसद्वृत्तिमन्नाममालानेकार्थसुन्दरम् ।
मौलिं लक्षणशास्त्रेषु, विश्वविद्वद्भिरादृतम् ॥

॥ त्रिभिर्विशेषकम् ॥

શ્રીહેમસૂરિએ વ્યાકરણોના સમૂહને અવલોકી ''શ્રીસિદ્ધહેમ'' નામે અદ્ભુત અને નવું શાસ્ત્ર રચ્યું. બત્રીસ પાદ અને આઠ અધ્યાયથી પૂર્ણ, ઉણાદિસૂત્રસહિત, ધાતુપારાયણથી યુક્ત, લિંગાનુશાસનથી મંડિત, સૂત્ર અને ઉત્તમવૃત્તિઓથી શોભતું, નામમાલા તથા અનેકાર્થકોષોથી સુંદર તે વ્યાકરણ વ્યાકરણશાસ્ત્રના મુકુટસમું અને બધાંય વિદ્વાનોના આદરને પાત્ર બન્યું.

Jain Education International For Private & Personal Use Only www.jainelibrary.org